CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

भारतीय

वास्तु शास्त्र

प्रतिमा-विज्ञान

प्रतिमा-लक्षण

C/24

डा० द्विजेन्द्रनाथ शुक्ल

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

STATE MUSEUM, LUCKNOW
LIBRARY

Acc. No.

Book No.

726.4

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

722.4

राजकीय संग्रहालय पुस्तकालय, लखनऊ
पुस्तक संख्या C 24
State Museum Library, Lucknow

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

c|24

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वास्तु-शास्त्रम्

प्रतिमा-लक्षणम्

C 24

भारतीय-वास्तु-शास्त्रमधिकृत्य प्रतिमा-विज्ञानेतिचतुर्थग्रन्थद्वितीयो भागः

डा० द्विजेन्द्रनाथ शुक्लः

साहित्याचार्य-साहित्यरत्न-काव्यतीर्थ-संस्कृत-दर्शन-द्विविषयक एम० ए०
पी-एच० डी० प्रभृतिभिर्विद्या-विरुदाभिर्विभूषितः लक्ष्मणपुर-
विश्वविद्यालयीय-संस्कृत-विभागाध्यापकश्च

State Museum.
LUCKNOW.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्राक्कथनम्

विदितमेव तत्र भवतां यदहं किञ्चित्कालाद् भारतीय-विज्ञानस्य नवीनामेवैकाद्भुता-मेवातिजटिलां कठिनाञ्चापि शाखां **वास्तु-शास्त्रमित्यभिधामधिकृत्यानुसन्धानकर्मणि** प्रवृत्तः; तत्रापि प्रथितकीर्तेस्तत्रभवतः धाराधिपस्य भोजराजस्य समराङ्गण-सूत्रधार-मधिकृत्य यः पी-एच०डी०-उपाधि-विषयक. प्रबन्धः प्रस्तुतस्तस्य च यः परमोत्तमः परीक्ष-काणां स्तवः (विशेषतश्च कलकत्ताविश्वविद्यालयीय-प्राच्य-भारतीयेतिहासविभागाध्य-क्षाणां प्रथितयशसां कला-शास्त्र-पारङ्गतानां डाक्टरजितेन्द्रनाथवैनर्जीमहोदयानाम्) प्राप्तः; अथ च उत्तर-प्रदेश-राज्येनापि भृशं सम्मानितश्च (प्रकाशन-साहाय्य-दानेन पारितोषिकेण च) तेन सर्वेणोत्साहितोऽहं **भारतीयवास्तु-शास्त्रेति** सामान्यविषयमुप-जीव्य चतुर्दशग्रन्थानामेका प्रकाशन-योजना कल्पितवानस्मि । तस्यां प्रतिमाविज्ञानाभिधस्य चतुर्थस्य ग्रन्थस्यायं द्वितीयो भागः प्रतिमा-लक्षणं विदुषां समक्षमुपस्थाप्यते ।

प्रतिमा-विज्ञान-विज्ञा जानन्त्येव विषयममुमधिकृत्य सर्वप्रथमः प्रयासः श्रीमतां टी० गोपीनाथरावमहोदयानामासीत् यैः एतद्विषयकं ग्रन्थचतुष्टयं विरचय्य शास्त्रस्यास्य महानुपकारः कृतः प्रथप्रदर्शनमपि । रावमहोदयानां ग्रन्थानां प्रकाशनात् प्रायेण चत्वा-रिंशद्वर्षाणि व्यतीतानि । ततः प्रभृति बहवः प्रतिमा-शास्त्र-विषयकाः नवीनाः ग्रन्थाः प्रकाशिताः; तेषु भोजकृत-समराङ्गण-सूत्रधार-वास्तुशास्त्रं भुवनदेवाचार्यविरचितापराजित-पृच्छेति ग्रन्थद्वयेऽन्यतमे, विशेषत इमावेवाधिकृत्य साम्प्रतं भारतीय-वास्तु-शास्त्रानुसन्धाने भृशं संलग्नो भगवन्तं भवानीपतिं प्रार्थये शीघ्रमेव

"अप्रज्ञेयं दुरालोकं गूढार्थं बहुविस्तरम् प्रज्ञापोतं समारुह्य प्राज्ञो वास्तुनिधिं तरेत्"

इति समराङ्गणवचनानुसारेण प्रज्ञापोतं विनैव भगवत्याः सर्वमङ्गलायाः कृपाकणेनैव किमपि कर्तुं पारये ।

प्रतिमा-लक्षणमिदमेकं स्वतन्त्रमेव कला-शास्त्र-पुस्तकं सम्पन्नम् । अस्य संकलनायां ये नवोन्मेषाः निर्दिष्टाः यः नवीन एव एकः प्रबन्धः उद्भावितः या चाभिनवैवैका सरणिरा-सादिता तेन सर्वेणेदं कथयितुं शक्नोमि ग्रन्थोऽयं शास्त्रस्यास्य विज्ञानां जिज्ञासूनाञ्च छात्राणां समेषामेव प्रमोदं वितरिष्यते उपकारञ्चापि करिष्यते । तेन धन्यो मे परिश्रमो भविष्यति ।

लखनऊ-विश्वविद्यालयस्य प्राचीन-भारतीयेतिहास-विभागाध्यक्षाणां श्रीमतां चरणदास चैटर्जी-महाभागानां भृशं कृतज्ञोऽस्मि यैर्प्रतिमा-विज्ञान-दर्शनाद्बहुप्रसन्नैर्प्रतिमा-लक्षण-विरचनाय प्रथमा प्रेरणा प्रदत्ता । अन्ते उत्तरप्रदेशराज्यस्याधिकारिणः स्मरामि तेषु विद्वद्वरेण्यानां मुख्यमन्त्रिणां डाक्टर सम्पूर्णानन्दमहाभागानामुत्साहप्रवर्धनी प्रशंसा पूर्व-मेवाधिगतासीत्; ठा० हरगोविन्दसिंहानामपि यत्कृपापात्रं जातस्तेनाहं बहु मन्ये । एतस्मि-न्नवसरे डाक्टरपन्तमहोदयाः नैव विस्मरणीयाः येषां प्रकाशनेऽस्मिन् महानभिनिवेशोऽस्ति । उत्तर-प्रदेश-राज्यस्यैव अष्टसहस्राधिकसहायतयैवेमे चत्वारः ग्रन्थाः (१. वास्तु-विद्या एवं पुर-निवेश २. प्रतिमा-विज्ञान ३. प्रतिमालक्षणम् ४. प्रासाद-वास्तु इत्यात्मकाः) प्रकाशिताः । आशासे नवीनाः शिक्षा-मन्त्रिणः त्रिपाठ्युपाह्वकमलापतिमहोदया अपि शेषाणां ग्रन्थानां प्रकाशने यथापूर्वं संरक्षणं साहाय्यं च प्रदास्यन्ते

आषाढ़ी गुरुपूर्णिमा २०१४ — शुक्लोपाह्व-द्विजेन्द्रनाथस्य

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विषयानुक्रमणिका

विषया: — पृष्ठा:

१. प्राक्कथनम्
विषयानुक्रमणी १-८

प्रथमो खण्डः

प्रतिमाविज्ञानम् ९-६७

१. प्रतिमा-निर्माणोपक्रमविधि: ९-१०
२. प्रतिमा-प्रकाराणि—बिम्बभेदा: १०
३. द्रव्यभेदेन बिम्बभेदा:—प्रतिमा-द्रव्याणि तत्फलभेदाश्च ११-१४
४. प्रतिमा-मान-लक्षणम् १४-१६
५. प्रतिमा-निर्माणे मानाधाराणां पञ्च-पुरुष-स्त्री-लक्षणम् १६
६. तालमानं तालनियमश्च १६-१८
७. मानभेदपूर्वकं प्रतिमा-विधानम् (प्रलम्बलक्षणमूर्ध्वासनार्चादयश्च) १८-३३
८. प्रतिमा-विधाने मधूच्छिष्ट-विधानम् ३३-३४
९. प्रतिमा-विधाने दोषा:तत्फलञ्च ३५-४०
१०. प्रतिमा-रूप-संयोगे
अ. आसनानि ४०
ब. वाहनानि—हंसगरुड़वृषभा: ४०-४३
स. आयुधा:—षट्त्रिंशदायुधा: ४३-४५
द. आभूषणानि ४६-५५
(i) मौलि-लक्षणम् ४६
(ii) भूषण-लक्षणम् ४६-४८
(iii) षोडशाभरणानां लक्षणम् ४८-५२
(iv) किरीटादिलक्षणम् (आभूषणानि वस्त्राणि च) ५२-५५
य. प्रतिमा-मुद्रा: ५६-५८
(i) असंयुत-संयुत-नृत्त-हस्तप्रभेदैः ६४ हस्त-मुद्रा: ५६
(ii) वैष्णवादिषड् स्थानकमुद्रा: ५६-५७
(iii) ऋज्वागतादिस्थान-लक्षणम् ५७-५८
११. प्रतिमा-निष्पत्तिः (नयनोन्मीलनम्) ५९-६२
१२. प्रतिमायां रसोन्मेष: ६२-६६
१३. प्रतिमा-प्रतिष्ठापनम् ६६-६७

द्वितीयो खण्डः

प्रतिमा-लक्षणम् ७०-२९३

प्रथमो पटलः

त्रिमूर्त्यादिब्राह्मप्रतिमा-लक्षणम् ७०-७६

त्रिमूर्ति-लक्षणे
१. ब्रह्म-विष्णु-महेश्वरा: ७०
२. हरि-हर-पितामह: ,,
३. चन्द्रार्क-पितामह: ,,
४. हरि-(सूर्योऽपि) हर-हिरण्यगर्भ: ,,
५. नरनारायणहरिकृष्णा: ,,

द्विमूर्ति-लक्षणे
१. हर्यर्धमूर्ति: ७१-७२
२. कृष्ण-शङ्कर-मूर्ति: ७२

ब्राह्म-प्रतिमा-लक्षणम् ७२-७५
ब्राह्म-लाञ्छन-रहस्यम् ७५-७६
ब्रह्मायतनम् ७६
ब्रह्मणोऽष्टप्रतीहारा: ७६

द्वितीयो पटलः

वैष्णव-प्रतिमा-लक्षणम् ७७-१०९

१. साधारणमूर्तय: ७७-७९
२. असाधारणमूर्तय: ७९-८६
(i) अनन्तशायी नारायण: ७९-८०
(ii) नारायणवासुदेव: ८०-८१
संकर्षणादयश्च ८१
(अ) वासुदेवादित्रयम् ८२
(ब) संकर्षणादित्रयम् ८२
(स) प्रद्युम्नादित्रयम् ८३
(य) अनिरुद्धादित्रयम् ८३
(र) अन्या: वासुदेवजा: मूर्तय: ८३-८४

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विषयाः पृष्ठाः

(iii) मानुषो वासुदेवः ८४
(iv) त्रैलोक्यमोहनः ८४
(v) विश्वरूपः ८४-८५
(vi) वैकुण्ठः ८५
(vii) अनन्तः ८५
(viii) योगेश्वरः ८६
(ix) लक्ष्मीनारायणौ ८६
३. वैष्णव-द्वादश-ध्रुवबेराणि ८६-८९
१. योगस्थानकमूर्तिः ८६-८७
२. भोगस्थानकमूर्तिः ८७
३. वीरस्थानकमूर्तिः ८७
४. आभिचारिकस्थानकमूर्तिः ८७
५. योगासनमूर्तिः ८७-८८
६. भोगासनमूर्तिः ८८
७. वीरासनमूर्तिः ८८
८. आभिचारिकासनमूर्तिः ८८
९. योगशयनमूर्तिः ८८-८९
१०. भोगशयनमूर्तिः ८९
११. वीरशयनमूर्तिः ८९
१२. आभिचारिकशयनमूर्तिः ८९
४. वैष्णवदशावताराः ९०-९९
१. मत्स्यावतारः ९०
२. कूर्मावतारः ,,
३. वराहः—प्रलययज्ञौ ९०-९२
४. नरसिंहः—केवल-स्थौण-यानकाः ९२-९४
५. वामनः ९४
६. त्रिविक्रमः ९४-९५
७. जामदग्न्यरामः ९५
८. राघवरामः ९५-९६
९. बलरामः ९७
१०. कृष्णः—नवनीतनट-वेणुगोपाल-पार्थसारथि-मदनगोपाल-कालियाहिमर्दकाः ९७-९८
११. बुद्धः ९८-९९
१२. कल्की ९९
५. चतुर्विंशतिमूर्तयः ९९-१०१
६. अन्याः वैष्णवमूर्तयः—
अंशावताराः क्षुद्रमूर्तयः १०१-३
दत्तात्रेय-पुरुष-कपिल-यज्ञनारायण-व्यास-धन्वन्तरि-हयग्रीव-धर्म-गरुडाः ,,

विषयाः पृष्ठाः

७. आयुधपुरुषाः—
आयुधपौरुषमूर्तयः १०३-१०५
वैष्णवी द्वारावती १०५-१०७
वैष्णव-प्रतिमा-पूजनफलम् १०७
वैष्णवलाञ्छनरहस्यम् १०७-१०८
विष्णवायतनम् १०८-१०९
विष्णोरष्टप्रतीहाराः १०९

तृतीयो पटलः

शैव-प्रतिमा-लक्षणम् ११०-१९९
(लिङ्गप्रतिमाः रूपप्रतिमाश्च)
लिङ्गप्रतिमा-लिङ्गलक्षणम् ११०-३३
लिङ्गव्युत्पत्तिः ११०
लिङ्गभेद-प्रभेदाश्च ११०-१११
लिङ्गनिवेशः-लिङ्गविभागाः १११-१४
लिङ्गपीठम् ११४-१९
चलाचलप्रभेदेन द्रव्यभेदेन फलभेद-प्रदर्शनपुरस्सरं क्षणिकलिङ्गलक्षणम्—— ११९-२०
मृन्मयादिलिङ्गलक्षणम् १२०-२९
मृन्मय-लिङ्गम् १२०-२२
दारूज-लिङ्गम् १२२-२३
लोहज-लिङ्गम् १२३-२५
शैलज-लिङ्गम् १२५-२७
रत्नज-लिङ्गम् १२७-२८
बाण-लिङ्गम् १२९
अचल-लिङ्ग-भेदेषु मानुषाचललिङ्ग-प्रभेदेषु आढ्यादिलिङ्ग-भेदाः
आढ्यादिलिङ्ग-भेदाः १३०
समलिङ्गम् ,,
बर्धमानलिङ्गम् १३०-३१
शैवाधिक्यलिङ्गम् १३१
स्वस्तिकलिङ्गम् ,,
धारालिङ्गम् ,,
सहस्रलिङ्गम् १३१-३२
त्रैराशिकलिङ्गम् १३२
मुखलिङ्गम् १३२-३३
रूपप्रतिमा (लिङ्गोद्भव) १३३-९९
लिङ्गोद्भवम् १३३-३४

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विषया:	पृष्ठा:
साधारणासाधारण-सौम्योग्रशान्ता-शान्तप्रभेदेषु——	
साधारणी मूर्त्तिः	१३५
असाधाणीषु च—	
सदाशिवः	१३६
द्वादशकलासम्पूर्णः सदाशिवः	१३७
महासदाशिवः	,,
पाशुपतः	,,
रौद्रपाशुपतः	,,
अन्यासु सौम्यासु शान्तासु च	
अर्धनारीश्वरः	१३७-४०
गङ्गाधरः	१४०-४१
कल्याणसुन्दरः	१४१-४५
बृषवाहनः	१४५-४६
विषापहारः	१४६-४७
चन्द्रशेखरः	१४७-४८
केवलमूर्तिः	१४८
सुखासनमूर्तिः	१४८-४९
उमासहितमूर्तिः	१४९
आलिङ्गन-मूर्तिः	,,
उमामहेश्वरः	१५०
सोमास्कन्दः	१५०-५१
अनुग्रहमूर्तिषु—	
विष्णवनुग्रहः	१५१-५२
नन्दीशानुग्रहः	१५२
विघ्नेशानुग्रहः	,,
अर्जुनानुग्रहः	,,
चण्डेशानुग्रहः	१५२-५३
नृत्तमूर्तिषु—	
प्रथमामारभ्य नवमीं यावत्	१५३-६२
दक्षिणामूर्तिषु—	
व्याख्यानदक्षिणामूर्तिः	१६२-६४
ज्ञानदक्षिणामूर्तिः	१६४
योगदक्षिणामूर्तिः	१६४-६६
वीणाधरदक्षिणामूर्तिः	१६६
अशान्तोग्रमूर्तयो यथा—	
कामान्तकमूर्तिः	१६६-६७

विषया:	पृष्ठा:
गजासुरसंहामूर्तिः	१६७-६८
कालारिमूर्तिः	१६८-७०
त्रिपुरान्तकः	१७०
त्रिपुरान्तकमूर्त्यष्टकम्	१७०-७३
शरभेशः	१७३-७४
शरभमूर्तिः	१७४
ब्रह्मशिरश्छेतृमूर्तिः	१७४
भैरवमूर्तयः	
स्वच्छन्दभैरवः	१७४-७५
भैरवः	१७५
बटुकभैरवः	१७५-७६
स्वर्णाकर्षणभैरवः	१७६
अष्टाष्टभैरवाः—	
प्रथमाष्टकम्	१७६
द्वितीयाष्टकम्	,,
तृतीयाष्टकम्	,,
चतुर्थाष्टकम्	,,
पञ्चमाष्टकम्	,,
षष्ठसप्तमाष्टमाष्टकानि	,,
अष्टाष्टभैरवनामानि	१७६-७७
अन्यसंहारमूर्तयः	
वीरभद्रमूर्तिः	१७७
जलन्धरहरमूर्तिः	१७७-७८
मल्लारिशिवः	१७८
अष्टभुजाघोरमूर्तिः	१७८-७९
दशभुजाघोरमूर्तिः	१७९
द्वात्रिंशद्भुजाघोरमूर्तिः	,,
कङ्कालभिक्षाटनमूर्ती	
१ कङ्कालमूर्तिः	१७९-८२
२ भिक्षाटनमूर्तिः	१८२-८४
एकादश रुद्राः	१८४
(i) १. अजः २. एकपादश्च	,,
३–११. अहिर्बुध्न—विरूपाक्ष—रेवत—हर—बहुरूप—त्र्यम्बक—सुरेश्वर—जयन्त—अपराजिताश्च	१८५
(ii) १. सद्योजातः २. वामदेवः	१८६
३. अघोरः ४. तत्पुरुषः	,,

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विषयाः	पृष्ठाः
५. ईशानः ६. मृत्युञ्जयः	१८६
७. विजयः ८. किरणाक्षः	१८७
९. अघोरास्त्रः १०. श्रीकण्ठः	,,
११. महादेवश्च	,,
विद्येश्वराः	
(i) स्वरूपम् (ii) नामानि च	,,
१. अनन्तः २. त्रिमूर्तिः	,,
३. सूक्ष्मः ४. श्रीकण्ठः	१८७
५. शिवोत्तमः ६. शिखण्डी	,,
७. एकनेत्रः ८. एकरूद्रश्च	१८८
मूर्त्यष्टकम्	
(i) नामानि (ii) स्वरूपवर्णाश्च	१८९
तेषु—शर्व—भीम—पशुपति—भवाः	,,
ईशानादयः पञ्चमूर्तयः	
१. ईशानः	,,
२. तत्पुरुषः ३. अघोरः	१९०
४. वामदेवः ५. सद्योजातश्च	,,
महेशः महादेवो वा	१९०-९१
शिवस्य गणादयः	१९१-९७
नन्दी	१९१-९२
चण्डेशः	१९२-९४
क्षेत्रपालः	१९५-९६
आर्यः शास्ता वा	१९६-९७
शिवभक्ताः	१९७
शैवलाञ्छनरहस्यम्	१९८-९९
शिवायतनम्	१९९
शिवायतनेऽष्टप्रतीहाराः	,,
चतुर्थो पटलः	
गाणपत्यप्रतिमालक्षणम्	
अ. गणपतिः गणेशः	२००-२०५
गणपतिः	२००
विनायकः	२००-२०२
बीजगणपतिः	२०२
हेरम्बः	,,
वक्रतुण्डः	,,
बालगणपतिः	,,
तरुणगणपतिः	२०३
भक्तविघ्नेशः	२०३
वीरविघ्नेशः	,,
शक्तिगणेशः	,,
ध्वजगणाधिपः	,,
पिङ्गलगणपतिः	,,
उच्छिष्टगणपतिः	,,
विघ्नराजगणपतिः	,,
लक्ष्मीगणेशः	२०३-४
महागणेशः	२०४
भुवनेशगणेशः	,,
नृत्तगणपतिः	,,
ऊर्ध्वगणपतिः	,,
प्रसन्नगणेशः	,,
उन्मत्तविनायकः	,,
हरिद्रागणेशः	,,
गणेशायतनम्	,,
गणेशप्रतिहाराः	२०५
ब. सेनापतिः कार्तिकेयः	२०५-२१६
सेनापतिः	२०५
कार्तिकेयः	२०५-६
सेनानीः	२०७
कुमारः	,,
स्कन्दः	२०७-८
सामान्यस्कन्दः	२०८
स्कन्दषण्मुखः	२०८-९
पञ्चविधः स्कन्दः	२०९-१०
विविधबाहुयुक्तःविविधवर्णश्च	२१०-१२
सुब्रह्मण्यः	२१२
ज्ञानशक्तिसुब्रह्मण्यः	,,
अग्निजातसुब्रह्मण्यः	,,
सौरभेयसुब्रह्मण्यः	,,
गाङ्गेयसुब्रह्मण्यः	,,
गुहसुब्रह्मण्यः	२१३
ब्रह्मचारिसुब्रह्मण्यः	,,
देशिकसुब्रह्मण्यः	,,
शक्तिधरः	,,
गजवाहनः	,,

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विषयाः	पृष्ठाः
शरबणभवः	२१३
तारकारिः	२१३-१४
ब्रह्मशास्ता	२१४
बल्लीकल्याणांसुन्दरः	२१४
बालस्वामी	„
क्रौञ्चभेत्ता	„
शिखिबाहः	२१४-१५
सुब्रह्मण्यायतनम्	२१५-१६
सुब्रह्मण्यद्वारपालकौ	२१६

पञ्चमो पटलः

देवी-प्रतिमा-लक्षणम्	२१७-२४४
(शाक्तप्रकरणम्)	
सरस्वति-ध्यानम्	२१७
सरस्वत्यर्चनम्	२१७-१८
सरस्वती	२१८-२०
महालक्ष्मीः	२२०-२१
लक्ष्मीः	२२१-२२
श्रीः	२२२
भूमिः	२२२-२३
तुलसीदेवी	२२३
महाकाली—ध्यानं लक्षणञ्च	„
काली	२२४
भद्रकाली	„
दुर्गा	२२४-२५
नवदुर्गाः	२२५-२६
रुद्रांशदुर्गा	२२६
वनदुर्गा	„
अग्निदुर्गा	„
जयदुर्गा	„
विन्ध्यवासिनी दुर्गा	„
रिपुमारिणी दुर्गा	„
कात्यायनी	२२६-२८
कौशिकी	२२८
चण्डिका	२२८-२९
चण्डिकाष्टप्रतीहाराः	२२९

विषयाः	पृष्ठाः
गौरी	२२९-३०
अ. गौरी-द्वादश-मूर्तयः	२३०-३१
ब. गौरी-पञ्च-ललीया-मूर्तयः	२३१
स. गौरीमूर्तयः	२३२
गौर्यायतनम्	„
गौर्याःअष्टद्वारपालिकाः	„
सप्तमातरः	२३२-३९
सामान्यम्	२३२-३५
१. ब्राह्मी	१३५-३६
२. माहेश्वरी	२३६
३. वैष्णवी	„
४. कौमारी	२३६-३७
५, वाराही	२३७
६. इन्द्राणी	२३७-३८
७. चामुण्डा	२३८-३९
बारूणी चामुण्डा	२३९
रक्तचामुण्डा	„
देवीभेदप्रभेदेषु—	
नन्दा-भूतमाता-योगनिद्राः	„
वामा-रौद्री-कलविकर्णिका-बलविकर्णिकाश्च	„
वलप्रमथनी-अम्बा-अम्बिका-मङ्गला सर्वमङ्गला कालरात्रि ललिताः	२४०
सर्वभूतदमनी मनोन्मनी च	„
शिवदूती-योगेश्वरी-भैरवी-त्रिपुरभैरवी-शिवा-कीर्ति-सिद्धि-ऋद्धयश्च	२४१
क्षमा-दीप्ति-रति-श्वेता-भद्राः	२४२
जया-विजया-घण्टाकर्णी-	„
जयन्ती-दिति-अरुन्धती-	„
अपराजिता-सुरभि-कृष्णाः	„
इन्द्राक्षी-अन्नपूर्णा-बालाः	२४३
राजमातङ्गी-अश्वारुढा-भुवनेश्वर्यः	„
ज्येष्ठा	२४३-४४

षष्ठो पटलः

सौर—प्रतिमा-लक्षणम्	२५४-२६०
अ. सूर्यादयः	
द्वादशादित्याः	२४५-४६

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विषयाः	पृष्ठाः
१. सूर्यः	२४६-४८
आदित्यपरिवाराः नवग्रहाः	
सामा० लक्ष०	२४८-४९
२. सोमः	२४९-५०
३. भौमः	२५०
४. बुधः	"
५.६. देवगुरुशुक्रौ	"
७. शनैश्चरः	२५१
८. राहुः	"
९. केतवः	"
सौरमायतनम्	"
सौरप्रतीहाराः	२५१-५३
ब. दिग्पालाः लोकपालाः वा	
सामान्यलक्षणम्	२५३-५४
१. इन्द्रः	२५४-५५
२. अग्निः	२५५-५६
३. वैवस्वतो यमः	२५६-५७
४. निर्ऋतिः	२५७-५८
५. वरुणः	२५८
६. वायुः	५८-२५९
७. धनदः	२५९-६०
८. ईशः	२६०

सप्तमो पटलः

मूर्त्यन्तराणि

यक्ष-विधाधर-मुनि-वसु-मरुद्गण-पितृगणादीनां प्रतिमा-लक्षणम्	२६१-६९
अश्विनीदेवते	२६१-६२
यक्षविद्याधराः	२६२
वसवः नागाश्च	२६२-६४
अप्सरसः असुराश्च	२६४
पिशाचाः वेतालाश्च	"
भूतपिशाचादयः	२६४-६५
मरुद्गणः	३६५
साध्याः	"
पितरः	"

विषयाः	पृष्ठाः
सप्तर्षयः	२६६-६७
भक्ताः	२६७
अर्थ-काम-दिशाः ज्वरश्च	"
वेदाः शास्त्राणि च	२६७-६८
धर्मज्ञानवैराग्यादयः	२६८
व्योम	२६८-६९
एडूक	२६९

अष्टमो पटलः

जैन-प्रतिमा-लक्षणं बौद्ध-प्रतिमा-लक्षणञ्च

अ. जैनप्रतिमाललक्षणम्	२७०-७६
जिनस्वरूपम्	२७०
जिनेश्वराणां सामान्यलाञ्छनानि	"
जैनलक्षणम्	२७०-७१
अ. २४ तीर्थङ्कराः	२७१
ब. २४ शासनदेविकाः	२७१-७३
स. २४ शासनदेवाः	२७३-७४
षोडशविद्यादेव्यः	२७४-७५
क्षेत्रपालः	२७५
मणिभद्रक्षेत्रपालः	"
शान्ती देवी	२७५-७६
जिनायतनम्	२७६
जिनायतने जिनमूर्तीनां स्थापनक्रमः	"
जिनेन्द्रस्याष्टौ प्रतीहाराः	"
ब. बौद्धप्रतिमालक्षणम्	२७७-१९३
बुद्धाः बुद्धशक्तयः बोधिसत्वाश्च	
पञ्चध्यानिबुद्धाः	२७७
१. अमिताभः	"
२. अक्षोभ्यः	"
३. वैरोचनः	"
४. अमोघसिद्धिः	"
५. रत्नसम्भवः	"
६. वज्रसत्वोऽपि	"

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विषयाः	पृष्ठाः
दिव्यबुद्धशक्तयः	२७७
दिव्यबोधिसत्वाः	,,
मानुषबुद्धाः	२७८
गौतमो बुद्धः	,,
मानुषबुद्धशक्तयः	,,
मानुषबोधिसत्वाः	,,
सर्वतन्त्रस्वतन्त्रः मञ्जुश्रीः बोधिसत्वः तस्य चतुर्दशरूपाणि—	
१-२. वाक्, धर्मधातुवागीश्वरश्च	२७८
३-६. मञ्जुघोष-सिद्धैकवीर-वज्रानङ्ग-नामसङ्गीतयः	२७८-७९
७-१० वागीश्वर-मञ्जुवर-मञ्जुवज्र-मञ्जुकुमाराः	२७९
११-१४. अपरचन-स्थिरचक्र-वादिराट्-मञ्जुनाथाश्च	,,
बोधिसत्व अवलोकितेश्वरः— १५रु०	
१-३. षडक्षरी-सिंहनाद-खसर्पणाः	२८०
४-६. लोकनाथ-हालाहल पद्मनर्तेश्वराः	२८०-८१
७-८ हरिहरिहरिवाहनोद्भव-त्रैलोक्यवशङ्करौ	२८१
९-१०. रक्तलोकेश्वर-मायाजालक्रमौ	,,
११-१५. नीलकण्ठ-सुगतिसन्दर्शन-प्रेतसन्तर्पित सुखावती-वज्रधर्माः	२८२
अमिताभाविर्भावेषु—देवौ देव्यश्च	
महाबलसप्तशतिकहयग्रीवदेवौ	२८२
शुक्ला-तारोद्भवा-उड्डियानभेदैः कुरुकुल्ला, भृकुटी, महासितवती च देव्यः	२८२-८३
अक्षोभ्याविर्भावेषु देवाः	
१-२. चण्डरोषणः, द्विभुजः शक्त्या-लिङ्गितश्च द्विविधः हेरूकः	२८३ २८४
३-४. बुद्धकपालः, सम्वर-सप्ताक्षर-महामायाप्रभेदैः वज्रडाकश्च	२८४-८५
५-६. हयग्रीवः रक्त-कृष्ण प्रभेदाभ्यां यमारिश्च	२८५
७. सामान्योच्छूष्मप्रभेदाभ्यां द्विविधो जम्भालः	२८६

विषयाः	पृष्ठ
अक्षोभ्याविर्भावेषु देव्यश्च	
१-२ महाचीनतारा, जाङ्गुली च	२८६
३. सामान्यविद्युज्जालकरालीप्रभेदाभ्यां चैकजटा	२८७
४-६. पर्णशवरी-प्रज्ञापारमिता-वज्रचर्च्चिकाः	,,
७-८. महामन्त्रानुसारिणी महाप्रत्यङ्गिरा च	२८७-८८
९-११. ध्वजाग्रकेयूरा-वसुधारा-नैरात्म्याश्च	२८८
वैरोचनाविर्भावेषु देव्य एव	
१. अशोककान्तार्यपिचुवाप्रभेदै-र्मारीची	,,
२-३. उष्णीषविजया-सितातपत्रा-पराजिता च	२८८-८९
४.५. महासाहस्रप्रमर्दिनी वज्रवाराही च	२८९
अमोघसिद्धयाविर्भावेषु देव्य एव	
१.४. खदिरवनी-वश्य-षड्भुज-धनदताराः	,,
५-७. पर्णशवरी-महामायूरी, वज्रशृङ्खला च	,,
रत्नसंभवाविर्भावेषु—	
देवौ—जम्भालोच्छूष्मजम्भालौ	२९०
देवीषु च—महाप्रतिसरा वसुधारा च	,,
पञ्चध्यानिबुद्धाविर्भावेषु—	
देवौ—जम्भाल-महाकालौ	२९०
देव्यश्च—१-२ वज्रतारा प्रज्ञापारमिता च	२९०-९१
३-४. मायाजालक्रमकुरुकुल्ला सिततारा च	२९१
चतुर्ध्यानिबुद्धाविर्भावेषु	
वज्रतारैकमात्रम्	,,

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विषयाः	पृष्ठाः
वज्रसत्वाविर्भावेषु	
१. जम्भालः	२९१
२. चुन्दा च	,,
पञ्चरक्षामण्लीयासु देवतासु—	
महाप्रतिसरादयः पञ्च	,,
ताराश्च	
सामान्याः विशेषाश्च	,,
स्वतन्त्रदेवताः	
१-३. गणपति-विघ्नान्तक—वज्र-हुङ्काराः	२९१-९२
४-५. भूतडामर-वज्रज्वालानलार्कौ	२९२
६-८. त्रैलोक्यविजय-परमाश्व-नाम-संगीतयः	२९२-९३
स्वतन्त्राः देव्यश्च	
१-३. सरस्वती, अपराजिता, वज्र-गान्धारी च	२९३
४-७ वज्रयोगिनी-गृहहमातृका-गणपतिहृदया-वज्रविदारिण्यश्च	२९३

तृतीयो खण्डः

चित्रलक्षणम्

टि० चित्रलक्षणस्य विषयानुक्रमणी (चित्रप्रशंशा-चित्रोत्पत्ति-चित्रनृत्यगीत-षडङ्ग-चित्र- चित्रप्रकार - चित्रोद्देश - चित्राङ्ग-भूमि-बन्धन-लेप्यकर्म-अण्डकबर्तन-मानादि-अवस्थादि-देवनृर्पषिगन्धर्वेत्यादि- सरित्सागर-वाहन-शैल-शिखर-द्वीप - भूमण्डल - शङ्ख -पद्मादि - चन्द्र-नक्षत्ररात्रिसन्ध्यादिनिर्माण - विलेखालक्षण-वर्तना-लक्षण-वर्तनाविधा-चित्रलेखनविधि-चित्र-पत्रोत्पत्ति-कण्टक-लक्षण-चित्रकर्मवर्णविन्यास-शुद्धवर्ण-मिश्रवर्ण-स्वर्णप्रयोग-चित्र-गुण-दोषा-दीनां) तत्र २९४ पृष्ठे द्रष्टव्या।

प्रकाशक

वास्तु-वाङ्मय-प्रकाशन-शाला

शुक्ल कुटी

भारतीय-वास्तु-शास्त्रमधिकृत्य प्रस्तावित-चतुर्दश-ग्रन्थेषु प्रकाशतां नीताः प्रकाशन-यन्त्रालयस्था वाधोलिखिताः ग्रन्थाः—

१.	वास्तु-विद्या एवं पुर-निवेश	मू० ८॥)
२.	प्रतिमा-विज्ञान	,, १५)
३.	प्रासाद-वास्तु	प्रेस में
४.	प्रतिमा-लक्षणम्	मू० १२)
५.	चित्र-लक्षणम्	,, २)
6.	**Hindu Iconography** 700 pages, price Rs. 25/—	in press
7.	**Hindu science of Architecture** with esp. ref. to Bhoja's Samarāṅgaṇa-Sūtradhāra and Bhuvanadev's Aparājita-pracchā	Shortly Coming

मुद्रकः—

प्रेम-प्रिंटिंग-प्रेस

गोलागंज, लखनऊ

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

राजकीय संग्रहालय पुस्तकालय, लखनऊ
विभाग C
पुस्तक क्रम संख्या 24
State Museum Library, Lucknow

प्रतिमा-विज्ञाने

१. प्रतिमा-निर्माणोपक्रमविधिः

(i) म० पु०

विविक्ते संवृते स्थाने स्थपतिः संयतेन्द्रियः ।
पूर्ववत् कालदेशज्ञः शास्त्रज्ञः शुक्लभूषणः ॥
प्रयतो नियताहारो देवताध्यानतत्परः ।
यजमानानुकूलेन विद्वान् कर्म समाचरेत् ॥

(ii) स० सू० ७६. ४-५

प्रारभेद् विधिना प्राज्ञो ब्रह्मचारी जितेन्द्रियः ।
हविष्यनियताहारो जपहोमपरायणः ॥
शयानो धरणीपृष्ठे (कुशास्तरणे तदन्तर ?) ।

(iii) अ० पृ० २२६. २१-३७

सूत्रधारस्ततः प्राज्ञः शुक्लाम्बरधरः शुचिः ।
हविष्यनियताहारो जपहोमपरायणः ॥
सुसमीक्ष्य प्रदेशं तु कुङ्कुमार्द्रं सुसञ्चितम् ।
इमं मे गङ्गे यमुनेऽभिषिच्यसलिलैः शुभैः ॥
कारयेन्मण्डपं पूर्वमार्द्रशाखाविनिर्गतम् ।
उत्तराभिमुखो विश्व कर्मरेखाकरो धृतिः ॥
अग्न आयाहि मन्त्रेण रेखास्तत्र प्रयोजयेत् ।
योगायोगेति मन्त्रेण कर्मसूत्रं समारभेत् ॥
अग्निर्ज्योतिर्हि मन्त्रेण ठङ्किकाग्रं च संस्पृशेत् ।
प्रज्वलद्विन्यसेदस्त्रं टङ्काग्रे सर्वतोमुखम ॥
अमृतीशं हृदये न्यस्य अस्त्रेणोज्ज्वलति तदा ।
आदेव इति मन्त्रेण पुनः पठति टङ्किकाम् ॥
शिल्पिनो भोजयेत्तत्र वस्त्रालङ्कारसंयुतान् ।
ब्राह्मणान् भोजयेत्तत्र शुद्धसैन्यं तपस्विनाम् ॥
भूरि दानं ततः कुर्याद् भूत्वा चाऽकृपणस्तथा ।
समाचरेत् कर्म तत्र कृत्वा पञ्चमहोत्सवान् ॥
यस्य देवस्य या मूर्तिश्चिन्तयेत्तां हृदम्बुजे ।
उमान्माहं देहिनां जन्त्रवाहक ॥
व्यहारेत्रिषु लोकेषु यस्य कस्यचिदामयम् ।
तस्मात् सर्वेषु मन्त्रेषु हंसो बीजः स उच्यते ॥
हंसः सदाशिवो देवो हंसश्चैवेश्वरो हरिः ।
ब्रह्मा हंसो यमः सूर्योऽग्निर्हंसः सर्वदैवतम् ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

आपो वायुश्च खं हंसो धर्मेन्द्रो धनदः क्षितिः ।
ध्रुवं ते हंसमित्येव गतोहं मिगतानि च ? ॥
एवं स गता हंसः सर्वात्मा परंपरा ? ।
हंसे लीना परा शक्तिरित्यर्थ व्याहरन्ति च ॥
वर्णा एकोनपञ्चाशन्निधनं यान्ति तत्र वै ।
निधनान्ते तु विज्ञेया वर्णास्ते तु महेश्वरः (रात्) ॥
निधनं तु गताशक्तिर्यदा मूर्ध्नि प्रलीयते ।
शून्यस्थानमिदं प्रोक्तं सेव्यते योगिभिः सदा ॥
मूर्ध्ना हृदयमायात्यमनस्कं परमं पदम् ।
स्थित्वासने सूत्रधारो जपेन्मन्त्रं सबीजकम् ।
या मूर्तिर्यस्य देवस्य शक्तिं तस्यैव तां न्यसेत् ॥

२. प्रतिमा-प्रकराणि—बिम्बभेदाः

(i) मय० ३३. १-३

निष्कलं सकलं मिश्रं लिङ्गं चेति त्रिधा मतम् ॥
निष्कलं लिङ्गमित्युक्तं सकलं बेरमुच्यते ।
मुखलिङ्गं तयोर्मिश्रं लिङ्गार्चाकृतिसन्निभैः ॥
बिम्बमूर्तिः शरीराभा विश्वमूर्तिस्वरूपकैः ।
छन्नदेहप्रतिच्छन्दप्रतिमाङ्कैस्तु नामभिः ॥
दृश्यो देवसमाख्यातो निष्कलं वक्ष्यतेऽधुना ।

(ii) शिल्प० २. ६-१३

अथ बिम्बं तु त्रिविधं निष्कलं सकलं तथा ।
मिश्रं चेति च तद् बिम्बमचलं च चलं तथा ॥
चलाचलमिति त्रेधा तत्प्रपञ्चः प्रदर्श्यते ।
निष्कलं केवलं लिङ्गमन्यत्त्ववयवान्वितम् ॥
तदेव चित्रमर्धाङ्गदर्शनं त्वर्धचित्रकम् ।
चित्राभासं तथा लेख्यमुक्तमादिक्रमेण तु ॥
सकलं त्रिविधं ज्ञेयं मिश्रलक्षणलक्षितम् ।
मिश्राख्यं मुखलिङ्गं स्यादचलादिकमुच्यते ॥
निधिकुम्भप्रतिष्ठादि सर्वमुक्तानुसारतः ।
कृत्वा प्रतिष्ठितं बिम्बमचलं परिकीर्तितम् ॥
पीठकोपरि संस्थाप्य पूजितं चलमेव हि ।
सौधं च पार्थिवं शैलं सङ्करं त्वचलं शुभम् ॥
रत्नजं दारुजं लौहं त्रयं चैतच्चलं शुभम् ।
धातुवर्णादिभिर्लेख्यं पटादौ तच्चलाचलम् ॥
लिङ्गं गर्भगृहद्वारस्तम्भाधिष्ठानकिष्कुभिः ।
तालमानाङ्गुलैश्चापि तथा मात्राङ्गुलैरपि ॥
यजमानोच्चमानेन चैवं नवविधं स्मृतम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

३. द्रव्यभेदेन बिम्बभेदाः—प्रतिमाद्रव्याणि तत्फलभेदाश्च

(i) शिल्प० १. २०-२१ शिलामयं मणिमयं लौहं दारुमयं तथा ।
मृन्मयं मिश्रकं लेख्यं बिम्बं सप्तविधं स्मृतम् ॥

१ शिलामयम् बिम्बार्थं पुंशिला ग्राह्या पीठार्थं स्त्रीशिला तथा ।
१.२५-२६ नपुंसकशिला पादशिलार्थमखिले मता ॥

२ रत्नमयम् स्फटिकं पद्मरागं च वज्रं नीलं हिरण्मयम् ।
१.३१-३८ वैडूर्यं विद्रुमं पुष्यं रत्नबिम्बं तथाष्टधा ॥
स्फटिकं सूर्यकान्तं च चन्द्रकान्तमिति त्रिधा ।
स्फटिकस्यैव भेदाः स्युः काममोक्षार्थदाः क्रमात् ॥
फलम्—श्रियं कामं तथारोग्यमृद्धिं पुत्रं जयं सुखम् ।
लभते पद्मरागादिबिम्बानां क्रमशोऽर्चनात् ॥
ग्रहरत्नानि—माणिक्यं च दिवाकरस्य शशिनो मुक्ताफलं विद्रुमं
भौमस्येन्दुसुतस्य वै मरकतं तत् पुष्यरागं गुरोः ॥
वज्रं दैत्यगुरोर्दिवाकरभुवो नीलं च गोमेदकं
राहोर्यद् ग्रहरत्नकं श्रृणु सखे! केतोश्च वैडूर्यकम् ॥
रत्न-नव-दोषाः—रत्नानामिह सर्वेषां दोषाः सामान्यतो नव ।
रेखाविन्दुः कलङ्कश्च काकाङ्घ्रिक्षतधूलयः ॥
तुषारत्रासरन्ध्राणि यत्नाद् रत्नेषु वर्जयेत् ।
रेखा विन्दुः कलङ्कं च त्रासः; काकपदं क्षतम् ॥
खद्योतो मक्षिका छायाभेदाः सन्धितुषारके ।
निम्नमस्तकता चेति दोषा रत्नभवास्तथा ।
स्त्रीपुंनपुसकभिदा न स्याद् रत्नेषु सर्वतः ।

३ लौहमयम् सौवर्णं राजतं ताम्रं पैत्तलं कांस्यमायसम् ।
१. ३८-४२ सैसकं त्रापूपुषं चेति लौहं बिम्बं तथाष्टधा ॥
भुक्तिमुक्तिप्रदं हैमं लिङ्गं रौप्यं तु पुष्टिदम् ।
ताम्रजं पुत्रदं विद्यात् तथैव स्यात् तु पैत्तलम् ॥
आयुरारोग्यदं कांस्यमायसं मारणं स्मृतम् ।
सैसकं त्रापुषं चापि विद्वेषोच्चाटनादिषु ॥
मुख्यलोहानि चत्वारि हेमादीनि शुभानि हि ।
पिशाचलोहान्यन्यानि कांस्यादीनीति केचन ॥

४ दारुमयम् चन्दनं देवदारुश्च शमीपिप्पलशिंशपाः ।
१. ४२-४४ खदिरासनमालूरमधूका बकुलस्तथा ॥
पद्मकं कर्णिकारं च विप्रादीनां त्रयं त्रयम् ।
क्रमाद् दारवलिङ्गानां विज्ञेयास्तरवः शुभाः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

५ मृन्मयम्	तीर्थक्षेत्राचलारामपुण्यदेशोद्भवां मृदम् ।
१. ४४-५०	शुक्लां रक्तां तथा पीतां कृष्णामादाय चूर्णयेत् ।।
(अ) आममार्तिकमपक्वमित्यर्थः	यवगोधूममाषाणां चूर्णानां गुग्गुलोरपि ।
	लाक्षाश्रीवेष्टकश्यामासर्जानां च समांशकैः ।।
	कुन्दुरिक्षस्य चांशेन मृच्चूर्णं सर्वसम्मतम् ।
	कपिलापञ्चगव्येन सतैलेन तु मर्दयेत् ।।
	तां मृदं मर्दितां पक्षं मासमात्रोषितां पुनः
	गृहीत्वा कारयेल्लिङ्गं सपीठं लक्षणान्वितम् ।।
	मासं तु शोषयेद् धर्मे बिम्बमामं तु मार्तिकम् ।
(ब) **पक्वलिङ्गम्**	अथवा केवलां मृत्स्नां कर्मयोग्यां विचूर्णिताम् ।।
	मर्दितां पञ्चगव्याद्भिर्मासमात्रं तथोषिताम् ।
	गृहीत्वा कारयेल्लिङ्गं सपीठं त्विष्टमानतः ।।
	विपचेत् कुशलैरग्नौ पक्वलिङ्गं तु तद् भवेत् ।
फलम्—	"मृन्मयं वार्क्षिकं बिम्बं सर्वसिद्धप्रदं सदा"
६ **मिश्रमयम्**	कृत्वा दारूमयं शूलं लोहपट्टविभूषितम् ।
१.५१	मृदा विधिवदालिप्य शोषयेन्मिश्रलिङ्गकम् ।।
७ **आलेख्य-मयम्** १. ५२	भित्त्यादावालिखेद् वर्णैर्लेख्यबिम्बं यथोदितम्
सैकतगौमयादिलिङ्गानि	सैकतं गौमयं पैष्टमान्नं गौलं फलात्मकम् ।
	नावनीतं च लिङ्गानि त्यज्यतां प्रतिवासरम् ।।
	नैतेषां पीठिका कार्य्या कुर्याल्लिङ्गं तदासने ।
	नैषां त्रिखण्डमानं वा न शिरोवर्तनादिकम् ।।
	नैषां कालमुहूर्ताद्यं नाधिवासादिकाः क्रियाः ।
	निर्माय सद्यस्तल्लिङ्गे शिवमावाह्य पूजयेत् ।।
	विसृज्य निरपेक्षं तल्लिङ्गमप्सु विनिक्षिपेत् ।
(ii) भ० पु० प्र० १३१, २-३	अर्चा सप्तविधा प्रोक्ता भक्तानां शुभवृद्धये ।
	काञ्चनी राजती ताम्री पार्थिवी शैलजा स्मृताः ।।
	वार्क्षी चालेख्यका चेति मूर्तिस्थानानि सप्त वै ।
(iii) शु० सा० चतु० ४.७२	प्रतिमा सैकती पैष्टी लेख्या लेप्या च मृन्मयी ।
	वार्क्षी पाषाणधातूत्था स्थिरा ज्ञेया यथोत्तरा ।।
(iv) स० सू०	सुवर्णरूप्यताम्राश्मदारूलेप्यानि शक्तितः ।
७६. १-३	चित्रं चेति विनिर्दिष्टं द्रव्यमर्चासु सप्तधा ।।
	सुवर्णं पुष्टिकृद् विद्याद् रजतं कीर्तिवर्धनम् ।
	प्रजाविवृद्धि (जं?दं) ताम्रं शैलेयं भूजयावहम् ।
	आयुष्यं दारवं द्रव्यं लेप्यचित्रे धनावहे ।।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

(v) अ० पु० मू० १२७

पुरा चाराधितं लिङ्गं धर्मभक्तिरतैस्तथा ?
लिङ्गं भद्र स्वरूपे च सम्प्राप्त: परमां गतिम् ।।
शक्रेणाराधितो देवो लिङ्गं वज्रमयं स्मृतम् ।
सुरराजपदं प्राप्तं रम्भाशक्तियुतात्मभि: ? ।।
धनदाराधितो देवो लिङ्गं स्वर्णमयं तथा ।
सम्प्राप्तो धनदत्वं च स्वयोनौ नाऽत्र संशय: ।।
विश्वेदेवाराधितो वै लिङ्गं रूप्यमयं स्मृतम् ।
प्राप्त: स विश्वेदेवत्वं स्वयोनौ नात्रसंशय: ।।
मारूताराधितो देवो लिङ्गं वै पित्तलात्मकम् ।
पवनत्वं स्म प्राप्नोति स्वयोनो नात्र संशय: ।।
आराधितोऽष्टवसुभिर्लिङ्गं कांस्यमयं स्मृतम् ।
वसुत्वाद्यपदं प्राप्तं स्वयोनौ नात्र संशय: ।।
मरीच्यादिगणैर्देवै: स्वल्प ? लिङ्गं पुरार्चितम् ।
शतार्धं विना त्वैकैश्च ? प्राप्ता देवपदं तथा ।।
तथा व्यन्तरजैर्देवो लिङ्गं वै पित्तलात्मकम् ।
आराधितं ततस्ते वै मुक्तिं प्राप्ता स्वयोनित:; ।।
शीशकोद्भवलिङ्गं तु पैशाचैरर्चितं पुरा ।
मुक्तिं प्राप्तास्तेन ते च स्वयोनेर्नाऽत्र संशय: ।।
वासुक्याद्यैश्च नागैश्च लिङ्गं तद्वयमनोर्चितिम् ? ।
तत: पाताल ाज्यं तु सम्प्राप्ता: कुलपन्नगा: ।।
दीप्तं वह्न्यर्चितं लिङ्गं ज्योतिर्मण्डलमध्यगम् ।
हुताशन: पदं प्राप्त: सर्वदेवमुखं तथा ।।
सूर्यकान्तमयं लिङ्गमादित्येन पुरार्चितम् ।
सूर्यत्वं च पदं प्राप्तं स्वयोनौ नात्र संशय: ।।
चन्द्रकान्तमयं लिङ्गं सोमेन च पुरार्चितम् ।
प्राप्तं नक्षत्राधिपत्यं स्वयोनौ नात्र संशय: ।।
प्रवालकमयं लिङ्गं पुरा मङ्गलपूजितम् ।
बुधेनाराधितं लिङ्गमिन्द्रनीलमयं पुरा ।।
पुष्परागयं लिङ्गं वाचस्पतिसुपूजितम् ।
शुक्रेण वै शङ्खमयं शशिना कृष्णनीलजम् ।।
केतुना वैडूर्यमयं गोमेधीयं च राहुणा ।
आर्हतै: पूजितं लिङ्गं शुद्धस्फटिकजं तथा ।।
महालिङ्गं हैमवतं ब्रह्मणा स्वयमर्चितम् ।
हेमकूटे विरूपाक्षं तज्जनार्दनपूजितम् ।।
देवीभिश्च समस्ताभिरष्टलोहमयं तथा ।
भैरवै: क्षेत्रपालैश्च त्रिजघात्मकमर्चितम् ।।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

योगिनीभिर्दिव्यलिङ्गं ब्रह्मरन्ध्रे च ध्यानजम् ।
शैलजं पार्थिवं लिङ्गं धातुजं रत्नजं तथा ॥
धर्मार्थकाममोक्षं च प्राप्नोति मनसि स्थितम् ।
लिङ्गं देवो रत्नजं च मुक्तिकामैर्नरेश्वरैः ॥
धातुदं शान्तिदं पूज्यं राजभिर्मुक्तिकीर्तिदम् ।
शैलजं च प्रवक्ष्यामि ह्यष्टवर्णमुदाहृतम् ॥
श्वेतं च पद्मवर्णं च कुमुदाभं च मुद्गभम् ।
पाण्डुरं माक्षिकनिभं कपोताभं च भृङ्गभम् ॥
श्वेतैर्विप्रा प्रवर्धन्ते राजानः पद्मवर्णकैः ।
वैश्याः कुमुदवर्णैश्च मुद्गाभैः शूद्रजातयः ॥
शेषवर्णैस्तथा चैव सामान्याननुलक्षयेत् ।
आरोग्यं पाण्डुवर्णे स्यात् माक्षिके विजयः स्मृतः॥
कपोते चार्थवृद्धिश्च भृङ्गाभे सुप्रजाः स्त्रियः ।
पृथ्वीमयं पार्थिवं स्याद्द्विधा तच्चैव भेदतः ॥
पक्वापक्वरेणुकाभिः सुखलिङ्गं प्रकीर्तितम् ।
सौभाग्यदं कुङ्कुमाढ्यैर्कर्पूरैः कामदं तथा ॥
कस्तूरिकाभवं लिङ्गं भुक्तिकामादिभोगदम् ।
मातुलिङ्गभवं पूज्यं भुक्तिकामैश्च राज्यदम् ॥
मध्यगं करवीराणां पूजितं श्रीपदं भवेत् ।
सन्तानवृद्धिदं पूज्यं लिङ्गं सर्वफलोद्भवम् ॥
यद्यत्फलोद्भवं लिङ्गं तैं फलैर्नोपजीवयेत् ।
चित्रेऽथवागमे वापि नियमार्थं सुपूजितम् ॥
तथाक्षतमयं पूज्यं मन्त्रलिङ्गं च पूजयेत् ।
उक्त्वा षडक्षरं मन्त्रं पुण्यं लिङ्गस्य दर्शनम् ।
पञ्चवारं समुच्चार्य लिङ्गवक्त्रादिदर्शनम् ॥

४. प्रतिमा-मान-लक्षणम्

मानगणनम्

(i) मरीचि प्रोक्त वै० आ० पट० २२

अथ विमानादिमानविभागार्थमङ्गुलीनां विधिं वक्ष्ये । मानाङ्गुलं मात्राङ्गुलं देहलब्धाङ्गुल मितित्रिविधं भवति । दिवादित्यरश्मौ जालकान्तः प्रविष्टे तद्-गोचरा अत्यन्तं क्षुण्णा लवाः परमाणवः प्रोक्ताः । परमाणुभिरष्टाभी-रथरेणुः । रथरेणुनाष्टगुणितं रोमाग्रम् । रोमाग्रादष्टगुणितं लिख्या(लिक्षा) । लिख्यादष्टगुणितं यूकम् । यूकादष्टगुणितं यवम् । यवादष्टगुणितं मानाङ्गुलमुत्तमम् । तदष्टांशोनं मध्यमम् । तत्तुरीयांशोनमधमम् । पुरुषस्य दक्षिणहस्तमध्यमाङ्गुलेर्मध्यमपर्वणि विस्तारं(आयतं वा) मात्राङ्गुलम् । बेरोत्सेधं तत्तालवशेन विभज्यैकांशं देहलब्धाङ्गुलं तदष्टांशं यवमिति ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

त्रयाणामङ्गुलानां संज्ञा । मात्रं च मूर्तीन्दुविश्वम्भरामोक्षोक्तमित्येकाङ्गुलस्य । कलागोलकाश्विनीयुग्मन्राह्मणविहगाक्षिपक्षाश्चेति द्व्यङ्गुलस्य । अग्निरुद्राक्षगुणार्णकालशूलरामवर्गमध्या इति त्र्यङ्गुलस्य । वेदप्रतिष्ठाजातिकराब्जजाननयुगतुर्यतुरीयाणीति चतुरङ्गुलस्य । विषयेन्द्रियभूतेषु सुप्रतिष्ठापृथिव्यश्चेति पञ्चाङ्गुलस्य । कर्माङ्गरससमयगायत्रीकृत्तिकाकुमाराननकौशिकर्तवः षडङ्गुलस्य । पातालमुनिधातवो लोकोष्णिग्रोहिणीद्वीपाङ्गाम्भोनिधयश्चेति सप्ताङ्गुलस्य । लोकपालनागोरगवस्वनुष्टुब् गणाश्चेत्यष्टाङ्गुलस्य । बृहतीग्रहरन्ध्रनन्दसूत्राणि नवाङ्गुलस्य । दिक्प्रादुर्भावनाडीपङ्क्तय इति दशाङ्गुलस्य । त्रिष्टुब्रुद्राश्चेत्येकादशाङ्गुलस्य । वितस्तिर्मुखं तालं यमं चार्कोराशिर्जगती चेति द्वादशङ्गुलस्य । अतिजगती त्रयोदशाङ्गुलस्य । शक्वरी मनुश्चतुर्दशाङ्गुलस्य । अतिशक्वरी तिथिश्चेति पञ्चदशाङ्गुलस्य । क्रियाष्टीन्दुकलाश्चेति षोडशाङ्गुलस्य । अत्यष्टिस्सप्तदशाङ्गुलस्य स्मृतिधृतिश्चेत्यष्टादशाङ्गुलस्य । अतिधृतिरेकोनविंशस्य । कृतिर्विंशदङ्गुलस्य प्रकृतिरेकविंशदङ्गुलस्य । आकृतिर्द्वाविंशतेः । विकृतिस्त्रयोविंशतेः । सत्कृतिश्चतुर्विंशतेः । अतिकृतिः पञ्चविंशतेः । उत्कृतिष्षड्विंशतेः । नक्षत्रं सप्तविंशते इति ।

एवं **मानानि** भवन्ति । मान प्रमाणमुन्मानं परिमाणमुपमानं लम्बमानमिति षण्मानानि ।

आयाममायतं दोर्घम्मानमित्येकार्थवाचकाः । विस्तारं विस्तृतं तारं विसृतिर्विसृतं व्यासं विसारितं विपुलं ततं विष्कम्भं विशालमिति **प्रमाणस्य** । बहलं नीव्रं घनमिति च । उच्छ्रायं तुङ्गमुन्नतमुदयमुत्सेधमुच्चमित्य**युन्मानस्य** । निष्क्रमं निष्कृतिर्निर्गमं निर्गतिरुद्गममिति च । मार्गं प्रवेशनं नत परिणाहं नाहं वृतिरावृतमिति **परिणामस्य** । निवृत विवरमन्तरमित्यु**पमानस्य** । सूत्रालम्बनान्वितं (सूत्रं लम्बनमुन्मितं) यत्तत्तल**लम्बमानमिति** । एतैष्षण्मानैमार्युतं वेरं कारयेत् ।

(ii) स० सू० ७५. १-३

ब्रूमोऽथ मानगणनम् परमाण्वादि तद् भवेत् ॥
परमाणू रजो रोम लिक्षा यूका यवोऽङ्गुलम् ।
क्रमशोऽष्टगुणा वृद्धिरे(व?वं)मानाङ्गुलं भवेत् ॥
द्व्यङ्गुलो गोलको ज्ञेयः कलां वा तां प्रचक्षते ।
द्वे कले गोलेकौ वा द्वौ भागो मानेन तेन तु ॥

(iii) अ०पु० २२५.६-१३

भास्करोदयनादिष्ट-दीप्ति-रश्मिप्रकाशतः ।
जालान्तरगतो रेणुर्दशने च पृथक् पृथक् ॥
उद्दिष्टं परमाण्वादि - प्रमाणं च समन्ततः ।
परमाण्वष्टकं रेणुः केशाग्रं च तदष्टतः ॥
अष्टाष्टगुणनादेवं केशाग्रं च प्रसिद्ध्यति ।
अष्टकेशाग्रतो लिक्षा यूका चैव तदष्टतः ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

अष्टाभिश्चैव यूकाभिर्यवश्चैवं प्रसिध्यति ।
तथाङ्गुलं चाष्टयवः प्रतीतं तत् प्रागुवधः ।।
रूपमानमिति प्रोक्तं परमाण्वादिपरिकल्पितम् ।
मूलनानं प्रोक्तमथो तनुभानंविनिर्णयम् ।।
अङ्गुलोद्भवमानं तु स्यान्मात्राङ्गुलसंज्ञकम् ।
कलाद्विमात्रा कथिता सैव गोलकउच्यते ।।
द्विमात्रं गोलकं विद्याद् भागं चैव द्विगोलतः ।
भागं त्रिगुणितं तालस्तन्मानात् प्रतिमा त्रिधा ।।
मानं तालात्मकं यत्तन् मूर्त्यार्जिवसमुच्छ्रयः ।
पृष्ठाद्यङ्गुलतः कार्यं तालसूत्रे प्रसिध्यति ।।

५. प्रतिमा-निर्माणे मानाधाराणां पञ्चपुरुष-स्त्री-लक्षणम्

स० सू० ८१, १-३ पञ्चानां हंसमुख्यानां देहबन्धाधिकं नृणाम् ।
दण्डिनी प्रमुखानां च स्त्रीणां तद् ब्रूमहे प्रथक् ।।
हंसः शशोऽथ रूचको भद्रो मालव्य एव च ।
(पञ्चैते) पुरुषास्तेषु मानं हंसस्य कथ्यते ।।
अष्टाशीत्यङ्गुलो हंसस्यायामः परिकीर्तितः ।
विज्ञेया बृद्धिरन्येषां चतुर्णां द्वयङ्गुलक्रमात् ।।

बृ० स० ६९.१,२,७. ताराग्रहैर्बलयुतैः स्वक्षेत्रस्वोच्चगैश्चतुष्टयगैः ।
पञ्चपुरुषाः प्रशस्ताः जायन्ते तानहं वक्ष्ये ।
जीवेन भवति हंसः सौरेण शशः कुजेन रुचकश्च ।
भद्रो बुधेन बलिना मालव्यो दैत्यपूज्येन ।।
षण्णवतितरङ्गुलानां व्यायामो दीर्घता च हंसस्य ।
शशरुचकभद्रमालव्यसंज्ञितास्त्र्यंगुलविवृद्धया ।।

६. तालमानं ताल-नियमश्च

(i) मरीचि-प्रोक्त वै० आ० पट० २२

अथ देवानां तालविधानम् । देवस्योत्तमं दशतालम् । तथैव ब्रह्मशङ्करयोः । श्रीभूम्योरुमासरस्वत्योश्च मध्यमं दशतालम् । इन्द्रादिलोकपालानामादित्यचन्द्रयोर्द्वादशादित्यानामेकादशरुद्राणामष्टवसूनाम - विश्वन्योर्भृगुमार्कण्डेयथोर्वीशशेषकयोदुर्गागुहसप्तर्षीणामध्यधमं दशतालम् । यक्षेशनवग्रहाद्यन्यदेवानां नवार्धतालमानेन । दैत्ययक्षोरगेशसिद्धगन्धर्वचारणानामुत्तमनवतालेन । देवकल्पमनुजानां सत्र्यङ्गुलं नवतालम् । निशाचरेन्द्राणामसुराणां च नवतालम् । मर्त्यानामष्टतालेन । वेतालानां सप्ततालेन । प्रेतानां षट्तालेन । कुब्जानां पञ्चतालेन । वामनानां चतुस्तालेन । भूतानां किन्नराणां च त्रितालेन कूष्माण्डानां द्वितालेन । कबन्धानामेकतालेन । तेषां प्रत्येकमुत्तममध्यमाधमभेदानि भवन्ति । चतुर्विंशच्छताङ्गुलमुत्तमं दशतालम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सविंशतिशताङ्गुलं मध्यमं दशतालम् । षोडशाधिकशताङ्गुलमधमं दशतालम् ।

अङ्गुष्ठप्रदेशिनीभ्यां मितं प्रादेशम्, अङ्गुष्ठमध्यमाभ्यां मितं तालमङ्गुष्ठानामिकाभ्यां मितं वितस्तिरङ्गुष्ठकनिष्ठिकाभ्यां मितं गोकर्णम् । मानाङ्गुलेन चतुर्विंशत्यङ्गुलं किष्कुः पञ्चविंशत्यङ्गुलं प्राजापत्यं, षड्विंशत्यङ्गुल धनुर्ग्रहं, सप्तविंशत्यङ्गुलं धनुर्मुष्टिस्तच्चतुर्गुणो दण्डस्तेन दण्डेन ग्रामादीनां विन्यासं कारयेत् ।

(ii) शिल्प० ४.३७-५१

उत्तम दशतालाख्यं चतुर्विंशच्छताङ्गुलम् ।
मध्यमं दशतालं स्याद् विंशाधिकशताङ्गुलम् ॥
अधमं दशतालं तु कलाधिकशताङ्गुलम् ।
तालं प्रत्ययमेवं तु क्रमाद् वेदांशहानितः ॥
उत्तमं नवतालादि बिम्बमानमुदाहृतम् ।
उत्तमं दशतालेन ब्रह्मविष्णुमहेश्वराः ॥
मध्यमं दशतालेन तथैवोमासरस्वती ।
उषा भूमिश्च दुर्गा च लक्ष्मीर्ज्येष्ठा च मातरः ॥
मध्यमं दशतालेन वा त्रिमूर्तीन् प्रकल्पयेत् ।
कन्यसं दशतालेन चन्द्रादित्यावथाश्विनौ ॥
आर्यं शतमखं चैव चण्डेशं क्षेत्रपालकम् ।
महर्षीणां गणांश्चैव तेषां देवीश्च कारयेत् ॥
उत्तमं नवतालेन विघ्नेशान् लोकपालकान् ।
वसूंश्च दिक्पतींश्चैव अस्त्रमूर्तीश्च गुह्यकान् ॥
देवानन्यांश्च देवीस्ताः कारयेल्लक्षणान्वितम् ।
मध्यमं नवतालेनाप्यष्टमूर्तिमरुद्गणान् ॥
यक्षासुरगणांश्चैव करोतु शुभलक्षणम् ।
कन्यसं नवतालेन विद्याधरगणांस्तथा ॥
असुरान् सिद्धगन्धर्वान् पितरश्च तथैव च ।
अष्टतालेन मर्त्यांस्तु पिशाचाः सप्ततालतः ॥
षष्ठतालेन कुब्जाश्च तत्तच्छ्रेष्ठान्तराधमाः ।
तत्तादुत्तममध्यादिभेदेनैव भवन्त्यतः ॥
पञ्चतालोत्तमेनैव विघ्नेशं स्कन्दमेव च ।
वामनं च करोत्वस्य भूतान् मध्येन वाधमात् ॥
बालांस्तु वेदतालेन कुर्याद् भूतगणांस्तु वा ।
त्रितालेन तु कर्त्तव्या यक्षकिन्नरजातयः ॥
द्वितालेनैव कूश्माण्डांस्तालात् कूर्माकृतिर्हरिः ।
यथोक्तप्रतिमायामं मूर्तिभेदवशादिह ॥
विभज्यार्काङ्गुलं तालं गोलकं वा कलां तथा ।
विदिताद्यङ्गुलं मानमङ्गुलाष्टांशकं यवम् ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

(iii) अ० पृ०२२५.१४-२५

ज्ञेयं तालं कीर्तिवक्त्रं तथा जलचराः मताः ।
विहङ्गाश्च द्वितालाः स्युः कुञ्जराश्च त्रितालकाः ॥
चतुस्तालाश्च तुरगाः किन्नराः पञ्चतालकाः ।
गणनाथश्च षट्तालो यक्षाश्चैवं प्रकीर्तिताः ॥
सप्तताला मानवाश्च अष्टांशा दिव्ययोषितः ।
नवांशा सर्वदेवाश्च सम्प्रोक्ता वै तथैव च ॥
दशतालो भवेद्रामो विष्णुर्वैरोचनस्तथा ।
सिद्धास्तथा जिनवरास्तथा कार्या दशांशतः ॥
एकादशांशा रूद्रश्च भूतानि च तथैव च ।
द्वादशांसा मधुमुरौ वैताला रूपतो मताः ॥
त्रयोदश राक्षसानां दानवानां चतुर्दश ।
तालाः पञ्चदश प्रोक्ता श्वामुण्डा भृगुरूपकः ॥
जटामुकुटचन्द्रालङ्कृताः षोडशतालतः ।
कार्याः षोडशतालान्ताः शास्त्रतो नाधिकास्ततः ॥

७. मानभेदपूर्वकं प्रतिमा-विधानम्

(i) मरीच-प्रो० वै० आ० प० २२

अ—अथातः प्रतिमालक्षणं वक्ष्ये । वेरस्य लम्बमानं पूर्वमेव परीक्ष्य कारयेत् । अष्टषष्ट्यङ्गुलायतां चतुर्विशत्यङ्गुलविस्तारां द्वयङ्गुलघनां लघ्वीं श्लक्ष्णां फलकां गृहीत्वा परितस्त्र्यङ्गुलं नीत्वा मानसूत्रं विन्यस्य प्राक्पश्चिमभागस्थानि सूत्राणि प्रसारयेत् । मध्ये सूत्रं विन्यस्य मध्यसूत्रादेकाङ्गुलं पुटपर्यन्तसूत्रं तदेव दृगन्तरी स्यात् । तस्मात् त्र्यर्धाङ्गुलं नेत्रपर्यन्तं तस्माद् द्वयर्धाङ्गुलं मुखपर्यन्तं तस्माद् द्वयङ्गुलं कर्णपर्यन्तं तस्मात् त्र्यङ्गुलं कक्षपर्यन्तं तस्माद्दशाङ्गुलं बाहु पर्यन्तमेवं त्रयोदश सूत्राणि विन्यस्य परभुजस्य मणिबन्धावसानं मानसूत्रद्वयमेव तत्तारं नीत्वाभ्यन्तरं भवेत् । पुरतो मध्यसूत्रयोगं मध्यसूत्रं, तस्माद् द्वयङ्गुलं पुटसूत्रं, तस्माद्द्वियवाधिकं द्वयङ्गुलं नेत्रसूत्रं तदेव वक्त्रबाह्यं, तस्मात् त्र्यङ्गुलमन्तर्भुजावधिकं तदेव कक्षपर्यन्तं, तद्वदेव चतुरङ्गुलं बाहुपर्यन्तं तदेव मध्येमध्यं कक्षाभ्यन्तरगतमङ्गपार्श्वमध्यं स्यात् । तस्माद् द्वयङ्गुलं कर्णपर्यन्तं तस्मात्त्र्यङ्गुलं शिरःपृष्ठावसानकं तदेव परभुजावधि भवतीति । एवं दक्षिणोत्तरगतानि सूत्राणि षट् च विन्यस्य तत्तत्सूत्रसङ्गे सुषिरं कृत्वा तन्तुना यवान्तरमात्राणि सूत्राणि सुषिरे संयोज्याग्रे प्रोतकुण्डलं लोहमयं मृन्मयं वा संबध्य सूत्राणि प्रलम्बयेत् ।

स्थानकस्य मध्यसूत्रं मौलिशिखामणेर्मध्ये मूर्ध्नो भ्रूसङ्गस्य नासाग्रस्यं च मध्ये कण्ठस्य हृदयस्य कुक्षेर्नाभेर्योनेः पादयोश्च मध्ये प्रलम्बयेत् । तत्सूत्र संस्पर्शं नासाग्रं कुक्षिमध्यं च । सूत्रान्मौल्यग्रान्तं

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

षडङ्गुलम्, हनुमध्यं यवाधिकचतुरङ्गुलं, हिक्कान्तं चतुरङ्गुलं, हृन्मध्यं द्व्यर्धाङ्गुलं, नाभिष्षड्यवमेकाङ्गुलं, योनिमूलं द्व्यङ्गुलम्, ऊरुमध्यं त्र्यङ्गुलं, जान्वन्तरं षडङ्गुलं, जङ्घान्तरमष्टाङ्गुलं, नलकान्तरं षोडशाङ्गुलम्, (अष्टाङ्गुलं वा?) सूत्रात्पूर्वं सार्धाङ्गुलमङ्गुष्ठाग्र सूत्रात्परतो द्व्यर्धाङ्गुलमेवं मध्यसूत्रवशान्मानयेत्। बाहुपर्यन्तमेव पार्श्वसूत्रं स्यात्। चूडामणौ मूर्ध्नि कर्णपाल्यन्तरे बाहुकूर्परयोः पार्श्वे जानुजङ्घागुल्फानां मध्ये प्रलम्बयेत्। मौलौ मूर्धनि कृकाटिकाककुद्वंशस्फिक्पार्ष्णीनां मध्ये पृष्ठमध्यसूत्रं प्रलम्बयेत्। शिरःपार्श्वे वक्त्राबाह्ये गण्डपार्श्वे चूचुकाग्रमध्ये श्रोणि-पार्श्वे चोरुजङ्घयोर्मध्ये वक्त्रबाह्यसूत्रं प्रलम्बयेत्। एतानि षट् च पीठावलम्बान्यन्यानि तत्तदङ्गसंस्पर्शान्येव लम्बयेत्। आसनस्योर्ध्वकायस्य पूर्ववन्मध्यसूत्रादीनि षट् सूत्राणि आसनस्योपरि लम्बयेत्। मध्यसूत्रं जानूपरिष्टात्केशान्तं तन्मध्यगं (बाहोरूपरिष्टात्केशान्तं तन्मध्यगं जान्वोः पार्श्वाभ्यां बाहुभ्यां च मध्यगं सूत्रं ?) प्रलम्बयेत्। सूत्राद्वामजान्वन्तरमूर्ध्वकायसमं दक्षिणजान्वन्तरं तदेव चतुरङ्गुलं त्र्यङ्गुलं यवोनं वान्यत्सर्वं पूर्ववत्कारयेत्।

अथात उपमानं वक्ष्ये। परभुजस्य मणिबन्धान्तरमष्टाङ्गुलमुष्णीषाच्छङ्खचक्रान्तरं मुखं, मध्योदरात्कूर्परान्तरं षडङ्गुल, अभयहस्तस्य मध्यमाङ्गुलाग्राच्चूचुकान्तरं त्रयोदशाङ्गुलं स्वागतस्य मध्यान्नाभ्यन्तरं दशाङ्गुलं, बरदस्य मध्याच्छ्रोण्यन्तरं नवाङ्गुलं, वामहस्तस्य मध्याङ्गुलान्मेढ्रान्तरं षडङ्गुलं, ऊरुमूलान्तरमेकाङ्गुलमूरुमध्यान्तरं द्व्यर्धाङ्गुलं, जान्वन्तरं चतुरङ्गुलं, जङ्घायोर्मध्यं पञ्चाङ्गुलं, नलकान्तरं षडङ्गुलम्, अक्षयोरन्तरं पञ्चाङ्गुलं, पार्ष्ण्यन्तरं चतुरङ्गुलं, तन्मध्यान्तरं षडङ्गुलम्, अङ्गुष्ठान्तरमष्टाङ्गुलं, शयनस्य तिर्यग्गतब्रह्मसूत्रस्य दक्षिणतो मुखं त्र्यङ्गुलं पादाङ्गुष्ठयोर्मध्यं विंशत्यङ्गुलं, पार्ष्ण्यन्तरं भागं, जान्वोरन्तरं चतुर्दशाङ्गुलं स्यात्। एवमुपमानं लक्षयेत्।

२३ प० ब—अथ देवेशस्योत्तमदशतालवशान्मानं वक्ष्ये। त्रियवाधिकमेकाङ्गुलमुष्णीषं, केशान्तं त्र्यङ्गुलं, दृक्सूत्रं त्रियवाधिकचतुरङ्गुलं तत्समं पुटान्तं, तत्समं हन्वन्तं, गलमर्धाङ्गुलं, हिक्का यवोनचतुरङ्गुलं, हिक्काया हृदयान्तं हृदयान्नाभ्यन्तं नाभेर्मेढ्रान्तं क्रमात्त्रियवाधिकत्रयोदशाङ्गुलं, मेढ्रादूर्वायामं त्रियवोनसप्तविंशत्यङ्गुलं, जानु त्रियवाधिकं चतुरङ्गुलं, जङ्घा चोरूसमायामा, पादं सत्रियवचतुरङ्गुलं, पादायामं सप्तदशाङ्गुलं, हिक्कासूत्रादधस्ताद्बाहुर्दीर्घं सप्तविंशत्यङ्गुलं, कूर्परं द्व्यङ्गुलं, प्रकोष्ठमेकविंशत्यङ्गुलं, तलं सप्ताङ्गुलं, तन्मध्यमाङ्गुलायामं षडर्धाङ्गुलं, तर्जनी यवाधिक-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पञ्चाङ्गुला, अनामिकातद्यवाधिका, अङ्गुष्ठं यवाधिकभागं, कनिष्ठाङ्गुलं तद्यवाधिकं स्यात् ।

अथ प्रमाणं वक्ष्ये । उस्णीषात्पूर्वकेशान्तं नवाङ्गुलं, द्विपार्श्वयोस्तत्समं, पृष्ठकेशान्तं द्व्यङ्गुलं, (मुखस्य विस्तारं) चतुर्दशाङ्गुलं मुखं, द्विचत्वारिंशदङ्गुलं नाहं शिरसः, पृष्ठतः कर्णयोरन्तरं त्रयोदशाङ्गुलं, पूर्वतष्षड्विंशात्यङ्गुलं, शेषं कर्णयोस्स्थानं, भ्रुवोर्मध्यमेकाङ्गुलं केशान्ताद् भ्रुवोर्मध्य त्र्यङ्गुलं(अष्टाङ्गुलार्धं तिर्यगुपक्षेपमक्षयामं ?) मध्यमष्टार्धाङ्गुलं, ग्रीवाग्रविस्तारं नवर्धाङ्गुलं, ग्रीवामूलविस्तारं बाह्वोर्पर्यन्तं चतुश्चत्वारिंशदङ्गुलं, वक्षोविशालं चतुर्विंशत्यङ्ग लं, हृदयविस्तारं विंशत्यङ्गुलं स्तनयोरन्तरं चतुर्दशाङ्गुलं, (दशाङ्गुलं?) मध्योदरं षोडशांगुलं, श्रोणिविस्तारमष्टादशाङ्गुलं, कटिविस्तारं विंशत्यङ्गुलम् ऊरुमूलविशालं त्रियवाधिकं त्रयोदशाङ्गुलम् । ऊरुमध्यविस्तारमेकादशाङ्गुलं, जानुविस्तारं नवार्धाङ्गुलं, जङ्घामूलमष्टाङ्गुलं जङ्घामध्यविस्तारं सप्ताङ्गुलं, नलकाविस्तारं सार्धचतुरङ्गुलम्, अक्षगुल्फान्तं पञ्चाङ्गुलं, पादविस्तारं सार्धपञ्चाङ्गुलं सार्धवेदाङ्गुलोत्सेधं, पार्ष्णिविस्तारं सार्धत्रिमात्रं, (पादाङ्गुलिविस्तारम्) अङ्गुष्ठायामं चतुरङ्गुलं, तर्जनी तद्यवाधिका, तद्यवोनं मध्यमाङ्गुलं, त्रिमात्रार्धानामिका, कनिष्ठकाङ्गुलायामं त्रिमात्रं, कनिष्ठाद्यङ्गुष्ठान्तं क्रमात्सप्ताष्टाष्टार्धनवषोडशभिर्यवैरङ्गुलानां विस्तारं, (शेषं विवरं) बाहुमूलविस्तारं दशाङ्गुलं, बाहुमध्यं नवाङ्गुलं, कूर्परं सार्धसप्ताङ्गुलं, प्रकोष्ठमध्यर्धसप्ताङ्गुलं, मणिबन्धं चतुर्मात्रं, तलं सार्धषण्मात्रं, रुद्राष्टनवसप्तषड्यवविपुलान्यङ्गुष्ठादिकनिष्ठान्तमङ्गुल्यग्राणि, तद्यवार्धहीनसप्तवेदेपुतुर्याग्नियववमङ्गुष्ठादिनखानां विशालं, द्वियवाधिकमायामं, द्विपर्वाङ्गुष्ठमन्यानि त्रिपर्वाणि, अङ्गुष्ठमूलपर्वार्धाधिकाङ्गुलं द्व्यर्धाङ्गुलमग्रपर्व, तर्जनीमूलपर्व चतुर्दशयवं, मध्यपर्व त्रयोदशयवा, अग्रपर्व द्वादशयवं, मध्यमाङ्गुलिमूलपव अष्टादशयवं, मध्यपर्व षोडशयवा, अग्रपर्व सार्धपञ्चदशयवा, अनामिकामूलपर्व सार्धचतुर्दशयवा, मध्यपर्व सार्धत्रयोदशयवा, अग्रपर्व द्वादशयवा, कनिष्ठाङ्गुलिमूलपर्व द्वादशयवा, मध्यपर्वैकादशयवा, अग्रपर्व दशयवा, अङ्गुलीनामाग्रे द्वियवाधिकं नखाग्रं, पर्ष्णिहस्तघनं वेदाङ्गुलं, तन्मध्यघनं द्व्यर्धाङ्गुलमग्रमङ्गुलीवत्क्षीणं, शुकोदरघनं द्व्यर्धाङ्गुलं, मणिबन्धात्तदायामं सयवं भागं, शुकोदरविशालं द्वियवोनं त्र्यङ्गुलं, पार्ष्णिहस्तवितारं द्वियवोनचतुरङ्गुलं, तस्याग्रे तर्जन्यादिकनिष्ठान्तनामङ्गुलीनां मूलतलं मांसलमर्ध-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मात्रेण, शेषं तलं निम्नम्, अङ्गुष्ठतर्जनीमूलयोस्सार्धत्र्यङ्गुलम्, अङ्गुलीनामधो मूलसन्धिरङ्गुलम् (एकाग्रो वा नीचार्धाङ्गुलं ?) कनिष्ठकादेशमूलात्तर्जनीमूल पार्श्वगा आयूरेखा, मध्यमाङ्गुल्यधो द्व्यङ्गुलं, तस्य षड्यवाधस्ताद्विद्यारेखा । तलमूलात्कराग्रान्तं ब्रह्मरेखा, दक्षिणे करतले चक्रशङ्खसमा रेखा भवेत् । उपक्षेपनिम्नं द्वियवम्, अन्तरावर्तं द्व्यङ्गुलम्, उपक्षेपविशालमध्यर्धाङ्गुलं, त्रियवोन्नतं हस्तिमस्तकवद्विस्तीर्णमस्तकं सोन्नतमङ्गुलम् (?)। (भ्रूतलं) भ्रूश्चतुर्यवा सार्धाङ्गुलायामा सार्धैकयवविस्तारानतार्धमात्रान्तर्या वक्रपुच्छका चापवत् । भ्रूलता स्निग्धरोमसंचिता द्व्यङ्गुल नेत्रतारं, भ्रुवस्थलादर्धाधिकाङ्गुलायामे अक्षिणी, अक्षिमण्डलमूर्ध्वाधोवर्मसंछन्नमूर्ध्ववर्म द्वादशयवमधोवर्म चतुर्यवमेतयोर्योगं नयनसूत्रम् । ऊर्ध्ववर्मविस्तारं द्वियवम्, अक्षिमोचन (?) विस्तारमेकाङ्गुलम्, ऊर्ध्ववर्म द्वादशयवमधोवर्मं चतुर्यवमूर्ध्ववर्मणा संस्पृशेत् । षड्यवं कृष्णमण्डलं, तस्योभयोः पार्श्वयोस्तदर्धाधिकायतौ शुक्लभागौ, कनीनिकाविस्तारायामं यवं, नेत्रान्तरक्तं यवार्धं, ज्योतिर्यवप्रमाणं, दृष्टिर्यूकमात्रोर्ध्ववर्मततं द्वियवमधोवर्मततं यवार्धकं, वर्मणो घनमर्धयवं, नवतिः पक्ष्मरोमाणि, शेषं पक्ष्म, नासिकाग्रमध्यमूलान्तं क्रमादष्टादशषड्यवविस्तृतं, नासिकाग्रमङ्गुलविस्तारं, गोजीमूलाग्रं द्व्यङ्गुलोच्छ्रयं, पुष्करमष्टयवोत्सेधं, तन्मूलविस्तारं द्वियवं, मध्यविस्तारं द्व्यर्धयवम्, अग्रविशालत्रियवं, पुटस्रोतोऽङ्गुलं, तिर्यग्यवपञ्चकं पुटस्य बहलं, यवमात्रायतान्वितं निष्पावबीजसदृशं तिलपुष्पसमाकारम् । नासिकापुटसूत्रान्नासाग्रं द्वियवार्धलम्बितं, सार्धचतुर्यवं गोजीतटं द्वियवविस्तारं, द्विवक्रा चोत्तरपाली सार्धयवविस्तृता, त्रियवार्धततं सार्धयववेदाङ्गुलायतमुत्तरोष्ठमास्यतारं तदेव । चत्वारः पुरतो दन्तास्त्रियवायामविस्तृताः, तावन्तोऽधरदन्ता द्वियवार्धततायताः, चतुर्यवायते दंष्ट्रे सदंशमुकुलोपमे ऊर्ध्वे, अधोदंष्ट्रे अर्धयवाधिके, पुरोदन्ताद्यवार्धेनानायतास्तत्समविस्ताराः पञ्चोपदंष्ट्रा द्विपार्श्वगा द्वात्रिंशद् दन्तसङ्ख्या । अधरोत्तरयोर्दन्तायामसमावन्तस्तदर्धोदन्तरोपणो (?) जिह्वा षडङ्गुलायामार्धविस्तारा, घृतजिह्वाङ्गुलं (बाहु ?) कर्णरन्ध्रं कलाङ्गुलं षडङ्गुलायतं, तालुविस्तीर्णत्र्यङ्गुलमास्यं नवयवान्तरं द्विगुणायतं षड्यवार्धमुत्सेधं, पालिका रक्ता, भागं ततमायामं द्विगुणम्, ओष्ठाधस्ताच्चिबुका सार्धाष्टयवं, हनुस्तत्समं तस्माद्धनुचक्रं सद्वियवं, तदुन्नतं रुद्राक्षियवं, चिबुकं निम्नगं (?) हनोर्गलं गलात्कण्ठमङ्गुलार्धं, गलरेखाध्यर्धकलायामा चापसन्निभा, कर्णबन्धाद्धनोर्मध्यं दशाङ्गुलं, तस्माच्चतुष्कलं

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

सृक्का नेत्रादधस्तादपाङ्गनेत्रमङ्गुलम्, अपाङ्गात्कर्णमूलं षडङ्गुलं, कर्णं कलाततं, नेत्रसूत्रसमं कर्णस्रोत:, तत्कर्णतुङ्गतार (?) कर्णनालमूलं कलासार्धयवं, कर्णावर्त्ती सार्धयवतता, पाली चतुर्यवा, कर्णपिप्पली चतुर्यवविस्तारा द्विगुणायता, पिञ्छूषी द्वयङ्गुलायामा षड्यवविशाला कर्णावर्तीपिञ्छूषीचूलिका यवतुमनुतुर्ययवार्धवविस्तारा:, पिञ्छूषीचूलिकाकर्णावर्त्युन्नतं चूल्यन्तावदत्यर्धयवमर्धाङ्गुलं (?) कर्णचूलीपिञ्छूषीकर्णीनिकायवान्तरं पिप्पलीपाल्यो: पाली बालेन्दुसन्निभा यवनिष्पावसदृशा, पिप्पली षड्यवायता चतुर्यविशाला, स्रोतोऽधोनेत्रसूत्रार्त्तिपिञ्छूष्यध: कर्णनालं मात्रार्धघनयुक्तं, नालौ पूर्वापरौ विवरं षड्यवमधोनाहं मात्रं स्यात्। कण्ठमूलादधौ वपु: कार्यं, कृकाटी सार्धाङ्गुलनता तस्यापरं यवं भागं (?) तद् ग्रीवायामं तत्रार्धाङ्गुलं तारं द्वादशाङ्गुलं तं स्कन्धयोस्समे (?) कर्णबन्धादधस्स्कन्धसन्धिस्सार्धषडङ्गुलं, सप्ताङ्गुलौ स्कन्धौ शोभान्वितौ, हिक्कासूत्रात्स्कन्धसन्ध्युच्चं चतुरङ्गुलं, तन्मध्मेऽप्यर्धाङ्गुलं जत्रु बाहुशिरस्सन्धिरंसान्तस्स्कन्धमूलतो नवाङ्गुलं द्वियवं, तस्माद् द्वियवं षडङ्गुल बाहुशिरो जत्रुसहितं कूर्परांसं पञ्चाङ्गुलायतं त्र्यङ्गुलायतमुत्क्षेपं समौ मुण्डितौ (?) भुजौ समनुन्नं मापयेदेवं नीत्वा भुजं नयेत्। कण्ठाधस्तात्ककुदद्व्रागायताष्टकोलकं (?) ककुद: कटिसन्धयन्तं वंशं विंशतिर्नागाधिका तत्समं ककुदोऽधस्तात् षड्भागे कक्षोड़रान्तरं (?) कक्षाधस्ताद्बाहुपर्यन्तं द्विनवं नवाङ्गुलं स्कन्धसन्धेरधस्तादंसपीठं सार्धेन्द्रियाङ्गुलं, तस्माद् द्वियवाङ्गुले अंसफलके स्तनसूत्रसमे, तत्रान्तरयोर्दशाङ्गुलं ककुद, धर……त्रिमात्रतारं सप्ताङ्गुलं तद्वक्षसो मांसलं तयोस्सन्धिवंशतारं कलानतं वंशपार्श्वे चांसफलकाया अधो नवाङ्गुलं, वृहत्योस्स्तनान्तरं वन्शात्सुप्रतिष्ठाकलं तयोर्वृहतीस्तनयोर्मध्यं सप्तदशाङ्गुलं घनं वृहत्या कटिसन्ध्यन्तरं मध्यं सप्ताङ्गुलायतं तद्धनं स्याच्चतुर्भागं तदधोऽङ्गुलाधिकं कटि सार्धमुखं सार्धाङ्गुलं खण्डकान्तं खण्डस्य पुरस्तात्पायुर्भागाङ्गुलं सार्धधृतिमात्रं कटिबन्धविशालं जघनस्य वहि:पृष्ठे वंशपार्श्वद्वयो: ककुन्दरं षडर्धाङ्गुलं विशालं निम्नौ ककुन्दरस्यान्तं द्वयङ्गुलं बिन्दुखण्डकयोस्तिर्यक्कटिर्वेदार्धमात्रिका खण्डं द्वयङ्गुलं तारं सार्धतुर्याङ्गुलं स्फिगारम्भतारं नवाङ्गुलं सुवृत्तं कण्ठ: कम्बुसमो वृत्तो द्विरेखावृतोऽधस्तान्नाडिकाधस्सद्वादशयवं कक्षाया हिक्कान्तं तावत् स्तनं कक्षादष्टाङ्गुलं षडङ्गुलं नम्रमुर: हृद् द्वियवाधिकं हृदयात्स्तनपीठतुङ्गमर्धाङ्गुलं कक्षाधारलम्बमत्युक्तं यवकोलकं स्तनपीठस्योन्नति: कक्षस्याङ्गुल तत्पुरस्तान्मुखं विप्राङ्गुलं यवं वृत्तं स्तनं यवोन्नतं स्तनाक्षं द्वियव-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तारं तदधस्ताद्द्वयङ्गुलं स्तनं हिक्का द्वयङ्गुलं निम्नं जत्रुरेखा द्वयङ्गुलं नाभिर्दक्षिणावर्ता षड्यवनिम्नायतेन्द्रियाङ्गुला नाभिः श्रोणिपार्श्वे त्रिकलाङ्गुलाद् द्वयङ्गुलोर्ध्वकटिश्रोण्याश्शेषं मेढ्-पीठं सार्धपञ्चाङ्गुलं लिङ्गायतं तारं द्विमात्रं मुष्कलम्बं तुर्यार्धाङ्गुलं तत्समविस्तारं वृषाननसदृशं मेढ्ं रुद्राक्षाङ्गुलं प्रतिस्ठाङ्गुलं द्वियवं जानुमण्डलविष्कम्भं घनं द्वयर्धमात्रं पार्श्वबन्धं तुर्याङ्गुलं पृष्ठाज्जानुत्रिमात्रार्धयववविस्तारान्वितं पृष्ठजं कोलकं मध्यभागं शेषं पार्श्वयोरपि जान्वन्तादिन्द्रवस्त्यन्ने (?) तालं मत्स्यवदुन्नतं पृष्ठ-जङ्घाश्रितं मत्स्यपार्ष्णी द्वयङ्गुलविस्तारं 'तनुकपृष्ठपार्श्वयोरन्तरं तद्बहिर्गते अक्षगुल्फयोस्तुङ्गं मनुपङ्क्तियवैर्विपुलं क्रमेणाष्टादशद्वि-विंशतियवं प्रतीष्ठार्धाङ्गुलं पार्ष्णितारं तत्तुङ्गं शराङ्गुलं सार्धं प्रपदतुङ्गमङ्गुष्ठद्वयङ्गुलं घनं शेषाणि विस्तारसमतुङ्गा न्यष्टयववविस्ताराद्दैर्घ्या नखमुखपार्श्वे द्वयोस्तुर्ययवं नीत्वा नखं नयेत् । चतुरर्धचतुस्सार्धाग्न्यग्नियययवैरश्विसार्ध (मध्यर्ध) यवैः क्रमा-न्नखानां विस्तारं तर्जन्यादिकनिष्ठान्तं त्रियवं तदर्धार्धेन नखाय-तास्तर्जन्यङ्गुष्ठयोरन्तरं चतुर्यवं, पर्वद्वयमङ्गुष्ठमन्यानि त्रिप-र्वाणि, स्वतारसदृशमग्रे पर्वान्तं यवाधिकमङ्गुष्ठपर्वमूलाग्रं शेषा-ङ्गुलीनां द्वियवाधिक्यमेकैकं सर्वाङ्गुलिमूलानां मूलतलं मांसलं पार्ष्णिभागे तलं पञ्चाङ्गुलायामं शेषं वर्तुलं कारयेत् । पादौ द्वौ चक्रशङ्खरेखासमन्वितौ । सर्वं सुव्यक्तं सुसम्पूर्णं बेरं सलक्षणं चक्षु-र्नन्दनमूर्ध्वकायमधः कायसममेव कृत्वा सर्वत्र विष्कम्भात्त्रिगुणं वृत्तं तत्परिमाणं स्यात् । सर्वेष्वङ्गेषु एकयवादिषड्यवान्तं हीना-धिक्यं न दोषाय भवति । तस्माद्यथोचितं युक्तया कारयेदित्याह मरीचिः ।

(ii) मान० ६४.

षोडशप्रतिमादीनां विष्णुविभवसर्वतः ।
उष्णीषात्पादपर्यन्तं मानं संक्षिप्यतेऽधुना ॥
लिङ्गमानवशाद् विष्णुमूलबेरावशात्क्रमात् ।
उत्तमं मध्यमं चार्धगर्भगेहविशालके ॥
हर्म्यतारवशाद् द्वारवशादधिष्ठानपादुके ।
हस्तमानवशाद् ग्राह्यं तालमाननवतालके ॥
यजमानवशान्मूलबेरलिङ्गाङ्गुलं तथा ।
मानाङ्गुलवशान्मानं मानद्वादशभेदकम् ॥
लिङ्गमानादिषण्मानं भोगमोक्षार्थधर्मदम् ।
हस्तादिवशान्मानं भोगमोक्षं प्रशंसितम् ॥
अङ्गुलं मुक्तिकामस्य कर्तुरिच्छा वशान्नयेत् ।
तस्मात्तन्मूललिङ्गादिमानं मानधृतमुच्यते ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

लिङ्गे स्वयंभुवे ज्ञात्वा मानुषे च द्विधा भवेत् ।
स्वयंभुलिङ्गे तु शिरोमानं च संग्रहम् ॥
परिणाहे यथा स्थूलदेशे विस्तार मानयेत् ।
मानुषलिङ्गतुङ्गे तु तच्छिरोमानकं त्यजेत् ॥
विस्तारे परिणाहे तु यदिच्छं देहं गृह्यते ।
एवं लिङ्गद्वयोत्तुङ्गे पीठमानं त्यजेद् बुधः ॥
लिङ्गशुद्धोदयं वाथ तत्तन्नाहसमं भवेत् ।
केचित्तत्त्रयमानं तु षोडशांशे विभाजिते ॥
तत्तदंशेन वृद्धिः स्याद्धीनं वा देशकालकम् ।
अथवा तत्तदंशेन लोकभूततलांशकम् ॥
नवमेकादशं चैव द्व्यधिक्यं वाथ हीनकम् ।
एवं लिङ्गवशात्प्रोक्तं विष्णुवेरवशादुच्यते ॥
मूलवेरसमं वापि नेत्रान्तं वा पुटान्तकम् ।
हन्वन्तं बाहुसीमान्तं स्तनान्तं हृदयान्तकम् ॥
नाभ्यन्तं मेढ्रसीमान्तं नवमानं चोत्सवोदयम् ।
तदर्धं कौतुकोत्सेधं कन्यसादि त्रयं त्रयम् ॥
शुद्धगर्भगृहं कृत्वा नन्दनन्दोदयं भवेत् ।
तदेवं नवमानं स्यान्नवतिविधमानकम् ॥
एवं गर्भगृहमानवशान्मानं प्रकल्पयेत् ।
प्रासादविस्तृते मानं गर्भगेहप्रमाणवत् ॥
शुद्धद्वारोदयं वाथ विस्तारे चायामे एव वा ।
तत्पादाधिकहीनं वा तत्तयोर्मध्यमानके ॥
समं वा पादमाधिक्यं द्वारमानं नवोदयम् ।
अधिष्ठानोदयं चैव पादतुङ्गं द्वयं ततः ॥
प्रत्येकं नवधा कृत्वा नवमानमुदीरितम् ।
हस्तादिनवहस्तान्तं हस्तमानवशोदयम् ॥
तालादिनवतालान्तं नवतालादिमानकम् ।
मुष्ट्यादि नवमुष्ट्यन्तं मुष्टिमाननवोदयम् ॥
कर्तृतुङ्गसमं वापि नेत्रान्तं च पुटान्तकम् ।
हन्वन्तं स्कन्धसीमान्तं स्तनान्तं हृदयान्तकम् ॥
नाभिमेढ्रविधानं स्यात्कर्तृमानं नवोदयम् ।
एतेषां चाष्टमानं तज्जात्यंशैस्तु नियोजयेत् ॥
तन्मानं शिल्पिभिः प्राज्ञैः षट्शुभायादि कारयेत् ।
अशुभायादिकं चोक्तं त्रिंशद्भागे विभाजिते ॥
तद्भागैकेन वृद्धिः स्याद् यशच्छुभायादिसंभवम् ।
सकलं चोत्सवादीनां यच्छुभांशावसानकम् ॥
अंशकं मानमेवोक्तमङ्गुलैर्मानमुच्यते ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

यल्लिङ्गतुङ्गं संग्राह्य चतुर्विशच्छतान्तकम् ।।
लिङ्गाङ्गुलमिति प्रोक्तं बेरं तालवशादपि ।
कृत्वा वेराङ्गुलं प्रोक्तं मानाङ्गुलमिहोच्यते ।।
यवताराष्टमात्रं स्याद् देवानामङ्गुलं भवेत् ।
मध्यं मुनियवाङ्गुल्यं षट्पञ्चाङ्गुलायतम् ।।
मानाङ्गुलमिति प्रोक्तं देहलब्धाङ्गुलं भवेत् ।
अङ्गुलद्वयमारभ्य जात्यंशं विनोदयं स्यात् ।।
द्वित्र्यङ्गुलं समारभ्य मध्ये भूताङ्गुलमारभेत ।
सप्ताङ्गुलं समारभ्य द्विद्वयङ्गुलविवर्धनात् ।।
पञ्चविशच्छतान्तं स्याद् यच्छुभायादसंभवम् ।
नागं नन्दं गुणं चाष्टनववेदगुणस्तथा ।।
भानुपङ्क्तचष्टहर्क्षमुनिनन्दक्षयं क्रमात् ।
शेषमायं व्ययं योनिश्च नक्षत्रं वारमंशकम् ।।
दरिद्रं दारनाशं च श्रीकरं विजयाद्भुतम् ।
भुक्तिर्मुक्तिश्च भोगस्तु चार्थलाभद्वयावहम् ।।
कीर्तिदं पुष्कलं चैव द्वादशं च तत्फलम् ।
सिद्धिदं विजयं चैव श्रीकरं चार्थहानिकम् ।।
भोगं च शत्रुनाशं च चक्षुरायार्थंलाभकम् ।
मुदितं सौख्यकं चैव दशधा व्ययस्य फलम् ।।
आयं सर्वहरं पुण्यं व्ययं सर्वहरं सुखम् ।
आयाधिक्यं व्ययं हीनं सर्वसंपत्करं सदा ।।
यत्फलं शुभयुक्तं चेदायहीनं तद्दूषणम् ।
पूज्यं व्ययं सममेवं तत्र दोषो न विद्यते ।।
ध्वजः सिंहो वृषो हस्ती स तेषां शुभयोनयः ।
जन्मद्वयं चतुष्षष्टिभिरष्टनन्दशुभर्क्षकम् ।।
नामजन्मादिनन्दं च गणनैस्तु विधीयते ।
कर्तृराश्यादिनारभ्य च मीनं द्वितीयान्तकम् ।।
तृतीये मीनजक्षादौ पूर्ववत् गुणनैस्तु वा ।
तस्मात्तृतीयपर्यन्तमृक्षैः सर्वशुभावहम् ।।
गुरुशुक्रबुधश्चन्द्रमुख्यवारं प्रशस्यते ।
तस्करोधनं षण्डञ्च प्रेष्यान्यानि शुभांशकम् ।।
वर्ज्यं पष्ठाष्टमं राशिमन्यत्सर्व शुभं भवेत् ।
गजः सर्वशुभं प्रोक्तं मानुषासुरं वर्जयेत् ।।
एकनेत्रं द्विनेत्रं वा संयुक्तांशं विसर्जयेत् ।
शुभयोगं शुभमेवं मृत्युयोगविनाशनम् ।।
यत्र दोषो गुणाधिक्यं तत्र दोषो न विद्यते ।
तेषामधिकगुणं वान्यं सर्वदोषकरं भवेत् ।।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तस्मात्परिहरेद् विद्वान् जन्मेवं प्रकल्पयेत् ।
तन्मात्राङ्गुलमानोच्चमात्मार्थं प्रयोजयेत् ॥
कुर्यादायादि सर्वेषां चोक्तवच्छिल्पिवित्तमः ।
अन्योन्यमन्यतो ग्राह्यं चोक्तवत्तत्तवित्तमः ॥
ब्रह्माविष्णुश्च रुद्राणां बुद्धस्य जिनकस्य च ।
अन्येषां च प्रतिमानमेवं मानं तु संग्रहम् ॥
एवं तु चोत्सवादीनां स्थावरजङ्गमादिनाम् ॥

प्रलम्ब-लक्षणम्
मान० ६७

सर्वेषां देवदेवीनां शयनस्थानके चासने ।
मानसूत्रविधिं सम्यग्लक्षणं वक्ष्यतेऽधुना ॥
बेरायामसमं वापि त्रिपादं चार्धमेव वा ।
आयामं त्रिविधं प्रोक्तं तत्त दूर्ध्वविशालकम् ॥
देहलब्धाङ्गुलं चैव चतुस्त्रिद्वयङ्गुलं घनम् ।
एवं प्रलम्बफलकालक्षणं चतुरश्रकम् ॥
तत्समं चासनं कुर्याद् घनं मानाङ्गुलेन च ।
चतुष्पादं त्रिपादं च द्विपादैकाङ्घ्रिमेव वा ॥
आसनस्योपरि स्थाप्य मध्ये बेरं विनिक्षिपेत् ।
सपादबेरायतं वाप्यर्ध्येनाङ्घ्रितुङ्गकम् ॥
पादतारं यथायुक्त्या कारयेत्तक्षकेन तु ।
फलका चासने चैव मानसूत्रं प्रसारयेत् ॥
कुर्याद्युक्तया च पादोर्ध्वे प्रलम्बफलकां न्यसेत् ।
सूत्राग्रे कन्दुकाकारं लौहे पाषाणकेऽथवा ॥
तन्मध्ये शुषिरं कृत्वा वन्धयेच्छिल्पिवित्तमः ।
फलके योजयेत्सर्वं सूत्रमेवं प्रशस्यते ॥
पूर्वापरपार्श्वे तु कायमध्ये प्रलम्बयेत् ।
स्थानके चासने चापि पञ्चसूत्रमुदीरितम् ॥
मुखान्तं द्विद्विमात्रं स्याल्लम्बं सप्तमिति स्मृतम् ।
तत्पृष्ठशिरः पार्श्वे तु वक्रान्तं रज्जुं लंम्बयेत् ॥
नवसूत्रमिति प्रोक्तमेकादशमिहोच्यते ।
कक्षतारं द्वयं सूत्रं लम्बयेद् रुद्रसूत्रकम् ॥
अथवा पृष्ठमध्ये तु सूत्रं हन्वन्तं लम्बयेत् ।
चतुर्दिक्षु चतुर्मध्ये पञ्चसूत्रं प्रधानकम् ॥
अन्यथा पुरतो देशे सर्वं मध्यादि लम्बयेत् ।
पुटपार्श्वौ मुखान्तौ च कुक्षौ वा बाहुपार्श्वकौ ॥
लम्बयेत्सूत्रमित्युक्तमेतदेकादशस्तथा ।
परहस्तौ पुटपार्श्वे सूत्रं त्यक्तवा चतुष्टयम् ॥
शेषं तु सर्वसूत्रं स्यादासने च प्रकल्पयेत् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स्थानके रुद्रसूत्रं स्याल्लम्बयेत्तु विचक्षणः ॥
शिखामणौ तु मौल्यग्रे मध्यमे मौलिमध्यमे ।
मौलिमूले च पट्टे च ललाटस्य तु मध्यमे ॥
भुवयोर्मध्यमे च नासिमध्यमे हनुमध्यमे ।
हिक्काया मध्यमे चैव तथा हृदयमध्यमे ॥
तस्याधो नाभिमध्ये च मेढ्रमध्ये तथैव च
उरुमूलद्वयोर्मध्ये जान्वोर्मध्यमे तथा ॥
नलकाद्वयोर्मध्ये च पार्ष्ण्योर्मध्यमे तथा ।
तलमध्यद्वयोर्मध्यमङ्गुष्ठयोर्मध्यमे तथा ॥
एवं तु लम्बयेत्कुक्षिनासाग्रे स्पर्शयेद् बुधः
सूत्राच्छिखामाणि स्याद् द्वयन्तरं द्वादशाङ्गुलम् ॥
सूत्रान्मौलिमूलान्तं रसमात्रान्तरं भवत् ।
सूत्रं ललाटमध्यं तद् द्वयन्तरं द्वयङ्गुलं भवेत् ॥
हिक्कामध्यं तु सूत्रान्तं द्वयन्तरं तु षडङ्गुलम् ।
तत्सूत्राद्हृदयान्तं च द्वयन्तरं चार्धमात्रकम् ॥
तत्सूत्रान्नाभिसीमान्तं द्वयन्तरं तु शिवाङ्गुलम् ।
तत्सूत्रान्मेढ्रमूलान्तं द्वयन्तरं तु गुणाङ्गुलम् ॥
स्थानके चासने वापि स्थानकेषु विशेषतः ।
पार्श्वसूत्रद्वयं काये द्वयन्तरं तदिहोच्यते ॥
तत्सूत्रादूरुमूलान्तं द्वयन्तरे तद् द्विमात्रकम् ।
सूत्रं च जानुमध्यं तत्सार्धवेदाङ्गुलान्तरम् ॥
तत्सूत्राज्जङ्घयोर्मध्यं द्वयन्तरं तु षडङ्गुलम् ।
सूत्रान्तं नलकान्तं स्यात्सार्धसप्ताङ्गुलं भवेत् ॥
समाङ्घ्रि स्थानकं कुर्यात्कायमृज्वायतं भवेत ।
पादङ्गुष्ठद्वयोर्मध्ये द्वयन्तरं चाष्टमात्रकम् ॥
तलमध्यद्वयोर्मध्ये द्वयन्तरं तु षड्ङ्गुलम् ।
तत्पार्ष्णिश्च द्वयोर्मध्ये च द्वयन्तरं वेदमात्रकम् ॥
नलकान्तद्वयोर्मध्ये द्वयन्तरं तु रसाङ्गुलम् ।
जङ्घामध्यद्वयोर्मध्ये द्वयन्तरं तु शराङ्गुलम् ॥
जानुमध्यद्वयोर्मध्ये द्वयन्तरं वेदमात्रकम ।
उरुमध्यद्वयोर्मध्ये द्वयङ्गुलं चान्तरं भवेत् ॥
उरूमूलद्वयोर्मध्ये शिवमात्रान्तरं भवेत् ।
हस्तौ च लम्बनं कुर्यात्तदन्तरमिहोच्यते ॥
श्रोण्यात् कूर्परं पार्श्वं च द्वयन्तरं तु षडङ्गुलम् ।
प्रकोष्ठात्कटयन्तर द्वयन्तरं च त्र्यङ्गुलम् ॥
अथवा द्वयङ्गुलं वापि मणिबन्धं दशाङ्गुलम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मध्याङ्गुलं च पार्श्वं च द्वयन्तरं दशमात्रकम् ।।
एवं तु देवदेवीनां स्थानके चासनेऽपि वा ।
ऊर्ध्वकायसमं कुर्यात्पद्मासनविशालकम् ।।
जानूर्ध्वात्केशपर्यन्तं तत्समं त्रिभुजाविति ।
मानयेज्जानुबाह्ये तु बाहुबाह्यं तु तत्समम् ।।
बाहुजानुद्वयं चैव सव्यापसव्यं मानयेत् ।
मेढ्रान्तं गुल्फस्याक्षान्तं द्वयन्तरं तु षडङ्गुलम् ।।
श्रोणिकूर्परपार्श्वे तु चान्तरं तु षडङ्गुलम् ।
प्रकोष्ठाग्रतलं चैव पञ्चांसौ उपरि विन्यसेत् ।।
अर्धान्तस्यासनं चेत्तु चैक पादं प्रलम्बयेत् ।
तज्जानुपार्श्वके तस्य द्वित्र्यङ्गुलोनमेव च ।।
तत्सूत्राल्लम्बपादादौ द्वयन्तरं द्वादशाङ्गुलम् ।
सर्वासां देवदेवीनामेवं प्रोक्तं तदासनम् ।।
पूर्वे च मध्यसूत्रं तु पृष्ठसूत्रं प्रलम्बयेत् ।
तदेव मौल्यग्रमध्ये मौलिमूलस्य मध्यमे ।।
तत्कृत्वाथ ककुन्मध्ये वंशमध्ये तु लम्बयेत् ।
जघनस्य द्वयोर्मध्ये चोरुद्वयोश्च मध्यमे ।।
पृष्ठजानुद्वयोर्मध्ये पार्ष्ण्योर्मध्ये च लम्बयेत् ।
एवं तु वरसूत्रं स्यात्पार्श्वसूत्रमिहोच्यते ।।
कर्णयो सुषिरमध्ये पार्श्वकायस्य मध्यमे ।
गुल्फस्य मध्यमे चैव पार्श्वसूत्र प्रलम्बयेत् ।।
पिप्पलीबाह्यदेशे तु स्तनचूचुकमध्यमे ।
उरुजान्वोर् यथादेशे तर्जन्यङ्गुलमध्यमे ।।
कक्षसूत्रात्कटिपार्श्वेऽपरे चाङ्गुलाष्टकम् ।
शक्तीनां कटिदेशे तु लम्बयेत्तु कनिष्ठके ।।
बाह्यके मध्यमे वापि कटी च पुटपार्श्वके
एवं तु कार्यसूत्रं स्याल्लम्बयेच्छिल्पवित्तमः ।।
परहस्तपार्श्वयोः सूत्रं मानयेज्जानुपार्श्वकम् ।
सर्वाङ्गं च ऋजुं कुर्यात्पूर्वापरयोर् योजयेत् ।।
ऋज्वाङ्गकभावं सामान्यमिति विद्यते ।
सर्वासां देवदेवीनां भङ्गमानमिहोच्यते ।।
आभङ्गं समभङ्गं तु चातिभङ्गं त्रिधा भवेत् ।
त्रिचतुष्पञ्चमात्रं स्यात्तुङ्गमानमितिक्रमात् ।।
उष्णीशमध्यमे चैव ललाटस्यैव मध्यमे ।
नासिकाग्रस्य मध्ये तु हिक्कायथोक्तपार्श्वके ।।
यथोक्तचूचुकस्यान्तं नाभिपार्श्वे यथोक्तवत् ।
यथोक्तश्चोरुगुल्फस्य पार्श्वसूत्रं प्रलम्बयेत ।।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

एवमाभङ्गसूत्रं स्यात् समभङ्गमिहोच्यते ।
उष्णीषस्य तु यथापार्श्वे ललाटस्य तु पार्श्वके ॥
यत्तत्पुटपार्श्वे तु स्तनचूचुकमध्यमे ।
नाभिश्चोरुस्तथा जङ्घा यथोक्तं गुल्फपार्श्वके ॥
एवं तु लम्बयेत् सूत्रं समभङ्गमिति स्मृतम् ।
उष्णीषस्य पूर्वपार्श्वे तु यथोक्तं नेत्रमध्यमे ॥
स्तनपार्श्वे चोरुमध्ये जानुजङ्घा च मध्यतः ।
तद् गुल्फाक्षयोर्द्वयोर्मध्ये द्वयन्तरं तु गुणाङ्गुलम् ॥
जानुद्वयोरन्तरं चाष्टमात्रं युक्त्या प्रयोजयेत् ।
उरुमूलद्वयोर्मध्ये द्वयन्तरं द्वयर्धमात्रकम् ॥
अङ्गुष्ठाग्रद्वयोर्मध्ये द्वयन्तरं द्वादशाङ्गुलम् ।
आभङ्गान्तरं प्रोक्तं समभङ्गमिहोच्यते ॥
तत्पादाङ्गुष्ठद्वयोर्मध्ये द्वयन्तरं षोडशाङ्गुलम् ।
पार्ष्ण्यन्तरं चतुर्मात्रं दशाङ्गुलं जानुकान्तकम् ॥
उरुमूलद्वयोर्मध्ये द्वयन्तरं त्वङ्गुलं भवेत् ।
एवं तु समभङ्गं स्यादतिभङ्गमिहोच्यते ॥
पार्ष्ण्यन्तरं शराङ्गुल्यं तत्पादाङ्गुष्ठयोरग्रके ॥
तद्द्वयोर्मध्यमे विंशदङ्गुल्यं द्वयन्तरं भवेत् ॥
तज्जानुद्वयोर्मध्ये द्वयन्तरं द्वादशाङ्गुलम् ।
उरुमूलद्वयोर्मध्ये सार्धद्वयङ्गुलकान्तरम् ॥
एवमतिभङ्ग स्यादेतानि युक्तितो न्यसेत् ।
एवं त्रिभङ्गसूत्रं तु द्वयन्तरं मानमुच्यते ॥
सूत्रात्तु तल्ललटान्तं द्वयन्तरं च द्विमात्रकम् ।
तत्सूत्राज्जानुकान्तं च द्वयन्तरं तु षडङ्गुलम् ॥
तत्सूत्रात् हृदयान्तं च द्वयन्तरं चाङ्गुलं भवेत् ।
तत्सूत्रान्नाभिसीमान्तमध्यर्धाङ्गुलकान्तरम् ॥
तत्सूत्रान्येढूसीमान्तं द्वयन्तरं तु गुणांशकम् ।
तत्सूत्रादुरुमध्ये तु द्वयन्तरं च द्विमात्रकम् ॥
तत्सूत्राज्जानुकान्तं स्याद् रसमात्रान्तरं भवेत् ।
तत्सूत्रं नलकान्तं स्याद् द्वयन्तरं चाष्टमात्रकम् ॥
स्थितपादान्तरे चैव कुर्यात्तु वर्धकिस्तथा ।
नासाग्रे कुक्षिदेशे तु सूत्रस्य स्पर्शनं भवेत् ॥
शक्तीनां कुक्षिदेशे चैकाङ्गुलान्तरं तु वा ।
शक्तीनां पूर्वहस्तं तु स्तनान्तं कटिकाग्रकम् ॥
तदङ्गुष्ठावसानान्तं च द्वयन्तरं चतुरङ्गुलम् ।
तच्छ्रोण्यात् कूर्परान्तं तु द्वयन्तरं षडङ्गुलम् ॥
अंसादालम्बनं हस्तं द्वयन्तरं पूर्ववद् भवेत् ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

तत्तद्विचिह्नवर्णादिभूषणाद्यैरलङ्कृतम् ॥
सर्वेषां वास्तुवस्तूनि प्रतिमादि यथोक्तवत् ।
कारयेत्सर्वसम्पत्यै भुक्तिमुक्तिफलप्रदम् ॥
अज्ञानाद् वास्तुवस्त्वादि विपरीतं चेद् विपत्करम् ।
तस्मात्परिहरेद् विद्वान्यथा पूर्वोक्तं सर्वतः ॥
एवं प्रोक्तं वास्तुवस्त्वादि हर्म्यैः
प्राकाराद्यैर्मण्डपाद्यैश्च शालाभिः ।
भूपालाङ्गं भूपतीनां च लिङ्गैर्
देवादीनां कारयेत्सम्पदार्थम् ॥

(iii) अ० पृ० २०९

प्रासादमानोद्भवार्चा प्रमाणैस्त्रिविधोदिता ।
सीमागर्भद्वारमानं तुर्यो हस्ताङ्गुलैर्विधिः ॥
आदौ सीमा पुनर्गर्भं द्वारमानं तृतीयकम् ।
हस्ताङ्गुलक्रमोक्तं च आर्चामानं चतुर्थकम् ॥
सीमार्धं च षडंशोनं हस्तात्तुर्यकरान्तगम् ।
इषुरसात्मकहस्ते स्थिता सीमा त्रिभागतः ॥
पादोद्भवा दशान्तं च षडंशोना ह्यमा तथा ।
पञ्चमांशा च पादोना हस्तविंशतिकावधि ॥
त्रिंशद्धस्ते षडंशेन त्रिभागोनं प्रकल्पयेत् ।
सप्तांशेऽर्चामानं त्यक्तार्धे चत्वारिंशदंशकैः ॥
अष्टमांशां शतार्धे तु त्रिभागोनां प्रकल्पयेत् ।
सीमामानोद्भवाख्याता ऊर्ध्वार्चा तु तथोत्तमा ॥
मध्यमा द्वादशांशोना अष्टांशोना कनिष्ठिका ।
ज्येष्ठमध्याधमाः ख्याताः सीमामाने त्रिधोदिताः ॥

—इतिसीमामानोद्भवार्चा

चतुरश्रीकृते क्षेत्रे दशधा प्रविभाजिते ।
चतुर्भागैश्च द्वै भित्ती शेषं गर्भगृहं मतम् ॥
गर्भगृहत्रिभागैश्च ह्यर्चा कार्या सुशोभना ।
दशांशोना मध्यमा च पञ्चांशोना कनीयसी ॥

—इतिगर्भमानम्

द्वारमानोद्भवां वक्ष्ये ह्यर्चां सर्वत्र शोभनाम् ।
ऊर्ध्वाऽऽसनस्था शय्यास्था प्रत्येका मानसम्भवा ॥
तत्त्वयुग्मोद्भवे द्वारे ह्यर्चामानं त्रिधोदितम् ।
षट्चन्द्रौ तत्त्वेन्दू शक्राः ऊर्ध्वार्चासङ्ख्या मता ॥
आसनस्था पूर्वमाने शक्रविश्वसूर्यांशतः ।
स्थितासना च केशान्तं प्रमाणं सूत्रतः स्मृतम् ॥

—इतिद्वारमानोद्भवार्चा

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

हस्ताङ्गुलक्रमेणैव अर्चा प्रासदामानतः ।
तस्यानुक्रम उक्तश्च पङ्क्तिसोपानसञ्चयः ॥
रुद्रादौ चैव दिग्वृद्धिर्हस्तैकाद्वेदहस्ततः ।
पक्षवृद्धादिषुश्चान्त सनार्धातांगुलोद्भवा ॥
एतन्मानोद्भवा ज्येष्ठा त्रिधोदितक्रमागता ।
त्यक्तविंशत्यंशा मध्या दशांशोना कनीयसी ॥
उक्तमूर्ध्वार्चाप्रमाणं शय्यास्था त्वेकमानतः ।
न्यूना न्यूनाधिकार्चानां प्रमाणमिति सम्भवेत् ॥
हस्तपादादिवृद्धिश्च क्रमेण परिकीर्तिता ।
हस्ताद्यं तुर्यपर्यन्तमत ऊर्ध्वं न कारयेत् ॥
त्र्यङ्गुलतो दिग्हस्तान्तं वृद्धिं कुर्यादनुक्रमात् ।
दिगुत्तरं शतार्धान्तमेकैकाङ्गुलवृद्धितः ॥
विंशत्यंशैः कनिष्ठोना ज्येष्ठा तदंशवर्धनात् ।
इत्यादिकं तथाप्रोक्तं त्रिविधं मानमेव हि ॥
आसनस्थोद्भवा ख्याता शयनस्था क्रमोद्भवा ।
स्थित्वा शयनकेशान्तं प्रमाणमेतत्सम्भवम् ॥

अ० पृ० २१० यत्किञ्चित्प्रतिमायामं विभजेन्नवभागतः ।
स्वकीयाङ्गुलमानेन भागं वै द्वादशाङ्गुलम् ॥
अष्टोत्तरशतं सङ्ख्यैरङ्गुलैरुच्छ्रयो भवेत् ।
नवतालः स विज्ञेयो व्यवहारे प्रसिद्धयति ॥
नवताले ततो वृद्धौ मस्तोर्ध्वे चतुरङ्गुलैः ।
विख्यातोऽर्चायामको द्वादशोत्तरशताङ्गुलः ॥
उष्णीषमङ्गुलं प्रोक्तं त्र्यङ्गुलं शिर उच्यते ।
तालो ललाटाद् गलान्तं सर्वत्रैव मुखे क्रमः ॥
त्र्यङ्गुलं च ललाटं स्यादङ्गुलं नेत्रसूत्रकम् ।
नेत्रसूत्रे तु कर्तव्या नासिका चतुरङ्गुला ॥
गोजका चैकमात्रा स्यादधरं त्रियववान्तरम् ।
ओष्ठो यवैः पञ्चभिः स्याद्धनुः सार्धाङ्गुला भवेत् ॥
विस्तारे वै द्वयङ्गुलं गलमर्धाङ्गुलं मतम् ।
ग्रीवा सार्धाङ्गुला स्तन-सूत्रं त्रयोदशाङ्गुलम् ॥
द्वादशाङ्गुलका नाभि उदरं चतुरङ्गुलम् ।
वलिकात्रयसम्युक्तं गुह्यमष्टाङ्गुलं तथा ॥
पञ्चमात्रोद्भवं मेढ्र वृषणश्चतुरङ्गुलः ।
... ... ॥
चतुर्विंशत्यङ्गुला स्याज्जङ्घा जानुयुगाङ्गुलम् ।
जङ्घामानेन नलको गुल्फः स्याच्चतुरङ्गुलः ॥
उच्छ्रयः कथितश्चैवं मस्तान्तो नवतालकः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

षट्त्रिंशदङ्गुलो मध्यो विस्तरं श्रृणु सम्प्रति ।।
चन्द्रोपमं ललाटं स्याद्विस्तारे चाष्टमात्रकम् ।
आयामे द्वयङ्गुले नेत्रे विस्तारे चाङ्गुलायते ।।
नासोर्ध्वं च भवेन्मात्रं द्विमात्रं नयनान्तरम् ।
सार्धाङ्गुला च नासा स्यात्पुटिः स्याद् द्वियवान्तरा ।।
निष्पावसदृशी श्रोत्रपुटिरर्धाङ्गुला तथा ।
पिप्पली पुटितुल्या च पिञ्छली* चतुरङ्गुला ।। (चम्पिका) *
हनुका द्वयङ्गुलायामे गण्डौ वृत्तौ षडङ्गुलौ ।
द्वादशाङ्गुले विस्तारे कर्णौ चैकैकमङ्गुलम् ।।
कर्णपार्श्वं द्विमात्रं च तत्तुल्यं चोन्नतौ भवेत् ।
अङ्गुष्ठाङ्गुलमायामे कर्णौ वै लक्षणान्वितः ।।
हनुकेशान्तयोर्मध्ये मानं षट्त्रिंशदङ्गुलम् ।
ग्रीवाष्टांशा परिणाहे चतुर्विंशतिमात्रका ।।
अष्टाङ्गुलौ तथा स्कन्धौ स्तनोर्ध्वे द्वादशाङ्गुले ।
कक्षास्थानं प्रकोष्ठाभ्यां षोडशाङ्गुलमीरितम् ।।
प्रकोष्ठान्मणिबन्धश्चाऽङ्गुलान्यष्टाऽथवा दश ।
सप्ताङ्गुलं करतालं मध्यमा पञ्चमात्रका ।।
तर्जनी चाऽनामिका च हीना च स्याच्चतुर्यवैः ।
अनामिका पञ्चयवैर्हीना सा स्यात्कनिष्ठिका ।।
अङ्गुष्ठं स्याच्चतुर्मात्रं तालार्धं च करोर्ध्वकम् ।
पञ्चाङ्गुलं च विस्तीर्णं कुर्यात्करतलं तथा ।।
अष्टयवान्तरेऽङ्गुष्ठं तर्जनी षड्यवान्तरे ।
मध्याद्यान्तिमान्ताः सप्त षट्पञ्चयवान्तराः ।।
त्रिपर्वकास्तथा सर्वा निम्ना अग्रे सुवृत्तकाः ।
पर्वार्धेन नखास्ताभ्यस्ताभिः सार्धं विनिर्गताः ।।
सार्धद्विपर्वं चाङ्गुष्ठं पर्वार्धं च नखाः स्मृताः ।
कुलरेखा च कर्तव्या अङ्गुष्ठमनुवर्तते ।।
कनिष्ठाद्यस्तर्जन्यन्तमायूरेखा समीरिता ।
मध्यमा च तथा रेखा धनरेखा तदूर्ध्वताः ।।
त्र्यङ्गुलो मणिबन्धः स्यान्नाहे सार्धदशाङ्गुलम् ।
गजहस्तोपमौ बाहू संस्थितौ च मनोहरो ।।
विंशत्यङ्गुलकं चैव कक्षयोरुभयान्तरम् ।
सप्ताङ्गुलं भुजस्कन्धः कक्षे चैकैकमङ्गुलम् ।।
चतुर्दशाङ्गुलो मध्यो नाभ्यूर्ध्वे च षडङ्गुलम् ।
अष्टादशाङ्गुलं नाभेर्द्विमुखं चोरुमूलकम् ।।
एकादशाङ्गुला जङ्घा निम्नाग्रे च सुवर्तिता ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सप्ताङ्गुलं जानुशिरो नलाग्रं निम्नमावृतम् ॥
वेदाङ्गुलं गुल्फमूलं नाहं च द्वादशोद्यवम् ।
षडङ्गुलं पूर्वपादः तर्जन्याः पूर्वभागतः ॥
सार्धत्र्यङ्गुलमङ्गुष्ठं तर्जनी चतुरङ्गुला ।
... ... ॥
अङ्गुष्ठसार्धाङ्गुलोवतं तर्जनी च तदर्धकम् ? ।
अङ्गुष्ठार्धं तु सूत्रेण कुर्यादग्रे कनिष्ठिकाम् ॥
निम्नमानक्रमः प्रोक्तः पर्वसङ्ख्याभिधीयते ।
त्रिपर्वकोद्भवाश्चान्या अङ्गुष्ठं च द्विपर्वकम् ॥
पर्वार्धं च नखं कुर्यात्स्मृतः सर्वेष्वयं विधिः ।
षण्मात्रः पादविस्तारश्चतुर्मात्रा च पार्ष्णिका ॥
पादमूलतले चापाकारे मध्योन्नते तथा ।
अक्षि ? गुल्फौ प्रकर्तव्यौ अर्धार्धमात्रकावुभौ ॥
स्कन्धौ समुन्नताकारौ पृष्ठमध्यस्तु वंशवत् ।
वंशक्षिप्तो त्रतपक्षौ ? सर्वावयवशोभनौ ॥

८. प्रतिमा-विधाने मधूच्छिष्ट-विधानम्

मान० ६८ बिम्बानां तु मधूच्छिष्टक्रियां सम्यग् वक्ष्यतेऽधुना ।
शैवं पाशुपतं चैव कालमुखं महाव्रतम् ॥
वामं च भैरभं चैव तन्त्रोक्तज्योतिः षट्क्रमात ।
अगस्त्यः काश्यपश्चैव भृगुगौतमभार्गवाः ॥
गालवश्चेति ऋषयः प्रोक्ताः कषणादिरचंनार्थकम् ।
तत्तन्त्रवशात्सर्वं कुर्यात् षट् संपदास्पदम् ॥
तत्तन्त्रविपरीतं चेद् विपत्तिं नित्यमावहेत् ।
अनुक्तं तत्र तन्त्रैस्तु ग्राह्यं दोषो न विद्यते ॥
विश्वकर्मा च विश्वेशः विश्वसारः प्रबोधकः ।
वृतश्चैव मयश्चैव त्वष्टा चैव मनुर्नलः ॥
मानविन्मानकल्पश्च मानसारो बहुश्रुतः ।
प्रष्टा च मानबोधश्च विश्वबोधो नयश्च तथा ॥
आदिसारो विशालश्च विश्वकाश्यपश्चैव च ।
वास्तुबोधो महातन्त्रो वास्तुविद्यापतिस्तथा ॥
पाराशरीयकश्चैव कालयूपो महाऋषिः ।
चैत्याख्यः चित्रकश्चावर्यः साधकसारसंहितः ॥
भानुश्चेन्द्रश्च लोकज्ञः सौराख्यः शिल्पिवित्तमः ।
ते एव ऋषयः प्रोक्ता द्वात्रिंशतिः संख्यया ॥
तान् गोत्रवशज्ज्ञात्वा शिल्पिनः सर्वत्र योग्कम् ।
शुक्लपक्षेऽथवा कृष्णे सर्वमासेषु कारयेत् ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

शुभयोगे सुनक्षत्रे सुमुहूर्ते सुलग्नके ।
मन्त्रवत्कारयेद गर्तं स्थपतिस्थापकावुभौ ।।
मधूच्छिष्टं योजयेच्छिल्पी शास्त्रतः कारयेत्क्रमात् ।
यथारूपं तथा ध्यात्वा स्थपत्याज्ञया वर्धकिः ।।
यन्मधुच्छिष्टबिम्बस्य पञ्चवर्णैरलङ्कृतम्
क्षणिकबेरमेवोक्तं चलं चाप्यचलं तथा ।।
तस्मात्सर्वप्रयत्नेन तत्रदोषो न विद्यते ।
अक्षैः स्फटिकसंयुक्तं लूतभाजनमेव च ।।
हस्तेन सर्वबिम्बानां ताम्रपत्रेण योजयेत् ।
अथवा पक्षकानां तु पक्षमूलेन विन्यसेत् ।।
नखसर्वेषु पादौ च संयुक्तं तु ताम्रेण च ।
अथवा शिखशल्यं स्याद् भूषणं च विशेषतः ।।
स्फटिकैः रत्नसंयुक्तं जीनपात्रेण विन्यसेत् ।
आम्रकद्रुमसर्वेषां युक्त्या वर्णं समाश्रितम् ।।
दारुकीलैश्च बिम्बानां यद्बलार्थं तु योजयेत् ।
आद्रव द्रव्यसंयुक्तं तस्माद् दोषमेवं न विद्यते ।।
सर्वालङ्कारसंयुक्तं बेरं ग्रामप्रदक्षिणम् ।
यजमानादि संवेक्ष्य सेव्यं तत्रार्चनं भवेत् ।।
तस्माद् देवतार्थं संग्राह्य चान्यग्रामे विलासयेत् ।
पश्चात्तु शिल्पिशालां च बेरमेवं प्रविश्यते ।।
मानोन्मानप्रमाणेन शोभयेच्छिल्पवित्तमः ।
द्वित्र्यङ्गुलमधिकं वाथ मधूच्छिष्टेन लेपयेत् ।।
तदूर्ध्वे मृत्तिकां लेप्य शोषयेत्तद् विचक्षणैः ।
तत्पिण्डमुत्तापयेद्वा मधूच्छिष्टोद्गमैः पुनः ।।
कर्तुंरिच्छा यथा लौहैर्धृतम् एतत्प्रशस्यते ।
पूर्णयेज्जलं संप्रोक्ष्य त्यक्त्वा तदर्धमृत्तिकाम् ।।
बिम्बं सर्वाङ्गं संशोध्य श्वेतगन्धेनानुलेपयेप्त् ।
तत्पीठोपरि संस्थाप्य पुष्पमाल्यैरलङ्कृतम् ।।
ग्रामं प्रदक्षिणं कुर्यात्सर्वमङ्गलघोषणैः ।
शिल्पिशालां प्रविशन्ति कारयेदुक्तवत्क्रमात् ।।
तस्योपाङ्गविहीनं चेत्पुनः सन्तानकं भवेत् ।
शिरो वा मध्यकायं वा हीनं चेद्विसृजेत्पुनः ।।
कर्तृशिल्प्यचलं चित्तं कारयेत्पूर्ववद् भवेत् ।
चलं चित्रं न कुर्याच्चेत्स्थाननाशं धनक्षयम् ।।
अनेकजन्मकृतं पुण्यं क्षिप्रमेवं विनश्यति ।
तस्मात्सर्वप्रयत्नेन पूतं च कारयेत्सुधी ।।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

(ii) अभि० चि०,
१. ७६—९६

नवतालप्रमाणेन लक्षणेन समन्विताम् ॥
प्रतिमां कारयेत्पूर्वमुदितेन विचक्षणः ।
सर्वावयवसम्पूर्णां किञ्चित्पीतां दृशोः प्रियाम् ॥
यथोक्तैरायुधैर्युक्तां बाहुभिश्च यथोदितैः ।
तत्पृष्ठस्कन्धदेशे च क्रमाद्यामकुटेऽथवा ॥
हेमपुष्पनिभं दीर्घं तालकं मदनोद्भवम् ।
स्थापयित्वा ततश्चार्चां लिम्पेत्संस्कृतया मृदा ॥
मषीं तुषमयीं कृत्वा कार्पासं शतशः क्षतम् ।
लवणं चूर्णितं श्लक्ष्णं तथा संयोजयेन्मृदा ॥
पेषयेत्सर्वमेकत्र सुश्लक्ष्णे च शिलातले ।
वारत्रयं तदावर्त्य तेन लिम्पेत्समन्ततः ॥
स्वच्छः स्यात्प्रथमो लेपः छायायां कृतशोषणः ।
दिनद्वये व्यतीते तु द्वितीयस्स्यात्ततः पुनः ॥
तस्मिञ्छुष्के तृतीयस्तु निबिडो लेप इष्यते ।
नालकस्य मुखं त्यक्त्वा सर्वमालेपयेन्मृदा ॥
शोषयेत्तत्प्रयत्नेन युक्तिभिर्बुद्धिमान्नरः ।
सिक्थकं तोलयेदादावर्चालग्नं विचक्षणः ॥
रीत्या ताम्रेण रौप्येण हेम्ना वा कारयेत्ततः ।
सिक्थाद्दशगुणं ताम्रं रीतिद्रव्यं च कल्पयेत् ॥
रजतं द्वादशगुणं हेम स्यात् षोडशोत्तरम् ।
मृदा संवेष्टयेद्द्रव्यं यदीष्टं कनकादिकम् ॥
नालिकेराकृतिं मूषां पूर्ववत्परिशोषयेत् ।
वह्नौ प्रताप्य तामर्चां सिक्थं निस्सारयेत्ततः ॥
मूषां प्रतापयेत्पश्चात्पावकोच्छिष्टवह्निना ।
रीतिस्ताम्रं च रसतां नवाङ्गारैर्व्रजेद्ध्रुवम् ॥
तप्ताङ्गारैर्विनिक्षिप्तै रजतं रसतां व्रजेत् ।
सुवर्णं रसतां याति पञ्चकृत्वः प्रदीपितैः ॥
मूषामूर्धनि निर्माय रन्ध्रं लोहशलाकया ।
संदंशेन दृढं धृत्वा तप्तां मूषां समुद्धरेत् ॥
तप्तार्चानालकस्यास्ये वर्तिं प्रज्वलितां न्यसेत् ।
संदंशेन धृतां मूषां नमयित्वा प्रयत्नतः ॥
रसं तु नालकस्यास्ये क्षिपेदच्छिन्नधारया ।
नालकाननपर्यन्तं संपूर्य विरमेत्ततः ॥
स्फोटयेत्तु समीपस्थं पावकं तापशान्तये ।
शीतलत्वं च यातायां प्रतिमायां स्वभावतः ॥
स्फोटयेन्मृत्तिकां दग्धां विदग्धो लघुहस्तकः ।
यथा द्रव्यमयी साऽर्चा यथा मदननिर्मिता ॥
जायते तादृशी साक्षादङ्गोपाङ्गोपशोभिता ।
यत्र क्वाप्यधिकं पश्येच्चारणैस्तत्प्रशान्तये ॥
नालकं छेदयेच्चापि पश्चापुज्ज्वलतां नयेत् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

(iii) शिल्प०
२. ३२—५३

मधूच्छिष्टेन निर्माय सकलं निष्कलं तु वा ।
बद्ध्वा मृदा दृढं शुष्कमधूच्छिष्टं बहिः सृजेत् ॥

तत्र लोहार्द्रमापूर्य कारयेल्लौहमुत्तमम् ।
अथ तत्प्रक्रियां वक्ष्ये कर्मकारहिताय तु ॥
कठिना मन्दकठिना मृद्वी मृदुतरा तथा ।
मूषाकरणयोग्येति पञ्चधा मृत्तिका स्मृता ॥

पूर्वोक्तां नाकुजां वाथ मृत्स्नामादाय यत्नतः ।
मृल्लोष्टचूर्णसंयुक्तां यथायुक्ति विमर्दयेत् ॥
शुद्धाम्भसा पूगचर्मसारं युक्त्या सुयोजयेत् ।
कारयेत् कठिनामेवं शिलामुसलताडिताम् ॥
तस्मिन् गोमयसंयुक्ते स्यान्मन्दकठिना पुनः ।
मृद्भाण्डचूर्णसंयुक्तां तत्पादांशकमृत्तिकाम् ॥
पेषण्यां पेषयेद् यां सा मृद्वीति कथिता पुरा ।
तदेव गोमययुता मृत्स्ना मृदुतरा स्मृता ॥
तुषाद्यङ्गारचूर्णेन संयुक्ता घटमृत्तिका ।
कार्पासिपटचूर्णेन समं मुसलपीडिता ॥
एषा मूषामृदाख्याता कर्तव्या सानया दृढम् ।
यत्किञ्चिदीप्सितं तन्तु विञ्चिन्न्यूनप्रमाणतः ॥

कृत्वा द्वितीयया शुष्के तष्ट्वा लिप्त्वा पुनः पुनः ।
अन्ते गोमयसारेण लिप्त्वा श्लक्ष्णीकृते पुनः ॥
कृत्वा तस्मिन् मधूच्छिष्टपट्टं युक्तघनान्वितम् ।
इष्टप्रमाणं तत् सर्वं कृत्वा तेन सलक्षणम् ॥
भूषणादीनि सर्वाणि मधूच्छिष्टस्य तन्तुना ।
कृत्वा तिन्त्रिणिसारेण वेणुसारेण वा तथा ॥

कृतेन युक्तशस्त्रेण सुस्निग्धं कारयेदथ ।
पुनर्विलेपयेन्मृत्स्नामार्द्रां मृदुतरं क्रमात् ॥
शुष्के तस्मिन् पुनर्लिप्त्वा मृद्व्या संशोषयेत् पुनः ।
कठिनेन पुनस्तत्र कृष्णायसपटादिभिः ॥
बद्ध्वा यथाबलं पश्चात् कठिनेन विलेपयेत् ।
आवृत्त्या लेपयेत् तेन यथातोषं यथाबलम् ॥

अप्रधानावयवगस्थाने स्याल्लोहपद्धतिः ।
एवं शुष्के पुनर्यन्त्रवशादातप्य वह्निना ॥
मधूच्छिष्टं बहिस्त्यक्त्वा तं दहेत् काष्ठवेष्टितम् ।
यदा कूश्माण्डपुष्पाभं वर्णमन्तर्गतं पुनः ॥
लोहमार्गादिरन्ध्रेण दृश्यते तत् तदैव हि ।
अवरुह्य भुवः श्वभ्रे विन्यस्योर्ध्वमुखं यथा ॥

मूषायामार्द्रितं लोहं शीघ्रमादाय यत्नतः ।
निक्षिप्य तन्मुखे मन्दमन्तर्भागं सुपूरयेत् ॥
पांसुना बहिराच्छाद्य कालाच्छीतलिते पुनः ।
तीक्ष्णायसकृतैः शस्त्रैर्मृदं त्यक्त्वा सुधीः क्रमात् ॥

सुश्लक्ष्णं कारयेत् तैस्तैरुचितैः शस्त्रभेदकैः ।
एवं तत्कर्मकुशलैर्लोहजं कारयेद् बुधः ॥
घनं चेल्लोहजं बिम्बं मधूच्छिष्टेन केवलः ।
कृत्वा मृल्लेपनादीनि पूर्ववत् क्रमतश्चरेत् ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

९. प्रतिमा-विधाने दोषा : तत्फलञ्च

(i) स० सू० ७८. १-९

अथ वर्ज्यानि रूपाणि ब्रूमहेऽर्चादिकर्मसु ।
यथोक्तं शास्त्रतत्त्वज्ञैर्गोब्राह्मणहितार्थिभिः ।।
अशास्त्रज्ञेन घटितं शिल्पिना दोषसंयुतम् ।
अपि माधुर्यसम्पन्नं न ग्राह्यं शास्त्रवेदिभिः ।।
अश्लिष्टसन्धिं विभ्रान्तां वक्रां चावनतां तथा ।
अस्थितामुन्नतां चैव काकजङ्घां तथैव च ।।
प्रत्यङ्गहीनां विकटां मध्ये ग्रन्थिनतां तथा ।
ईदृशीं देवतां प्राज्ञो हितार्थं नैव कारयेत् ।
अश्लिष्टसन्ध्या मरणं भ्रान्तया स्थानविभ्रमम् ।
वक्रया कलहं विद्यान्नतया वयसः क्षयम् ।।
नित्यमस्थितया पुंसामर्थस्य क्षयमादिशेत् ।
भयमुन्नतया विद्याद् हृद्रोगं च न संशयः ।।
देशनान्तरेषु गमनं सततं काकजङ्घया ।
प्रत्यङ्गहीनया नित्यं भर्त्तुः स्यादनपत्यता ।।
विकटाकारया ज्ञेयं भयं दारुणमर्चया ।
अधोमुख्या शिरोरोगं (तथानयापि च ?) ।।
एतैरुपेतादोषैर्या वर्जयेत् तां प्रयत्नतः ।।

विम्ब-दोषाः

(ii) शिल्प० २६

मांसवर्णैर्नखैर्वाथ पद्मताम्रनिभैस्तथा ।
संयुक्ताः प्रतिमा यत्र तत्रस्थाः सुखिनो नराः ।।
श्वेतैर्नखैर्दुःखिनश्च शूलाग्रैः स्फटिकोपमैः ।
दरिद्रतां भजन्त्येव तथैव हरितैर्नखैः ।।
(अंगुल्यः) प्रोन्नताग्राश्चेद् भवन्ति सुखदाः सदा ।
पादाङ्गुष्ठमतिक्रम्य प्रदेशिन्यग्निवर्तयेत् ? ।।
लभन्ते तत्रदेशस्था नारीभोगमनुत्तमम् ।
कनिष्ठायां तु दीर्घायां वहुवित्तकरो भवेत् ।।
अङ्गुल्यः कुटिलाः शुक्ला विरला दुःखभागिनः ।
अस्वेदनौ मृदू रक्तौ पुष्पौ चारुदलाविव ।।
लग्नाङ्गुली सुपार्ष्णी च सिराविरहितौ तथा ।
मांसलौ गूढगुल्फौ च कूर्मपृष्ठसमावपि ।।
भवेतां चरणौ यस्य तत्रस्था राजवल्लभाः ।
विवृतौ शूर्पसङ्काशौ सस्वेदौ ह्रस्वपाण्डरौ ।।
रोमशौ चरणौ यस्य तत्रस्था दुःखभागिनः ।
दीर्घपादतले रेखा हलाङ्कुशनिभा यदि ।।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सार्वभौमत्वदं लक्ष्म तदिदं नात्र संशयः ।
क्रमाद् वृत्ते प्रशस्येते जङ्घे स्निग्धे त्वरोमके ॥
सिंहव्याघ्रोपमे जङ्घे धनिनां परिकीर्तिते ।
काकजङ्घो भवेद्राजा मृगजङ्घोऽपि तादृशः ॥
जङ्घे च मीनवद् यस्य सोऽपि साम्राज्यभाग्जनः ।
स्थूलजङ्घा दीर्घजङ्घा जायन्तेः पथिगाः सदा ॥
सृगालकोलजङ्घा ये ते नरा दुःखभागिनः ।
इदं तु बिम्बे सञ्चिन्त्यं तथा वृत्ते च जानुनी ॥
मांसले च समे शब्दहीने गुढतरास्थिनी ।
किंचिदुन्नतयुक्ते तु भवेतां सर्वमङ्गले ॥
ऊरु करिकराकारौ रोमभिः परिवर्जितौ ।
सुश्लक्ष्णौ निविडौ नातिस्थूलौ नातिकृशौ वरौ ॥
सुखदं मांसलं स्फिक् चेद् व्याघ्रिभेकस्फिगेव हि ।
तथैव दुःखदं ज्ञेयं शुष्कस्फिङ्ग नैव संशयः ॥
मृगेन्द्रकटिसंकाशकटिश्चेत् पार्थिवत्वदा ।
कामित्वं स्थात् कोलकटेः ··· ··· ··· ··· ··· ···॥
कर्कटोष्ट्रकटिस्तद्वत् श्वकटित्वं सुतापहम् ।
मेहनं धनदं ह्रस्वं स्थूलं पुत्रार्थनाशदम् ॥
(अ ? पु) त्रवृद्धिकरं ज्ञेयमेतद् दक्षिणतोन्नतम् ।
मणिनी सोन्नते स्निग्धे धनस्त्रीरत्नभाजनम् ॥
मध्यनिम्ने भवेन्निःस्वो मध्यादग्रे विशेषतः ।
ईशद्रक्ते समृद्धिःस्यात् पाण्डरे धनहीनता ॥
मणौ च मलिनच्छाये दारिद्रयमुपजायते ।
गुष्कयोरुभयोःसाम्ये राजराजत्वमाप्नुयात् ॥
लम्बयोर्ह्रस्वयोश्चैव मुष्कयोदीर्घजीविनः ।
एकं एवं यदा मुष्कस्तदा स्यान्मरणं जलात् ॥
वृत्तविस्तीर्णगम्भीरनाभौ सुखमतीव हि ।
विषमा बिलमध्यस्था नाभिर्दारिद्र्यकरिणी ॥
दक्षिणावर्तनी शस्ता बामावर्तापकारिणी ।
लम्बोदरो भवेदाढ्यो बहुभोगःसमोदरे ॥
कृशोदरे लघुःकामी दुःखभागी महोदरे ।
घटोदरे भवेन्निस्वस्तथैव विकृतोदरे ॥
सर्पोदरे दरिद्रत्वं तथा निम्नोदरेऽपि च ।
वल्यैकया शस्त्रमृत्युः स्त्रीजितत्वं वलिद्वये ॥
आर्यःस्यात् त्रिवलीयुक्ते पुटं चतुर्वलीयुते ।
मृतुल्यौ धनदौ पार्श्वौ निर्धनाख्यौ च वक्रकौ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स्निग्धं विशालमुत्तुङ्गमुरश्चेद राजलक्षणम् ।
सिरालं विषमं निम्नं वक्षश्चेद् विपदास्पदम् ॥
समौ चेच्चूचुकौ भूपा लम्बितौ प्रेष्यतां गताः ।
अदृश्यौ तन्तुनाशाख्यौ विषमौ दुःखदौ स्मृतौ ॥
उच्चकक्षसमायुक्ता धनधान्यविवर्धनाः ।
समकक्षश्च तत्तुल्यो निर्धनो निम्नकक्षकः ॥
दुःखी विषमकक्षःस्यादथ पृष्ठस्य लक्षणम् ।
अलग्नं मांसलं पृष्ठं मग्नवंशं शुभावहम् ॥
निन्दितं विपरीतं चेत् दुःखदारिद्र्यकारणम् ।
उन्नतैर्जत्रुभिर्ज्ञेयं धनधान्यादिभोगदम् ॥
तैरेव विषमैर्निम्नैर्विज्ञेयं धनवर्जितम् ।
सुश्लिष्टौ विपुलावंसौ निर्बलीकौ सुखावहौ ॥
रोमशौ वलिसंयुक्तौ निर्मांसौ दुःखदायिनौ ।
वाहू करिकराकारौ वरावाजानुलम्बिनौ ॥
गूढसांश्लिष्टसन्ध्याढ्यौ विपरीतौ विवर्जितौ ।
लाक्षारुणं पीवरं च मध्ये निम्नं मनागपि ॥
तलं शुभदमाख्यातं विपरीतं विनाशकृत् ।
उन्नते दानशीलत्वं शुष्के दारिद्रयदं भवेत् ॥
विषमे तु तले तद्वत् पापदं व्याघ्रपाणिकम् ।
हस्तरयाङ्गुलयो दीर्घाश्चिरजीवी नरःस्मृतः ॥
वैंदुष्यदा विवलिकाःस्थूला दारिद्रयदायिनः ।
मढत्वदा बहिर्नता पूर्वोक्तान्नखरे वदेत् ॥
शूरः स्यान्महिषग्रीवः कम्बुग्रीवः क्षमापतिः ।
शुष्कग्रीवो भवेन्निःस्वः समग्रीवः समो भवेत् ॥
अभिन्नाग्रं मृदु स्निग्धं घनं श्मश्रु प्रशस्यते ।
आरक्तं विषमं कूर्चं स्थूलरोममशोभनम् ॥
पूर्णचन्द्रसमाकारं बदनं त्वतिशोभनम् ।
निःस्वाः स्युर्दीर्घवदनाः समाना वर्तुलं मुखम् ॥
चतुरश्राननाः धूर्ता त्रिम्नास्यः पुत्रवर्जितः ।
भीतास्यः पापकारी स्यादेवं वदनलक्षणम् ॥
रक्ता स्निग्धा शुभा जिह्वा पापी स्याच्छ्यामजिह्वकः ।
स्थूलजिह्वश्च तत्तरयः कृष्णजिह्वस्तथैव च ॥
कृष्णा च कर्बुराधस्तात् रसना दुःखदा सदा ।
सुवर्ण रक्तवर्णं च तालु दुःखतरं मतम् ॥
लम्बमांसलकर्णा स्युः पापिनः शुष्ककर्णकाः ।
शुकनासः सुखी प्रोक्तश्चिरायुः शुष्कनासिकः ॥
वक्राग्रा धनदा नासा क्रूरा दक्षिणवक्रका ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

समाल्प··· ··· ···दुखिनो मानवा स्मृताः ॥
शङ्कुकर्णो महाभागो रोमकर्णाः शतायुषः ।
विस्तीर्णकर्णा धनिनः सिंहकर्णस्तु निष्ठुरः ॥
कृपणाः ह्रस्वकर्णाः स्युः सुभगाःश्यामर्णकाः ।
समाल्पविवरा मूर्ध्नि नासा भाग्यप्रदायिनी ॥
धनिनः पद्मपत्राक्षा रक्तान्ताक्षास्तु श्रीप्रदाः ।
महाक्षा मधुपिङ्गाक्षा गजाक्षाश्च महत्तराः ॥
गम्भीरनेत्राः धनिनः स्थूलाक्षश्चैव तत्समः ।
शुभगा श्यामनयना बुधा नीलोत्पलेक्षणाः ॥
अधोदृष्टिश्चोर्ध्वदृष्टिः सततं दुःखदा नृणाम् ।
पार्श्वदृष्टिश्च तत्तुल्या समदृष्टिः शुभावहा ॥
जिह्माःस्युःसारमेयाक्षास्तस्करा मर्कटेक्षणाः ।
निःस्वा निर्गतनेत्रा स्युः पापा मार्जारलोचनाः ॥
भ्रुवो + अत्यन्तयाल्पायुर्विशालोन्नतया सुखी ।
भ्रुवा विषमया निःस्वो बालेन्दुनतया धनी ॥
उन्नतैर्विपुलैर्शखैर्भवन्ति वशिनो नराः ।
निम्नयार्थेन संन्त्यक्तास्तनयैश्च विवर्जिताः ॥
ललाटैर्विषमैर्निःस्वा धनिनोऽर्धेन्दुसन्निभैः ।
केशैरेकैकशो जातैः स्निग्धै कृष्णैश्च कुंचितैः ॥
अभिन्नाग्रैश्च मृदुभिर्बहुभिस्तैर्महीपतिः ।
एकमूलैश्च बहुभिर्विषमैरतिपिङ्गलैः ॥
स्थूलैर्विर्शीर्णपर्यन्तैर्ह्रस्वै रूक्षैर्दरिदता ।
एकैकेन भवेद्रोम्णा राजा द्वाभ्यां तु पण्डितः ॥
त्रिभिर्निःस्वश्चतुर्भिस्तु सर्वदा दुःखभाग्जनः ।
सिंहेभवृषहंसनां गमनं शुकवर्हिणोः ॥
गमनेनानुकुरुते यो नरः स महीपतिः ।
मेषोष्ट्रमहिषोलूकवराहबलिभुक्छ्वभिः ॥
समाना स्याद् गतिर्यस्य स पुमान्भाग्यवर्जितः ।
अङ्गुष्ठमध्यसन्धिस्थयवेन स्याद्धनी नरः ॥
अगुष्ठमूलगेनापि बहुपुत्रो निरूप्यते ।
स्निग्धाभिः कररेखाभिर्निम्नाभिर्धनवान्भवेत् ॥
अस्निग्धाभिरनिम्नाभिर्भवेद् दारिद्रयभाग्जनः ।
मणिबन्धोत्थिता रेखास्तिस्रः करतलं गताः ॥
राज्यकारणमित्याहुः सामुद्रमतवेदिनः ।
मीनयुग्मकरः सत्री मीनपुच्छकरः सुखी ॥
आकारो जायते पाणौ रेखया वक्ररूपया ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

शंखातिपत्रशिबिकागजपद्माश्वसन्निभः ॥
चक्रवर्ती भवेद्राजा जायते नास्ति संशयः ।
गवाढचो दामरूपाभिः स्वस्तिकाकृतिभिर्धनी ॥
चक्रखड्गधनुःप्रासतोमराकृतिभिर्नृपः ।
अङ्गुष्ठमूलरेखाभिः स्थूलाभिः पुत्रवान् भवेत् ॥
तत्रत्यसूक्ष्मरेखाभिः कन्यां जनयति ध्रुवम् ।
प्रदेशिनीतलं प्राप्तरेखा स्युः शतजीविनः ॥
न्यूनाभिश्छिन्नरूपाभिर्द्रुमपाताद् भवेन्मृतिः ।
अरेखा बहुरेखाश्च मानवा धनवर्जिताः ॥
नखा दन्ता रोमकेशव्योमच्छया: सुखप्रदाः ।
समन्ताद् भूमिसंलग्नं यस्याश्चरणयोस्तलम् ॥
अष्टौ पुत्रान्प्रसूते सा पत्युः सन्तानवर्धनात् ।
अङ्गुष्ठं समतिक्रम्य दीर्घा यस्याः प्रदेशिनी ॥
संरक्षितापि यत्नेन सा भवेद व्यभिचारिणी ॥
दीर्घा स्यान्मध्यमा यस्याः सर्वा वा चरणाङ्गुली ॥
दुःशीला दुर्भगा नित्यं सा कन्या निन्दिता बुधैः ।
काकजङ्घा च या नारी या च रोमशजङ्घिका ॥
अचिरेण परिज्ञेयं वैधव्यमुभयोस्तयोः ।
अंसौ च पृथुलौ यस्याः सा दासी समुदाहृता ॥
ऊरू कृशौ रोमशौ वा यस्याः स्यातां भुजावपि ।
भर्तारं त्वरितं हन्ति विवाहे सापि वर्जिता ॥
अश्वत्थदलसंकाशं गूढगुह्यमणिस्थितम् ।
यस्याः सा सुभगा कन्या धन्या पुण्यैरवाप्यते
नितम्बविम्बभृद् दृष्टं विस्तीर्णं शस्यते स्त्रियाः ।
मध्यं वलित्रयोपेतं कृशं शुभमरोमशम् ॥
स्तनौ वृत्तघनौ शस्तावुरो रोमविवर्जितम् ।
ग्रीवा रेखात्रयोपेता बिम्बाकारोऽधरोऽधरः ॥
ग्रीवया स्थूलया चण्डी दरिद्रा ह्रस्वया तया ।
कुलस्य नाशिनी निम्नदीर्घया जायते पुनः ॥
श्मश्रुभिः सहिता कन्या विषमश्रवणा च या ।
सा विरुद्धा भवेद् भर्तुरुत्तरोष्ठे तथोन्नता ॥
विषमा दशना यस्या विरलाः स्थौल्यभागिनः ।
पूर्वाचाय परिज्ञेया सर्वक्लेशकरी परा ॥
द्वितीयचन्द्रसंकाशभ्रूयुगा समनासिका ।
ऋज्वङ्गुलीका रमणी पत्युः संपत्करी सदा ॥
पार्श्वे गले ललाटे वा वामतो लाञ्छनान्विता ।
तस्मिंस्तिलकिता चापि जनयेत् प्रथमं सुतम् ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्रसन्नवदना राज्ञी लम्बकेशी तपस्विनी ।
दुःखिता बहुकेशी स्यात् सामुद्रमतमीदृशम् ॥
कोष्ठाब्जकलशाकारा रेखा यस्यास्तथैव च ।
तोरणं स्वस्तिकं चक्रं करे बाहुतलेऽपि वा ॥
यस्या विभाव्यते स्त्रीणामाधिपत्यं लभेत् सा ।
पद्मरेखा करे वामे या विरती वराङ्गना ॥
इत्यादि लक्षणं युक्त्या बिम्बे चैव निरूप्यताम् ।
यदुक्तं तत्फलं सर्वं तत्र ··· ··· ···देदिदम् ॥

१० प्रतिमा-रूप-संयोगे

अ आसनानि

पद्मासनम्

ऊरूमूले वामपादं पुनस्तद्दक्षिणं पदम् ।
वामोरौ स्थापयित्वा तु पद्मासनमिदं स्मृतम् ॥

कौक्कुटासनम्

पद्मासनमधिस्थाय जान्वन्तरविनिसृतौ ।
करौ भूमौ निवेश्यैतद् व्यौमस्थः कुक्कुटासनम् ॥

वीरासनम्

एकपादमथैकस्मिन् विन्यस्यौरौ च संस्थितः ।
इतरस्मिंस्तदा पादं वीरासनमुदाहृतम् ॥

योगासनम्

अथ योगासनं वक्ष्ये यद् कृत्वा योगविद् भवेत् ।
ऊर्वोः पादतलद्वन्द्वं स्वाङ्के वद्ध्वा करद्वयम् ॥

आलीठासनं प्रत्यालीढासनञ्च

भुग्नवामपदं पश्चात् स्तब्धजानूरुदक्षिणम् ।
वितस्त्यः पञ्चविस्तारे तदालीढं प्रकीर्तितम् ॥
एतदेव विपर्यस्तं प्रत्यालीढं प्रकीर्तितम् ।

कूर्मासनम्

गूढं निपीड्य गुल्फाभ्यां व्युत्क्रमेण समाहितः ॥
एतत्कूर्मासनं प्रोक्तं योगिसिद्धकरं परम् ॥

सिंहासनम्

सीविन्याः पार्श्वयोर्गुल्फौ व्युत्क्रमेण निवेश्य तु ।
करौ जान्वोर्निधायोभौ प्रसार्य निखिलाङ्गुलीन् ॥
नासाग्रन्यस्तनयनः व्यात्तवक्तृऋजुस्सुधीः ।
एतत्सिंहासनं प्रोक्तं सर्वदेवाभिपूजितम् इति दिक् ॥

ब वाहनानि

अथ वक्ष्ये त्रिमूर्तीनां वाहनानां तु लक्षणम् ।
हंसस्य लक्षणं चैव चव गरुडस्य तु लक्षणम् ॥
वृषस्य लक्षणं सिंहरूपस्य लक्षणम् ।
······························ ······························ ॥

हंसः

सर्वाङ्गं धवलाकारं पादौ च रक्तवर्णयुक् ।
तदास्यं हेमवर्णाभं कुर्यात्तु ब्रह्मवाहनम् ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सर्वेषामपि मूर्तीनां दोलयानं च कल्पयेत् ।
... ... ॥
एवं हंसे पुच्छके पत्रयुक्तम्
पृष्ठे ग्रीवे स्तूपिकापत्रवल्या ।
लम्बं कुक्षिरावृत्तपत्रैः
सर्वैर्वर्णैरभिरामं संभूष्यम् ॥
देवानां भूतैतिलानां नृपाणाम्
हर्म्ये देशे प्रस्तरे चोत्तरोर्ध्वे ।
कूटैर्नीडैः सर्वतो ग्रीवदेशे
युक्त्या कुर्याच्छ्रेणिकाहंसं भूष्यम् ॥

गरुडः
मान० ६१

विहङ्गराजमानं च लक्षणं वक्ष्यतेऽधुना ।
....॥
नासिका शुकतुण्डं पदाग्रे
हंसकास्यदंष्ट्रवत्कुर्यात् ।
श्वेतवर्णनखैरपि वक्त्रयुक्
श्यामवर्णमतितुण्डाग्रके ॥
अष्टनागविभूषणपक्षिवत्पक्षयुक्
उग्रदृक् मकुटं सकरण्डकम् ।
वर्णनीलसमरत्नमण्डलं कृतम्
तप्तहेमनिभं गरुडं भवेत् ॥
पञ्चवर्णसमन्वितपक्षयुक्
अङ्कुरवत्कर्णशिरावृतम् ।
कुञ्चितः सहितगमनेऽपि च
सञ्चितस्थितभावमिति स्मृतम् ॥
मूर्ध्नि शङ्खं क्षीरवर्णावृतं च
वामे कर्णे पद्मवर्णाभपद्मम् ।
सव्ये कर्णे तन्महापद्ममेव
धुम्रवर्णं हारकार्कोटकं च ॥
गुडिकस्कन्धौ लम्बयेत्कृष्णसर्पम्
चासृकवर्णं वा सङ्गिवक्त्रसूत्रम् ।
अत्यन्तं शुक्लवर्णाभं वामप्रकोष्ठे
हिरण्यवर्णं तार्क्ष्यकस्य कटकम् ॥
केचित्तच्छ्रियार्थं तु तार्क्ष्ये वर्णं विशेषतः ।
केशान्तात्कर्णसीमान्तं श्यामनीलाग्रसीमकम् ॥
भित्तिकाहृदयान्तं च तद्द्वयं कूर्परान्तकम् ।
पञ्चवर्णसमं श्रितपक्षकांशुककञ्चुकी ॥
हृदयात्कटिसूत्रान्तं प्रकोष्ठादिकराग्रयोः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पीतवर्णमिति प्रोक्तं तस्योरुजानुकान्तकम् ॥
रक्तवर्णं तु पादान्तं श्वेतवर्णनिभं भवेत् ।
द्विभुजाग्रं च वक्त्रं च द्विपादौ कुञ्चितौ भवेताम् ॥
स्थानकं चासनं वापि विष्णुं ध्यायेत् कृताञ्जलिः ।
सर्वालङ्कारसंयुक्तं ग्रामे स्थाप्यं स्वतन्त्रकम् ॥
एवमैश्वर्यसिद्धिः स्यात्तन्मात्रैरर्चयेत्सुधीः ।
अभिचारादिकाम्यार्थं तार्क्ष्यरूपं विशेषतः ॥
पादं स्थानकं कुर्याद् वक्त्रं चासनं भागतः ।
सर्वाङ्गं स्वर्णवर्णं स्यात्पक्षकञ्चुकिपूर्वकम् ॥
वपुषं तु निर्वाणमधोहस्तौ कृताञ्जलिम् ।
शीर्षं च सिंहवक्त्रं च संयुक्तं पञ्चवर्णयुक् ॥
नाभिषेकं शिर ऊर्ध्वे तु कुक्कुटस्य शिरोऽग्रवत् ।
रक्तवर्णं तु पुच्छाग्रं पञ्चमात्रं तदायतम् ॥
घनं चोर्ध्ववक्त्रं च न प्रच्छादनमास्यकम् ।
सप्ताष्टपूर्ववत्साङ्गैर्वर्णवपर्यं विश्वतः ॥
सुग्रामे क्षेत्रसीमान्ते चान्यत्र निरीक्षणम् ।
क्षणिकालयं संस्थाप्य पूजयेत्तन्त्रवित्तमः ॥
त्रिनाडि त्रिदिने वापि त्रिपक्षे वा त्रिमासके ।
नित्यं त्रिकालं संपूज्य शत्रुनाशं न संशयः ॥
रिपुसंग्रहणार्थं चेद्धस्तौ रात्रौ च कारयेत् ।
युद्धकाले रिपुभवस्तम्भं हस्तौ च बन्धनम् ॥
शिलामृण्मये वापि दारुजे कट शर्करया ।
एतैः वैनतेयं च वर्णसंस्कारमेव च ॥

वृषभः
मान० ६२

वृषभस्य लक्षणं सम्यग्वक्ष्यते विधिनाधुना ।
वायोरभिमुखं स्थापयेत् पीठे वाथोपपीठे वा ॥
विमाने मण्डपे वापि चारोपरि परिन्यसेत् ।
द्वारतुङ्गसमं श्रेष्ठं त्रिभागं मध्यमं भवेत् ॥
कन्यसं द्विभागं स्यात् त्रिविधं वृषभोदयम् ।
... ...॥
... ... ।
श्वेतवर्णनिभं भद्रमग्रं कृष्णधूमवत् ॥
वेदपादखुरैरपि कर्णयोः
श्वेतरक्तसमग्रमनोहरम् ।
शङ्खशल्यैः क्षणमरक्तं च माला
कर्णबन्धैः कर्णरुद्राक्षमाला ॥
अन्यैर्युक्तं किंशुकपुष्पमालाभिः
वंशस्योर्ध्वे व्याघ्रचर्माभिरामम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

भृङ्गकोलकललाटपट्टधृक्
पत्रवल्लीं बहुरत्नशोभितम् ।।
कर्णयोवर्पु: पार्श्वचामरैः
पादनूपुरसभूषणान्वितम् ।।

सिंहः देवानां वाहनं सिंहं लक्षणं वक्ष्यतेऽधुना ।
मान० ६३ ... ... ।।
श्वेतवर्णनिभं सिंहं रक्तवर्णं च केशरम् ।
अन्तस्थले तथैवास्यं कर्णान्तं स्थितरक्तयुक् ।।
बालचन्द्रवदाकारं नखं दन्ताकृतिस्तथा ।।
एवं प्रोक्तं सिंहरूपं जनानाम्
देवानां देवीनां च कल्पयेद् बाहनं च ।
मानं सर्वं चोक्तवद् ग्राह्यमेवम् ।
शयनं वा स्थानकं चासनं वा कल्पयेत् ।।

स. आयुधाः—षट्त्रिंशदायुधलक्षणम् (अ० पृ० २३५)

नामानि आयुधानामतो वक्ष्ये नामसंख्यावलिं क्रमात् ।
त्रिशूलच्छुरिकाखड्गखेटाः खट्वाङ्गकं धनुः ।।
वाणपाशाङ्कुशा घण्टारिष्टिदर्पणदण्डकाः ।
शङ्खश्चक्रं गदावज्रशक्तिमुद्गरभृशुण्डयः ।।
मुसलः परशुश्चैव कर्त्तिका च कपालकम् ।
शिरः सर्पश्च श्रृङ्गं च हलः कुन्तस्तथैव च ।।
पुस्तकाक्षकमण्डलुश्रुचयः पद्मपत्रके ।
योगमुद्रा तथा चैव षट्त्रिंशच्छत्रकाणि च ।।

१. त्रिशूलः षोडशाख्यं पदं कृत्वा पदेन नाभिवृत्तकम् ।
तदूर्ध्वे चोभयपक्षौ भीषणाग्रौ प्रकीर्तितौ ।।
पट्टास्त्रांशशक्तिपिण्डवलणं कटण्कावृतम् ।
उभयोः कटकोपेतो मध्ये शक्त्यंश उन्नतः ।।
दशभागभवेद् दण्डं पृथुत्वं चैकभागिकम् ।।

२. क्षुरिका धुरिकालक्षणं वक्ष्ये यदुक्तं परमेश्वरैः ।
कौमारी चैव लक्ष्मीश्च शंखिनी तुन्दका तथा ।।
पापिनी शुभगा लाक्षा षडङ्गुलादिकोद्भवाः ।
द्वादशान्तिमाङ्गुलान्यङ्गुलमानं प्रशस्यते ।।
आदिहीना मतिभ्रंशं मध्यहीना धनक्षयम् ।
हन्याद्वंशं वंशहीना शूलाग्रे मृत्युसंभवः ।।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

चतुरङ्गुला भवेन्मुष्टिरुर्ध्वे द्व्यङ्गुलताडिता ।
मुष्टिकाधो यवाकारो जडनार्थं च कीलकम् ॥

३. खड्गः

शस्त्रं शतार्धाङ्गुलं स्यान्मध्यमं तुद्दिहीनतः ।
तद् द्दिहीनं कनिष्ठं स्यात् त्रिविधः खङ्गउच्चते ॥
……… …द्भवामूर्ध्वे तानिकोभयपक्षतः ।
पालिकोर्ध्वे यवं कुर्यात्ताडकाधस्तुग्राहकम् ॥
जडिद्वयं ग्राहके च जवकः खड्ग उच्यते ।

४. खेटकम्

खङ्गमानोद्भवो व्यासो द्व्यङ्गुलाभ्यां तथाधिकः ।
तद्वदग्र पुनस्तत्वेवं ज्येष्ठमध्यकनिष्ठकम् ॥
उभयपक्षे चान्तरं तु चतुर्दशाङ्गुलैर्भवेत् ।
हस्ताधारद्वयं कुर्यात् वृत्ताकारं तु वारुणम् ।

५. खट्वाङ्गः

… … … … … …, … … … … ॥
… …धनिर्मीसं त्रिनेत्रज्ञात्वावंडपम् ।
श्वेतासं सृगस्त्र … ? हेमदण्डविभूषितः ॥

६–७. धनुर्बाणौ

द्विमुष्टयन्धङ्गुलं मध्यं मध्योर्ध्वं च द्विहस्ततः ।
निम्नं चोभयतः कुर्याद् गुणाधारे तु कर्णिके ॥
………गुलं मध्यदेशे चवमौनैर्गुणैर्मतम् ।
सप्ताष्टनवमुष्टिश्च वाणं पुष्प अदग्णै ? युतः ॥
कुम्भके कुम्भयेद् वाणं पूरकेण तु पूरयेत् ।
रेचके रेचयेद् बाणं त्रिविधं शरलक्षणम् ॥

८-९. पाशांकुशौ

मकरद्वित्रिकं वापि पाशो ग्रन्थिसमाकुलम् ।
अंकुशं चांकुशाकारं तालमानसमावृत ॥

१०-१३. घण्टा-रिष्टि दर्पण-दण्डाः

घण्टां घण्टाकृति कुर्यच्चतुर्धारा च रिष्टिका ।
दर्पणं दर्शनार्थं च दण्डः स्यात्खड्गमानतः ॥

१४-१६. शंख-चक्र-गदाः

शङ्खश्च दक्षिणावर्तश्चचक्रं चारयुतं तथा ।
गदा च खड्गमाना स्यात् पृथुतालं अंकदाणेत्रयम् ॥

१७-१८. वज्र-शक्ती

वज्रं शूलद्वयं दीर्घमेकविंशतिशूलतः ।
अर्धेन्दुनिभधाराग्रा शक्तिः स्याद् द्वादशाङ्गुला ॥

१९-२०. मुरद्ग-भृशुण्डी

हस्तग्राह्यश्चोर्ध्वतश्च मुद्गरः षोडशाङ्गलिः ।
भृशुण्डी युग्मदोरास्या द्विहस्तान्ताग्रचालका ॥

२१-२२. मुसलपरशू

विशंत्यङ्गुलं मुसलं चतुरङ्गुलवृत्तकम ।
अर्धचन्द्रोपमः परशुस्तदण्डः खड्गमध्यतः ॥

२३-२५. कर्तिका-कपाल शीर्षकानि

कर्तिका क्षुरिकामाना चक्रे च त्रिसमाकृतिः ।
शिरोऽस्थिकं कपालं स्याच्छिरश्च रिपुशीर्षकम् ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

२६-२९ सर्प-श्रृङ्ग-हल-कुन्तकानि

सर्पो भुजङ्गस्त्रिफणी श्रृङ्गं स्याद्वै गवादिजम् ।
हलं हलाकृतिः कुर्यात् कुन्तं वै पञ्चहस्तकम् ॥

३०-३३ पुस्तकाक्षमाला-कमण्डलु-श्रुचयः

पुस्तकं युग्मातालं स्यात् जाप्यामालाक्षसूत्रकम् ।
कमण्डलुश्च पादोनः श्रुग्वै षट्त्रिंशदङ्गुला ॥

३४-३६ पद्म-पत्र-योगमुद्रा

पद्मं च पद्मसंकाशं पत्रं मुक्त च लोलकम् ।
पद्मासनार्धयुग्महस्ता योगमुद्रा तथोच्यते ॥

शिल्प० १६, ५४. ६६½

यद्द्रव्येण कृतं बिम्बं तेनैवायुधमाचरेत् ।
शताङ्गुलायतं चापं नवसप्ताशुगानलैः ॥
मात्रैर्युतं विहीनं वा नवधा धनुषोदयम् ।
पूर्णमुष्टिस्तु नाहःस्यान्मध्यादग्रौ क्रमात् कृशौ ॥
अग्रावर्धाङ्गुलौ व्यासौ वृत्तौ कार्यौ गुणाङ्गुलौ ।
चितौ आयत्रिभागैके बाणनाभिस्तु मूलतः? ॥
चापायामाष्टभागोनं रज्जुदीर्घमुदाहृतम् ।
त्रिवक्रसहितं वाथ बालेन्द्वाकारमेव वा ॥
एकविंशाङ्गुलं बाणदीर्घं तद्द्विगुणं तु वा ।
कनिष्ठाङ्गुलिमानेन परिणाहं शरस्य तु ॥
आस्यायामं पञ्चमात्रं तत्तारं चैव तत्समम् ।
आस्यदीर्घसमं पुच्छं पत्रबन्धविचित्रतम् ॥
पत्राणामङ्गुलं व्यासं पृष्ठे ज्यानाभिमाचरेत् ।
पुच्छतारत्रिभागैकं नाभ्यगाधं च विस्तृतम् ॥
टङ्कं भान्वङ्गुलायामं कुर्याद् युक्त्या बहिर्मुखम् ।
मृगं बहिर्मुखं वाथ कुर्यादन्तर्मुखं तथा ॥
द्वादशाङ्गुलमायामं तस्योच्चं युक्तितश्चरेत् ।
द्वादशाङ्गुलविस्तारं चक्रं शङ्खं तथैव च ॥
डमरोर्दीर्घविस्तारे वसुपञ्चाङ्गुलान्विते ।
मध्यं गुणाङ्गुलं व्यासमायामं चैव तत्समम् ॥
वलयद्वयसंयुक्तं चर्मसूत्रादिसंयुतम् ।
नवाङ्गुलं तु विस्तारं तारादर्धं त्रिपादकम् ॥
उच्चं कमन्डलोः कुर्याद् यथाकारं तथैव च ।
पद्मं तालसमुच्छ्रयं द्विगुणविस्तारं च षोढा कृते
मूले पट्टमिलांशतो द्वितयतो वाधस्तनाष्टच्छदम् ।
अङ्घ्र्यूनप्रथमब्जमध्यमुपरिष्टादष्टपत्रं त्रिभि-
र्भागैः पट्टयुतं करोतु कमलेनामात्र पीठोछ्रयः ॥
विंशत्या प्रतिमाङ्गुलैः प्रविततं वृन्ते तथा सैकया
नालं सद्वितयापि वाथ विततेरष्टाचलाङ्गांशकैः ।
अन्ते हीनवितानमारचयतु ब्रह्मोपलान्तायतं,
तुर्याश्रं सकलेषु वैधसमिदं वृत्तं क्वचिच्चैश्वरम् ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

द. आभूषणानि

अ. मौलिलक्षणम्
मान० ४९. ४-१७

देवानां भूपतीनां च मौलिलक्षणामुच्यते ।
जटामौलिकिरीटं च करण्डं च शिरस्त्रकम् ॥
कुन्तलं केशबन्धं च धम्मिलालकचूडकम् ।
मकुटं च(ट)मिति[च]ख्यातं तत्तदाकारमानतः ॥
पत्रपट्टं रत्नपट्टं पुष्पपट्टं त्रिधा मतम् ।
पितामहस्य रुद्रस्य जटामकुटं योग्यकम् ॥
किरीटमकुटं चैव नारायणस्य योग्यकम् ।
कन्यसा देवतानां च करण्डमकुटमन्वितम् ॥
जटामौलि मनोन्मन्या मण्डला(मकुटं)कुण्डलं तथा ।
सरस्वत्याश्च सावित्र्याः केशबन्धं च कुन्तलम् ॥
अथवा सर्वशक्तीनां करण्डमकुटमन्वितम् ।
किरीटं सार्वभौमस्य चाधिराजस्य योग्यकम् ॥
नरेन्द्रस्य करण्डं स्यात्पार्ष्णिकस्य शिरस्त्रकम् ।
चक्रवर्त्यादिभूपस्य करण्डमकुटं तु वा ॥
पत्रपट्टं पट्टधरे रत्नपट्टं च पार्ष्णिके ।
पट्टभाजः पुष्पपट्टं च चोक्तमेवं पुरातनैः ॥
प्राहारकास्त्रग्राहौ च(हयोः)पुष्पमाल्यं प्रकीर्तितम् ।
चक्रवर्तिमहिष्याश्च कुन्तलं मकुटं भवेत् ॥
अधिराजस्य नरेन्द्रस्य महिष्याः केशबन्धनम् ।
पार्ष्णिकपट्टधरयोर्मण्डलेशस्य पट्टभाजः ॥
एतेषां महिषीणां च धम्मिल्लमकुटमाहृतम् ।
प्राहारकास्त्रग्राहाणां महिषीणामलकचूडकम् ॥

ब. भूषण-लक्षणम्
मान० ५०.१-१८

देवानां भूपतीनां च भूषणानां तु लक्षणम् ।
क्रमात्तद्विधिना सम्यक् संक्षेपाद्वक्ष्यतेऽधुना ॥
पत्रकल्पं चित्रकल्पं रत्नकल्पं च मिश्रितम् ।
एषां च(तच्च)तुर्विधं प्रोक्तं कुर्यादाभरणं बुधः ॥
देवानामपि सर्वेषां कल्पैः(ल्प)सर्वं तु योग्यकम् ।
पत्रकल्पं विना सर्वं सार्वभौमस्य योग्यकम् ॥
रत्नं मिश्रं च योग्यं स्यादधिराजनरेन्द्रयोः ।
अन्येषां भूपतीनां च मिश्रकल्पं च योग्यकम् ॥
पत्रवल्लीर(ल्लीभिर)लङ्कृत्य पत्रकल्पमिति स्मृतम् ।
पुष्पवल्ली च(ल्लीभिश्च)चित्रैश्च सर्वरत्नैरलंकृतम् ॥
एतत्तु चित्रकल्पं तु नाटकाभिरलंकृतम् ।
पुष्परत्नैरलंकृत्य भूषणं रत्नकल्पकम् ॥
पत्ररत्नैश्च संभूष्य मिश्रकल्पमिति स्मृतम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

हारोपग्रीवकेयूरकटकैश्च सुपूरिमम् ।।
वांहुवलयदामं(म)च स्कन्धो(न्ध)मालावलम्बनम् ।
प्रकोष्ठे वलयं चैव मणिवन्धकलापकम् ।।
रत्नाङ्गुलीयकैश्चैव विना मध्याङ्गुलीयकम् ।
मध्ये चोदरबन्धं स्यात्तस्योर्ध्वे स्तनसूत्रकम् ।।
यज्ञसूत्रादिपार्श्वैकसूत्रं स्यात्तु स्तनावृतम् ।
पुरसूत्रलम्बनं पूर्वे यज्ञसूत्रं तु बन्धनम् ।।
कटिसूत्रावसानं स्यात्पुरसूत्रमिति स्मृतम् ।
वक्षस्थले च हारं स्यादुपग्रीवहृदयान्तकम् ।।
बाहुमूले तु वलयं दाम कक्षावसानकम् ।
बाहुमा(मू)लावलम्बं स्यात्केयूरकटकान्वितम् ।।
बाह्वायामस्य मध्ये तु केयूरकटकान्वितम् ।
तदूर्ध्वे पूरिमं कुर्यात् कर्णे मकरभूषणम् ।।
कटिसूत्रं तु संयुक्तं कटिप्रस्थ (प्रान्ते) सपट्टिका ।
मेढ्रान्तं पट्टिकान्तं स्यात्तन्मध्ये सिंहवक्त्रवत् ।।
अथवा रत्नबन्धं स्यात्स्यादामेढ्रविनिर्गमम् ।
निर्व्यं(नीलं)च पञ्चपार्श्वे तु मध्ये दामचलान्वितम् ।।
पीताम्बरदुकुलं च नलकान्तप्रलम्बनम् ।
अथवा जानुपर्यन्तं चर्मचीरं च वाससम् ।।
जङ्घादिवलयोपेतं पादजालादिभूषम् ।
विहाय तर्जनीं सर्वैर(र्वेष्व)ङ्गुलैर(लेष्व)ङ्गुलीयकम् ।।
ऊर्ध्वकाये च हारादि पार्श्वयोर्वाति(तु)लम्बनम् ।
मध्ये दामं(म)च लम्बितं स्याच्छन्नवीरमिति स्मृतम् ।।
इत्युक्तं भूषणं देवैश्च(वानां च)क्रवर्तिन इति स्मृत ।
चक्रव(र्त्तिन)स्तदा विष्णोर्वनमाला विभूषषणम् ।।
अधिराजनरेन्द्राभ्यां (न्द्रयोः)विनासूत्रोपरिस्तनौ ।
अन्येषां सर्वभूपानां केयूरकटकं बिना ।।
सर्वेषामपि देवानां गुल्फस्योपरिदेशके ।
भुजङ्गकटकोपेतं पादनूपुरसंयुतम् ।।
कर्णं विभूषणं कुर्यान्मकराङ्कितकुण्डलम् ।
अथवा स्वर्णताटङ्कौ शेषं तु पूर्ववद्भवेत् ।।
अङ्गभूषणमित्युक्तं बहिर्भूषणमुच्यते ।
दीपदण्डं व्यजनं च दर्पणञ्चैव लक्षणम् ।।
पर्णमञ्जूषकादीनां दोलाया लक्षणं तथा ।
भूपानां च तुलाभारतुलालक्षणमुच्यते ।।
वत्सरारम्भलेखार्थं पत्रं च कर्णलक्षणम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मृगनाभिबिडालस्य शुकस्यापि च पञ्जरम् ॥
चातकस्य चकोरस्य मरालस्य च पञ्जरम् ।
पारावतस्य नीडं च नीलकण्ठस्य पञ्जरम् ॥
तित्तिरेश्च कुलायं च खञ्जरीटस्य पञ्चरम् ।
कुक्कुटस्य कुलायं च नकुलस्यापि पञ्जरम् ॥
चटकस्य गोधारस्य पञ्जरं व्याघ्रपञ्जरम् ।
सर्वेषां लक्षणं वक्ष्ये विधिना संक्षेपतः क्रमात् ॥

स. षोडशाभरणानां लक्षणानि—
अ० पृ० २३६

१. हारः

मेखलोदर्भे कटिसूत्रं हारोवक्षः स्थलालयः ।
मुक्ताफलानि सर्वाणि शुद्धाकर भवानी च ॥
पाण्डयमातङ्गसौराष्ट्रे हैम सौर्प्पारकौशले ।
वेण्वातटे कलिङ्गे च वज्राकरसमुद्भवः ॥
एषु मुक्तासमानानि शुद्धरत्नानि यानि च ।
अथवा चाह्मिमातङ्गवाराह्मत्स्यनक्रजाः ॥
शंखजा वेणुजाश्चैव मुक्तानां योनय इमाः ।
निश्चलत्वमन्यूनत्वं निर्वाणत्वं सुगन्धिता ॥
सुवेध्यं च मणिं वीक्ष्य कण्ठे धार्य्यं च भूभुजैः ।
व्यङ्गितानि यदा तानि त्यजेदेतानि भूपतिः ॥
पुराणि (रत्नानि) सौम्यरूपाणि नृपार्थं हार उत्तमः ॥

२. पदकम्

पदकं संप्रवक्ष्यामि सर्वरत्नैरलंकृतम् ।
धूली ? मरकतं चाद्यं तथा चैवं सपत्रकम् ॥
कीटपक्षोऽपरः प्रोक्तो गरुडागार एव च ।
चत्वारो मणयः प्रोक्ताः सर्वे दुःखप्रणाशनाः ॥
पञ्चधा भाजितेक्षेत्रे पुनस्त्वेवं च पञ्चभिः ।
तन्मध्ये च महादिव्यं मरक्तं सुरवल्लभम् ॥
माणिक्यं पूर्वतो देशे दाडिमीबीजसप्रभम् ।
उदितार्कसमच्छायं प्रभामण्डलमण्डितम् ॥
दृश्यते तत्तु माणिक्यं दक्षिणं दिशमाश्रितम् ।
पद्मरागनिभं स्वच्छं दीपकांशु स्वभावकम् ॥
अपरं च महादिव्यं माणिक्यं ब्रह्मवल्लभम् ।
सुस्निग्धं दुग्धवत्स्वच्छं दाडिमीकुसुमप्रभम् ॥
तन्माणिक्यं तु कौबर्यां शाश्वतं शक्तिपूजने ।
दक्षिणोत्तरप्राचीषु नीलं वै वज्रवत् क्रमात् ॥
तन्मध्ये विदिशायां च वज्रं शक्रस्य वल्लभम् ।
पद्माकारं घृतं दद्यात्परिधौ नालरूपकम् ॥
विचित्रकण्टकैर्युक्तं पत्रशाखाविभूषितम् ।
दण्डशृङ्खलरूपं च खचितं चित्ररत्नकैः ॥
लशुनं मध्यभूमौ स्याद् हृदयानन्दकारकम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

३. श्रीवत्सम्

श्रीवत्सं संप्रवक्ष्यामि सदा विष्णोश्च वल्लभम् ॥
चतुरस्रं समं कृत्वा रसभागविभाजितम् ।
चतुष्पदं च मध्यस्थं रमणं कलिकोद्भवम् ॥
बाह्यपङ्क्तौ दिशायां च चतुर्भागैश्चतुर्दिशम् ।
कोणे पदानि चत्वारि दिशायां मूर्ध्नि पत्रकम् ॥
क्षिपेत्समस्तगर्तेषु शुचीर्वीराहृर्कणिकाः ।
तन्मध्ये च महारत्नं सर्वलक्षणसंयुतम् ॥
तस्याऽधः पङ्कजं दिव्यमष्टपत्रं सकेसरम् ।
मृणालग्रन्थिवल्लीकं कन्दं कलिविभूषितम् ॥
वर्तना कथिता सा तु कथ्यते तेऽधुना पुनः ।
क्षेपगर्त्तकमध्यस्थं मध्ये चोपाश्रयं क्षिपेत् ॥
सोमकान्तिं तस्योपरि सुधाधौतं सदासितम् ।
वर्णानुक्रम्परिधौ धूल्याद्यं गरुडान्तगम् ॥
तदुपरि पत्रवल्ली पुष्परागचतुष्टयम् ।
कोणस्थानेषु वैडूर्य्यचतुष्कं विघ्ननाशनम् ॥
चक्रकोणेषु सर्वेषु निक्षिपेत् परिधौ क्रमात् ।
पौंड्रमातङ्गसौराष्ट्रहेमसापरिकोशलाः ॥
वेण्वातरं कलिङ्गश्च बज्रस्याष्टौ तथा कराः ।
वर्णानुक्रमकं वक्ष्ये विप्रशूद्रान्तजातिषु ॥
(इतः परं भ्रष्टो ग्रन्थः)
... ...।

४. कौस्तुभः

तदधस्तान्मृणालं च कण्टककलिभूषितम् ॥
मध्यभूमौ समस्तायां पत्रपंक्तिविराजितम् ।
दिक्स्थानेषु स्थितं बाह्ये पद्मराग चतुष्टयम् ॥
महारत्नेन्द्रनीलाश्च चत्वारश्चचतुर्दिशम् ।
अष्टौ च कोणपत्रेषु पुष्परागास्तथोदिताः ॥
तन्मध्यतो वै शिरीषशाखापत्रविराजितम् ।
समस्तं हीरकैर्बद्धं मुक्ताभिर्मणिभिस्तथा ॥
विचित्रपत्रसंयुक्तमूर्ध्वे कुर्यात् सुरूपकम् ।
दण्डस्तु भागविस्तीर्णो द्विभाश्चोर्ध्वतो भवेत् ॥
उगान्तं गर्त्तसम्पन्नं हीरकैः खचितं तथा ।
अन्तरे तस्य माणिक्यमुदिताकसमप्रभम् ॥
उपाश्रयं च संक्षिप्य न्युप्तं वाराभिर्वर्जितम् ।
दृढत्वं च मृदुत्वं च मृणालकमलोपमम् ॥
ईदृशं च महालिङ्गमपांपतिसमुद्भवम् ।
हृत्पद्मोपरिस्थाप्यः सौम्यकान्तिश्चिन्तामणिः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

दुर्लभः कौस्तुभश्चायं सुरासुरनरोरगैः ।
सौम्यकान्तिं विना विष्णुं नाऽपि देवैरवाप्यते ॥

५. पत्राभरणम्

प्रथमं शिशुपत्रं च सकलं च द्वितीयकम् ।
स्वस्तिकं तु तृतीयं च वर्द्धमानं चतुर्थकम् ॥
तथान्यत्सर्वतोभद्रं पञ्चपत्रमिति स्मृतम् ।
क्षीरार्णवसमुत्पन्नं मुद्रारूपं तथोत्तमम् ॥
हेममयानि सर्वाणि चितानि मणिरत्नतः ।
हृदि कण्ठे तथा मूर्ध्नि सदा धार्याणि भूपते ॥

शेखरादित्रयं मुकुटम्

मुकुटं सम्प्रवक्ष्यामि ज्येष्ठमध्यकनिष्ठकम् ।
शेखरं प्रथमं नाम किरीटं च द्वितीयकम् ॥
तृतीयं चाऽमलासारं मूले मुकुटमण्डनम् ।

६. शेखरमु०

शेखरं शिखराकारमङ्गत्रयविभूषितम् ॥
तन्मध्ये च महारत्नं वज्रं वै रुद्ररूपकम् ।
मरवतं वामदेशे च साक्षाद्वै विष्णुदैवतम् ॥
दक्षिणे पद्मरागं च पुरुषाख्यवपुः कृतम् ।
त्रिभिः शृङ्गैः रत्नमयं मूलदेशे प्रपूजितम् ॥
सदाशिवो मध्यपट्टे श्रेणीयुक्तश्च मण्डितः ।
पद्मरागैश्च मणिभिरिन्द्रनीलादिभिस्तथा ॥
पूरिताहीरककणैः समस्ता खचिता मही ।
पत्रवल्ली त्रिभङ्गी च कर्णिका कलिकैर्युतम् ॥

७. किरीटमुकुटः

अतोवक्ष्यामि मकुटं तथा सुरगणार्चितम् ।
पट्टं शशिप्रभाभं च शृङ्गपञ्चकसंयुतम् ॥
शृङ्गाण्युपरि चत्वारि त्रीणि चैव तदूर्ध्वतः ।
शृङ्गद्वयं तत्परं तदुपर्येकं च शृङ्गकम् ॥
शृङ्गाणि चैव कार्याणि मणिभिर्भूषितानि च ।
हीरकेण समायोज्य पत्रवल्लीसमन्वितम् ॥
तत्रमध्ये महादिव्यं सोमकान्तमणिस्तथा ।
धृतं शिरसि संपूज्यं मुकुटं च किरीटकम् ॥

८. आमलसारमु०

वक्ष्येऽथामलसारं च मुकुटं दैवदुर्लभम् ।
अर्धचन्द्राकृतिपट्टं मुक्ताषोडशकावृतम् ॥
पञ्चाण्डकमयं दिव्यं सर्वरत्नविराजितम् ।
खचितं हीरकैः सर्वं वैडूर्य्यमणिमध्यगैः ॥
मुक्ताफलमयी श्रेणिरण्डकैरावृता सदा ।
वज्रवैडूर्य्यगोमेदपुष्परागेन्द्रनीलकाः ॥
एते पञ्च महापुण्या उपर्युपरितश्चिताः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पञ्चरत्नमिदं दिव्यं स्वयमेव सदाशिवः ॥
समस्तेषु च कोणेषु कर्केतं लशुनं तथा ।
वार्यन्तरे समस्ते च पत्रवल्ली विराजिता ॥
विद्रुमश्च महानीलं कोणजं खचितं सदा ।
महातेजः सूर्यकान्तिं मौलिमध्ये च पुष्पकम् ॥
परीक्ष्येमानि रत्नानि यानि शुद्धानि तानि च ।
ग्राह्याणि सूत्रधारेण मुकुटार्थं नृपस्य च ।
मुकुटं दिव्यरूपं च शिरस्युपरि धार्यते ।
सुरभूमिपतीनां च ह्यन्येषां मुकुटं न हि ॥

९. कण्ठः
कण्ठाभरणकं ज्ञेयं मुक्ताफलमयं शुभम् ।
तन्मध्ये पद्मरागं च सूर्यतेजः समप्रभम् ॥

१०. बाहुबलः
ततो बाहुबलं वक्ष्ये सर्वसौभाग्यदायकम् ।
मध्येदेशे मरकतः परिधौ सर्वरत्नकम् ॥
हीरकैः खचितं सर्वं शिशुपत्रविराजितम् ।
क्षिपेत्समस्तगर्तेषु माणिक्यमणिकादिकम् ॥
उपाश्रयस्य चोत्तङ्गे ? पद्मरागमधः स्थितम् ।
कोमलं ललितं नालं हीरकैः खचितं तथा ॥

११. कुण्डली
कुण्डले मुकुटं चैतच्छृङ्गारार्थं त्रिकं सदा ।
मुक्ताफलमयी वल्ली चामीकरं तस्यान्तरे ॥
एषां गर्तेषु सर्वेषु हीरकं क्षेपयेत्सदा ।
पद्मरागं तस्य मध्ये दिव्यकान्तिं सुतेजसम् ॥

१२. नवग्रह-कंकणम्
योज्यं च कंकणं बाह्वोर्नवरत्नमयं शुभम् ।
हीरकं पद्मरागं च महानीलं च मौक्तिकम् ॥
मरक्तं विद्रुमं पुष्पं गोमेदं लशुनं तथा ।
एतेभ्यश्च महादिव्या ग्रहाश्चैव यथा प्रभाः ॥
यद्धरते कंकणं दिव्यं शुद्धरत्नैः समावृतम् ।
तस्य गेहे महापीडा न भवन्ति कदाचन॥
गाङ्गेयं निकषे शुद्धं दिव्यं·········ग्रन्थितम् ।
महारत्नं तस्य मध्ये माणिक्यं वामदक्षिणे ॥
परिधौ हीरकं चैव तीक्ष्णधाराविवर्जितम् ।
हस्तकण्डं शशंभाव तंच पुरविश्वेकनिर्मितम्? ॥
तन्मध्ये च पद्मरागं मरक्तं वामदक्षिणे ।
मुक्ताश्च वामदेशे तु शुद्धश्शृङ्खलमेव च ॥
हारङ्ककणनिबद्धं मध्यदण्डसकेवलम् ।
करभद्मं च तन्नाम करालङ्कार उत्तमः ॥

CC-0. Agamnigam Digital Preseyation Foundation, Chandigarh

१३. रामचन्द्र-खड्गम्

रामचन्द्रं प्रवक्ष्यामि हस्तकाब्जस्थितं सदा ।
तन्मध्ये च महादिव्यं माणिक्यं सूर्यसन्निमम् ।।
अष्टपत्रं क्षिपेद् गर्भे संकीर्णं हीरकैस्तथा ।
कणांश्चपूरयेत् सर्वं ? पत्रपत्रेष्वयं विधिः ।।
कलितं कलिकाभिश्च चामीकरं करं तथा ।
इदं खङ्गं महादिव्यं सर्वपापप्रणाशनम् ।।

१४. अंगुलिकाः

मस्तके मध्यतः कुर्यादुभयोः हीरकं तथा ।

(i) अंगुलिकम्

मृणालदण्डसदृशं कार्यं चैवाङ्गुलीयकम् ।।

(ii) युगलाङ्गुलिकम्

मरक्तं पद्मरागं च हीरकं च दक्षिणोत्तरे ।
हरिब्रह्मात्मकं नाम युगलं च तदुच्यते ।।

(iii) टीका-त्रिपुरुषम्

सोमकान्तिर्यदा मध्ये मरक्तं दक्षिणे स्थितम् ।
माणिक्यमुत्तरे देशे उक्तं त्रिपुरुषं च तत् ।।

(iv) अंगुष्ठम्

मरक्तं पुष्परागश्च माणिक्यं मौक्तिकं तथा ।
हीरकं च यदा मध्ये आङ्गुष्ठं तत्सदाशिवः ।।

(v) अर्द्धाङ्गुलिकम्

कनिष्ठां मुक्ताफलं चक्रसद्म इति प्रभा ।
मृणालदण्डसदृशं तदर्द्धाङ्गुलिकं कृतम् ।।

(vi) वज्रधारा

अन्योन्यतः स्थिते वज्रे तद्धारा प्राङ्मुखी तथा ।
सा विज्ञेया वज्रधारा इन्द्रकान्त ? द्युतिप्रभा ।।

(vii) अङ्गुलिका

शुद्धस्यान्ते मणीसर्वे निर्दोषा हेमसंयुताः ।
तस्य तुष्यन्ति देवा वै येन चाङ्गुलिका धृता ।।

१५. कुंडलम्

सर्वरत्नमयं दिव्यं पूरितं हैरकैः कर्णैः ।
कुंडलं तदिति प्राज्ञैर्वासुदेवे उदाहृतम् ।।

१६. पादमुद्रिकाः

पादाङ्गुलीषु सर्वासु मुद्रिका रत्नवर्जिताः ।
यः कुर्यादन्यथा मूढस्तत्पादौ छेदयेन्नृपः ।।

टि०—१ रत्नानां पादयोरप्रयोज्यत्वम्

पादेन स्पर्शयेद्रत्नं यो नरो देवनिर्मितम् ।
स पतेन्नरके घोरे राजवध्यस्तथा भवेत् ।।

टि०—२ आभरणायोज्याः

वनेचरा जलचरा कृमिकीटपतङ्गकाः ।
कुर्यादाभरणं नैषु यदिच्छेज्जीवितं चिरम् ।।

किरीटादि लक्षणम् (शिल्प० १६. १—५३)

अ. आभूषणानि

अत्रैकाङ्गुलसम्मितेन परिवेष्टघोष्णीषपट्टेन के,
कोटीरं मकुटोज्ज्वलं विरचयेदष्टाङ्गुलैः सर्वतः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

द्व्यष्टाभिर्धृतिसम्मितैर्दिनकरद्वन्द्वप्रमैरङ्गुलैः —
रुष्णीषोपरि भासमानमकुटोपेतं किरीटं हरौ ॥
कुर्यात्किरीटं शिखरैरुपेतं त्रिपञ्चसप्तप्रमितैर्यथार्हम ।
अण्डोपमं वा कमलोपमं वा छत्रोपमं वा कमठोपमं वा ॥

युग्मसंख्या जटा कार्या उभयोः पार्श्वयोः प्रथक् ।
द्वात्रिंशन्मात्रमारम्य अथैकाङ्गुलवृद्धितः ॥
एकषष्टचङ्गुलान्तं तु जटादीर्घमुदाहृतम् ।
अधोजटा दीर्घतमास्तस्मादूर्ध्वोर्ध्वगास्तथा ॥
क्रमान्न्यूना तु कर्तव्या तदर्हेषु समान्तरा ।
कनिष्ठाङ्गुलपरीणाहं जटानाहमुदाहृतम् ॥
जटामकुटतुङ्गं तु चतुर्विंशाङ्गुलं तु वा ।
एकविंशाङ्गुलं वाथ कुर्यादष्टादशाङ्गुलम् ॥
सप्तादशाङ्गुलं वाथ षोडशाङ्गुलमेव वा ।
केशान्तान्मकुटान्तं तु ललाटे पट्टसंयुतम् ॥
मुखान्तव्याससदृशं मकुटस्य विशालकम् ।
तुङ्गार्धं वा त्रिपादं वा यथाशोभं प्रकल्पयेत् ॥
तत्सप्ताष्टनवांशैकहीनमग्रविशालकम् ।
चतुष्पूरिमसंयुक्तं भान्वंशं पूरिमोदयम् ॥
शम्भौ जटायां कर्तव्या भूर्ध्नि गङ्गा प्रमाणतः ।
भान्वङ्गुलायता वाथ षोडशांशसमुच्छ्रया ॥
हृदयेऽञ्जलिसंयुक्ता प्रोक्तस्त्रीलक्षणान्विता ।
किरीटमकुटं चैव केशं वा तत्र कल्पयेत् ॥
मूलादग्रं क्रमात् क्षीणं करण्डमकुटस्य तु ।
अग्रस्य मुकुलाकारं मकुटस्य प्रकल्पयेत् ॥
त्रिपञ्चसप्तसङ्ख्यैस्तु करण्डैश्च विराजितम् ।
करण्डमकुटं कार्यमन्यत् सर्वं यथापुरम् ॥
त्रिचतुष्पञ्चमात्रं स्यात् पत्रकुण्डलविस्तृतम् ।
यवं वृत्तघनं प्रोक्तं श्वेताभं वात्र चार्तवम् ॥
मकरं कुण्डलं वाथ सिंहकुण्डलमेव वा ।
गजादिकुण्डलं वाथ द्विचतुष्पञ्चमात्रकम् ॥
कुर्याद् व्यासं च तुङ्गं च तत्तदाकारभेदतः ।
वृत्तकुण्डलविस्तारमष्टादशयवं भवेत् ॥
वेदाङ्गुलं तु तत्तुङ्गं रम्भाब्जमुकुलोपपम् ।
हिक्कासूत्रोपरिष्टात्तु उपग्रीवं तु बन्धयेत् ॥
रुद्राक्षं वाथ रत्नं वा हेमक्लृप्तमणिं तु वा ।
नानाचित्रविचित्रं तु ग्रैवेयं वा यथोचितम् ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कटकं वलयोपेतं प्रकोष्ठे तु प्रकल्पयेत् ।
कनिष्ठाङ्गुलिपरीणाहं वलयं वर्तुलं तु वा ॥
अथवा वलयस्यैव घनं द्वित्रियवं तु वा ।
घनद्विगुणविस्तारं नानारत्नविचित्रतम् ॥
युगलं युगलं तत्तु प्रकोण्ठेषु प्रकल्पयेत् ।
केयूरं कोर्पराद्र्ध्वे वलयोक्तघनान्वितम् ॥
एकाकारं तु केयूरं साष्टपादाब्जसंयुतम् ।
नानारत्नसमायुक्तं शैवलाभमथापि वा ॥
पत्रपूरितसंयुक्तं बाहुमध्ये प्रकल्पयेत् ।
पत्रपूरितनालं तु केयूरसदृशं घनम् ॥
तत्पूरितादधोनालं बाहुमित्यावृतं तु वा ।
त्रिचतुष्पञ्चमात्रं वा पत्रपूरितविस्तृतम् ॥
तद्वचासार्धं तु तत्तुङ्गं पादोनद्विगुणं तु वा ।
द्विगुणं वापि कर्तव्यं तद्बाहुवलयं भवेत् ॥
मध्याङ्गुलं विना शेषा अङ्गुला मुद्रिकान्विता ।
मुद्रिकामूलपर्वस्था वृत्ता यवघनान्विताः ॥
रत्नचित्रविचित्रा वा तत्तद्योग्यं समाचरेत् ।
मध्याङ्गुलाग्रमभये चूचुकोर्ध्वसमं भवेत् ॥
तर्जन्यादिकनिष्ठान्तास्तुल्यमूलास्तु वक्रिता ।
ईषद् वक्रितमङ्गुष्ठमूर्ध्वाग्रं तु बहिर्मुखम् ॥
तथैव वरदं कृत्वा मणिबन्धकटौ पुनः ।
मध्याङ्गुलाग्रमालम्ब्य मेढ्राग्रान्तं बहिर्मुखम् ॥
तदेव सिंहकर्णाख्यं तलमध्यगतं यदि ।
मध्याङ्गुलाग्रं वक्राभं तदुपान्तगतं तथा ॥
अनामिकाग्रं शेषाः स्युः पूर्ववत् परिकल्पिताः ।
अभयाकारमालम्ब्य हस्तमूरौ समर्पितम् ॥
यदि तत्कटकं प्रोक्तं मणिबन्धं तूरुबाह्यतः ।
एकद्वित्र्यङ्गुलाद् बाह्ये कर्तव्यं बुद्धिमत्तमैः ॥
हिक्कासूत्रसमं मध्यमाग्रमूर्ध्वानितं करम् ।
बहिर्मुखं कर्तरी सा शंखचक्रादिसंयुता ॥
वक्रौ त्वनामिकाङ्गुष्ठौ तलमध्यगतौ पुनः ।
किंचित्वक्रा कनिष्ठा सा द्वावन्यावप्यृजुक्रियौ ॥
तथा सूचीति विख्याता कर्णसूत्रसमोन्नता ।
तर्जन्याग्रं तदा तत्र योजयेदङ्कुशादिकम् ॥
अङ्गुष्ठानामिकामध्यमाङ्गुल्यस्तलमध्यगाः ।
किञ्चिद्वक्रा कनिष्ठा सा तर्जन्यृजुतरा भवेत् ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

यज्ञोपवीतं सर्वेषां यवाष्टांशघनान्वितम् ।
उपवीतं त्रिसूत्राढ्यमुरस्सूत्रसमन्वितम् ॥
एकमेव ह्यु रस्सूत्रमुपवीतघनान्वितम् ॥
वामस्कन्धोपरिष्टांत्तु नाभ्यधौ द्वयङ्गु लान्ततः ॥
यज्ञोपवीतदीर्धं तु नाभेर्दक्षिणपार्श्वगम् ।
अपरे वंशमाश्रित्य यज्ञसूत्रं निधापयेत् ॥
ऊरु! उरस्सूत्रं समालम्ब्य स्तनादष्टाङ्गु लान्तरे ।
यज्ञोपवीतवत्कार्यं स्कन्धयोरुभयोरपि ॥
पाश्वयोश्चैव योन्यूर्ध्वे चन्नवीरमिदं विदुः ॥
हिक्कात् षडङ्गु लावस्नात स्तनयोर्मध्यदेशतः।
ग्रैवेयहारमाख्यातं वेदमात्रवितानकम् ॥
यवत्रयं घनं तस्य नानामणिहिरण्मयम् ।
कण्ठादुदरब न्धान्तमक्षमालां प्रकल्पयेत् ।
हृन्मालेति प्रसिद्धा सा स्कन्धमालां च कारयेत् ॥
नानापुष्पमयी स्कन्धदेशे सा सम्प्रकीर्तिता ।
कटिसूत्र त्रिभिः सूत्रैः सूत्रं प्रति यवं घनम् ॥
कटिसन्ध्योपरिष्टात्तु रत्नचित्रितमाचरेत् ।
मेढ्रादधः कृत्तिमास्यं पञ्चषट्प्तमात्रसकम् ॥
तारं तारसमं तुङ्गं घनमर्धाङ्गु लं स्मृतम् ।
ततोरुमानत्र्यंशान्तं मुक्तादामादि लम्बयेत् ॥
पादौ जालकसंयुक्तौ गुल्फाधस्तात्तथैव च ।
जालकाबद्धसूत्रं तु यवद्वयघनान्वितम् ॥
तत्सूत्राज्जालकालम्बं त्रिपञ्चयवमानकम् ।
त्रियवं जालनालं तु व्यासतुल्यं तदुन्नतम् ॥
यवमानं घनं शेषं गाढमत्र प्रकल्पयेत् ।
गाढयुक्तं तु वृत्ताभमन्तःपाषाणसंयुतम् ॥
गाढहीनं घनं वार्न्तदृषदत्र न कारयेत् ।
भुजङ्गवलयं यत्र प्रकोष्ठादिषु रोचते ॥
तत्प्रदेशपरीणाहात् सपादं स्यात्तदायतम् ।
तद्दीर्घादुपरि रुयातं फणं भान्वङ्गलायतम् ॥
सप्ताङ्गु लं तु विस्तारं घनं चैकाङ्गु लं फणे ।
अतितीक्ष्णातरे जिह्वे मुखे कुर्यात्तु लोचने ॥

ब. वस्त्राणि

वस्त्रं कौशेयकार्पासचीरचर्मादिकं पुनः ।
तत्तद्योग्यं प्रकर्तव्यं युक्त्या सर्वत्र बुद्धिमान् ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

य. प्रतिमा-मुद्राः

(i) पताकादिचतुष्षष्टिहस्तमुद्राः (स०सू० ८३)

२४. असंयुत-हस्ताः

पताकस्त्रिपताकश्च तृतीयः कर्तरीमुखः ।
अर्धचन्द्रस्तथारालः शुकतुण्डस्तथापरः ॥
मुष्टिश्च शिखरश्चैव कपित्थः खटकामुखः ।
सूच्यास्यः पद्मकोशाहिशिरसो मृगशीर्षकः ॥
काङ्गूलकालपद्मश्च चतुरो भ्रमरस्तथा ।
हंसास्यो हंसपक्षश्च सन्दंशमुकुलावपि ॥
ऊर्णनाभस्ताम्रचूड इत्येषा चतुरन्विता ।
हस्तानां विंशतिस्तेषां लक्षणं कर्म चोच्यते ॥

१३. संयुतहस्ताः

त्रयोदशाथ कथ्यन्ते संयुता नामलक्षणैः ।
अञ्जलिश्च कपोतश्च कर्कटः स्वस्तिकस्तथा ॥
खटको वर्धमानश्चाप्युत्सङ्गनिषधावपि ।
डोलः पुष्पपुटस्तद्वन्मकरो गजदन्तकः ॥
अवहित्थाभिधानश्च वर्धमानस्तथापरः ।
अञ्जलिश्च कपोतश्च कर्कटः स्वस्तिकस्तथा? ।
त्र्योदशैते कथिता हस्ताः संयुक्तसंज्ञिताः ॥

२९. नृत्तहस्ताः (२८)

लक्षणं नृत्तहस्तानामिदानीमभिधीयते ।
चतुरश्रौ तथोद्वृत्तौ स्वस्तिको विप्रकीर्णकौ ॥
(पद्मकोशाभिधानौ) चाप्यरालखटकामुखौ ।
आविद्धवक्त्रकौ सूचीमुखरेचितसंज्ञकौ ।
अर्धरेचितसंज्ञौ तु तथैवोत्तानवञ्चितौ ॥
पल्लवाख्यौ करौ चाथ केशबन्धौ लताकरौ ।
करिहस्तौ तथा पक्षवञ्चिताख्यौ ततः परम् ।
पक्षप्रद्योतकौ चैव तथा गरुडपक्षकौ ।
ततश्च दण्डपक्षाख्यावूर्ध्वमण्डलिनौ ततः ।
पार्श्वमण्डलिनौ तद्वदुरोमण्डलिनावपि ॥
अनन्तरं करौ ज्ञेयावुरःपार्श्वार्धमण्डलौ ।
मुष्टिकस्वस्तिकाख्यौ च नलिनीपद्मकोशकौ ॥
ततश्च कथितौ हस्तावलपल्लवकोल्बणौ ।
ललितौ वलिताख्यावित्येकान्नत्रिंशदीरिताः ॥

(ii) पादमुद्राः—वैष्णवादिषड्स्थानकमुद्राः (स०सू० ८०)

अथान्यान्यभिधीयन्ते चेष्टास्थानान्यनेकशः ।
यानि ज्ञात्वा न मुह्यन्ति केपि चित्रविचक्षणाः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वैष्णवं समपादं च वैशाखं मण्डलं तथा ।
प्रत्यालीढमथालीढं स्थनान्येतानि लक्षयेत् ॥
(अश्वक्रामत्तमथायामविहितनाकत्र यं स्त्रीणाम)?।
द्वौ तालवर्द्धतालश्च पादयोरन्तरं भवेत् ॥
तयोः समन्वितश्चैकस्त्र्यश्रः पक्षस्थितोऽपरः ।
किञ्चिदञ्चितजङ्घं च (शगात्रभोज्यचसंयुतम्?)॥
वैष्णवस्थानमेतद्धि विष्णुरत्राधिदैवतम् ।
समपादे समौ पादौ तालमात्रान्तरस्थितौ ॥
स्वभावसौष्ठवोपेतौ ब्रह्मा चात्राधिदैवतम् ।
तालास्त्रयोऽर्धतालश्च पादयोरन्तरं भवेत ॥
अश्रमेकं द्वितीयं च पादं पक्षस्थितं लिखेत् ।
नैषमोरु? भवत्येवं स्थानं वैशाखसंज्ञितम् ॥
विशालो भगवानस्य स्थानकस्याधिदैवतम् ।
ऐन्द्रं स्यान्मण्डलं पादौ चतुस्तालान्तरस्थितौ ॥
त्र्यश्रपक्षस्थितिश्चैव कटिर्जानुसमा तथा ।
प्रसार्य दक्षिणं पादं पञ्चतालान्तरस्थितम् ।
आलीढं स्थानकं कुर्याद्रुद्रश्चात्राधिदैवतम् ।
कुञ्चितं दक्षिणं कृत्वा वामपादं प्रसारयेत् ।
आलीढं परिवर्तेन प्रत्यालीढमिदं स्मृतम् ।
दक्षिणस्तत्र समः पादस्त्र्यश्रः पक्षस्थितोऽपरः ।
समुन्नतकटिर्वामश्चावहित्थं तदुच्यते ।
एकः समस्थितः पादो द्वितीयोऽग्रतलान्वितः ॥
(शूद्रमविद्धं वात ?) श्चक्रान्त उच्यते ।
स्थानत्रयमिदं स्त्रीणां नृणामपि भवेत् क्वचित् ॥

शरीर-मुद्राः (चेष्टाः)

१. ऋज्वागतादिस्थानलक्षणं
स० सू० ७९

अत ऊर्ध्वं प्रवक्ष्यामि नवस्थानविधिक्रमम् ।
संपात्यारुघाणां ? हि जायन्ते नव वृत्तयः ॥
पूर्वमृज्वागतं तेषां ततोऽर्धर्ज्वागतं भवेत् ।
ततः साचीकृतं विद्यादध्यर्धाक्षमनन्तरम् ॥
चत्वार्यूर्ध्वागतादीनि परावृत्तानि तानि च ।
ऋज्वागतपरावृत्तं ततोर्धर्ज्वागतादिकम् ॥
साचीकृतपरावृत्तं ततोध्यर्धाक्षपूर्वकम् ।
पार्श्वागतं च नवमं स्थानं भितिकविग्रहम् ॥
ऋज्वर्धर्जुनोर्मध्ये चत्वारि व्यन्तराणि च ।
अर्धर्जुसाचीकृतयोर्मध्ये च व्यन्तरत्रयम् ॥
द्वयर्धर्ज्वा? साचीकृतयोर्मध्ये द्वे व्यन्तरे परे ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

परोद्वर्धक्षपार्श्वं ? व्यन्तरं चैकमन्तरे ॥
ऋज्वागतपरावृत्तपार्श्वाभ्यागतयोर्दश ।
अन्तरे व्यन्तराणि स्युः स्थानकान्यपराणि अपि ।

ब. स्थानक-विधिः
भ०पृ० २११

अथ वक्ष्ये स्थानविधिं क्रमयोगमुपागतम् ।
ऋज्वागतादिस्थानानि पञ्च वै पूर्वभागतः ॥
कार्याण्यपराङ्मुखानि चतुर्वृत्ताभिधानि च ।
ब्रह्मसूत्रोद्भवं पूर्वं सन्मुखं चावलोकने ॥
अङ्गाभिधानसंज्ञे तु ऋज्वागतादिस्थानतः।
ऋज्वागतं ध्रुवं पूर्वं तदाद्यं प्रवृत्तभ्रमः ॥
स्वाङ्गुलोद्भवयुक्ता च पादयुक्ता त्रिशोभना ।
भ्रुकेशान्तयोर्मध्ये च शिरोवृत्ते तु मानतः ॥
आद्यमृज्वागतं नाम अर्धर्जु च द्वितीयकम् ।
साचीकृतं तृतीयं तु द्व्यर्धर्ज्वाख्यं चतुर्थकम् ॥
उपर्य्यथो सूत्रघातैः पराङ्मुख (वृत्त) चतुष्टयम् ।
ऋज्वागतपरावृत्तमर्धर्जुपरावृत्तकम् ॥
साचीकृतपरावृतं ततो द्व्यर्धर्जुपूर्वकम् ।
इत्युक्तं परभागैश्च परावृत्तचतुष्टयम् ॥
उभयर्ज्वागतमध्ये प्रत्यङ्गाङ्गकशोभनम् ।
इति पार्श्वागतं प्रोक्तं स्थानकं नवमं विदुः ॥
पिंपलीकण्ठमध्ये च बाह्वोश्चस्कन्धगर्भतः ।
अक्षसूत्रोद्भवाख्यं च पार्श्वसूत्रं प्रतिष्ठितम् ॥
नासाग्रं दशनाग्रं च अङ्गुष्ठाग्रं तथैव च ।
पूर्वे प्रतिष्ठितं सूत्रं क्रमयुक्तिमुपागतम् ॥
ललाटनासिकामध्ये चिबुकस्तनयोस्तथा ।
मेढं च गुह्यमूलं च वलसूत्रं प्रतिष्ठितम् ॥
कुर्यात्स्थूलं च सूत्रस्थं नासाग्रमात्रनिर्गतम् ।
उच्छ्वासः सार्धद्वयाक्षोऽङ्गुष्ठमूलं वेदाङ्गुलम्॥
क्षिप्त्वा सङ्गमत्रियवं गोजिकामात्रमेव च ।
अधरान्तं गतं सूत्रं हनुकामात्रमेव च ॥
ग्रीवा वेदाङ्गुलोत्क्षिप्ता आहिका?मात्रसंज्ञिका ।
जङ्घामध्ये त्रिभागोक्ता द्विगुणं जानु मस्तके ॥
पण्मात्रा गुल्फसूत्रे च प्रवेशो निर्गमस्तथा ।
निर्गमश्च प्रवेशश्च युक्तिमानं विधीयते।
कार्यं पृष्ठं स्तनसूत्रे चतुर्दशाङ्गुलक्रमात ।
नाभिदेशे तथा सङ्घधाऽऽसनसूत्रे चतुर्दश ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

२. प्रतिमा-निष्पत्तिः

नयनोन्मीलन-लक्षणम्
मान० ७०

देवानामपि देवीनां भक्तानां नेत्रमोक्षणम् ।
लिङ्गानामुद्धारलक्षणं वस्त्वादीनां यथाक्रमम् ।।
स्थपतिः प्रकृतिः प्रोक्तः स्थापको जीवमिष्यते ।
तस्मात्क्रियारम्भतः सह कुर्यात्तु संसदा ।।
एवं विधाय चान्येन वस्त्वादीनि कृतान्यपि ।
वस्तोर्वास्तोस्तु हानिः कर्तृनाशं भवेद् ध्रुवम् ।।
किं सृजेन्नयनोन्मेषमन्धकारानुपत्तये ।
उदिते तु सहस्रांशौ यथा गच्छति समन्ततः ।।
तथैवमस्तमानादि लोचनस्य जनस्य च ।
अन्तर्बहिश्च रागस्तु चार्थनाशं न संशयः ।।
अकृत्वा नयनोन्मोक्षं चक्षुरोगो भवेद् ध्रुवम् ।
तस्मात्तु नयनोन्मोक्षलक्षणं वक्ष्यतेऽधुना ।।
हर्म्ये वा मण्डपे वापि स्थपतिस्थापकावुभौ ।
स्थापनात्पूर्वके कुर्यादुक्तवदङ्कुरार्पणम् ।।
पश्चात्तु सुमुहूर्ते च कुर्यान्नियनमोक्षणम् ।
प्रासादाभिमुखे चैव चोत्तरे वाथ दक्षिणे ।।
नयनोन्मीलनं यागमण्डपं कल्पयेत्सुधीः ।
नवहस्तं सप्तहस्तं पञ्च हस्तमथापि वा ।।
चतुरश्रसमाकारं षोडशस्तम्भमेव च ।
द्वादशस्तम्भमेवं वा कूटं वाथ प्रपाङ्गकम् ।।
चतुर्दिक्षु चतुर्द्वारं चतुस्तोरणसंयुतम् ।
तन्मण्डपस्य मध्ये तु वेदिं कुर्यात्तु चोक्तवत् ।।
तदग्रे चाग्निकुण्डं स्याद् गोमयालेपनं भवेत् ।
विधानध्वजसंयुक्तं नानावस्त्रेण संयुतम् ।।
पादानां समलङ्कृत्य कदलीफलैर्युतं ।
परितश्चोर्ध्वदेशे तु रम्भामाल्यैरलङ्कृतम् ।।
पुष्पमाल्यैरलंकृत्य रत्नैस्सर्वैरलङ्कृतम् ।
पश्चात्तु शिल्पिनः प्राज्ञाः कुर्युर् नयनमोक्षणम् ।।
वेदिकापश्चिमे वाथ दक्षिणे वाथ नैर्ऋते ।
कल्पयेत्स्थण्डिलं वाथ दारू (नव) पीठमथापि वा ।।
तदूर्ध्वे स्थापयेद् बिम्बं सकूर्चाद्यैरलङ्कृतम् ।
तत्पूर्वे शुद्धमाल्येन स्थण्डिलं मण्डलं न्यसेत् ।।
तदूर्ध्वे स्थापयेद्धेमपात्रे नैर्ऋत्ये पूरितम ।
क्षोमेणाच्छादनं कुर्यादन्तः कूर्चैरलङ्कृतम् ।।
वेदिकोपरि शाल्येन कुर्यान्मण्डलं बुधः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पञ्चविंशत्पदं वाथ कल्पयत्पीठमेव वा ॥
दर्भैरास्तीर्य पश्चात्तु शुद्धतण्डुलरेखया ।
नानापुष्पैश्च लाजैश्च प्रोक्षयेच्छोभनार्थकम् ॥
नवकुम्भैर् नवैर्वापि पञ्चविंशतिभिरेवा ।
विधिवत्क्षालयेत्सर्वसूत्रैरावेष्टनं भवेत् ॥
शुद्धतोयेन सम्पूर्य वेदिकोपरि विन्यसेत् ।
मध्ये प्रधानकुम्भः स्यादन्ये क्रमात्समन्ततः ॥
सर्ववस्त्रैश्च संवेष्ट्य सकूर्चाग्रपल्लवैः ।
संविधानफलैश्चैव पुष्पमाल्यैरलङ्कृतम् ॥
उपवेद्युपरि स्थाप्य चोक्तवच्चाष्टमङ्गलम् ।
पश्चात्तु शिल्पिभिः प्राज्ञैः पादप्रक्षालनं क्रियेत् ॥
विध्युक्ताचमनं कुर्यात्सकलीकरणं क्रमात् ।
ब्रह्मादीनां च देवानां तत्तत्स्वनाममन्त्रकैः ।
प्रणवादिनमोऽन्तेन क्रमादाराधयेत्पुनः ॥
धूपदीपं ददेत्प्राज्ञो मध्यकुम्भस्य मध्यमे ।
आराध्य गन्धपुष्पैश्च भुवनादिपतिं जपेत् ॥
घृतगुडशस्यदधिक्षीरान्नं वा निवेदयेत् ।
धूपदीपं दद्यात्ताम्बूलादि निवेदयेत् ॥
दर्शयेद्धेनुमुद्रादीन् गीतादिनृत्तघोषणैः ।
तदग्रे स्थपतिः प्राज्ञो होमं कुर्यात्ततः क्रमात् ॥
समिदाज्यचरुलाजप्रत्येकमष्टोत्तरशताहुतिः ।
शुद्धतोयेन सङ्ख्यया पञ्चविंशतिरेव वा ॥
हृल्लेखं बीजमुच्चार्य स्वाहान्तं प्रणवान्तकम् ।
बिम्बं गायत्रीमन्त्रेण पूर्णाहुतिं च कारयेत् ॥
अग्निकार्यावसाने तु विधिवद् बिम्बमाश्रयेत् ।
पुण्याहं वाचयित्वा ब्राह्मणैः सह घोषणैः ॥
रत्नशुद्धिं ततः कुर्याद् गन्धपुष्पैरिवार्चयेत् ।
स्थपतिः प्रोक्षयेद् बिम्बं सर्वमङ्गलघोषणैः ॥
धूपदीपं दद्यात् पश्चाद् बिम्बाय गायत्रीमन्त्रतः ।
आराध्य गन्धपुष्पैश्च धेनुमुद्रां प्रदर्शयेत् ॥
नववस्त्रेण गोप्याङ्गं बिम्बस्य नेत्रमालिखेत् ।
सर्वान्दक्षिणहस्तेन स्पर्शयेत्त्वेकचित्तवत् ॥
अक्षिरेखां समालिख्य सव्येऽक्षि कृष्णमण्डलम् ।
ज्योतिर्मण्डलकं ध्यात्वा सौरमन्त्रं समुच्चरेत् ॥
पश्चात्तु वामनेत्रे तु शशिमन्त्रं समुच्चरेत ।
ललाटे लोचनमालिख्याग्निबीजं समुच्चरेत् ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पश्चात्तु स्वर्णलेपेन पयसाज्येन लेपयेत् ।
ततः प्रच्छादनं कुर्याद् वस्त्राङ्गकनकैः सह ॥
पायसं धनधान्यादिराशिं दर्शयेत्पुनः ।
स्थपतिर्वरवेषाढ्यः प्राप्तपञ्चाङ्गभूषणः ॥
श्वेतानुलेपनं लिप्य नववस्त्रोत्तरीयवान् ।
स्वर्णयज्ञोपवीतीश्च सितपुष्पशिवः शुचिः ॥
स्वमूर्त्तिसव्यं चास्ये एव मूलकुम्भं तथोत्तरे ।
अन्यकुम्भानि सर्वाणि धारयेत् परिचारकैः ॥
छत्रचामरसंयुक्तं सर्वमङ्गलघोषणैः ।
हर्म्यप्रदक्षिणं यात्स्वाध्यायघोषणैः सह ॥
तद्बिम्बं च समाश्रित्य सजलेनाभिषेचयेत् ।
अन्येन सर्वकुम्भानां जलेनोपाङ्गादि पूजयेत् ॥
एवं कुम्भान्परिक्षिप्य तत्तसूत्रं समुत्सरेत् ।
नानावस्त्रेण संयुक्तं नानापुष्पैरलङ्कृतम् ॥
गन्धानुलेपनमालिप्य सर्वाभरणभूषितम् ।
धूपदीपं दद्यात् पश्चान्नृत्तगीतादिघोषणैः ॥
मूर्धादिप्राणपर्यन्तं मातृकाक्षरं न्यसेत् ।
पादादिऊर्ध्वपर्यन्तं पर्यायादि चाक्षरं न्यसेत् ॥
अष्टत्रिंशत्कलाः सर्वाः तत्तङ्गानि विन्यसेत् ।
अङ्गपादैः करैर्वक्त्रं करणानि च विन्यसेत् ॥
पश्चात्तु मूलमन्त्रेण समध्यानपरायणः ।
आराध्य गन्धपुष्पैश्च धूपदीपं दद्यात्पुनः ॥
पश्चात्तु ताम्बुलादीनि नैवेद्यानि निवेदयेत् ।
ब्राह्मणश्चाक्षतैः प्रोक्ष्य कुर्यात्तु स्वस्तिघोषणैः ॥
नृत्तगीतादिमुद्राभिश्च दर्शयेच्छिल्पिवित्तमः ।
नयनोन्मीलनं प्रोक्तं पश्चाद् ग्रामप्रदक्षिणम् ॥
लक्षणोद्धारमेवोक्तमुक्तवद् रेखया लिखेद् ।
प्रतिमा लोहजा प्रोक्ता तथा रत्नं तु विन्यसेत् ॥
शिलालिङ्गं तु बिम्बानां यत्तत्कर्मावसानके ।
स्थापनात्पूर्वके रत्नविन्यासं कारयेद् बुधः ॥
पीठं तस्य च मध्ये तु नवकोष्ठं प्रकल्पयेत् ।
पद्मरागं तु तन्मध्ये वज्रं चेन्द्रपदे न्यसेत् ॥
प्रवालं चाग्निकोष्ठे तु महानीलं यमे तथा ।
वैडूर्यं न्यसेन्नैर्ऋत्ये मरतकं पश्चिमे तथा ॥
वायव्ये पुष्परागं च मौक्तिकं तु कुबेरके ।
इन्द्रनीलं तु चेशे तु विन्यसेद् विधिवित्तमः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स्थपतिः स्थापकश्चोभौ स्थापयेद् बिम्बलिङ्गकम् ।
एवं तु रत्नविन्यासं शेषमङ्गं यथोक्तवत् ॥
हृदयकमलमध्ये दीपवत्तत्परं स्यात् ।
कमलजहरिहरादिदेवतानां च सर्वम् ॥
विधिमिह सकलरूपं च चक्षुरुन्मीलनं च ।
कृतिमिति चाखिलमुक्तं मानसारं पुराणैः ॥
पितामहेन्द्रप्रमुखैः समस्तैः ।
देवैरिदं शास्त्रवरं पुरोदितम्
तस्मात्समुद्धृत्य हि मानसारम्
शास्त्रं कृतं लोकहितार्थमेतत् ॥

ल. प्रतिमायां रसोन्मेषः——रस-चित्राणि

अ. रसाः

स०सू० ८२.१-१४

रसानामथ वक्ष्यामो दृष्टीनां चेह लक्षणम् ।
तदायत्ता यतश्चित्रे भावव्यक्तिः प्रजायते ॥
शृङ्गारहास्यकरुणा रौद्रप्रेयोभयानकाः ।
वीर (प्रत्ययाक्षौ?) च वीभत्सश्चाद्भुत स्तथा ॥
शान्तश्चैकादशेत्युक्ता रसाश्चित्रविशारदैः ।
निगद्यते क्रमेणैषां सर्वेषामपि लक्षणम् ॥
सभ्रूकम्प (कटीक्षपेच?) तथा प्रेमगुणान्वितः ।
यत्रेष्टललिताता चेष्टा स **शृङ्गारो** रसः स्मृतः ॥
विकासिललितापाङ्गो मृदु च स्फुरिताधरः ।
लीलया सहितो यश्च स **हास्यो** रस उच्यते ॥
अश्रुक्लिन्नकपोलान्तः शोकसङ्कुचितेक्षणः ।
चित्तसन्तापसंयुक्तः प्रोच्यते **करुणो** रसः ॥
निर्मार्जितललाटान्तः संरक्तोद्वृत्तलोचनः ।
दन्तदष्टाधरोष्ठो यः स **रौद्रा** रस उच्यते ॥
अर्थलाभसुतोत्पत्तिप्रियदर्शनहर्षजः ।
सञ्जातपुलकोद्भेदो रसः **प्रेमा** स उच्यते ॥
वैरिदर्शनवित्रासससम्भ्रमोद्भ्रान्तलोचनः ।
हृदि संक्षोभयोगाच्च रसो ज्ञेयो **भयानकः** ॥
(अष्टावष्टम्भसमेर्था ?) सूत्रसङ्कुचितानतः ।
धैर्यवीर्यबलोत्पन्नः स **वीरस्तु** रसः स्मृतः ॥
(इषदुप्तसित्तत्र कस्तच्च ?) स्तिमितितारकः ।

टि०—इह वीरादनन्तरयोर्द्वयोरसयोर्लक्षणं लुप्तम्

असम्भाव्यं विलोक्यार्थम**द्भुतो** जायते रसः ॥
अविकारैः प्रसन्नैश्च भ्रूनेत्रवदनादिभिः ।
अरागाद् विषयेषु स्याद् यः स **शान्तो** रसःस्मतः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

इत्येते चित्रसंयोगे रसाः प्रोक्ताः सलक्षणाः ।
मानुषाणि पुरस्कृत्य सर्वसत्वेषु योजयेत् ॥

ब. रस-दृष्टयः
स० सू० ८२. १४-३५

अथ दृष्टीरमिदध्यो ललिता हृष्टा विकासिता विकृता ।
भ्रकुटी विभ्रमसंज्ञा संकुचिता (छवितनाग्रीव?) ॥
ऊर्ध्वगता योगिन्यथ दीना दृष्टा च विह्वला चैव ।
स्याच्छङ्किताभिधाना (विविख्याव?) जिह्मा च ॥
मध्यस्थेति तथान्या स्थिरेति चाष्टादशैवमुद्दिष्टाः ।
एता दृशोऽथ लक्षणमेतासामुच्यते क्रमशः ॥
विकसित (प्रगल्लाससम्भ्रमत्र?) कटाक्षविक्षेपा ।
शृङ्गाररसोद्भूता दृष्टिर्ललितेति विज्ञेया ॥
प्रियदर्शने प्रसन्ना प्रोद्गतरोमाञ्चविकसितापाङ्गा ।
(प्रस्तरसासि?) जाता हृष्टा दृष्टिः समाख्याता ॥
विकसितनयनप्रान्ता विकासितापाङ्गनयनगण्डतला ।
क्रीडाकारयुतान्या हास्यरसे स्याद् विकासिता दृष्टिः ॥
विख्याता प्रीतिविकारि (?) व्यक्तभया भ्रान्त तारका या च ।
ज्ञेया (विकृत्यकारैः सारैच ?) भयानका दृष्टिः ॥
दीप्तोर्ध्वतारकाताम्रपतता मन्ददर्शना ।
दृष्टिरूर्ध्वं निविष्टा तु भ्रकुटिः परिकीर्तिता ॥
सत्वस्था दृढलक्ष्मा ससौष्ठव व्यक्ततारका सौम्या ।
(विप्रत्यपरजालाता?) दृष्टिः स्याद् विभ्रमा नाम ॥
मन्मथमदेन युक्ता स्पर्शरसोन्मीलताक्षिपुटयुग्मा ।
सुरतसुखानन्दयुता सङ्कुचिता नाम दृष्टिराख्याता ॥
निर्विकारा क्वचित् तावन्नासिकाग्रावलोकिनी ।
योगिनी नाम सा दृष्टिस्तत्वे चित्तस्य योजनात् ॥
अर्धस्रस्तोत्तरपुटा किञ्चित् संरुद्धतारका ।
मन्दसञ्चारिणी सास्रा शोके दीनाभिधीयते ॥
संस्थिते तारके यस्याः स्थिरा विकसिता तथा ।
सत्वमुद्गिरती दृष्टा दृष्टिरुत्साहसम्भवा ॥
म्लानभ्रूपुटपक्ष्मा या शिथिला मन्दचारिणी ।
(काम?) प्रविष्टतारा च विह्वला नाम सा स्मृता ॥
किञ्चिच्चला स्थिरा किञ्चिदुत्ताना तिर्यगायता ।
मूढा चकिततारा च शङ्किता दृष्टिरिष्यते ॥
आनिकुञ्चितपक्ष्मा या पुटैराकुञ्चिता तथा ।
‥ ‥ ‥तारा च कुञ्चिता दृष्टिरुच्यते ॥
लम्बितार्धपुटा तिर्यग्रूक्षेक्षणा शनैः ।
निगूढा गूढतारा च जिह्मा दृष्टिरुदाहृता ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ऋजुतारा ऋजुपुटा प्रसन्ना रागवर्जिता ।
त्यक्तादरा च विषये **मध्यस्था** दृष्टिरुच्यते ॥
समतारा समपुटा समभ्रूरविकारिणी ।
(उपगारा?)विहीना च **स्थिरा** दृष्टिःप्रकीर्तिता ॥

टि०—प्रतिमाकलायां भावाभिनिवेशं रस-परिपाकञ्चाधिकृत्य समराङ्गणे यथा

हस्तेन सूचयन्नर्थं दृष्टया च प्रतिपादयन् ।
सजीव इति दृश्येत् सर्वाभिनयदर्शनात् ॥
आङ्गिके चैव चित्रे च प्रतिमासाधनमुच्यते ।
(भवेदत्रायतं?) स्तस्मादनयोश्चित्रमाश्रितम् ॥
प्रोक्तं रसानामिदमत्र लक्ष्म
दृशां च संक्षिप्ततया तदे (त्ये?त्) ।
विज्ञाय चित्रं लिखतां नराणां
न संशयं याति मनःकदाचित् ॥

स. रस-चित्राणि
वि० ध०

शृंगारहासकरुणवीररौद्रभयानकाः ।
वीभत्साद्भुतशान्ताश्च नवचित्ररसाः स्मृताः ॥
तत्र यत्कांतिलावण्यलेखामाधुर्यसुन्दरम् ।
विदग्धवेशाभरणं शृंगारे तु रसे भवेत् ॥
यत्कुब्जवामनप्रायमीषद्विकटदर्शनम् ।
वृथा च हस्तं सकोच्य तत्स्याद्धास्यकरं रसे ॥
याञ्चाविरहासन्त्यागविक्रयव्यसनादिषु ।
अनुकम्पितकं यत्स्याल्लिखेत्करुणारसे ॥
पारुष्यविकृतिक्रोधविषस्त्यर्था न दूषणम् ।
दीप्रशस्त्राभरणवत्कृतं रौद्ररसे भवेत् ॥
प्रतिज्ञागर्भशौर्यादिष्वर्थेष्वौदार्यदर्शनम् ।
सस्मयं सभ्रकुटिवद्वीरं वीररसेऽद्भुतम् ॥
दुष्टदुर्दर्शनोन्मत्तहिंस्रव्यापादकादि यत् ।
तत्स्याद् भयानकरसे प्रयोगे चित्रकर्मणः ॥
श्मशानगर्हितं घातकरणं स्थानदारुणम् ।
यच्चित्रं चित्रवच्छ्रेष्ठं तद्वीभत्सरसे भवेत् ॥
यदा विनीतरोमाञ्चचिन्तां तार्क्ष्यमुखानतम् ।
प्रदर्शयति चान्योऽन्यं तदद्भुतरसाश्रयम् ॥
यद्यत्सौम्याकृतिध्यानधारणासनबन्धनम् ।
तपस्विजनभूयिष्ठं तत्तु शान्ते रसे भवेत् ॥
शृंगारहास्यशान्त्याख्या लेखनीया गृहेषु ते ॥
परशेषा न कर्तव्या कदाचिदपि कस्यचित् ।
देववेश्मनि कर्तव्या रसाः सर्वे नृपालये ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

राजवेश्मनि नो कार्या राज्ञां वासगृहेषु ते ।
सभावेश्मसु कर्तव्या राज्ञां सर्वरसागृहे ॥
वर्जयित्वा सभां राज्ञो देववेश्म तथैव च ।
गृद्ध श्मशानकरुणामृत्दुःखार्तकुत्सितान् ॥
अमङ्गल्यांश्च न लिखेत्कदाचिदपि वेश्ममु ।
निधिश्रृंगान्वृषान्राजन्निधिहस्तान्नताङ्गजान् ॥
निधिर्विद्याधरा राजनृषयो गरुडस्तथा ।
हनूमांश्च सुमङ्गल्या ये लोके सुप्रकीर्तिताः ॥
लिखितव्या महाराज गृहेषु सततं नृणाम् ।
चित्रकर्म न कर्तव्यमात्मना स्वगृहे नृप ॥
दौर्बल्यं स्थूलरेखत्वमविभक्तत्वमेव च ।
वर्णानां सङ्करश्चात्र चित्रदीपाः प्रकीर्तिताः ।
स्थानप्रमाणं भूलम्भो मधुरत्वं विभक्तता ।
सादृश्यं क्षयवृद्धी च गुणाष्टकमिदं स्मृतम् ॥
स्थानहीनं गतरसं शून्यदृष्टिमलीमसम् ।
चेतनारहितं वा स्यात्तदशस्तं प्रकीर्तितम् ॥
लसतीव च भूलम्बो विम्यतीव तथा नृप ।
हसतीव च माधुर्यं सजीव इव दृश्यते ॥
सश्वास इव यच्चित्रं तच्चित्रं शुभलक्षणम् ।
हीनाङ्गं मलिनं शून्यं बद्धव्याधिभयाकुलैः ॥
मृतं प्रकीर्णकेशैश्च सुमङ्गल्यैर्विवर्जयेत् ।
प्रतीतं च लिखेद्धीमान्नाप्रतीतेः कथञ्चन ॥
शास्त्रज्ञैः सुकृतैर्दक्षैश्चित्रं हि मनुजाधिप ।
श्रियमावहयति क्षिप्रमलक्ष्मीं चापकर्षति ॥
निर्णेजयति चोत्कण्ठां निरुणद्धयागतं शुभम् ।
शुद्धां प्रथयति प्रीतिं जनयत्यतुलामपि ॥
दुःस्वप्नदर्शनं हन्ति प्रीणाति गृहदैवतम् ।
न तु शून्यमिवाभाति यत्र चित्रं प्रतिष्ठितम् ॥
………………………दकर्णं चाप्यनलङ्कृतम् ।
शल्यविद्धं च वृद्धं च यः करोति स चित्रवित् ॥
तरङ्गाग्निशिखाधूमं वैजयन्त्यस्वरादिकम् ।
वायुगत्या लिखेद्यस्तु विज्ञेयोऽस्ति मत्तचित्रवित् ॥
सुप्तं च चेतनायुक्तं मृतं चैतन्यवर्जितम् ।
निम्नोन्नतविभागं च यः करोति स चित्रवित् ॥
एतेषां खलु सर्वेषामानुलोम्यं प्रशस्यते ।
सम्मुखत्वमथैतेषां चित्रे यत्नाद्विवर्जयेत् ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

यथाचित्रं तथैवोक्तं खातपूर्वं नराधिप ।
सुवर्णरूप्यताम्रादि तच्च लोहेषु दर्शयेत् ।
शिलादारुषु लोहेषु प्रतिमाकरणं भवेत् ।
अनेनैव विधानेन यथा चित्रिमुदाहृतम् ॥

टि०—प्रतिमासु वर्णविन्यासोऽपि यथा शुक्रनीतिसारे —

दिव्याभरणवस्त्राढ्यां दिव्यवर्णक्रियां सदा ।
श्वेतपीतारक्तकृष्णपाषाणैर्युगभेदतः ॥
प्रतिमां कल्पयेच्छिल्पी यथा रूच्यपरैः स्मृता ।
श्वेता स्मृता सात्विकी तु पीता रक्ता तु राजसी ॥
तामसी कृष्णवर्णा तु ह्यु क्तलक्ष्मयुता यदि ।
सौवर्णी राजसी ताम्री रैतिकी वा कृतादिषु ॥
शाङ्करी श्वेतवर्णा वा कृष्णवर्णा तु वैष्णवी ।
सूर्यशक्तिगणेशानां ताम्रवर्णा स्मृतापि च ॥
लोहसीसमयी वापि यथोद्दिष्टा स्मृता बुधैः ।

ब. प्रतिमा-प्रतिष्ठापनम्

अ. पञ्चधा प्रतिष्ठा
ईशा० गु० प० ४५

लिङ्गानां निष्कलादीनां प्रतिष्ठा पञ्चधा स्मृता ।
प्रतिष्ठा प्रतिष्ठापनं तद्वत् स्थितस्थापनमित्यपि ॥
उत्थापनास्थापने च प्रथक् तल्लक्ष्म लिख्यते ।
यत्र ब्रह्मशिलायां तल्लिङ्गमादौ निधाय तु ॥
क्रियते पिण्डिकायोगस्तां **प्रतिष्ठां** प्रचक्षते ।
स्थापनं बाणलिङ्गानामार्षाणां च स्वयम्भुवाम् ॥
रत्नहेमादिलिङ्गानामेका चेत् पिण्डका तदा ।
स्थितस्थापनमुद्दिष्टं जीर्णे **चोत्थापनं** भवेत् ॥
आस्थापनं स्याद् व्यक्तानां विष्णवादीनां च तत् तथा ।

ब. प्रतिष्ठा-विधिः
बृ० सं० ६०

दिशि सौम्यायां कुर्यादधिवासनमण्डपं बुधः प्राग्वा ।
तोरणं चतुष्टययुतं शस्तद्रुमपल्लवच्छन्नम् ॥
पूर्वे भागे चित्राः स्रजः पताकाश्च मण्डपस्योक्ताः ।
आग्नेय्यां दिशि रिक्ताः कृष्णाःस्युर्याम्यनैर्ऋतयोः ॥
श्वेता दिश्यपरस्यां वायव्यायां तु पाण्डुरा एव ।
चित्राश्चोत्तरपार्श्वे पीताः पूर्वोत्तरे कार्याः ॥
आयुःश्रीबलजयदा दारुमयी मृण्मयी तथा प्रतिमा ।
लोकहिताय मणिमयी सौवर्णी पुष्टिदा भवति ॥
रजतमयी कीर्तिकरी प्रजाविवृद्धिं करोति ताम्रमयी ।
भूलाभं तु महान्तं शैली प्रतिमाऽथवा लिङ्गम ॥
शंकूपहता प्रतिमा प्रधानपुरुषं कुलं च घातयति ।
श्वभ्रोपहता रोगानुपद्रवांश्चाक्षयान् कुरूते ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मण्डपमध्ये स्थण्डिलमुपलिप्यास्तीर्य सिकतयाऽथकुशैः ।
भद्रासनकृतशीर्षोपधानपादां न्यसेत्प्रतिमाम् ।।
प्लक्षाश्वत्थोदुम्बरशिरीषवटसम्भवैः कषायजलैः ।
मङ्गलसंज्ञिताभिः सर्वौषधिभिः कुशाद्याभिः ।।
द्विपवृषभोद्धृतपर्वतवल्मीकसरित्समागमतटेषु ।
पद्मसरस्सु च मृद्भिः सपञ्चगव्यैश्च तीर्थजलैः ।।
पूर्वशिरस्कां स्नातां सुवर्णरत्नाम्बुभिश्च ससुगन्धैः ।
नानातूर्यनिनादैः पुण्याहैर्वेदनिर्घोषैः ।।
ऐन्द्र्यां दिशीन्द्रलिङ्गा मन्त्राः प्राग्दक्षिणेऽग्निलिङ्गाश्च ।
जप्तव्या द्विजमुख्यैः पूज्यास्ते दक्षिणाभिश्च ।।
यो देवः संस्थाप्यस्तन्मन्त्रैश्चानलं द्विजो जुहुयात् ।
अग्निनिमित्तानि मया प्रोक्तानीन्द्रध्वजोच्छ्राये ।।
धूमाकुलोऽपसव्यो मुहुर्मुहुर्विस्फुलिङ्गकृन्नशुभः ।
होतुः स्मृतिलोपो वा प्रसर्पणं वाशुभं प्रोक्तम् ।।
स्नातामभुक्तवस्त्रां स्वलंकृतां पूजितां कुसुमगन्धैः ।
प्रतिमां स्वास्तीर्णायां शय्यायां स्थापकः कुर्यात् ।।
सुप्तां सुनृत्यगीतैर्जागरणैः सम्यगेवमधिवास्य ।
दैवज्ञसम्प्रदिष्टे काले संस्थापनं कुर्यात् ।।
अभ्यर्च्य कुसुमवस्त्रानुलेपनैः शंखतूर्यनिर्घोषैः ।
प्रादक्षिण्येन नयेदायतनस्य प्रयत्नेन ।।
कृत्वा बलिं प्रभूतं सम्पूज्य ब्राह्मणांश्च सभ्यांश्च ।
दत्वा हिरण्यशकलं विनिक्षिपेत्पिण्डिका श्वभ्रे ।।
स्थापकदैवज्ञद्विजसभ्यस्थपतीन् विशेषतोऽभ्यर्च्य ।
कल्याणानां भागी भवतीह परत्र च स्वर्गी ।।
विष्णोर्भागवतान् मगांश्च सवितुः शम्भोः सभस्मद्विजान्,
मातॄणामपि मण्डलक्रमविदो विप्रान्विदुर्ब्रह्मणः ।
शाक्यान् सर्वहितस्य शान्तमनसो नग्नान् जिनानां विदु-
र्ये यं देवमुपाश्रिताः स्वविधिना तैस्तस्य कार्या क्रिया ।।
उदगयने सितपक्षे शिशिरगभस्तौ च जीववर्गस्थे ।
लग्ने स्थिरे स्थिरांशे सौम्यैर्धीधर्मकेन्द्रगतैः ।।
पापैरुपचयसंस्थैर्ध्रुवमृदुहरितिष्यवायुदेवेषु ।
विकुजे दिनेऽनुकूले देवानां स्थापनं शस्तम् ।।
सामान्यमिदं समासतो लोकानां हितदं मया कृतम् ।
अधिवासनसंनिवेशने सावित्रे पृथगेव विस्तरात् ।।

समाप्तः प्रथमो खण्डः

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

★

द्वितीये खण्डे

प्रथमे पटले	त्रिमूर्त्यादि-ब्राह्म-प्रतिमा-लक्षणम्
द्वितीये ,,	वैष्णव-प्रतिमा-लक्षणम्
तृतीये ,,	शैव-प्रतिमा-लक्षणम्
चतुर्थे ,,	गाणपत्य-प्रतिमा-लक्षणम्
पञ्चमे ,,	देवी-प्रतिमा-लक्षणम्
षष्ठे ,,	सौर-प्रतिमा-लक्षणां दिग्पालाश्च
सप्तमे ,,	यक्ष-विद्याधर-भक्त-मुनि-वसु-मरुद्गण-पितृगणादीनां प्रतिमा-लक्षणम्
अष्टमे ,,	जैन-प्रतिमा-लक्षणं बौद्ध-प्रतिमा-लक्षणञ्च

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

द्वितीयो खण्डः

प्रतिमा-लक्षणम्

★

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

त्रिमूर्त्यादि-ब्राह्म-प्रतिमा-लक्षणम्

(i) ब्रह्म-विष्णु-महेश्वराः त्रिमूर्ति-लक्षणम्

अ. शब्द० चि० 'एकमूर्तिरपि भिन्नरूपिणी या जगज्जनन-पालन-क्षये'

ब. वि० ध० ब्राह्मी तु राजसी मूर्तिस्तस्य सर्वप्रवर्तनी ।
सात्विकी वैष्णवी ज्ञेया संसारपरिपालिनी ।।
तामसी च तथा रौद्री ज्ञेया संहारकारिणी ।

(ii) हरि-हर-पितामहः एकपीठसमारूढं एकदेहनिवासिनम् ।
अ० पु० २१३.३०-३१ षड्भुजं च चतुर्वक्त्रं सर्वलक्षणसंयुतम् ।।
अक्षसूत्रं त्रिशूलं च गदां चैव तु दक्षिणे ।
कमण्डलुं च खट्वाङ्गं चक्रं बामभुजे तथा ।।

टि०—अपराजित-पृच्छायां ब्रह्म-विष्णु-महेशानां त्रिमूर्तिमन्तरेण अन्येषामपि त्रिमूर्तिः चतुर्मूतिश्चापि संकीर्तितास्ति ।

(iii) चन्द्रार्क-पितामहः षड्भुजं च चतुर्वक्त्रं सर्वाभरणभूषितम् ।
अ० पु० २१३. ३५-३६ कमण्डलुं चाक्षसूत्रमुभयोः एकदृक्करम् ।।
मृणालमूर्ध्वकरयोः कर्त्तव्यं शुभलक्षणम् ।
सर्वाभरणसंयुक्तं सर्वकामफलप्रदम् ।।

(iv) हरि-(सूर्योपि) हर-हिरण्यगर्भः चतुर्वक्त्रं चाष्टबाहुं चतुष्कैकनिवासनम् ।
ऋज्वागतो मुखःकार्यः पद्म-हस्तो दिवाकरः ।।
अ० पु० २१३. ३२-३४ खट्वाङ्गत्रिशूलहस्तो रुद्रो दक्षिणतः शुभः ।
कमण्डलुं चाक्षसूत्रमपरे स्यात्पितामहः ।।
वामे तु संस्थितश्चैवं शङ्खचक्रधरो हरिः ।
एवं विधं प्रकर्त्तव्यं सर्वकामफलप्रदम् ।।

(v) नर-नारायण-हरि-कृष्णाः दूर्वाश्यामो नरः कार्यो द्विभुजश्च महाबलः ।
(विष्णुधर्मोत्तरे) नारायणश्चतुर्बाहुर्नीलोत्पलदलच्छविः ।।
तयोर्मध्ये तु वदरी कार्या फलविभूषणा ।
वदर्यामवनौ कार्यावक्षमालाधरावुभौ ।।
अष्टचक्रे स्थितौ याने सूतयुक्ते मनोरमे ।
कृष्णाजिनधरौ दान्तौ जटामण्डलधारिणौ ।।
पादेन चैकेन रथस्थितेन पादेन चैकेन च जानुगेन ।
कार्यो हरिश्चात्र नरेणतुल्यः कृष्णोऽपि नारायणतुल्यमूर्तिः ।।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

द्वि-मूर्ति-लक्षणम्

(i) हर्यर्ध-मूर्तिः

(अ) उत्तरका० ६०.

अर्धनारीश्वरो ह्येवं हर्यर्धं श्रृणुत द्विजाः ।
प्राग्वत्कृत्वा महेशार्धं विष्ण्वर्धमितरत्र च ।।
भुजद्वययुतं शङ्खकटकस्तत्र संमतः ।
पीताम्बरसमोपेतं सर्वाभरणसंयुतम् ।।
हर्यर्धमेवं ब्रह्मादिभागं चैव समाचरेत् ।

(ब) सुप्र० ३४.

पीताम्बरधरं विष्णुं व्याघ्रचर्माम्बरं हरम् ।
विष्णुं किरीटसंयुक्तं शङ्करं तु जटान्वितम् ।।
श्यामवर्णं हरिं चैव शङ्करं युक्तरूपिणम् ।
हरिरर्धमिदं प्रोक्तं भिक्षाटनमतः परम् ।।

(स) पूर्वका०

ईशार्धं पूर्ववत्प्रोक्तं विष्ण्वर्धे मकुटं नयेत् ।
वामे तु द्विभुजोपेतं केयूरकटकोज्वलम् ।।
स्यान्नक्रकुण्डलं कर्णे कटकं शङ्खहस्तकम् ।
अर्धपीताम्बरोपेतं भूषणैर्भूषणार्हकैः ।।
ऋज्वागतं तथा सर्वं चन्द्रशेखरवत्कुरु ।
हरिरर्धमिदं प्रोक्तं सुखासनमथ श्रृणु ।।

(य) शिल्प० २२.

अथ वक्ष्ये हरिहरं सुस्थितं समपादकम् ।
दक्षिणे त्वभयं वामे कटकं तूरूसंयुतम् ।।
परशुं दक्षिणे वामे शङ्खं तु परहस्तके ।
वाममर्धं हरिं कुर्याद्धरमन्यार्धमाचरेत् ।।
क्रमाच्छ्यामप्रवालाभमुभयोचितभूषणम् ।
दक्षिणे व्युग्रदृष्टिस्स्याद्वामे शीतलनेत्रकम् ।।
किञ्चित्प्रकाशितोर्ध्वाक्षं दक्षिणार्धे ललाटके ।
शिरश्चक्रसमायुक्तं तस्य लक्षणमुच्यते ।।
रूद्राङ्गुल विशालं तु तद्भानांशे गतं नम् (?) ।
सुवृत्तं चक्रवत्तन्तु पद्माकृतिरथापि वा ।।
शिरश्चक्रविशालस्य सप्तभागैकभागिकम् ।
शिरश्चक्रस्य नालस्य विस्तारं परिकीर्तितम् ।।
चक्रतारत्रिभागैकं चक्रादाशिरसोऽन्तरम् ।
अग्राल्ललाटपट्टस्य शिरश्चक्रस्य नालकम् ।।
गुणाङ्गुले तु कट्यूर्ध्वे चक्रनालस्थितिर्भवेत् ।
चक्राद् गुणांशमालम्ब्य पुष्पमाला तु मध्यमात् ।।
सर्वेषामपि देवानां देवीनामेवमाचरेत् ।

(र) शिल्प० सं०

देवं हरिहरं वक्ष्ये सर्वपातकनाशनम् ।
दक्षिणे शङ्करस्यार्धमर्धं विष्णोश्च वामतः ।।
बालेन्दुभूषितः कार्यो जटाभारस्तु दक्षिणे ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

नानारत्नमयं द्रव्यं किरीटं वामभागतः ॥
दक्षिणं सर्पराजेन भूषितं कर्णमालिखेत ।
मकराकारक दिव्यं कुण्डलं वामकर्णतः ॥
वरदो दक्षिणो हस्तो द्वितीयश्शूलभृत्तदा ।
कर्तव्यौ वामभागे तु शङ्खचक्रगदाधरौ ॥
दक्षिणे वसनं कार्यं द्वीपिचर्ममयं शुभम् ।
पीताम्बरमयं भव्यं जघनं सव्यमालिखेत् ॥
वामपादः प्रकर्तव्यो नानारत्नविभूषितः ।
दक्षिणाङ्घ्रिः प्रकर्तव्यो भुजगेन्द्रविभूषितः ॥
शीतांशुधवलः कार्यश्शिवभागो विचक्षणैः ।
अतसीपुष्पसंकाशो विष्णोर्भागो विरच्यते ॥

(ल) वि० ध० कार्यं हरिहरस्यापि दक्षिणार्धं सदाशिवः ।
वाममर्धं हृषीकेशश्श्वेतनीलाकृतिः क्रमात् ॥
वरत्रिशूलचक्राब्जधारिणो बाहवः क्रमात् ।
दक्षिणे वृषभः पार्श्वे वामे विहङ्गराट् ॥

(ii) कृष्ण-शङ्कर-मूर्तिः
अ० पु० २१३.२८-२९
कृष्णशङ्करकं वक्ष्ये कृष्णार्धेन तु संस्थितम् ।
कृष्णार्धे मुकुटं कुर्यात् जटाभारं च दक्षिणे ॥
कुण्डलं दक्षिणे कर्णे वामे मकरकुण्डलम् ।
अक्षमालां त्रिशूलं च चक्रं वै शङ्खमेव च ॥

ब्रह्मणो लक्षणम्

(i) वृ० सं० ५८.४१ 'ब्रह्मा कमण्डलुकरश्चतुर्मुखः पङ्कजासनस्थश्च'

(ii) म० पु० 'ब्रह्मा कमण्डलुधरः कर्तव्यः स चतुर्मुखः ।
हंसारूढः क्वचित्कार्यः कचिच्च कमलासनः ।'
'कमडण्लुं वामकरे स्रुवं हस्ते च दक्षिणे ।
वामे दण्डधरं तद्वत् स्रुवश्चापि प्रदर्शयेत्, ॥'
आज्यस्थालीं न्यसेत्पार्श्वे वेदांश्च चतुरः पुनः ।
वामपार्श्वे तु सावित्री दक्षिणे च सरस्वती ॥

(iii) अ० पु० चतुर्मुखश्चतुर्बाहुः बृंहज्जठरमण्डलः ।
लम्बकूर्चो जटायुक्तो ········ ····· ॥
दक्षिणे चाक्षसूत्रञ्च स्रुवं वामे तु कुण्डिकाम् ।
आज्य ··· ··· ··· ··· ··· ··· ··· ··· ··· ··· ॥

(iv) वि० पु० ब्रह्माणं कारयेद् विद्वान् देवं सौम्यं चतुर्भुजम् ।
बद्धपद्मासनं तुष्टं तथा कृष्णाजिनाम्बरम् ॥
जटाधरं चतुर्बाहुं सप्तहंसरथस्थितम्
वामे न्यस्तेतरकरं तस्यैकं दोर्युगं भवेत् ।
एत(क?)स्मिन् दक्षिणे पाणावक्षमाला तथा शुभा।
कमण्डलुं द्वितीये च सर्वाभरणधारिणम् ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सर्वलक्षणयुक्तस्य शान्तिरूपस्य पार्थिव ।
पद्मपत्रदलाग्राभं ध्यानसंमीलितेक्षणम् ॥
अर्च्चायां कारयेदेवं चित्रे वा वास्तुकर्मणि ।

(v) आ० पु० पद्मपत्रासनस्थश्च ब्रह्मा कार्यश्चतुर्मुखः ।
सावित्री तस्य कर्त्तव्या वामोत्सङ्गगता तथा ।

(vi) अंशु० ४९ चतुर्भुजश्चतुर्वक्त्रो हरितालसमप्रभः ।
जटामुकुटसंयुक्तः पिङ्गाक्षस्सर्वभूषणः ॥
कृष्णाजिनोत्तरीयश्च यज्ञसूत्रसमन्वितः ।
शुक्लवस्त्रधरश्शान्तः कटिसूत्रसमन्वितः ॥
शुक्लमाल्यानुलेपश्च कर्णकुण्डलमण्डितः ।
दक्षिणे चाक्षमाला च कूर्च्चं चैव धारयेत् ॥
कमण्डलु कुश(र्श?)वामे दक्षिणे स्रुक्स्रुवौ तलः(?)।
आज्यस्थालीं कुशांचैव(श्चैव?) वामहस्ते तु धारयेत् ॥
अभयवरदोपेतौ पूर्वहस्तौ द्विजोत्तम ! ।
आसने तूभयाङ्घ्रिश्च शाययेत्तु ततः परम् ॥
मेढ्रमूलोपरिष्टात्तु वामहस्तोर्ध्ववक्त्रकम् ।
सव्यहस्तं च तस्योर्ध्वे तदन्यास्यं च कारयेत् ॥
दक्षिणे चाक्षमालां च वामहस्ते कमण्डलुम् ।
सरस्वती दक्षभागे सावित्री वामभागके ॥
आसीनो वा स्थितो वापि पद्म पीठोपरिस्थितः ।

(vii) सुप्र० ३४ चतुर्मुखं चतुर्बाहुं कमण्डल्वक्षधारिणम् ।
रक्तवर्णजटायुक्तं कृत्वा ब्रह्माणमुज्ज्वलम् ॥
सावित्रीं वामपार्श्वे तु सर्वालङ्कारसंयुताम् ।
एवं चतुर्मुखं कुर्य्याज्जगत्सृष्टिकरं शुभम् ॥

(viii) मान० ५१ चतुर्भुजं चतुर्वक्त्रं द्विपादं चाष्टलोचनम् ।
अष्टकर्णसमायुक्तं तनुश्चैकाकृतिस्तथा ॥
उत्तमं दशतालेन मानयेत्त्वङ्गमानकम् ।
स्थानकं चासने वापि चीरबेरधरं तथा ॥
वरदाभयहस्तं च जटामुकुटमण्डितम् ।
कुण्डिका चाक्षमाला च वामे वामे करे क्रमात् ॥
स्रुक्स्रुवधारणं वापि प्राग्वरदाभयान्वितम् ।
मकरलाञ्छितं पुष्पं कुण्डलं वाथ कर्णयोः ॥
यज्ञसूत्रोत्तरीयादि मात्रादोदरबन्धनम् ।
हारोपग्रीवसंयुक्तं बाहुमालाविभूषितम् ॥
केयूरकटकाद्यैश्च कुर्यात्तु मणिबन्धनम् ।
कटकत्रयसंयुक्तं नलकाकटकान्वितम् ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कटिसूत्रादिपट्टं स्या।न्नीव्यं चलनसंयुतम् ।
रत्नाङ्गुलीयकौ हस्तौ पादं जालसरत्नकम् ।।
ललाटे वृत्ततिलकं स्याच्चन्दनागरूमेव च ।
सर्वाङ्गं हेमवर्णं स्यान्नलकान्तं तु चीरयुक् ।
पार्श्वयोः शक्तिको।पेतं दक्षिणे तु सरस्वती ।।
वामपार्श्वे तु सावित्री सर्वाभरणभूषितम् ।।
एवं पितामहं प्रोक्तं कुर्याच्छास्त्रविद् बुधः ।।

(ix) शिल्प० २५. लिखेच्चतुर्मुखं देवं चतुर्बाहुं शुभेक्षणम् ।
रत्न-कुण्डल-संयुक्तं लम्बकूर्चोपरि स्थितम् ।।
कृष्णाजिनधरं गौरं शुक्लाम्बरविराजितम् ।
दक्षिणं वरदं हस्तं तत्रान्यांशुभ(न्यंस्रुव?)धारिणम् ।।
कमण्डलुधरं वामं तथान्यं संयुतं शु (स्रु) चा ।
बिभ्राणं चतुरो वेदान् पुरतश्चास्य विन्यसेत् ।।
वामे पार्श्वे तु सावित्रीं दक्षिणे तु सरस्वतीम् ।
आज्यस्थालीं पुरोभागे महिषीश्च(महर्षींश्च)समन्ततः ।।
हंसारूढं लिखेत्क्वापि क्वचिच्च कमलासनम् ।
स्रष्टारं सर्वलोकानां ब्रह्माणं परिकल्पयेत् ।।

(x) स० सू० ७७. ब्रह्मानलार्चिःप्रतिमः कर्त्तव्यः सुमहाद्युतिः ।।
स्थूलाङ्गः स्थूलपुष्पश्च श्वेतवेष्टनवेष्टितः ।
कृष्णजिनोत्तरीयश्च श्वेतवासाश्चतुर्मुखः ।।
दण्डः कमण्डलुश्चास्य कर्त्तव्यो वामहस्तयोः ।
अक्षसूत्रधरस्त(द्वा?द्वद)मौञ्ज्या मेखलया वृतः ।।
का(र्या?र्यो)वर्धयमानस्तु जगद् दक्षिणपाणिना ।
एवं कृते तु लोके (शे) क्षेमं भवति सर्वतः ।।
ब्राह्मण।(र्थ !) वर्धन्ते सर्वकामैर्न संशयः ।
यदा विरूपा दीनां वा कृशा रौद्रा कृशोदरी ।।
ब्रह्मणोऽर्चा भवेद वर्णा(!)सा नेष्टाभयदायिनी ।
निहन्ति कारकं रौद्रा दीनरूपा च शिल्पिनम् ।।
कृशा व्या(धि?धिं) विनाशं च कुर्यात् कारयितुः सदा ।
कृशोदरी तु दुर्भिक्षं विरूपा चानपत्यताम् ।।
एतान् दोषान् परित्यज्य कर्त्तव्या सा सुशोभना ,
ब्रह्मणो(वा?र्चा)विधानज्ञैः प्रथ(मो?मे)यौवने स्थिता ।।

(xi) म० पु० २१४. ऋग्वेदादिविभेदने कृतादियुगभेदतः ।
विप्रादिवर्णभेदने चतुर्वक्त्रश्चतुर्भुजः ।।
ब्रह्मा पितामहश्चैव विरञ्चिः कमलासनः ।
एकैकस्य यथा प्रोक्ता मूर्तिः स्यात्परमेष्ठिनः ।।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कमलासनः—अक्षसूत्रं करे दक्षे शुचिस्तस्योर्ध्वतः स्थिता ।
पुस्तकं वामहस्ते च तस्याधस्तात्कमण्डलुः ॥
कमलासनमूर्तिः स्यात्सर्ववर्णहितप्रदा ।
कलौ युगे भवेच्चैवं कर्तृकप्रवरादिषु ॥
विरञ्चिः—अक्षसूत्रं पुस्तकं च शुचिश्चैव कमण्डलुः ।
विरञ्चेः सा भवेन्मूर्तिः द्वापरे सुखदायिनी ॥
पितामहः—कमण्डलुश्चाक्षसूत्रं श्रुवाश्च पुस्तकं तथा ।
पितामहस्य मूर्तिः स्यात् त्रेतायां सुखदायिनी ॥
ब्रह्मा—पुस्तकं चाक्षसूत्रं च श्रुवाश्चैव कमण्डलुः ।
ब्रह्मणः सा भवेन्मूर्तिः कृते तु सुखदायिनी ॥
ब्रह्मा सुवक्त्रः सुभावः कर्णसंस्थितकुण्डलः ।
किरीटमालाशोभाढ्य समांसगलकेशकः ॥
तप्तकाञ्चनवर्णाभो मणिरत्नहारोज्ज्वलः ।
मुक्ताकटककेयूरसर्वाभरणभूषितः ॥

(xii) रूप० ऋग्वेदादिप्रभेदेन कृतादियुगभेदतः ।
विप्रादिवर्णभेदेन चतुर्वक्त्रं चतुर्भुजम् ॥
दक्षिणाधः करात्स्रष्टा जपमालां तथा स्रुचम् ।
पुस्तं कमण्डलुं धत्ते सकूर्च्चः कमलासनः ॥
अक्षसूत्रं पुस्तकं च धत्ते पद्मं कमण्डलुम् ।
चतुर्वक्त्रा तु सावित्री श्रोत्रियाणां गृहे स्थिता ॥

ब्राह्म-लाञ्छन-रहस्यम्

अरुणं रजसावर्णं तेन पद्माग्रसन्निभः ।
ब्रह्मा देववरो ज्ञेयस्सर्वभूतनमस्कृतः ॥
ऋग्वेदः पूर्ववदनं यजुर्वेदस्तु दक्षिणम् ।
पश्चिमं सामवेद स्यादाथर्वणमथोत्तरम् ॥
ये वेदास्ते मुखा ज्ञेयाश्चतस्रो बाहवःदिशः ।
आप एव जगत्सर्वं स्थावरं जङ्गमं तथा ॥
ताश्च धारयते ब्रह्मा तेन हस्ते कमण्डलुः ।
अक्षमाला विनिर्दिष्टा कालस्तु ब्रह्मणः करे ॥
कलनात्सर्वभूतानां काल इत्यभिधीयते ।
यज्ञो विस्तीर्यते सर्वः शुक्लाशुक्लेन कर्मणा ॥
शुक्लाशुक्लमतो ज्ञेयं वासःकृष्णाजिनं विभोः ।
भूलोकश्च भुवोलोकः स्वर्लोकोऽथ महत्तथा ॥
जनस्तपश्च सत्यं च सप्तलोकाः प्रकीर्तिताः ।
ये लोकास्ते रथे हंसा ब्रह्मणः परेमष्ठिनः ॥
विष्णुनाभी समुत्पन्नं यत्पद्मं सा महीभुजः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मेरुस्तु कर्णिका तस्य विज्ञेया राजसत्तम ॥
सर्वत्र पार्थिवस्थैर्यं ध्यानबन्धमतः स्थितम् ।
पद्मासनेन भगवान्विधत्ते पार्थिवेन तु ॥
आत्मनः परमं धाम रूपहीनं विचिन्तयेत् ।
दृष्टयर्थं जगतामास्ते ध्यानसम्मीलितेक्षणः ॥
तथैवोषधययो राजञ्जगदाभरणकारणाः ।
ब्रह्मणस्ता जटा ज्ञेयः सर्वगस्य महात्मनः ॥
प्रकाशकानि लोकस्य विद्यास्थानानि यानि च ।
तस्याभरणजातानि ज्ञेयानि परमेष्ठिनः ॥

ब्रह्मायतनम्

(i) अ० पृ० १२१. ९-१० आग्नेयां तु गणेशः स्यान्मातृस्थानं च दक्षिणे ।
नैर्ऋत्ये तु सहस्राक्षो जलशायी च वारुणे ॥
उमाशङ्करौ वायव्ये ग्रहाश्चैववोत्तरस्थिताः ।
ईशाने तु श्रियादेवी प्राच्यां तु धणीरधरः ॥

(ii) रूप० जटिलाः श्मश्रुलाः शान्ता आसीना ध्यानतत्पराः ।
कमण्डलवक्ष-सूत्राभ्यां संयुक्ता ऋषयस्स्मृताः ॥
विश्वकर्मा चतुर्बाहुरक्षमालां च पुस्तकम् ।
कं वा (बुं ?) कमण्डलुं धत्ते त्रिनेत्रो हंसवाहनः ॥
आग्नेय्यां तु गणेशस्स्यान्मातृस्थानं च दक्षिणे ।
नैऋत्ये तु सहस्राक्षं वारूण्यां जलशायिनम् ॥
वायव्ये पार्वतीरूद्रौ ग्रहांश्चैवोत्तरे न्यसेत् ।
ऐशान्ये कमलादेवीं प्राच्यां तु धरणीधरम् ॥

ब्रह्मणोऽष्टप्रतीहाराः

अ० पृ० २२०.१-५ ब्रह्मणोऽष्टप्रतीहारान् कथयिष्याम्यनुक्रमात् ।
पुरुपाकारगम्भीराः सुकूर्चा मुकुटोज्ज्वलाः ॥
पद्मं स्रुक् पुस्तकं दण्डः वामे स्यात्सत्यनामकः ।
शस्त्रापसव्ययोगेन दक्षिणे **धर्मको** भवेत् ॥
अक्षपद्मागमा दण्डः वामे चैव **प्रियोद्भवः** ।
दण्डागमस्रुक् फलकं **यज्ञः** स्यात्सर्वकामदः ॥
अक्षसूत्रं गदा खेटं दण्डो **विजयनामकः** ।
अधोहस्तापसव्येन फलयुक् **यज्ञभद्रकः** ॥
अक्षपाशाङ्कुशदण्डा **भवः** स्यात्सर्वकामदः ।
दण्डाङ्कुशपाशपद्मं **विभवः** सर्वशान्तिदः ॥

इति प्रतिमा-लक्षणे प्रथमो पटलः समाप्तः

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

द्वितीयो पटलः

वैष्णव-प्रतिमा-लक्षणम्

टि०—वष्णव-प्रकरणे तत्र प्रतिमा-विज्ञाने लक्ष्ये वैष्णव-प्रतिमानां सप्त वर्गा उपदर्शितास्सन्ति, तदधिकृत्यैव वैष्णव-प्रतिमा-लक्षणान्यत्र समुद्धृतानि भविष्यन्तीति ।

१. साधारण-मूर्तयः

(i) वृ० सं० ५८

कार्योऽष्टभुजो भगवांश्चतुर्भुजो द्विभुज एव वा विष्णुः ।
श्रीवत्साङ्कितवक्षाः कौस्तुभमणिभूषितोरस्कः ॥
अतसीकुसुमश्यामः पीताम्बरनिवसनः प्रसन्नमुखः ।
कुण्डलकिरीटधारी पीनगलोरस्स्थलांसभुजः ॥
खड्गगदाशरपाणिर्दक्षिणतः शान्तिदश्चतुर्थकरः ।
वामकरेषु च कार्मुकखेटकचक्राणि शङ्खश्च ॥
अथ च चतुर्भुजमिच्छति शान्तिद एको गदाधरश्चान्यः ।
दक्षिणपार्श्वे ह्येवं वामे शङ्खश्च चक्रं च ॥
द्विभुजस्य तु शान्तिकरो दक्षिणहस्तोऽपरश्च शङ्खधरः ।
एवं विष्णोः प्रतिमा कर्त्तव्या भूतिमिच्छद्भिः ॥

(ii) वि०ध०तथा रूप०

देवदेवं तथा विष्णुं कारयेद् गरुडस्थितम् ।
कौस्तुभोद्भासितोरस्कं सर्वाभरणधारिणम् ॥
सजलाम्बुदसच्छायं पीतदिव्याम्बरं तथा ।
मुखानि चास्य चत्वारि बाहवो द्विगुणास्तथा ॥
सौम्येन्दुवदनं पूर्वं नारसिंहं तु दक्षिणम् ।
कापिलं पश्चिमं वक्त्रं तथा वाराहमुत्तरम् ॥
तस्य दक्षिणहस्तेषु वाणारिमुसलाभयम् ।
चर्म सीरवराविन्दुर्वामे च वनमालिनः ॥
कार्याणि विष्णोर्धमज्ञ ! वामहस्तेष्वनुक्रमात् ।

(iii) स० सू०

विष्णुर्वैदूर्यसङ्काशः पीतवासाः श्रियावृतः ।
वराहो वामनश्च स्यान्नरसिंहो भयानकः ॥
कार्यो दाशरथी रामो जामदग्न्यश्च वीर्यवान् ।
द्विभुजोऽष्टभुजो वापि चतुर्बाहुररिन्दमः ॥
शङ्खचक्रगदापाणिस्तेजस्वी कान्तिसंयुतः ।
नानारूपस्तु कर्त्तव्यो ज्ञात्वा कार्यान्तरं विभुः ॥
इत्येष विष्णुः कथितः सुरासुरनमस्कृतः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

(iv) अंशु० विष्णुः किरीटमकुटकटिसूत्रविभूषितः ।
पीताम्बरधरस्सौम्यश्चतुर्भुजसमन्वितः ॥
अभयं दक्षिणं हस्तं कटकं वामहस्तकम् ।
परहस्ते तु वामे तु शङ्खं चक्रं च दक्षिणे ॥
पद्मपीठोपरिष्टात्तु सस्यश्यामनिभाकृतिः ।
आसीनो वा स्थितो वापि सव्येऽसव्ये श्रियान्वितः ।
संयुक्तः केवलो वापि कर्त्तव्यं विष्णुमूर्त्तिनम् ॥

(v) सुप्र० ३४ शङ्खचक्रधरं देवं पीताम्बरधरं हरिम् ।
श्रीभूमिसहितं देवं सर्वालङ्कारसंयुतम् ॥
स्थितं वाथ समासीनं शयितं वापि कारयेत् ।

(vi) मान० चतुर्भुजं द्विनेत्रं च किरीटमकुटान्वितम् ।
पीताम्बरधरं युक्तं श्यामवर्णाङ्गशोभितम् ॥
सर्ववक्षःस्थले कुर्यात्तदूर्ध्वे श्रीवत्सलान्छनम् ।
उत्तमदशतालेन चाङ्गमानं च मानयेत् ॥
कटकं वा गदाधरं चोर्व्यामाश्रितमेव वा ।
अथवा वरदहस्तं स्यात्पुरतो वामहस्तके ॥
दक्षिणे त्वभयं पूर्वं सव्ये चापरे चक्रयुक् ।
अपरे वामहस्ते तु पाञ्चजन्यावधारणम् ॥
तत्रामं कर्णपत्रं स्यात्कुर्यान्मकरकुण्डलम् ।
प्रसन्नदवनं तुङ्गं नासि दीर्घाक्षिशोभितम् ॥
हारोपग्रीवसंयुक्तं यज्ञसूत्रोत्तरीयकम् ।
रत्नोदरबन्धं स्याद् बाहुमालाविभूषितम् ॥
कटकं कटिसूत्रं च केयूरं रत्नपूरितम् ।
रत्नाङ्गुलीयकैर्युक्तं पादजालविभूषितम् ॥
नलकान्तं चलान्तं स्यात्पीताम्बरविलम्बिनम् ।
शिरश्चक्रं शिरः पृष्ठे युक्तं सर्वाङ्गभूषणम् ॥
द्वयोर्जङ्घावसानं स्याद् वनमालामनोहरम् ।
एवं तु विष्णुमूर्तिः स्याच्छक्तियुक्ता तु पार्श्वयोः ॥
त्रि(श्री)भूमि दक्षिणे वामे स्थावरे जङ्गमेऽपिवा ।
कुर्यादासनं वापि स्थानकं चापि एव च ॥

(vii) शिल्प० २३ अर्कौघाभं किरीटान्वितमकरलसत्कुण्डलं दीप्तिराज—
त्केयूरं कौस्तुभाढ्यं शबलरुचिरहारं चारूपीताम्बरं च ॥
नानारत्नांशुभिन्नाभरणशतयुजं श्रीधराश्लिष्टपार्श्वं ।
वन्दे दोःसक्तचक्राम्बुरूहदरगदं विश्ववन्द्यं मुकुन्दम् ॥
ध्येयः सदा सवितृमण्डलमध्यवर्ती ।
नारायणः सरसिजासनसन्निविष्टः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

केयूरवान् मकरकुण्डलवान् किरीटी ।
हारी हिरण्मयवपुर्धृतशङ्खचक्रः ॥
धृतशङ्ख+चक्रवराब्जगदाकुलदोः परिघं सितपद्मगतम् ।
वलयाङ्गदहारकिरीटधरं नवकुन्दनिभं प्रणमामि सदा ॥
दुग्धाब्धिद्वीपवर्यप्रविलसितसुरोद्यानकल्पद्रुमाधो
भद्राम्बोजन्मपीठोपरिगतविनतानन्दनस्कन्धसंस्थः ।
दोर्बिभ्रद् रथाङ्गं वरदमथ गदापङ्कजे स्वर्णवर्णे
भास्वन्मौलिर्विचित्राभरणपरिगतः स्याच्छ्रियै वो मुकुन्दः ॥

असाधारण-मूर्तयः

अनन्तशायी, जलशायी वा नारायणः

(i) प० पु०

देवदेवस्तु कर्त्तव्यः शेषसुप्तो द्विबाहुकः ।
एकपादोऽस्य कर्तव्यो लक्ष्म्युत्सङ्गगतः प्रभोः ॥
तथा परश्च कर्तव्यश्शेषभागांकसंस्थितः ।
एकः करोऽस्य कर्तव्यः सव्यजानौ प्रसारितः ॥
कर्तव्यो मूर्धदेशस्थस्तथा तस्यापरः करः ।
नाभीसंभूतकमले सुखासीनः पितामहः ॥
नाले लग्नौ तु कर्तव्यौ पद्मस्य मधुकैटभौ ।
शंखचक्रगदादीनि मूर्तानि परितो न्यसेत् ॥

(ii) वि० ध०

जलमध्यगतः कार्यश्शेषपन्नगतल्पगः ।
फणापुञ्जमहारत्नदुर्निरीक्ष्यशिरोधरः ॥
देवदेवस्तु कर्त्तव्यस्तत्र सुप्तश्चतुर्भुजः ।
तथापरश्च कर्त्तव्यश्शेषभोगाङ्कसंस्थितः ॥
एकपादोऽस्यकर्त्तव्यो लक्ष्म्युत्सङ्गगतः प्रभोः ।
तथापरश्च कर्त्तव्यस्तत्र जानौ प्रसाधितः ॥
कर्त्तव्यो नाभिदेशस्थस्तथा तस्यापरः करः ।
तथैवान्यः करः कार्यो देवस्य तु शिरोधरः ॥
सन्तानमञ्जरी धारो तथैवास्यापरो भवेत् ।
नाभीसरसि सम्भूते कमले तस्य यादव ॥
सर्वपृथ्वीमयो देवः प्राग्वत्कार्यः पितामहः ।
नाललग्नौ च कर्त्तव्यौ पद्मस्य मधुकैटभौ ॥
नृरूपधारीणि भुजङ्गमस्य कार्याण्यथास्त्राणि तथा समीपे ।
एतत्तवाग्रे यदुपुङ्गवोक्तं देवस्य रूपं परमस्य तस्य ॥

(iii) अ० पु० २१९. १-९

अथातः संप्रवक्ष्यामि लक्षणं जलशायिनः ।
शयानः शेषपर्यङ्के शेषं तुल्यो ने धृतिः? ॥
अष्टतालस्तथा यामे तन्मानि धू वृतोद्भवम्? ।
नवतालः पूर्णवृत्ते लिङ्गरूपसुखासनम् ॥
तेनावर्तेन रूपं स्यात् गर्भं कुर्यात् शाश्वतम् ।
एकः शिरोधरो हस्तश्चैको हृत्कमलस्थितः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

गदा वै वामतो हस्ते उर्ध्वे चैव सुदर्शनम् ।
किरीटमालाशोभाढ्यो वनमालाविभूषितः ।।
हारकेयूरसंयुक्तः कुण्डलाभ्यामलङ्कृतः ।
माला तुल्याः सप्त फणाः मुकुटान्ते व्यवस्थितः ।।
भूतामृताः सप्तकुम्भा नवनागकुलान्यथः ।
लक्ष्मीः पादतले लग्ना तार्क्ष्यः करपुटाञ्जलिः ।।
ब्रह्मा च नाभिकमले कमलयोनिसंज्ञकः ।
सप्तलोकाः परिकराः क्रमेण परिकीर्तिताः ।।
दशावताराः कर्तव्याः मन्दरोन्मथनादिकम् ।
एवं विधः प्रकर्तव्यो विष्णुर्वै जलशायिकः ।।
साहाय्ये केशवः कार्यस्त्रिविक्रमदामोदरौ ।
अधोक्षजस्तथैव स्यात् नान्यमूर्तिः प्रशस्यते ।।

(iv) रूप०

सत्पुरुषं शेषतल्पे दक्षो दण्डभुजोऽस्य तु ।
शिरोधरोऽस्य वामस्तु सपुष्पोऽयं जलेशयः ।।
तन्नाभिपङ्कजे धाता श्रीभूमी च शिरोह्निगे ।
निध्यस्त्रादिस्वरूपाणि पार्श्वयोर्मधुकैटभौ ।।

नारायण-वासुदेवः दैविको वासुदेवो वा

(i) अ० पु०

दक्षिणे तु करे चक्रमधस्तात्पद्ममेव च ।
वामे शङ्खं गदाधस्ताद्वासुदेवस्य लक्षणम् ।।
श्रीपुष्टी चापि कर्त्तव्ये पद्मवीणाकरान्विते ।
उरुमात्रोच्छ्रितायामे मालाविद्याधरौ तथा ।।
प्रभामण्डलसंस्थौ तौ प्रभाहस्त्यादिभूषणौ ।
पद्माभं पादपीठं तु प्रतिमास्वेवमाचरेत् ।।

(ii) वि० ध०

एकवक्त्रश्चतुर्बाहुस्सौम्यरूपस्सुदर्शनः ।
पीताम्बरश्च मेघाभस्सर्वाभरणभूषितः ।।
कण्ठेन शुभदेशेन कम्बुतुल्येन राजता ।
वराभरणयुक्तेन कुण्डलोत्तरभूषिणा ।।
अङ्गदीबद्धकेयूरी वनमालविभूषणः ।
उरसा कौस्तुभं विभ्रत्किरीटं शिरसा तथा ।।
शिरः पद्मस्तथैवास्य कर्त्तव्यश्चारुकर्णिकः ।
मध्येन त्रिवलीभङ्गशोभितेन सुचारुणा ।।
स्त्रीरूपधारिणी क्षोणी कार्या तत्पादमध्यगा ।
तत्करस्थाङ्घ्रियुगलो देवः कार्यो जनार्दनः ।
तालान्तरपदन्यासः किञ्चिन्निष्क्रान्तदक्षिणः ।।
अनुदृश्या (?) मही कार्या देवदर्शितविस्मिता ।
देवश्च कटिवासेन कार्यो जान्ववलम्बिना ।।
वनमाला च कर्त्तव्या देव जान्ववलम्बिनी ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

यज्ञोपवीतं कर्त्तव्यं नाभिदेशमुपागतम् ॥
उत्फुल्लकमलं पाणौ कुर्याद्देवस्य दक्षिणे ।
वामपाणिगतं शङ्खं शङ्खाकारं तु कारयेत् ॥
दक्षिणे तु गदादेवी तनुमध्या सुलोचना ।
स्त्रीरूपधारिणी मुग्धा सर्वाभरणभूषिता ॥
पश्यन्ती देवदेवेशं कार्या चामरधारिणी ।
कुर्यात्तन्मूर्ध्नि विन्यस्तं देवहस्तं तु दक्षिणम् ॥
वामभागगतश्चक्रः कार्यो लम्बोदरस्तथो ।
सर्वाभरणसंयुक्तो वृत्तविष्फारितेक्षणः ॥
कर्त्तव्यश्चामरकरो देववीक्षणतत्परः ।
कुर्याद्देवकरं वामं विन्यस्तं तस्य मूर्धनि ॥

संकर्षणः
वासुदेवस्वरूपेण कार्यस्संकर्षणः प्रभुः ।
स तु शुक्लवपुःकार्यो नीलवासा यदूत्तम ! ॥
गदास्थाने च मुसलं चक्रस्थाने च लाङ्गलम् ।
कर्तव्यौ तनुमध्यौ तु नृरूपौ रूपसंयुतौ ॥

प्रद्युम्नः
वासुदेवस्वरूपेण प्रद्युम्नश्च तथा भवेत् ।
स तु दूर्वाङ्कुरश्यामस्सितवासा विधीयते ॥
चक्रस्थाने भवेच्चापो गदास्थाने तथा शरः ।
तथाविधौ तौ कर्त्तव्यौ यथा मुसललाङ्गलौ ॥
चापबाणधरः कार्यः प्रद्युम्नश्च सुदर्शनः ।
राजन्निन्द्रमणिश्यामश्वेतवासा मदोत्कटः ।

अनिरुद्धः
एतदेव तथा रूपमनिरुद्धस्य कारयेत् ।
पद्मपत्राभवपुषो रक्ताम्बरधरस्य तु ॥
चक्रस्थाने भवेच्चर्म गदास्थानेऽसिरेव च ।
चर्म स्याच्चक्ररूपेण प्रांशुः खड्गो विधीयते ॥
चक्रादीनां स्वरूपाणि किंचित्पूर्वं सुदर्शयेत् ।
रम्याण्यायुधरूपाणि चक्रादीन्येव यादव ! ॥
वामपार्श्वगताः कार्या देवानां प्रवरा ध्वजाः ।
सुपताकायुता राजन् ! यष्टिस्थास्ते यथेरितम् ॥

अनिरुद्धसाम्बौ
कर्त्तव्यश्चानिरुद्धोऽपि खड्गचर्मधरः प्रभुः ।
साम्बः कार्यो गदाहस्तस्सुरूपश्च विशेषतः ॥
साम्बानिरुद्धौ कर्त्तव्यौ पद्माभौ रक्तवाससौ ।

(iii) वै० आ० दैविकवासुदेवं सिंहासने समासीनं चतुर्भुजं शंखचक्रधरं श्रीभूम्या सहितं तथा देवस्य दक्षिणवामयोः पूर्वोक्तान्देवान्बलभद्रस्य दक्षिण देवीं रेवतीं प्रद्युम्नस्य दक्षिणो रोहिणीमनिरुद्धस्योषां साम्बस्ये-न्दुकरीं च सहैव स्थापयेत् । एतेषां कौतुकबिम्बं पूर्ववत् ।

31

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

(iv) अ० पृ० २१७

अ. वासुदेवत्रयम्

अथातः सम्प्रवक्ष्यामि विष्णुमूर्तेश्च लक्षणम् ।
मूर्तयो वासुदेवाद्या युगादिवर्णभेदतः ॥
कृते युगे वासुदेवस्त्रेतायां कृष्ण एव च ।
प्रद्युम्नो द्वापरे चैवानिरुद्धश्च कलौ युगे ॥
वासुदेवो भवेद्विप्रे क्षत्रे संकर्षणः शुभः ।
प्रद्युम्नश्च तथा वैश्ये शूद्रे चैवानिरुद्धकः ॥
शुद्धस्फटिकसंकाशं छत्राकारं तु मस्तके ।
दक्षिणे च करे शङ्खस्तस्याधस्ताद् गदा शुभा ॥
वामे चोर्ध्वे तथा चक्रमधः पद्मं सुशोभनम् ।
स्याद्वासुदेवमूर्तिः स्वा पूजनीया द्विजोत्तमैः ॥
रक्तवर्णं दिव्यदेहं मुकुटं चैव मस्तके ।
दक्षिणोर्ध्वे करे शङ्खं तस्याधश्च गदोत्तमा ॥
वामोर्ध्वे तु भवेत् पद्मं तस्याधश्च सुदर्शनम् ।
साङ्कर्षणी भवेन्मूर्तिः क्षत्रियाणां वरप्रदा ॥
पीतवर्णा महातेजः प्रमुखीकृतमस्तका ।
दक्षिणोर्ध्वकरे शङ्खं तस्याऽधश्चक्रमुत्तमम् ॥
वामे कौमोदकी चोर्ध्वे तस्याधः पङ्कजं तथा ।
प्रद्युम्नस्य भवेन्मूर्तिर्वैश्यानां हितकामदा ॥
अतसीपुष्पसंकाशा बालेन्दुकृतमस्तका ।
दक्षिणोर्ध्वे गदा चैव तस्यधाश्चक्रमुत्तमम् ॥
वामोर्ध्वहस्ते शङ्खं च तस्याधः पङ्कजोत्तमम् ।
अनिरुद्धस्य मूर्तिः स्यात् शूद्राणां वरदायिनी ॥
केशवो नारायणश्च माधवो वासुदेवकः ।
त्रिविक्रमो वामनश्च श्रीधरः प्रद्युम्नस्तथा ॥
हृषीकेशः पद्मनाभो दामोदरोऽनिरुद्धकः ।
दक्षहस्तस्याध आद्यं दक्षिणोर्ध्वं पुनस्तथा ॥
वामस्योर्ध्वमधश्चान्ते नाम्ना प्रदक्षिणक्रमः ॥
अथासां सर्वमूर्तीनां शस्त्रभेदाः करक्रमात् ।
नापसव्येन कुर्वीत मूर्तीर्वै विष्णुरूपिकाः ॥
पद्मशङ्खे चक्रगदे केशवे वासुदेवके ।
शङ्खाम्बुजगदाचक्रं नारायणे तत्सम्भवे ॥
गदाचक्रे शंखपद्मे माधवे वासुदेवके ।
सालङ्कारं भवेद्रूपं श्वेतवर्णं तथैव च ॥

ब. संकर्षणादित्रयम्

चक्रं गदा पद्मशङ्खौ गोविन्दे गोपवर्द्धने ।
गदापद्मे शङ्खचक्रे विष्णौ स्युर्जगतीपती ॥
चक्रशङ्खौ पद्मगदे तथा स्युर्मधुसूदने ।
साङ्कर्षणास्त्रयो भेदा विष्णुरूपादिकोद्भवाः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स. प्रद्युम्नादित्रयम् — पद्मं गदा चक्रशंखौ रूपे त्रैविक्रमे तथा ।
शंखचक्रगदापद्मं वामने बलिबन्धने ।।
पद्मं चक्रं गदा शंखं श्रीधरे श्रीनिकेतने ।
प्रद्युम्नस्य त्रयो भेदा विष्णुशस्त्रसमुद्भवाः ।।

य. अनिरुद्धादित्रयम् — गदा चक्रं पद्मशंखौ हृषीकेशे उदाहृताः ।
शंखपद्मे चक्रगदे पद्मनाभे ब्रह्मोद्भवे? ।।
पद्मशंखगदाचक्रं दामोदर उदाहृतम् ।
अनिरुद्धस्य भेदाश्च पुराणैश्च प्रबोधिताः ।।

र. अन्याः वासुदेवजाः द्वादश मूर्तयः — अथान्याःसम्प्रवक्ष्यामि मूर्तिर्वै वासुदेवजाः ।
संकर्षणश्च प्रद्युम्नोऽनिरुद्धश्च यथाक्रमम् ।।
अधोक्षजः कृष्णकार्तिकेयश्च पुरुषोत्तमः ।
तार्क्ष्यध्वजाच्युतोपेन्द्रा जयन्तो नारसिंहकः ।।
जनार्दनो गोवर्द्धनो हरिः कृष्णस्तथैव च ।
पद्मं गदा शंखचक्रे तथैवाऽधोक्षजे सदा ।।
पद्मं कृष्णकार्तिकेये शक्तिखेटककम्बवः ।
चक्रपद्मे शंखगदे तथा च पुरुषोत्तमे ।।
पद्मं शंखो ध्वजा गदा चिन्हं चक्रं तार्क्ष्यस्थे गरुडध्वजे ।
गदा पद्मं चक्रशंखावच्युते विष्णुरूपके ।।
उपेन्द्रमूर्तौ शंखोऽथ गदा चक्रं च पद्मकम् ।
अक्षचक्रदण्डपद्मं वादित्रैः परिवेष्टिते ।।
जयन्तनामविख्याते रिपुसैन्यविमर्दने ।
चक्रपद्मगदाशंखा नारसिंहे तथैव च ।।
पद्मं चक्रं शङ्खगदे तथैव च जनार्दने ।
गोवर्धने चाऽक्षचक्रशंखाब्जं गोपवल्लभे ।।
शङ्खचक्रे पद्मगदे हरौ वै मोक्षदायके ।
शङ्खो गदा पद्मचक्रं कृष्णमूर्तौ तथैव च ।।
तिस्रस्तिस्रश्चतुर्भेदैरेवं द्वादशमूर्तयः ।

(v) रूप० — वासुदेवस्संकर्षणः प्रद्युम्नश्चानिरुद्धकः ।
श्वेतरक्तपीतकृष्णाः क्रमात्कृतयुगादिषु ।।
पूज्या द्विजातिभिश्चैषां छत्राभं कुर्कुटाण्डवत् ।
त्रपुषाभं च बालेन्दूपमं कुर्याच्छिर क्रमात् ।।

(vi) शिल्प० २३ — विक्रान्त्या ध्वस्तवैरिव्रजमजितमपास्तावनीभारमाद्यै-
रावीतं नारदाद्यैर्मुनिभिरनुदिनं तत्त्वनिर्णीतिहेतोः ।
सायाह्ने निर्मलं तं निरूपममजरं पूजयेन्नीलभासं
मन्त्री विश्वोदयस्थित्यपहरणपरं मुक्तिदं वासुदेवम् ।।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वासुदेवसङ्कर्षणौ प्रद्युम्नश्चानिरुद्धकः ।
स्फटिकस्वर्णदूर्वेन्दुनीलाभा वर्णतो मताः ॥
चतुर्भुजाश्चक्रशङ्खगदापङ्कजधारिणः ।
किरीटकेयूरिणश्च पीताम्बरधरा अपि ॥

मानुषो वासुदेवः
वै० आ०

अथ मानुषं वासुदेवमायताश्रे विमाने मध्यमं दशतालमितं सविंशतिशतांगुलं द्विभुजं चक्रशंखधरं दक्षिणे रुक्मिणीं देवीं तद्दक्षिणे हलमुसलधरं बलभद्रं तद्दक्षिणे प्रद्युम्नं द्विभुजं क्षुरिकाधरदक्षिणहस्तं कट्यवलम्बितवामहस्तं तद्दक्षिणे विरिञ्चं चतुराननं चतुर्भुजं देवस्य वामपार्श्वेऽनिरुद्धं द्विभुजं खड्गखेटकधरं तद्वामे साम्बं द्विभुजं दानदक्षिणकरमन्यद्दण्डधरं तस्य वामे गरुडं च कारयेत् । तेषां वर्णाम्बराभरणानि भृगूक्तविधिना कारयेत् । देवानेतान्स्थितानेव संस्थाप्य तद्रूपं कौतुकं कारयेत् । अथवा तेषां मध्ये विष्णुं चतुर्भुजमेव स्थापयेत् ।

त्रैलोक्यमोहनः
(i) अ० पृ० २१९

त्रैलोक्यमोहनं वक्ष्ये संसारे मोहकारकः ।
स षोडशभुजैर्युक्तः तार्क्ष्यस्थश्च महाबलः ॥
गदा वज्रांकुशौ बाणः शक्तिश्चक्रं तथा क्रमात् ।
वरदश्चेति हस्तेषु ह्यस्त्राणि दक्षिणेषु च ॥
मुद्गरः पाशशार्ङ्गे च शंखः पद्मं कमण्डलुः ।
शृङ्गी वामेषु हस्तेषु योगमुद्रा करद्वये ॥
नरास्यो नारसिंहास्यः सूकरः कपिलाननः ।
द्विरष्टशक्तिसंयुक्तः कार्यस्त्रैलोक्यमोहनः ॥

(ii) रूप०

मुखानि पूर्ववत्तस्याप्यथ त्रैलोक्यमोहनः ।
स षोडशभुजस्ताक्ष्यारूढः प्राग्वच्चतुर्भुजा? ॥
गदाचक्राङ्कुशौ बाणं शक्तिश्चक्रं वरं क्रमात् ।
दक्षेषु मुद्गरः पाशश्शार्ङ्गशङ्खाब्जकुण्डिका ॥
शृङ्गी वामेषु हस्तेषु योगमुद्राकरद्वयम् ।
नरं च नारसिंहं च सूकरं कपिलाननम् ॥

विश्वरूपः
(i) अ० पृ० २१९

विश्वरूपो महातेजा विश्वज्ञः सृष्टिकारकः ।
तस्य चाऽनुक्रमं वक्ष्ये भुजानां विंशतिस्तथा ॥
पताका हलशंखौ च वज्रांकुशशरास्तथा ।
चक्रं च बीजपूरं च वरो दक्षकरेषु च ॥
पताका दण्डपाशौ च गदाशार्ङ्गे तथैव च ।
पद्मं शृङ्गी च मुसलमक्षं वामभुजेषु च ॥
करयुग्मे योगमुद्रा वैनतेयोपरिस्थितः ।
नरश्च नारसिंहश्च श्रीमुखः सूकराननः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स्रस्टा विश्वस्य जगतो विश्वमूर्ति महोद्भवः ।
शक्तिविंशतिसंयुक्तः कर्तव्यः सर्वकामदः ॥

(i) रू०प०
विंशत्या हस्तकैर्युक्तो विश्वरूपश्चतुर्मुखः ।
पताका हलशङ्खौ च वज्राङ्कुशशरास्तथा ॥
चक्रं च बीजपूरं च वरो दक्षिणबाहुषु ।
पताका दण्डपाशौ च गदाखड्गोत्पलानि च ॥
शृङ्गी मुसलमक्षं च क्रमात्स्युर्वामबाहुषु ।
हस्तद्वये योगमुद्रा चैन (?) गरुडोपरिस्थितः ॥
क्रमान्नरनृसिंहस्त्रीवराहमुखवन्मुखैः ।

वैकुण्ठः
(i) अ०पृ० २१९
प्रवचम्यथ वैकुण्ठं सोऽष्टबाहुर्महाबलः ।
गरुडस्थश्चतुर्वक्त्रः कर्तव्यः शान्तिमिच्छता ॥
गदाखड्गो बाणचक्रे दक्षिणेऽस्त्रचतुष्टयम् ।
शंखःखेटो धनुः पद्मं वामे चाऽस्त्रचतुष्टयम् ॥
पुरतः पुरुषाकारो नारसिंहश्च दक्षिणे ।
अपरे श्रीमुखाकारो वाराहास्यस्तथोत्तरे ॥

(ii) रूपः
वैकुण्ठं तु प्रवक्ष्यामि सोऽष्टबाहुर्महाबलः ।
तार्क्ष्यासनश्चतुर्ववत्रः कर्तव्यश्शान्तिमिच्छता ॥
गदां खड्गं शरं चक्रं दक्षिणेऽस्य चतुष्टयम् ।
शङ्खं खेटं धनुः पद्मं वामे दद्याच्चतुष्टयम् ॥
अग्रतः पुरुषाकारं नारसिंहं च दक्षिणे ।
अपरं स्त्रीमुखाकारं वाराहास्यं तथोत्तरम् ॥

अनन्तः
अ० पृ० २१९
अनन्तोऽनन्तरूपश्च यतोऽनन्तजगद्भवः ।
अनन्तशक्तिसंकीर्णोऽनन्तरूपसमुद्भवः ॥
भुजै द्वादशकैर्युक्तश्चतुर्वक्त्रो महोत्सवः ।
सुपर्णकेतुराख्यातः कर्तव्यः सर्वकामदः ॥
गदा खड्गश्च चक्रं च वज्रांकुशवरास्तथा ।
भुजेषु दक्षिणेष्वेवमस्त्रषट्कं तथोत्तमम् ॥
शंखः खेटो धनुःपद्मं दण्डपाशौ तथैव च ।
भुजेषु चैव वामेषु ह्यस्त्रषट्कमितीरितम् ॥
नरास्यो नारसिंहास्यः श्रीमुखः सूकराननः ।
तेजपुञ्जमयः कार्यो ह्यनन्तो नाम नामतः ॥

(ii) रूप०
अनन्तोऽनन्तरूपस्तु हस्तैर्द्वादशभिर्युतः ।
अनन्तशक्तिसंवीतो गरुडस्थश्चतुर्मुखः ॥
गदाकृपाणचक्राढ्यो वज्राङ्कुशवरान्वितः ।
शङ्खखेटं धनुःपद्मं दण्डपाशौ च वामतः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

योगेश्वरः
(i) सि० सं०

पद्मासनसमासीनः किञ्चिन्मीलितलोचनः ।
घोणाग्रे दत्तदृष्टिश्च श्वेतपद्मोपरि स्थितः ॥
वामदक्षिणगौ हस्तावुत्तानावेकभागगौ ।
तत्करद्वयपार्श्वस्थे पङ्केरुहमहागदे ॥
ऊर्ध्वे करद्वये तस्य पाञ्चजन्यस्सुदर्शनः ।
योगस्वामी स विज्ञेयः पूज्यो मोक्षार्थियोगिभिः ॥

(ii) वै० अ० अथादिमूर्तिविधिं वक्ष्ये । अनन्तोत्सङ्गे समासीनं दक्षिणं प्रसार्य वाममाकुञ्च्य दक्षिणहस्तमनन्तोत्सङ्गे न्यस्य वामं वामजानूर्ध्वे प्रसार्य चतुर्बाहुं शङ्खचक्रधरं फणाभिः पञ्चभिर्वा छन्नमौलिं प्रवालाभं सर्वाभरणभूषितं कृत्वा तद्दक्षिणे भृगुं बामे मार्कण्डेयमेकजानुक्रमेणासयित्वा दक्षिणे ब्रह्माणं वामे शङ्करं च कृत्वा तद्रूपं कौतुकं च कृत्वा प्रतिष्ठोक्तक्रमेण प्रतिष्ठां कारयेत् ।

लक्ष्मीनारायणौ
(i) विश्वकर्म०

लक्ष्मीनारायणौ कार्यौ संयुक्तौ दिव्यरूपिणौ ।
दक्षिणस्था विभोर्मूर्तिर्लक्ष्मीमूर्तिस्तु वामतः ॥
दक्षिणः कण्ठलग्नोऽस्या वामो हस्तस्सरोजभृत् ।
विभोर्वामकरो लक्ष्म्याः कुक्षिभागस्थितस्सदा ॥
सर्वावयवसम्पूर्णा सर्वालङ्कारभूषिता ।
सुष्ठुनेत्रकपोलास्या रूपयौवनसंयुता ॥
सिद्धिः कार्या समीपस्था चामरग्राहिणी शुभा ।
कर्तव्यं वाहनं सव्ये देवाधोभागगं सदा ॥
शङ्खचक्रधरौ तस्य द्वौ कार्यौ पुरुषौ पुरः ।
वामनौ हारकेयूरकिरीटमणिभूषणौ ॥
उपासकौ समीपस्थौ प्रभोर्ब्रह्मशिवात्मकौ ।
रशनां योगपट्टं च शिखामञ्जलिमास्थितौ ॥

(ii) शिल्प० २३

हस्ते बिभ्रत् सरसिजगदाशङ्खचक्राणि विद्यां
पद्मादर्शौ कनकलशं मेघविद्युद्विलासम् ।
वामोत्तुङ्गस्तनमविरलाकल्पमाश्लेषलोभा-
देकीभूतं वपुरवतु वः पुण्डरीकाक्षलक्ष्म्योः ॥

(iii) शिल्प० २५

चक्रं विद्यादरघटगदादर्पणान् पद्मयुग्मं
दोर्भिर्बिभ्रत् सुरुचिरतरं मेघविद्युन्निभामम् ।
गाढोत्कण्ठाविवशमनिशं पुण्डरीकाक्षलक्ष्म्यो-
रेकीभूतं वपुरवतु वः पीतकौशेयकान्तम् ॥

३. वैष्णवद्वादशध्रुवबेराणि—(वैखा०)

१. योगस्थानकमूर्तिः देवेशं श्यामाभं चतुर्भुजं शंखचक्रधरमभयकरदक्षिणहस्तं वरदं कट्यवलम्बितवामहस्तं दक्षिणे चैकजानुनासीनं भृगुं तथा

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वामे मार्कण्डेयं तथैव भूमिपुण्यार्चिते वा दक्षिणे भित्तिपार्श्वे हेमाभं चतुर्भुजमक्षमालाकमण्डलुधरमभयकटचवलम्बितहस्तं ब्रह्माणमुत्तराभिमुखमुत्तरे भित्तिपार्श्वे श्वेताभं चतुर्भुजं मृगपरशुधरमभयकटचवलम्बितहस्तं शङ्करं दक्षिणाभिमुखं स्थितमेव कारयेत् ।

टि०—ब्रह्मशङ्कराभ्यां हीनं मध्यमम् । पूजकमुनिभ्यां हीनमधमम् ।

२. भोगस्थानकमूर्तिः द्वितीयं भोगस्थानकं चतुर्भुजं श्यामाभं शंखचक्रधरमभयवरददक्षिणहस्तकटचवलम्बितसिंहकर्णवामहस्तं तथा ब्रह्मेशौ, दक्षिणे श्रीदेवीं रुक्माभां सुस्थितदक्षिणपादां किंचित्कुञ्चितवामपादां धृतकमलदक्षिणहस्तां प्रसारितवामकरां देवं किंचित्समीक्ष्य स्थितां, वामे हरिणीं श्यामाभां प्रसारितदक्षिणहस्तां धृतोत्पलवामहस्तां सुस्थितवामपादां किंचित्कुंचितदक्षिणपादां देवं किंचित्समीक्ष्य स्थितां कारयेत् । देव्योर्हस्तौ पादौ विपरीतौ वा कारयेत् । दक्षिणे भृगुं दक्षिणजानुनासीनं वामेनोत्कुटिकमासीनं सपद्मवामहस्तं दक्षिणोरुनिहितदक्षिणकरं वामे पुराणं वामेन जानुनासीनं सपद्मदक्षिणहस्तं (वामोरु) विन्यस्तवामकरं कारयेत । एवमासयित्वा हस्तौ सम्पुटौ वा कारयेत् । भित्त्यूर्ध्वभागे मायासंह्लादिनीभ्यां कामिनीव्याजनीभ्यां तुम्बुरुनारदाभ्यां किन्नरमिथुनाभ्यां यक्षविद्याधराभ्यां सनकसनत्कुमाराभ्यां सूर्यचन्द्राभ्यां युक्तमुत्तमं भोगस्थानकम् ।

टि०—तुम्बुरुनारदाभ्यां यक्षविद्याधराभ्यां हीनं मध्यमम् ।
सनकसनत्कुमाराभ्यामादित्यचन्द्राभ्यां पूजकमुनिभ्यां हीनमधमम् ।

३. वीरस्थानकमूर्तिः तृतीयं वीरस्थानकं देवं श्यामाभं चतुर्भुजं शंखचक्रधरं दक्षिणवामयोः ब्रह्मेशाभ्यां भृगुपुण्याभ्यां किष्किन्धसुन्दराभ्यां सनकसनत्कुमाराभ्यां सूर्यचन्द्राभ्यां युक्तमुत्तमम् वीरस्थानकम् ।

टि०—किष्किन्धसुन्दराभ्यां सनकसनत्कुमाराभ्यां हीनं मध्यमम् ।
आदित्यचन्द्राभ्यां पूजकमुनिभ्यां हीनमधमं वीरस्थानकम् ।

४. आभिचारकस्थानकमूर्तिः चतुर्थमाभिचारिकस्थानकं देवं द्विभुजं चतुर्भुजं वा धूम्रवर्णं श्यामवस्त्रधरं शुष्कवस्त्रं शुष्काङ्गं तमोगुणान्वितमूर्ध्वनेत्रं ब्रह्मादिदेवैर्विवर्जितं पैशाचपद आर्द्राद्यनुक्तनक्षत्रे शर्वर्यां चरराशौ स्थापितं विमानं च लक्षणहीनं वा कारयेत् ।

५. योगासनमूर्तिः अथ योगासनं वक्ष्ये । देवेशं श्वेताभं पीतवाससं चतुर्भुजं जटामौलिं श्वेतपद्मे समासीनमूर्ध्वस्थितदक्षिणपादमधस्स्थवामपादमङ्कविन्यस्तवामकरं शङ्खचक्ररहितपरभुजं श्वेतवस्त्रोत्तरीयं सोपवीतं कुण्डलाङ्गदाद्यलङ्कारभूषितमीषन्निमीलितलोचनं च भित्तिपार्श्वे दक्षिणे ब्रह्माणमुत्तरे शङ्करमूर्ध्वभागे चन्द्रादित्यौ सनकसनत्कुमारौ

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कौतुकाद्दक्षिणवामभागयोर्भृगुमार्कण्डेयौ तथा महीमार्कण्डेयौ वा कारयेत्तदुत्तमं योगासनम् ।

टि०—चन्द्रादित्याभ्यां सनकसनत्कुमाराभ्यां हीनं मध्यमम् । भृगुमार्कण्डेयाभ्यां हीनमधमम् ।

६. भोगासनमूर्तिः देवं सिंहासने समारूढं श्यामलाङ्गं चतुर्भुजं शङ्खचक्रधरमभयवरददक्षिणहस्तकटिविन्यस्तर्सिहकर्णवामहस्तं प्रसारितदक्षिणपादं दक्षिणे श्रियं देवीं वामपादमाकुञ्च्य दक्षिणं प्रसार्य सिंहासने समासीनां वामपार्श्वे महीं देवीं दक्षिणं पादमाकुञ्च्य वामं प्रसार्य सिंहासनसमासीनामेतयोर्वामदक्षिणकरौ पद्मोत्पलधरावन्यहस्तौ सिंहासने निहितौ स्वोरुनिहितौ सिंहकर्णौ वा तद्विपरीतौ वा ··· ···दक्षिणोत्तरयोर्ब्रह्मशङ्करौ तथासीनौ भृगुमार्कण्डेयौ चैकजानुक्रमेणासीनौ, अन्यत्सर्वं योगासनवत्कुर्यात् । अपरभित्तिपार्श्वे मायासंह्लादिनीभ्यां तुम्बुरुनारदाभ्यां किन्नरमिथुनाभ्यां यक्षविद्याधराभ्यां सनकसनत्कुमाराभ्यां सूर्यचन्द्राभ्यां देवद्रुमसमायुक्तमुत्तमं भोगासनम् ।

टि०—तुम्बुरुनारदाभ्यां किन्नरमिथुनाभ्यां यक्षविद्याधराभ्यां हीनं मध्यमम् । सनकसनत्कुमाराभ्यामादित्यचन्द्राभ्यां पूजकमुनिभ्यां हीनमधमं भोगासनम् ।

७. वीरासनमूर्तिः सिंहासनोपरिष्टात्पद्मासने वामपादं समाकुञ्च्य दक्षिणं किंचित्प्रसार्य समासीनं चतुर्भुजं शंखचक्रधरमभयदक्षिणहस्तं सिंहकर्णवामहस्तं प्रवालाभं श्यामाम्बरधरं पूजकस्थाने श्रीदेवीं वामे महीदेवीमेकजानुक्रमेणासयित्वा दक्षिणे ब्रह्माणं मार्कण्डेयं वामे शङ्करं भृगुं च गीर्वाण्यौ चामरधारिण्यौ च कारयेत् । सनकसनत्कुमाराभ्यां सूर्यचन्द्राभ्यां सहितमुत्तमं वीरासनम् ।

टि०—तुम्बुरुनारदाभ्यां सनकसनत्कुमाराभ्यां कामिनीव्याजिनीभ्यां हीनं मध्यमम् । ब्रह्मशङ्कराभ्यां सूर्यचन्द्राभ्यां पूजकस्थाने देवीभ्यां हीनमधमम् ।

८. आभिचारिकासनमूर्तिः देवं वेदिकासने समासीनं द्विभुजं चतुर्भुजं वा नीलाभं श्यामवस्त्रधरं तमोगुणान्वितमूर्ध्वाक्षं देव्यादीन्विना लक्षणहीने विमाने शत्रुदिङ्मुखे कृष्णाष्टम्यामार्द्राद्यनुक्तनक्षत्रे रात्रौ गर्भालये पैशाचपदे चरराशौ स्थापितमाभिचारिकासनम् ।

९. योगशयनमूर्तिः अथ योगशय्याक्रमं वक्ष्ये । देवं द्विभुजमर्धार्धशयनं पीतश्यामं दक्षिणहस्तमुपधाने न्यस्य मौल्यग्रं समुद्धृत्य सम्यक् प्रसार्य वान्यं समाकुञ्च्य तत्कोर्परमूर्ध्वं कृत्वा कटिमवलम्ब्याथवा तदूरौ प्रसार्य वा, पादं दक्षिणं प्रसार्य वाममाकुञ्च्य शयानं सर्वाभरणभूषितं किंचिदुन्मीलितलोचनं भृगुपुण्यार्चितं पादपार्श्वे मधुकैटभसंयुक्तं च

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

नाभ्यम्बुजसमासीनं ब्रह्माणं पञ्चायुधान् गरुडं विष्वक्सेनं सप्तर्षी-श्चापरभित्पूर्वभागे प्राञ्जलीकृत्य स्थितान्दक्षिणभित्तिपार्श्वे ब्रह्माणं वामे शङ्करं च समासीनमेव कारयेत् । एतदुत्तमं योग-शयनम् ।

टि०—सप्तर्षीन्विष्वक्सेनं च विना मध्यमम् । पूजकमुनिभ्यां मधुकैटभाभ्यां हीनमधमं विज्ञायते ।

१०. भोगशयनमूर्तिः द्वितीय भोगशयनं देवेशं श्यामलाङ्गं दर्शनीयं सुपुष्टाङ्गं चतुर्भुजं वार्धशयानं चापवद्गात्रं हस्तं दक्षिणमुपधाने निधाय मुकुटमालम्ब्य किञ्चित्प्रसार्य वामं वामोरौ प्रसार्य दक्षिणं पादं प्रसार्य वाममाकुञ्च्य शयानं कारयेत् ।… …शिरःपार्श्वे श्रियं देवीं देवस्कन्धबाहुस्पर्शीं सपद्मदक्षिणहस्तां कटकवामहस्तां पादपार्श्वे महीदेवीं वामाङ्घ्रि-संस्पर्शी हस्तेन दक्षिणेनोत्पलधृतां वामहस्तं कटकं कौतुकाद्दक्षिणे मार्कण्डेयं वामे भृगुं दक्षिणे भित्तिपार्श्वे चासीनं ब्रह्माणं वामे शङ्करं च दक्षिणे वक्रतुण्डं वामे विन्ध्यवासिनीं पादपार्श्वे मधुकैटभावुग्रवेग-समन्वितौ समुद्रतरङ्गच्छादितजानू अनन्तस्य विषज्वालाभिर्दह्य-मानौ वा कारयेत् । नाभिपद्मे समासीनं ब्रह्माणं तद्दक्षिणे पञ्चा-युधान् गरुडोपरिष्टाद्दक्षिणे भास्करमुत्तरे निशाकरं तथा बालरूपिणौ तुम्बुरुनारदौ दक्षिणेऽश्विनावष्टलोकपालांस्तथाप्सरसश्च कारयेत् । एतदुत्तमं भोगशयनम् ।

टि०—तुम्बुरुनारदाभ्यां लोकपालैश्च बिना मध्यमम् । पूजकमुनिभ्याम-प्सरोभिश्च विनाधमम् ।

११. वीरशयनमूर्तिः तृतीयं वीरशयनं देवं श्यामाभं चतुर्भुजं शङ्खचक्रधरं सव्य-हस्तं शिरोपधानं कृत्वा वामहस्तं प्रसार्य शयानं पादपार्श्वे श्रीभूमिभ्यां पादमर्दकाभ्यां मधुकैटभाभ्यां संयुक्तं कौतुकाद्दक्षिणे मार्कण्डेयं वामे भृगुं नाभिपद्मे समासीनं ब्रह्माणं पञ्चायुधान् गरुडं चन्द्रादित्यौ सप्तर्षीन् द्वादशादित्यानेकादशरुद्रान् जयाद्यप्सरस-स्तुम्बुरुनारदौ किन्नरमिथुने सनकसनत्कुमारौ ब्रह्मेशौ च कारयेदिति। एतदुत्तमं वीरशयनम् ।

टि०—रुद्रादित्यैरप्सरसोभिर्मुनिभिश्च विना मध्यमम् । किन्नर-मिथुनाभ्यां सनकसनत्कुमाराभ्यां पूजकमुनिभ्यां हीनमधमम् ।

१२. आभिचारिक-शयनमूर्तिः शेषशयनं लक्षणहीनं द्विफणं द्विवलयमनुन्नतं शिरःपार्श्वे, देवं नीलाभं द्विभुजं चतुर्भुजं वा समनयनं महानिद्रासमायुक्तं शुष्क-वक्त्रं शुष्काङ्गं श्यामवस्त्रधरं सर्वदेवैर्विहीनं कारयेत् । एतदुत्तम-माभिचारिकशयनम् ।

टि०—एकफणमेकवलयं मध्यमम् । सर्पदेहं विना मममस्थलशयनमधम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

४. वैष्णवदशावताराः (द्वादशावताराः वा)

१. मत्स्यावतारः 'मत्स्यावतारिणं देवं मत्स्याकारं प्रकल्पयेत्' ।

२. कूर्मावतारः 'कूर्मावतारिणं देवं कमठाकृतिमालिखेत्' ।

३. वराहः

(i) अ० पु०

नराङ्गो वाथ कर्तव्यो भूवराहो गदादिभृत् ।
दक्षिणे वामके शंखं लक्ष्मीर्वा पद्ममेव वा ॥
श्रीर्वामकूर्परस्था तु क्ष्मानन्तौ चरणानुगौ ।
वराहस्थापनाद्राज्यं भवाब्धितरणं भवेत् ॥

(ii) वि० ध०

ऐश्वर्यसंनिरुद्धश्च वराहो भगवान् हरिः ।
ऐश्वर्यशक्त्या दंष्ट्राग्रसमुद्धृतवसुन्धरः ॥
नृवराहोऽथवा कार्यश्शेषोपरिगतः प्रभुः ।
शेषश्चतुर्भुजः कार्यश्चारुरत्नफणान्वितः ॥
आश्चर्योत्फुल्लनयनो देववीक्षणतत्परः ।
कर्तव्यौ सीरमुसलौ करयोस्तस्य यादव ! ॥
सर्पभोगश्च कर्तव्यः तथैव रचिताञ्जलिः ।
आलीढस्थानसंस्थानस्तत्पृष्ठे भगवान्भवेत् ॥
वामारत्निगता तस्य योषिद्रूपा वसुन्धरा ।
नमस्करपरा तस्य कर्तव्या द्विभुजा शुभा ॥
यस्मिन्भुजे धरादेवी तत्र शंखकरो भवेत् ।
अन्ये तस्य कराः कार्याः पद्मचक्रगदाधराः ॥
हिरण्याक्षशिरश्छेदचक्रोद्वृत्तकरोऽथवा ।
मृतोद्धतहिरण्याक्षः सुमुखो भगवान्भवेत् ॥
मूर्तिमन्तमनैश्वर्यं हिरण्याक्षं विदुर्बुधाः ।
ऐश्वर्येणाविनाशेन स निरस्तोऽरिमर्दनः ॥
नृवराहोऽथवा कार्यो ध्याने कपिलवत्स्थितः ।
द्विभुजस्त्वथवा कार्यः पिण्डनिर्वपनोद्यतः ॥
समग्रक्रोडरूपेण बहुदानवमध्यगः ।
नृवराहो वराहश्च कर्तव्यः क्ष्माविदारणः ॥

(iii) वै० आ० आदिवराहं चतुर्भुजं शङ्खचक्रधरं सस्यश्यामनिभं नागेन्द्रफणामणिस्थापितदक्षिणपादं तद्दूरौ महीं दधानं दक्षिणहस्तेन देव्योः पादौ गृहणन्तं वामहस्तेन तामुपगृह्णन्तं मुखेन देवीं जिघ्रन्तं कृत्वा तां महीं प्राञ्जलीकृतहस्तां प्रसारितपादां पुष्पाम्बरधरां श्यामाभां किंचिद्देवं समीक्ष्य व्रीडाहर्षेण संयुक्तां सर्वाभरणसंयुक्तां देवस्य स्तनान्तां वा पञ्चतालेन मानेन कारयेत् ।

(iv) अ० पृ० २१९

सप्तभागोच्छ्रयं कुर्यान्नवभागायतो भवेत् ।
द्विभागं मस्तकं कुर्यात तुण्डनाली द्विभागतः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

भागा पिण्डे तुण्डनाली? ग्रीवास्थाने सार्धद्विकम् ।
त्रिवलीसहिता ग्रीवा साधांशद्विकवृत्तिका ॥
मस्तकार्धभागः स्कन्धः पादाश्चतुर्भागतः ।
एवं पृष्ठोद्भवः कार्यो द्विरदाकारकस्तथा ॥
सार्धद्वयंशावग्रपादावपरौ च द्विभागकौ ।
त्रिभागं पिण्डकं कार्यं भागं स्यादक्षदेशकम् ॥
भागार्धश्चाग्रपादश्च भागपादा खुरी मता ।
द्विभागं वाह्यकं कार्यं सार्धस्यापि क्रमेण च ॥
जानुभागं चार्ध-भागं शुण्डिका? (क्षुरिका)पादभागिका ।
पिण्डभागे बाहुमध्ये एकभागं तथोदरम् ॥
चतुर्भागौ च द्वौ कुक्षी सुवृत्तं जठरं तथा ।
पुष्करं भागपादोनं पादैका कोष्ठपालिका ॥
पुष्करं समविस्तारं वृत्ताकारं सुसंस्थितम् ।
पुष्करे छिद्रयुग्मं च वक्त्रं दंष्ट्राद्वयान्वितम् ॥
भागत्रयात्पुष्करतोऽर्धभागं मस्तकं परे ।
सपादभागः कर्णश्च स तत्राग्रोन्नतो भवेत् ॥
कर्णयोः समसूत्रे तु भागार्धं दृष्टिरेव च ।
गजनेत्रोपमा कार्या मस्तकं गजमस्तवत् ॥
मस्तपुतकयोर्मध्ये भाग षंडश वृत्तकाः ।
उद्धृताग्रो वामपादोऽपरं स्याग्र क्रमम्? ॥
मस्तकस्य भागपादे पृष्ठे मेरुर्लिङ्गाकृतिः ।
तत्प्रदक्षिणतः कुर्यात् त्रैलोक्यं सचराचरम् ॥
पुच्छग्रीवाग्रन्थिहृदयाग्रे वै शेषसम्भवः ।
कार्यश्चाधस्तु कूर्मो वै तस्याधो जलपट्टकम् ॥
एवमादि प्रकर्तव्यमुक्तं सौकरमानकम् ।
दंष्ट्राग्रे वै लक्ष्मीर्वामे दंष्ट्रायां दक्षिणः करः ॥

(v) रूप॰ मत्स्यकूर्मौ स्वस्वरूपौ नृवराहो गदाम्बुजे ।
विभ्रच्छ्चयामो वराहास्यो दंष्ट्राग्रेणोद्धृतां धराम् ॥

(vi) शिल्प॰ २५ नृवराहं प्रवक्ष्यामि सूकरास्येन शोभितम् ।
गदापद्मधरं धात्रीं दंष्टाग्रेण समुद्धृताम् ॥
विभ्राणं कोर्परे वामे विस्मयोत्फुल्ललोचनाम् ।
नीलोत्पलधरां देवीमुपरिष्टात्प्रकल्पयेत् ॥
दक्षिणं कटिसंस्थं च बाहुं तस्य प्रकल्पयेत् ।
कूर्मपृष्ठे पदं चैकमन्यन्नागेन्द्रमूर्धनि ॥
अथवा सूकराकारं महाकायं क्वचिल्लिखेत् ।
तीक्ष्णदंष्ट्राग्रघोणास्यस्कन्धकर्णोर्ध्वरोमकम् ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वराहभेदाः

अ. प्रलयवराहः
वै० आ०

वक्ष्ये प्रलयवराहं वामपादं समाकुञ्च्य दक्षिणं प्रसार्य सिंहासने समासीनं नीलाभं शंखचक्रधरमभयदक्षिणहस्तमूरुप्रतिष्ठितवामहस्तं पीताम्बरधरं सर्वाभरणभूषितं कारयित्वा तस्य दक्षिणे देवीं महीं पादं वाममाकुञ्च्य दक्षिणं प्रसार्यासीनां श्यामाभां सर्वाभरणभूषितामुत्पलधरवामकरामासननिहितदक्षिणकरां किंचिद्देवं समीक्ष्य विस्मयोत्फुल्ललोचनां कारयेत् ।

ब. यज्ञवराहः

अथ यज्ञवराहं श्वेताभं चतुर्भुजं शंखचक्रधरं वामपादं समाकुञ्च्य दक्षिणं प्रसार्य सिंहासने पीताम्बरधरं सर्वाभरणभूषितं कारयित्वा तस्य दक्षिणे देवी श्रियं हेमाभां वामपादं समाकुञ्च्य दक्षिणं प्रसार्यासीनां पद्मधरवामहस्तमासने निहितदक्षिणहस्तां वामपार्श्वे महीं देवीं सस्यश्यामनिभां दक्षिणपादमाकुञ्च्य वामं प्रसार्यासीनामुत्पलधरदक्षिणहस्तामासने निहितवामहस्तां देवं किंचित्समीक्ष्य विस्मयोत्फुल्ललोचनां कारयेत् । त्रयाणां वराहाणां तत्तद्रूपं कौतुकबिम्बं विष्णुं चतुर्भुजं वा कारयेत् ।

४. नरसिंहः
वै० आ०

नारसिंहो द्विविधो गिरिजस्स्थूणजश्चेति । तयोर्मुखं सिंहस्येवान्यन्नराकारं तस्य मूर्धादिपादतलान्तं सविंशतिशताङ्गुलं ………………नारसिंहं देवं सिंहासने पादं दक्षिणं प्रसार्य वाममाकुञ्च्य समासीनं चतुर्भुजं शंखचक्रधरं कुन्देन्दुधवलप्रभं रक्तवस्त्रधरं सर्वाभरणभूषितं करण्डिकामकुटयुतं पूर्वं दक्षिणकरमभयं दधानं वामं कटचवलम्बितमूरुस्थं वा कारयेत् । तद्दक्षिणे श्रियं देवीं वामपादमाकुञ्च्य दक्षिणं प्रसार्यासीनां पद्मधरवामहस्तामासने निहितदक्षिणहस्तां सुवर्णाभां सर्वाभरणभूषितां वामपार्श्वे महीं देवीं दक्षिणं पादमाकुञ्च्य वामं प्रसार्यासीनामुत्पलधरदक्षिणहस्तामासने निहितवामहस्तां श्यामाभां सर्वाभरणभूषितां कारयेत् । अथवा सिंहासनस्योर्ध्वे वामं पादं प्रसार्याकुञ्च्य तज्जानूर्ध्वे दक्षिणहस्तं गजहस्तवत्प्रसार्य वाममूरौ संन्यस्यासीनं शंखचक्रधरं देवीभ्यां सहितं कारयेत् ।

नरसिंहभेदाः

अ. केवलनरसिंहः
(i) वै० आ०

केवलं नृसिंहदेवं पद्मपीठोपरिष्टाद् द्वौ पादौ व्यत्ययेन न्यस्योत्कुटिकासनेनासयित्वोरूमध्ये वस्त्रेणाबध्य सर्वाभरणसंयुक्तं चतुर्भुजं शंखचक्रधरमन्यहस्तौ जानूपरिष्टात्प्रासारितौ च कारयेत् ।

शि० सं०

आसीनं द्विभुजं देवं प्रमत्तवदनेक्षणम् ।
श्वेतस्फटिकसंकाशं चतुर्बाहुमथापि वा ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

आजानुलम्बिनौ बाहू कर्तव्यौ तत्र दक्षिणे ।
समीपे कल्पयेच्चक्रं वामे शंखं समीपतः ॥
ऊर्ध्वस्थिताभ्यां बाहुभ्यां दक्षिणे पङ्कजं न्यसेत् ।
वामे बाहौ गदाभ्यां लिखेच्चित्रविशारदः ॥

ब. स्थौण-नारसिंहः

(i) वै० आ० — अथ स्थूणनारसिंह सोपाधानसिंहासने वामपादमाकुञ्च्यान्यं प्रसार्य समासीनं चतुर्भुजं शंखचक्रधरमभयकदानदक्षिणहस्तमूरुप्रतिष्ठितवामहस्तं सटास्कन्धसंयुक्तं तीक्ष्णदंष्ट्रेक्षणं भयानकं श्वेताभं रक्ताम्बरधरं सर्वाभरणसंयुक्तं कारयेत् । तस्य कोपशान्त्यर्थं पार्श्वयोर्दक्षिणवामयोः श्रीमह्यौ प्रह्लादं वन्दमानं च कारयेत् । दक्षिणे नारदं वीणाहस्तं भित्तिपार्श्वे परितः प्रागाद्यैशानान्तमिन्द्रादिलोकपालान्वन्दमानांश्च कारयेत् ।

(ii) अ० पु०

नरसिंहो विवृत्तास्यो वामोरूक्षतदानवः ।
तद्वक्षो दारयन्माली स्फुरच्चक्रगदाधरः ॥

(iii) वि० ध०

य एवं भगवान्विष्णुर्नरसिंहवपुर्धरः ।
ध्यानविधिस्स एवोक्तः परमज्ञानवर्धनः ॥
पीनस्कन्धकटिग्रीवः कृशमध्यः कृशोदरः ।
सिंहाननो नृदेहश्च नीलवासाः प्रभान्वितः ॥
आलीढस्थानसंस्थानस्सर्वाभरणभूषितः ।
ज्वालामालाकुलमुखो ज्वालाकेसरमण्डलः ॥
हिरण्यकशिपोर्वक्षः पाटयन्नखरैः खरैः ।
नीलोत्पलाभः कर्तव्यो देवजानुगतस्तथा ॥
हिरण्यकशिपुर्दैत्यस्तमज्ञानं विदुर्बुधाः ।

(iv) रू०

नृसिंहस्सिंहवक्त्रोऽतिदंष्ट्रालः कुटिलोरूकः ।
हिरण्योरस्स्थलासक्तविदारणकरद्वयः ॥

(v) शिल्प० २५

नृसिंहस्याकृतिं वक्ष्ये रौद्रपिङ्गमुखेक्षणाम् ।
भुजाष्टकसमायुक्तां स्कन्धपीनसमाश्रिताम् ॥
हिरण्यकशिपुं दैत्यं दारयन्तीं नखाङ्कुरैः ।
ऊरोरुपरि पीनस्य खड्गखेटकधारिणम् ॥
तस्यान्त्रमालां निष्कृत्य बाहुयुग्मेन बिभ्रतीम् ।
मध्यस्थिताभ्यां बाहुभ्यां दक्षिणे चक्रपङ्कजौ ॥
कौमोदकीं गदां शंखं बाहुभ्यामिति वामतः ।
नीलोत्पलवच्छायां किं वा चम्पकसप्रभाम् ॥
तप्तकाञ्चनसङ्काशां बालार्कसदृशीं लिखेत् ।

स. यावकनरसिंहः

वै० आ० — अथ यानकनरसिंहं वीशस्कन्धोपरिष्टाच्छेषोत्सङ्गे समासीनं तत्फणैः पञ्चभिः छन्नमौलिं चतुर्भुजं शंखचक्रधरं

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सर्वाभरणभूषितं कारयेत् । अथवाष्टाभिर्द्विरष्टाभिर्वा भुजैर्युक्तं भयानकं दैत्यवधानुरूपं नृसिंहं स्थूणजं कारयेत् ।

५. वामनः (i) अ० पृ० 'छत्री दण्डी वामनःस्यादथवा स्याच्चतुर्भुजः'

(ii) वि० ध० कर्तव्यो वामनो देवस्सङ्क्षिप्तैर्गात्रपर्वभिः ।
पीनगात्रश्च कर्तव्यो दण्डी चाध्ययनोद्यतः ॥
दूर्वाश्यामश्च कर्तव्यः कृष्णाजिनधरस्तथा ।

(iii) वै० आ० अथ वामनं पञ्चतालमितिं द्विभुजं छत्रदण्डधरं कौपीनवाससं शिखापुस्तकमेखलोपवीतकृष्णाजिनसमायुतं पवित्रपाणिं बालरूपं ब्रह्मवर्चस्विनं कारयेत् ।

(iv) रूप० 'वामनस्सशिखश्श्यामो दण्डी पीनोम्बुपात्रवान्'

(v) शिल्प० २५ कृष्णाजिन्युपवीती स्याच्छत्री धृतकमण्डलुः ।
कुण्डली शिखया युक्तः कुब्जाकारो महोदरः ॥

६. त्रिविक्रमः
(i) वै० आ० त्रिविक्रमस्त्रिविधः प्रोक्तो लोकेषु त्रिपदन्यासाद् भूलोकाक्रमणार्थं जानुमात्रमन्तरिक्षलोकाक्रमणार्थं नाभिमात्रं स्वर्गलोकाभिक्रमणार्थं ललाटमात्रं चोर्ध्वपादो भवेत् । एतेषु यथेष्टरूपं निश्चित्य पूर्ववच्चतुर्विंशतितालविभागेन देवमष्टबाहुं चतुर्बाहुं वाष्टभुजे दक्षिणहस्ते चक्रशङ्खगदाशार्ङ्गहलधरं चतुर्भुजे दक्षिणहस्तेन चक्रधरं वामहस्तेन शङ्खधरमभयं वरदं वा दधानं दक्षिणहस्ते प्रसारितपादेन प्रसारितवामहस्तं स्थितदक्षिणपादं प्रसारितोद्धृतवामपादं श्यामाभं रक्ताम्बरधरं सर्वाभरणभूषितं, तत्पृष्ठे कल्पद्रुममिन्द्रश्छत्रमुभयोः पार्श्वयोर्जवनजलेशौ चामरधारिणौ तदूर्ध्वे दक्षिणे दिवाकरं वामे निशाकरं तथा सन् सनकसनत्कुमारौ च कृत्वा प्रसारितपादस्योर्ध्वभागे ब्रह्माणं तत्पादं प्रगृह्य हस्ताभ्यां प्रक्षालयन्तं कृत्वा तत्स्रोतसीं गङ्गां श्वेताभां नाभेरूर्ध्वं शङ्करं प्राञ्जलीकृतहस्तं च कारयेत् । पादपार्श्वे नमुचिमंभ्रम?माणं वामपार्श्वे क्रतुविघ्नकरं तं मुष्टिना प्रहरन्तं गरुडं, दक्षिणे वामनं तत्पार्श्वे बलिं हेमाभं सर्वाभरणभूषितं सपत्नीकं हर्षेण पाणिभ्यां हेमकलशमुद्धरन्तं तस्योर्ध्वे जाम्बवन्तं भेरीताडनपरं च कारयेत् । अत्रानुक्तं सर्वं भूभर्तुर्विधिना कारयेत् । त्रिविक्रमस्य कौतुकं विष्णुं चतुर्भुजमेव कारयेत् ।

(ii) वि० ध० सजलाम्बुदसंकाशस्तथा कार्यस्त्रिविक्रमः ।
दण्डपाशधरः कार्यश्शंखचक्रगदाधरः ॥
शंखचक्रगदापद्माः कार्यास्तस्य सु रूपिणः ।
निर्देहास्ते न कर्तव्याश्शेषं कार्यो तु पूर्ववत् ॥
एकोर्ध्ववदनः कार्यो देवो विस्फारितेक्षणः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

(iii) शिल्प० २५ त्रिविक्रमक्रमं वक्ष्ये वामपादेन मेदिनीम् ।
आक्रामन्तं द्वितीयेन साकल्येन नभस्स्थलम् ॥

७. जामदग्न्यरामः
(i) वै० आ० जामदग्न्यरामं मध्यमदशतालेन मितं सविंशतिशताङ्गुलं द्विभुजं रक्ताभं श्वेतवस्त्रधरं दक्षिणहस्तेन परशुधरमुद्देश्यवामकरं जटामुकुटधरं सोपवीतं सर्वाभरणभूषितमेवं कारयेत् । कौतुकं तद्रूपं विष्णुं चतुर्भुजं वा कारयेत् ।

(ii) अ० पु० रामश्चापेषुहस्तस्स्यात्खड्गी परशुनान्वितः ।

(ii) वि० ध० कार्यस्तु भार्गवो रामो जटामण्डलदुर्दृशः ।
हस्तेऽस्य परशुः कार्यः कृष्णाजिनधरस्य तु ॥

(iv) रूप० जटाजिनधरो रामो भार्गवः परशुं दधत् ।

८. राघवरामः (i) बृ० स० ५८ दशरथतनयो रामो बलिश्च वैरोचनिः शतं विंशम् ।
द्वादशहान्या शेषाः प्रवरसमन्यूनपरिमाणाः ।

(ii) अ० पु० रामश्चापी शरी खड्गी शङ्खी वा द्विभुजस्मृतः ।

(iii) वि० ध० रामो दाशरथिः कार्यो राजलक्षणलालितः ।
भरतो लक्ष्मणश्चैव शत्रुघ्नश्च महायशाः ॥
तथैव सर्वे कर्तव्याः किंतु मौलिविवर्जिताः ।

(iv) वै० अ० अथ राघवरामं सविंशतिशताङ्गुलमितं द्विभुजं त्रिभङ्गस्थितं दक्षिणेन हस्तेन शरधरं वामेन चापधरं श्यामाभं रक्ताम्बरधरं किरीटाद्याभरणान्वितं कारयेत् । देवस्य बाहुसमां देवीं सीतां नवार्धतालमानेनाभङ्गवशाद्रुक्माभां शुकपिच्छनिभाम्बरधरां सर्वाभरणभूषितां धम्मिल्लबन्धयुतां करण्डिकामकुटोपेतां वामहस्तेन नीलोत्फुल्लपद्मधरां प्रसारितदक्षिणहस्तां कारयेत् । देवस्य दक्षिणे पार्श्वे देवं किंचित्समीक्ष्य विस्मयोत्फुल्ललोचनां देवीं कारयेत् । वामपार्श्वे सौमित्रिं देवस्य कर्णसीमान्तं बाह्वन्तं वा लक्ष्मणं दशतालं षोडशाधिकशताङ्गुलं ··· ··· ··· उद्बद्धकुन्तलं युवराजभूषणान्वितं द्विभुजं रामवच्छरचापधरं सुवर्णवर्णं श्यामाम्बरधरं समभङ्गान्वितं कारयेत् । हनूमन्तं प्रमुखे किंचिद् दक्षिणमाश्रित्य स्थितं देवस्य स्तनान्तं नाभ्यन्तमूरुमूलान्तं वा सप्ततालमितं द्विभुजं दक्षिणेन हस्तेनास्यं वामेन स्ववस्त्रं च पिधानं किंचिदूर्ध्वाननं कारयेत् ।

आग्नेये राघवं पश्चिमाभिमुखमुत्तराभिमुखं वा श्यामाभो रक्ताम्बरो मुकुटादिसर्वाभरणसंयुक्तः श्रीवत्साङ्को द्विभुजो दक्षिण इषुधरो वामे धनुरवलम्ब्य त्रिभङ्गसंस्थितो माघमासे पुनर्वसूजातस्सीतापति रथान्यत्सर्वमादिमूर्तेरिवा, रामं दाशरथिं वीरं काकुत्स्थमिति । तस्य दक्षिणे सीता हेमाभा शुक्लाम्बरा वामे पद्मधरी

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

दक्षिणहस्तप्रसारिता दक्षिणं स्थितं वाममाकुञ्च्य पादमुद्बन्धकौटिकौन्तलं करण्डिकामकुटसंयुक्ता वा सीताद्यक्षरबीजान्यत्सर्वं श्रीमिव, सीतामयोनिजां लक्ष्मीं वैदेहीमिति । वामे सौमित्रि रक्ताभं श्यामाम्बरं द्विभुजो रामवत्त्रिभङ्गस्थितश्चापधरश्चोद्बन्धकौन्तलयुतो वैशाखे रोहिणीजातो लक्षाद्यक्षरबीजोऽन्यत्सर्वं रामवत्, सौमित्रि रामानुजं लक्ष्मणं लक्ष्मीवर्धनमिति । दक्षिणे भरतश्श्यामाभो रक्ताम्बरोद्बन्धकौन्तलयुतश्शरचापखड्गखेटकधरो द्विभुजस्त्रिभङ्गस्थितश्चैत्रे स्वात्युद्भवो मलेशो भगाद्यक्षरबीजः श्रीवत्सकौस्तुभोऽन्यत्सर्वं रामवत्, भरतं कैकेयीसुतं रामानुजं धर्मचारिणमिति । वामे शत्रुघ्नो हेमाभो रक्ताम्बरोद्बन्धकौन्तलयुतो ज्येष्ठमासे धनिष्ठाजातो नामाद्यक्षरबीजो निर्मलेशोऽन्यत्सर्वं लक्ष्मणवत, शत्रुघ्नं रामप्रियं विजयं भरतानुजमिति । दक्षिणे पुरतोऽञ्जनाभः श्वेतवस्त्रधरः कपिरूपस्सर्वाभरणभूषितो द्विभुजो दक्षिणेनास्यं पिधाय वामेन वस्त्रं विधायावनतगात्रः सीताया वार्ताविज्ञापनपरो मृगवाहनो दण्डध्वजो महानादरवः श्रावणे मासि श्रवणजः कलाद्यक्षरबीजो हनूमान् कपिराजं हनूमन्तं शब्दराशिं महामतिमिति । दक्षिणे शरं नपुंसकं श्यामाभं श्वेताम्बरं त्रिनेत्रं रौद्रसमुद्रघोषरवं वायुवाहनं पक्षध्वजं शिरसि शरभृतं माघमासे वारुण्यजातं शराद्यक्षरबीजं शरं महारवममोघं तीक्ष्णधारमिति । (अग्रतः बहुभ्रष्टमस्ति— ग्रंथकर्ता)

(v) रूप० 'रामश्शेरषुधृक्छ्यामः'

(vi) शिल्पः

वैदेहीसहितं सुरद्रुमतले हैमे महामण्डपे
मध्ये पुष्पकमासने मणिमये वीरासने सुस्थितम् ।
अग्रे वाचयति प्रभञ्जनसुते तत्त्वं मुनिभ्यः परं
व्याख्यान्त भरतादिभिःपरिवृतं रामं भजे श्यामलम् ॥
रामं रत्नकिरीटकुण्लधरं केयूर हारा न्वितम्
सीतालङ्कृतवामभागममलं सिंहासनस्थं प्रभुम् ।
सुग्रीवादिसमस्तवानरगणैः संसेव्यमानं सदा
विश्वामित्रपराशरादिमुनिभिः संस्तूयमानं भजे ॥
वामे भूमिसुता पुरस्तु हनुमान पश्चात् सुमित्रासुतः
शत्रुघ्नो भरतश्च पार्श्वदलयोरग्न्यादिकोणेष्वथ ।
सुग्रीवश्च विभीषणश्च युवराट् तारासुतो जाम्बवान्
मध्ये नीलसरोजकोमलरुचिं रामं भजे श्यामलम् ॥
वैदेहीमधिरूह्य जातपुलकां वामाङ्कमासेविनीं
वामेन स्तनचूचुकं पुलकिना वामं करेणामृशन ।
तत्त्वं दक्षिणपाणिना कलितया चिन्मुद्रया शोभयन्
रामो मारुतिसेवितो लसतु मे साम्राज्यसिंहासने ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

९. बलरामः
(i) बृ० सं०

बलदेवो हलपाणिर्मदविभ्रमलोचनश्च कर्तव्यः ।
बिभ्रत्कुण्डलमेकं शंखेन्दुमृणालगौरवपुः ॥
एकोनांशा कार्या देवी बलदेवकृष्णयोर्मध्ये ।
कटिसंस्थितवामकरा सरोजमितरेण चोद्वहती ॥
कार्या चतुर्भुजा सा वामकराभ्यां सपुस्तकं कमलम् ।
द्वाभ्यां दक्षिणपार्श्वे वरमर्थिष्वक्षसूत्रं च ॥
वामेष्वष्टभुजायाः कमण्डलुश्चापमम्बुजं शास्त्रम् ।
वरशरदर्पणयुक्तास्सव्यभुजास्साक्षसूत्राश्च ॥

(ii) अ० पु०

गदालाङ्गधारी च रामो वाथ चतुर्भुजः ।
वामोर्ध्वे लाङ्गल दद्यादधश्शङ्खं सुशोभनम् ॥

(iii) वि० ध०

सीरपाणिर्बलः कार्यो मुसली चैव कुण्डली ।
श्वेतोऽतिनीलवसनो मदोदञ्चितलोचनः ॥

(iv) वै० आ०

अथ बलभद्ररामं मध्यमं दशतालमिति द्विभुजं त्रिनतं दक्षिणहस्तेन मुसलधरं वामेन हलधरं श्वेताभं रक्तवस्त्रधरमुद्बद्ध-कुन्तलं दक्षिणे रेवतीं देवीं पद्मकिञ्जल्कवर्णां पुष्पाम्बरधरां दक्षिणेन हस्तेन पद्मधरां प्रसारितवामहस्तामेवं कारयेत् । तद्रूपं कौतुकं विष्णुं चतुर्भुजं वा कारयेत् ।

(v) स० सू०

बलस्तु सुभुजः श्रीमांस्तालकेतुर्महाद्युतिः ।
वनमालाकुलोरस्को निशाकरसमप्रभः ॥
गृहीतसीरमुसुलः कार्यो दिव्यमदोत्कटः ।
चतुर्भुजः सौम्यवक्त्रो नीलाम्बरसमावृतः ॥
मुकुटालङ्कृतशिरोरोहो रागविभूषितः ।
रेवतीसहितः कार्यो बलदेवः प्रतापवान् ॥

१०. कृष्णः ध्यानम्
(i) वि० ध०

उदयगिरितटान्ते रुक्मिणीसत्यभामा-
सहितमखिलगोपीवल्लभं देवदेवम् ।
अभयवरदहस्तं पायसादं प्रसन्नं
विबुधगणनिषेव्यं नन्दसूनुं नमामि ॥
कृष्णश्चक्रधरः कार्यो नीलोत्पलदलच्छविः ।
इन्दीवरधरा कार्या तस्य साक्षाच्च रुक्मिणी ॥

(ii) वै० आ०

कृष्णस्य लक्षणं वक्ष्ये । मध्यमं दशतालमिति सविंशति शताङ्गुलं द्विभुजं श्यामाभं रक्तवस्त्रधरं सर्वाभरणभूषितं-किरीटिनमुद्बद्धकुन्तलं वा दक्षिणेन हस्तेन क्रीडायष्टिधरं वामोद्यतकरकर्पूरहिक्कासूत्रादधस्तादथोर्ध्वं करमन्यत्सवं

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

राघवस्योक्तमार्गेण । दक्षिणे रुक्मिणीं देवी हेमाभां धम्मिल्ल-कुन्तलयुतामुद्बद्धकुन्तलां वा प्रसारितदक्षिणहस्तां सपद्मवाम-हस्तां तथा वामपार्श्वे सत्यभामां श्यामाभां शिरोरुहबन्ध-धम्मिलयुतामुद्बद्धकुन्तलयुतां वा सोत्पलदक्षिणहस्तां प्रसारित वामहस्तां सर्वाभरणसंयुक्तां कारयेत् । देवीभ्यां करण्डिकामुकुटं वेति केचित् । देवस्य वामपार्श्वे गरुडं प्राञ्जलीकृत्य सुस्थितं कारयेत् । देवस्य दक्षिणहस्तं लीलायष्टियुतं वामं सशङ्खं वा कारयेत् । तद्रूपं कौतुकं विष्णुं चतुर्भुजं कारयेत् ।

नवनीतनटः
(i) वै० आ० नवनीतनटस्य वामपादमाकुञ्च्य स्थितं दक्षिणमुत्तान-कुञ्चितं दक्षिणहस्तमभयं नवनीतयुतं वा वामं प्रसार्योत्तानं सर्वाभरणभूषितमम्बरहीनमम्बरधरायुतं नवनीतनृत्तरूपं कारयेत् ।

वेणुगोपालः
(i) वि० ध०
गोपालप्रतिमां कुर्याद्वेणुवादनतत्पराम् ।
वर्हापीडां घनश्यामां द्विभुजामूर्ध्वसंस्थिताम् ॥

(ii) वै० आ० गोपीगोपकन्याभिः परिवृतं दक्षिणं सत्ययोद्यतपादं वामं सुस्थितमाहृत्य द्विहस्ताभ्यामङ्गुलीषु वेणुविवरान्संयोज्य त्रिभङ्गभङ्गगानरससमन्वितगोपालं गायकम् ।

पार्थसराथिः
रथारूढं ध्वजाश्वचक्रमुकुलादिरथाङ्गैर्युक्तं रथं कृत्वा पार्थं सचापं प्राञ्जलीकृत्याधस्स्थले स्थितं चोपरि यत्र यष्टिपाशौ गृहीत्वा दक्षपादं स्थितं वाममुद्धृत्य रथभित्तौ संस्थाप्य दक्षिण-हस्तेन व्याख्याननिर्णयाङ्गुलिमुद्रया संयुक्तं पार्थसारथिरूपं कारयेत् ।

मदनगोपालः
पाञ्चरात्रे
रक्तवर्णो दशभुजस्सर्वालङ्कारभूषितः ।
शङ्खचक्रगदापद्मपाशाङ्कुशसुमाशुगान् ॥
इक्षुकोदण्डमन्याभ्यां वादयन्वेणुमादरात् ।
षोडशच्छदपद्मस्थष्षट्कोणोपरि संस्थितः ॥
गोपालो मदनाख्योऽयं मन्दस्मितमुखाम्बुजः ।
स्वरपत्रस्थगोपीभिरादरादीक्षितोऽवतात् ॥

कालियाहिमर्दकः
एवमेव कालियाहिफणोपरिस्थितं दक्षिणहस्तं सपताकं वामकरेणाहिपुच्छं संग्रहय नृत्यन्तं कारयेत् ।इति दिक्—कृष्ण-रूपाण्यसंख्यानि वक्तुं न शक्यानि ; तस्माद्यथेष्टरूपं कारयेत् ।

बुद्धः
(i) बृ० सं०
पद्माङ्कितकरचरणः प्रसन्नमूर्तिस्सुनीचकेशश्च ।
पद्मासनोपविष्टः पितेव जगतो भवेद्बुद्धः ॥

(ii) अ० पु०
शान्तात्मा लम्बकर्णश्च गौराङ्गश्चाम्बरावृतः ।
ऊर्ध्वपद्मस्थितो बुद्धो वरदाभयदायकः ॥

(iii) वि० ध०
काषायवस्त्रसंवीतस्स्कन्धसंसक्तचीवरः ।
पद्मासनस्थो द्विभुजो ध्यायी बुद्धः प्रकीर्तितः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

(iv) मान०

बौद्धस्य लक्षणं वक्ष्ये सम्यक् च विधिनाधुना ।
जिनदेवमस्थिरं युक्तं बौद्धस्य च विशेषतः ॥
स्थानकं चासनं वापि सिंहासनादिसंयुतम् ।
अश्वत्थवृक्षसंयुक्तं कल्पवृक्षं तथा न्यसेत् ॥
शुद्धश्वेतवर्णं स्याद् विशालाननसंयुतम् ।
लम्बकर्णमायताक्षं स्यात्तुङ्गघोणं स्मिताननम् ॥
दीर्घबाहु विशालं च वक्षःस्थलं च सुन्दरम् ।
मांसलाङ्गं सुसंपूर्णं लम्बोदरपूर्णकृत् ॥
समपादस्थानकं कुर्याल्लम्बहस्तं सुखासनम् ।
द्विभुजं च द्विनेत्रं च चोष्णीषोज्ज्वलमौलिकम् ॥
एवं तु स्थानकं कुर्यादासनादि यथाक्रमम् ।
पीताम्बरधरं कुर्यात्स्थानके चासनेऽपि च ॥
पीतं वामभुजोर्ध्वे तु चार्धकं तु साधना ।
स्थावरं जङ्गमं वापि दारु शैलं च लोहजम् ॥
चित्रं वार्धचित्रं च चित्रभासमथापि वा ।
पट्टे वा भित्तिके वापि कुर्यान्मृत्तिकाशर्कराभ्याम् ॥
उत्तमदशतालेन कारयेत्त्वङ्गमानकम् ।
शेषं प्रागुक्तवत्कुर्यात्तत्तदागमवद् बुधः ॥

(v) रूप०

बुद्धः पद्मासनो रक्तस्त्यक्ताभरणमूधजः ।
कषायवस्त्रो ध्यानस्थो द्विभुजो कार्द्धपाणिकः? ॥

१२ कल्की

(i) अ० पु०

धनुस्तूणान्वितः कल्की म्लेच्छोत्सादको द्विजः ।
अथवाश्वस्थितः खड्गी शङ्खचक्रशरान्वितः ॥

(ii) वि० ध०

खड्गोद्यतकरः क्रुद्धो हयारूढो महाबलः ।
म्लेच्छोच्छेदकरः कल्की द्विभुजः परिकीर्तितः ॥

(iii) वै० आ० कल्किनं मध्यमं दशतालमितमश्वाकारं मुखमन्यन्नराकारं चतुर्भुजं चक्रशङ्खधरं खड्गखेटकधरमुग्ररूपं भयानकमेवं देवरूपं कृत्वा कौतुकं विष्णुं चतुर्भुजमेव कारयेत् ।

(iv) रूप०

कल्की सखड्गोऽश्वारूढो हरेरवतरा इमे ।

५. चतुर्विंशतिमूर्तयः ।

(i) प० पु० (पाता०)

शंखचक्रगदापद्मी केशवाख्यो गदाधरः ।
नारायणः पद्मगदाचक्रशङ्खायुधैः क्रमात् ॥
माधवश्चक्रशङ्खाभ्यां पद्मेन गदया भवेत् ।
गदाब्जशङ्खचक्री वा गोविन्दाख्यो गदाधरः ॥
पद्मशङ्खारिगदिने विष्णुरूपाय वै नमः ।
सशङ्खाब्जगदाचक्रमधुसूदनमूर्तये ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

नमो गदारिशङ्खाब्जयुक्तत्रिविक्रमाय च ।
सारिकौमोदकीपद्मशङ्खवामनमूर्तये ॥
चक्राब्जशङ्खगदिने नमः श्रीधरमूर्तये ।
हृषीकेशस्सारिगदाशङ्खपद्मिन्नमोऽस्तु ते ॥
साब्जशङ्खगदाचक्रपद्मनाभस्वमूर्तये ।
दामोदर ! शङ्खगदाचक्रपद्मिन्नमोऽस्तु ते ॥
शङ्खाब्जचक्रगदिने नमस्संकर्षणाय च ।
सारिशङ्खगदाब्जाय वासुदेव नमोस्तु ते ॥
शङ्खचक्रगदाब्जादिधृतप्रद्युम्नमूर्तये ।
नमोऽनिरुद्धाय गदाशङ्खाब्जारिविधारिणे ॥
साब्जशङ्खगदाचक्रपुरुषोत्तममूर्तये ।
नमोऽधोक्षजरूपाय गदाशङ्खारिपद्मिने ॥
नृसिंहमूर्तये पद्मगदाशङ्खारिधारिणे ।
पद्मारिशङ्खगदिने नमोऽस्त्वच्युतमूर्तये ॥
गदाब्जारिसशङ्खाय नमः श्रीकृष्णमूर्तये ।

(ii) रूप•

केशवः कमलं कम्बुं धत्ते चक्रं गदामपि ।
नारायणः कम्बुपद्मगदाचक्रधरो भवेत् ॥
माधवस्तु गदां चक्रं शङ्खं वहति पङ्कजम् ।
गोविन्दो धरते चक्रं गदां पद्मं च कम्बुना॥
विष्णुः कौमोदकीं पद्मं पाञ्चजन्यं सुदर्शनम् ।
मधुसूदनस्तु चक्रं शङ्खं सरसिजं गदाम् ॥
त्रिविक्रमोम्बुजगदाचक्रशङ्खान्विभर्ति यः ।
वामनश्शङ्खभृच्चक्रगदापद्मलसत्करः ॥
श्रीधरो वारिजं चक्रं गदां शङ्खं दधाति यः ।
हृषीकेशो गदां चक्रं पद्मं शङ्खं च धारयेत् ॥
पद्मनाभः पाञ्चजन्यं पद्मं चक्रं गदामपि ।
दामोदरोम्बुजं शङ्खं गदां धत्ते सुदर्शनम् ॥
संकर्षणो गदाकम्बुसरसीरूहचक्रभृत् ।
वासुदेवो गदाशङ्खचक्रपद्मधरो मतः ॥
प्रद्युम्नश्चक्रभृच्छङ्खगदाम्भोजानि पाणिभिः ।
अनिरुद्धो लसच्चक्रगदाशङ्खारविन्दवान् ॥
पुरुषोत्तमस्तु चक्रं पद्मशङ्ख गदा दधत् ।
अधोक्षजस्सरसिजं गदाशङ्खसुदर्शनम् ॥
नरसिंहस्तु चक्राब्जगदाकम्बुविराजितः ।
अच्युतस्तु गदापद्मचक्रशङ्खैस्समन्वितः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

जनार्दनोम्बुजं चक्रं कम्बु कौमोदकीं दधत् ।
उपेन्द्रो वहते शङ्खं गदां चक्रं कुशेशयम् ॥
हरिर्धारयते कम्बु चक्रं तामरसं गदाम् ।
कृष्णः करैः पाञ्चजन्यं गदामब्जं सुदर्शनम् ॥
एतास्तु मूर्त्तयो ज्ञेया दक्षिणाधः करात्क्रमात् ।
वासुदेवादिवर्णास्स्युष्षट्षडेते तदादयः

टि०—अपराजित-पृच्छायाः चतुर्विंशतिमूर्तीनां नामानि यतः नैकसमानि अत असाधारणमूर्तिषु वासुदेवभेदेषु तासां सन्निवेशः ।

६. अन्याःवैष्णव-मूर्तयः—अंशावताराः क्षुद्रमूर्तय इत्यथः

१. दत्तत्रेयः
दत्तात्रेयकल्पे

मन्दारमूले मणिमण्डपस्थं सुवर्णदानैकनिवद्धदीक्षम् ।
ध्यायेत्परीतं नवनाथसिद्धैर्दारिद्रचदावानलकालमेघैः ॥
व्याख्यामुद्रां करसरिसजे दक्षिणे संदधानो
जानुन्यस्तावरकरसरोजातवामोन्नतांसः ।
ध्यानाधारात्सुखपरवशादर्धमामीलिताक्षो
दत्तात्रेयो भसितधवलः पातु नः कृत्तिवासाः ॥

२. पुरुषः
वै० आ०

प्राच्यां पूरुषं प्राङ्मुखं श्वेताभं पीतवाससं श्रीमेदिनीभ्यां संयुक्तं पुरुषं पुरुषात्मकं परं पुरुषं धर्ममयमिति ।

३. कपिल
(i) वै० आ०

आग्नेय्यां कपिलं प्राङमुखं श्वेताभोऽष्टहस्तो दक्षिणेनैकमभयमन्यच्चक्रासिहलधरो वामेनैकं कट्यवलम्बितमन्यच्छङ्खपाशदण्डधरो रक्तवासास्सावित्रीयुक्तं कपिलं मुनिवरं शुद्धं वेदरूपिणमिति ।

(ii) वि० ध०

प्रद्युम्नं विद्धि वैराग्यात्कापिलीं तनुमास्थितः ।
मध्ये तु करकः कार्यस्तस्योत्सङ्गगतः परः ॥
दोर्युगं चापरं तस्य शङ्खचक्रधरं भवेत् ।
पद्मासनोपविष्टश्च ध्यानसंमीलितेक्षणः ॥
कर्त्तव्यः कपिलो देवो जटामण्डलमण्डितः ।
वायुसंरोधपीनांसः पद्माङ्कचरणद्वयः ॥
मृगाजिनधरो राजन् ! श्मश्रुयज्ञोपवीतवान् ।
विभुर्मन्त्रमहापद्मकलिकासंस्थितः प्रभुः ॥
वैराग्यभावेन महानुभावो ध्यानस्थितस्त्वं परमं पदं तत् ।
ध्यायंस्तथास्ते भुवनस्य गोप्ता साङ्ख्यप्रवक्ता पुरुषः पुराणः ॥

४. यज्ञनारायणः
वै० आ०

नैर्ऋत्यां पश्चिममुखस्तप्तचामीकराभश्चतुश्शृङ्गो द्विशीर्षस्सप्तहस्तश्शङ्खचक्राज्यदर्वीस्रुक्स्रुवजुहूपधरस्त्रिपादो रक्तवस्त्रस्सर्वाभरणभूषितो दक्षिणवामयोस्स्वाहास्वधायुक्तो यज्ञो, यज्ञेशं सर्वदेवमयं पुण्यं सर्वक्रतुवरमिति ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

५. व्यासः	कृशः कृष्णतनुर्व्यासः पिङ्गलोऽतिजटाधरः ।
वि० ध०	सुमन्तुर्जैमिनिः पैलो वैशम्पायन एव च ॥
	तस्य शिष्याश्च कर्तव्याश्चत्वार पारिपार्श्वकाः ।
६. धन्वन्तरिः	धन्वन्तरिस्सुकर्तव्यस्सुरूपः प्रियदर्शनः ॥
	करद्वयगतश्चास्य सामृतः कलशो भवेत् ।
७. हयग्रीवः	मूर्तिमान्पृथिवीहस्तन्यस्तपादस्सितच्छविः ॥
वि० ध०	नीलाम्बरधरः कार्यो देवो हयशिरोधरः ।
	विद्यात्संकर्षणांशेन देवो हयशिरोधरः ॥
	कर्त्तव्योऽष्टभुजो देवस्तत्करेषु चतुर्ष्वथ ।
	शङ्खं चक्रं गदां पद्मं स्वाकारं कारयेद् बुधः ॥
	चत्वारश्च कराः कार्या वेदानां देहधारिणाम् ।
	देवेन मूर्ध्नि विन्यस्तास्सर्वाभरणधारिणः ॥
८. धर्मः	चतुर्वक्त्रश्चतुष्पादश्चतुर्बाहुस्सिताम्बरः ।
आ० पु०	सर्वाभरणवाञ्छ्वेतो धर्मः कार्यो विजानता ॥
	दक्षिणे चाक्षमाला च तस्य वामे च पुस्तकम् ।
	मूर्तिमान्व्यवसायस्तु कार्यो दक्षिणभागतः ॥
	वामभागे ततः कार्यो वृषः परमरूपवान् ।
	कार्यौ पद्मकरौ मूर्ध्नि विन्यस्तौ तु तथा तयोः ॥
(९) गरुड़ः	ताक्ष्र्यो मरकतप्रख्यः कौशिकाकारनासिकः ।
(i) वि० ध०	चतुर्भुजस्तु कर्त्तव्यो वृत्तनेत्रमुखस्तथा ॥
	गृध्रोरुजानुचरणः पक्षद्वयविभूषितः ।
	प्रभासंस्थानसौवर्णकलापेन विराजितः ॥
	छत्रं तु पूर्णकुम्भं च करयोस्तस्य कारयेत् ।
	करद्वयं तु कर्त्तव्यं तथा विरचिताञ्जलि ॥
	यदास्य भगवान्पृष्ठे छत्रकुम्भधरौ करौ ।
	न कर्त्तव्यौ तु कर्त्तव्यौ देवपादधरौ शुभौ ॥
	किंचिल्लम्बोदरः कार्यस्सर्वाभरणभूषितः ।
(ii) श्रीतत्व०	उपेन्द्रस्याग्रतः पक्षी गुडाकेशः कृताञ्जलिः ।
	सव्यजानुगतो भूमौ मूर्ध्नि च फणिमण्डितः ॥
	स्थूलजङ्घो नरग्रीवस्तुङ्गनासो नराङ्गकः ।
	द्विबाहुः पक्षयुक्तश्च कर्त्तव्यो विनतासुतः ॥
(iii) अ० पृ० २१९	वैनतेयं प्रवक्ष्यामि प्रमाणे स्वामिसन्निभः ।
	विष्णोरेवाग्रतः कार्यो नान्येषां च दिवौकसाम् ॥
	मूले चार्चोद्भवं मानं नतां स्तासादत्वांसकै? ।
	नवतालोद्भवा कार्या अर्चा चायामतस्तथा ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पञ्चषट्सप्ता द्विरङ्गुला नतो छाया ? ।
गुह्यनाभिस्तनं यावत् वाहनस्योच्छ्रयोऽग्रत: ।।
पादो जानुकटिर्यावत् अर्चाया वाहनस्य दृक् ।
करपुटाग्रस्थानं च कर्तव्यं वै भयात्मकम् ।।
नररूपसमाकार: तुङ्गतीक्ष्णोग्रनासिक: ।
भुजोपर्युभयपक्षो मुकुटालङ्कृतस्तथा ।।
तलजानुर्वामपाद: पादो जानुपुटोऽपर: ।
पादपद्माग्रकं भव्यं पक्षोत्सेधसुशोभित: ।।
शिवाग्रे वृषभ: स्थाप्यो विष्णोरग्रे च पक्षिराट् ।
ब्रह्मणोऽग्रे सदा चैवं श्वेताङ्गो हंस एव च ।।
सूर्याग्रे च भवेत् व्योम देव्यग्रे पादुका तथा ।
अर्चाया: पादपद्माग्रे पादुकातुल्यमुच्छ्रिता ।।

(iv) शिल्प० आजानूत्तप्तहेमप्रभमथ (च) हिमप्रख्यमानाभि साक्षा-
दाकण्ठात्कुङ्कुमाभं भ्रमरकुलसमश्यामलं मूर्ध्नि शान्तम् ।
व्याप्तब्रह्माण्डगर्भं द्विभुजमभयदं पिङ्गनेत्रोग्रतारं,
तार्क्ष्यं नीलाग्रनासद्युतिविविधमहापक्षलक्ष्यं नमामि ।।
पायाद्देवो गरुत्मानमृतघटगदाशङ्खचक्रासिनागा-
न्बिभ्राण:कृष्णपादो निजकरकमलैरष्टभिस्स्वर्णवर्ण: ।
पापघ्नै: पक्षपातैरखिलविषहरैराश्रितार्तिघ्नवृत्त:
श्रीमान्वा पन्नगारिस्सकलविषभयाद्रत्नजालोज्वालाङ्ग:।।

७. आयुध-पुरुषा:—आयुधपौरुषमूर्तय:

(i) उ० कामि० दशायुधप्रतिष्ठां तु वक्ष्ये लक्षणपूर्वकम् ।
वज्रं शक्तिश्च दण्डं च खड्गं पाशं तथाङ्कुशम् ।।
गदा त्रिशूलं पद्मं च चक्रं चेति दशायुधम् ।
एकवक्त्रं द्विनेत्रं च करण्डमुकुटान्वितम् ।।
कृताञ्जलिपुटोपेतं द्विबाहुं सर्वलक्षणम् ।
प्रतिमालक्षणप्रोक्तमानेनैव समाचरेत् ।।
जाये शक्तिगदे ज्ञेये चक्रपद्मे नपुंसके ।
शेषा: पुमांसो विज्ञेयास्त्वष्टतालविनिर्मिता: ।।
स्वमूर्त्यायुधसंयुक्तास्स्वक्रियादेकतालत: ।
तालार्ष्टांशविवृद्धया तु चतुस्तालावसानकम् ।।
कल्पयेदायुधं विद्वानस्त्रवर्गोक्तमार्गत: ।
तेषां मूर्ध्न्यायुधं कार्यमथवा मुकुटोपरि ।।
हस्तयोरन्तरे वापि वामेतरकरेऽपि वा ।
परित्यज्याङ्कुशं यद्वा तत्स्थाने कल्पयेद् ध्वजम् ।।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

(ii) पू० का० वज्रं शक्तिश्च दण्डं च खड्गं पाशं तथाङ्कुशम् ।
गदा त्रिशूलं चक्रं च पद्मं चेति दशायुधम् ॥
द्विभुजाश्च द्विनेत्राश्च सर्वाभरणसंयुताः ।
कृताञ्जलिपुटोपेताःकरण्डमुकुटान्विताः ॥
तत्तद्वक्त्रप्रमाणेन अस्त्रमूर्तिसमन्विताः ।
नानावर्णसमायुक्तं नीलजीमूतवर्णकम् ॥
नीलकं पद्मरागं च तुषारं चेन्द्रनीलकम् ।
शारदाभ्रं च रक्तं च वज्रादीनां तु वर्णकम् ॥
जाये शक्तिगदे विद्यात्पाशपद्मे नपुंसके ।
शेषाः पुमानिति ख्याताः कीर्तितास्त्वस्त्रमूर्तयः ॥

(iii) वि० ध० **शक्तिस्तु** योषिदाकारा लोहिताङ्गी वृकाश्रिता ।
दण्डोऽपि पुरुषः कृष्णो घोरो लोहितलोचनः ॥
खड्गश्च पुरुषश्श्यामशरीरः क्रुद्धलोचनः ।
पाशस्सप्तफणस्सर्पपुरुषः पुच्छसंयुतः ॥
ध्वजस्तु पुरुषः पीतो व्यावृतास्यो महाबलः ।
गदा पीतप्रभा कन्या सुपीनजघनस्थला ॥
त्रिशूलं पुरुषो दिव्यस्सुभ्रूश्श्यामकलेबरः ।
शङ्खोऽपि पुरुषो दिव्यश्शुक्लाङ्गश्शुभलोचनः ॥
हेतिर्बहुतिथी (?) सा स्त्री **भिन्दिश्श्यामतनुः** पुमान् ।
शरस्स्यात्पुरुषो दिव्यो रक्ताङ्गो दिव्यलोचनः ॥
धनुस्स्त्री पद्मरक्ताभा मूर्ध्नि पूरितचापभृत् ।
एवमस्त्राणि पूतानि जानीयात्परमेश्वरे ॥
उक्तानां चैव सर्वेषां मूर्ध्नि स्वायुधलाञ्छनम् ।
भुजौ द्वौ तु प्रकर्तव्यो स्कन्धलग्नौ सदा बुधैः ॥

सुदर्शनपुरुषः चक्रं शङ्खं च चापं परशुमसिमिषुं शूलपाशाङ्कुशाग्निं
(i) शिल्प० बिभ्राणं खड्गखेटं हलमुसलगदाकुन्तमत्युग्रदंष्ट्रम् ।
ज्वालाकेशं त्रिनेत्रं कनकमयलसद्गात्रमत्युग्ररूपं
वन्दे षट्कोणसंस्थं सरलरिपुजनप्राणसंहारचक्रम् ॥

(ii) सु० श० ज्योतिश्चूडालमौलिस्त्रिनयनवदनष्षोडशोत्तुङ्गबाहुः,
प्रत्यालीढेन तिष्ठन्प्रणवशशधराधारषट्कोणवर्ती ।
निस्सीमेन स्वभूम्ना निखिलमपि जगत्क्षेमवन्निर्मिमाणो,
भूयात्सौदर्शनो वः प्रतिभटपुरुष पूरुषः पौरुषाय ॥
उग्रं पश्याक्षमुद्यद्भृकुटि समकुटं कुण्डलि स्पष्टदंष्ट्रं
चण्डास्त्रैर्बाहुदण्डैर्लसदनलसमक्षौमलक्ष्योरुकाण्डम् ।
प्रत्यालीढस्थपादं प्रथयतु भवतां पालनव्यग्रमग्रे
चक्रेशोऽकालकालेरितभटविकटाटोपलोपाय रूपम् ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

चक्रं कुन्तं कृपाणं परशुहुतवहावङ्कुशं दण्डशक्ती
शङ्खं कोदण्डपाशौ हलमुसलगदावज्रशूलांश्च हेतीन् ।
दोर्भिस्सव्यापसव्यैर्दधदतुलबलस्तम्भितारातिदर्पै—
र्व्यूहस्तेजोऽभिमानी नरकविजयिनो जृम्भतां संपदे वः ॥

वैष्णवी द्वारावती

अ० पृ० २१९ द्वारकायाःप्रवक्ष्यामि छन्दान्पञ्च प्रकीर्तितान् ।
अनुक्रमादथैकैकं कथयिष्यामि च ध्रुवम् ॥
पद्मिनी विजयाख्या च श्रीतुङ्गा चैव शान्तिकी ।
महोत्सवा च विज्ञेयाः पञ्चैव द्वारिका मताः ॥
पद्मिन्याख्या कृतयुगे त्रेतायां विजया तथा ।
श्रीतुङ्गाख्या द्वापरे च शान्तिका च कलौ युगे ॥
चतुर्युगे चतुर्वर्णे प्रशस्ता च महोत्सवा ।
तलच्छन्दाश्चतस्रःस्युः पञ्चमी स्यान्महोत्सवा?॥
सङ्कर्षणस्य विजया वासुदेवस्य पद्मिनी ।
प्रद्युम्नस्य च श्रीतुङ्गाऽनिरुद्धस्याऽथ शान्तिका ॥
महोत्सवा च क्रियते सर्वमूर्तिषु कामदा ।
धर्मार्थकाममोक्षाणां प्राप्तिहेतव ईरिताः ॥
चतुरश्रीकृते क्षेत्रे दशधा प्रविभाजिते ।
द्विभागा भित्तिरित्युक्ता गर्भः षड्भाग ईरितः ॥
मध्यक्षेत्रत्रिभागस्तु ह्यर्चापीठः सुशोभनः ।
चतुरस्रे समे क्षेत्रेऽम्बुपट्टं वेदिकाकृति ॥
प्रतिष्ठाप्यो वासुदेवः पूर्वदिङ्मुख एव च ।
सङ्कर्षणः स्यात्सुखदो दक्षिणाभिमुखस्थितः ॥
प्रद्युम्नः सुखदो देवःतथा वरुणदिङ्मुखः ।
कौवेरीमुखसंस्थश्च ह्यनिरुद्धस्तथोच्यते ॥
एकपीठसमारूढाश्चत्वारो हरयः स्थिताः ।
अपरप्रागग्निनिर्ऋत्याश्रिताः [कृष्ण] उच्यते? ॥
धर्मार्थकाममोक्षाश्च लभ्यन्ते कृष्णदेवतः ।
कृष्णदेवस्याऽऽदि मूर्तिः द्वारकादि जगत्पतेः ॥
यथा प्रजा बिना राज्ञा पुंभि र्हीनास्तु योषितः ।
द्वारिका कृष्णहीना तु बिना कृष्णं न शोभते ॥
एकया कृष्णमूर्त्या च लब्धपुण्या च द्वारिका ।
समस्तमूर्तियुक्ताऽपि विना कृष्णं न पुण्यभाक् ॥
स्वप्ने बा मनसा वापि द्वारिकां यस्तु कारयेत् ।
लभेत् विष्णुलोकं स यावदाभूतसंप्लवम् ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वर्द्धमानापरं शिखरं ? कर्णानुगे कुद्धाकृति ? ।
प्राग्ग्रीवोभयकुक्ष्योश्च पक्षिराजाधिपगृहे ।।
आदिमूर्तिर्यथाकृष्णः ततो हीना समस्तकाः ।
विभक्तिचनुक्रमौ तासां कथयामि विशेषतः ।।
पादेन वा त्रिभागेन न्यूनः स्याद्वासुदेवकः
आदिमूर्त्यर्धभागेन वाराहस्य तथोदयः ।।
देवमानमिति ख्यातं भृत्यमानं च कथ्यते ।
कटिनाभिस्तनन्धूना नूनं भृत्यादि—देवताः ।।
बैकुण्ठो विश्वरूपश्चाऽनन्तश्त्रैलोक्यमोहनः ।
ऐते स्कन्धसमानाश्च शेषा न्यूनास्ततोऽपि च ।।
प्रासादे देवता मध्ये मण्डपे गर्भमध्यतः ।
उदुम्बरोच्छ्र्यसमा वेदिका जलपीठिका ।।
वेदास्रं वेदिकाकारं जलपट्टस्य निर्गमम् ।
वासुदेवादिक्रमेण स्थापयेच्चतुरो हरीन् ।।
शुक्लाम्बरधरो देवः शुक्लमाल्यानुलेपनः ।
शुक्लध्वजपताकश्च शुक्लयज्ञोपवीतिकः ।।
चतुःसहस्त्रगोपीयुक् कार्यः परिकरस्तथा ।
रुक्मिण्यादिगोपिकायुक् प्राङ्मुखो वासुदेवकः ।
रक्ताम्बरधरो देवो रक्तमाल्यानुलेपनः ।।
रक्तध्वजपताकश्च रक्तयज्ञोपवीतिकः ।।
रोहिण्यादिगोपिकायुगनन्तो दक्षिणामुखः ।
चतुःसहस्त्रगोपिकायुक् कार्यः परिकरस्तथा ।।
पीताम्बरधरो देवः पीतमाल्यानुलेपनः ।
पीतध्वजपताकश्च पीतयज्ञोपवीतकः ।।
रत्यादिगोपिकायुक्तः प्रद्युम्नःपश्चिमामुखः ।
चतुःसहसगोपिकायुक् कार्यःपरिकरस्तथा ।।
नीलाम्बरधरो देवश्चातसीपुष्पसन्निभः ।
नीलध्वजपताकश्च नीलयज्ञोपवीतकः ।।
उषादिगोपिकायुक्तोऽनिरुद्धश्चोत्तरामुखः ।
चतुःसहस्त्रगोपिकायुक् कार्यः परिकरस्तथा ।।
शेषाः पङ्क्तौ प्रकर्तव्याः केशवादिकमूर्तयः ।
पक्षभद्रे मण्डपस्य मध्योत्तमगवाक्षके ।।
बैकुण्ठो दक्षिणे स्थाप्यो वामतो विश्वरूपकः ।
मूलगर्भस्य मध्ये त्वनन्तत्रैलोक्यमोहनौ ।।
मण्डपाग्रे त्रिकं [प्रोक्तं कर्तव्यं सर्वकामदम् ।
एकद्वित्रिक्षणाः कार्याः परितो मत्तवारणाः ।।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वाराहो मध्यदेशे तु पीठोदुम्बरतः समः ।
शेषं कूर्मसमायुक्तं लक्ष्मीर्वैवामपार्श्वतः ॥
सम्मुखे च गवाक्षस्य द्वारस्य वामदक्षिणे ।
दुर्वासा नारदश्चैव ह्यगस्तिर्दण्डपाणिकः ॥
यथाविधि विधातव्या वत्सयुक्ता? च द्वादशी ।
विताने गोकुलोद्भाव कालीयस्यायभिदायकम्?॥
एवं वै द्वारिका कार्या संसारे मोक्षदायिनी ।
धर्मार्थकाममोक्षाणां वाञ्छितार्थफलप्रदा ॥

वैष्णव-विविध-प्रतिमा-पूजन-फलम्

अ० पृ० २१५

अथातः सम्प्रवक्ष्यामि विष्णु मूर्तेश्च लक्षणम् ।
वर्णभेदानुक्रमं च मूर्तीनां च पृथग्विधिम् ॥
केशवो नारायणश्च माधवो गोविन्दस्तथा ।
स्थापिता मूर्तयश्चैषां विप्राणां च सुखावहाः ॥
विष्णोर्मधुसूदनस्य क्षत्रियस्य फलप्रदे ।
त्रिविक्रमवामनयोः स्थापनं वैश्यसौखदम् ॥
स्थापिता श्रीधरी मूर्तिः शूद्रस्यापि सुखावहा ।
रजकानां चर्मकारनटानां वरटस्य च ॥
कैवर्तमेदभिल्लानां हृषीकेशः सुखावहः ।
कुम्भकारो वणिग्वैश्या चक्रिकध्वजिनावपि ॥
एतेषां प्रकृतीनां च सर्वेषां सुखावहः ।
पद्मनाभः सुविख्यातः स्थाप्यो देवश्चतुर्भुजः ॥
वांस्त्र्यम्बकः? श्रीमान् दण्डिनां च विशेषतः ।
दामोदरः समाख्यातंस्तथा च ब्रह्मचारिणाम् ॥
यच्छन्त्येते शुभं राज्यं भृत्यपुत्रकलकम् ।
हरिं हरं हेमगर्भं नारसिंहमतः परम् ॥
वामनं चैव वाराहं सर्ववर्णेषु कारयेत् ।
धनं धान्यं च सौभाग्यं लभन्ते कर्तृकावराः ॥

वैष्णव-लाञ्छन-रहस्यम्

वि० ध०

ब्रह्मणैव हरेः प्रोक्तं सर्वाभरणधारणम् ॥
बिभर्ति वक्षसा ज्ञानं कौस्तुभं विमलं हरिः ।
कृष्णा दीर्घा विचित्रा च वनमाला प्रकीर्तिता ॥
यथा सर्वमिदं बद्धं जगद्राजंश्चराचरम् ।
अविद्या वसनं तस्य संसार परिपालिनी ॥
विद्या शुक्ला विनिर्दिष्टा कृष्णमज्ञानमुच्यते ।
अज्ञानविद्या मध्यस्था त्वविद्या परिकीर्तिता ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

न कृष्णा न तथा शुक्ला तेन विद्येयमुत्तमा ।
अन्तरालं विभर्त्येव सुवर्णकनकोपमम् ।।
मनस्तु गरुडो ज्ञेयः सर्वभूतशरीरगम् ।
तस्माच्छीघ्रतरं नास्ति तथैव बलवत्तरम् ।।
दिशश्चतस्रो धर्मज्ञ तावत्यो विदिशस्तथा ।।
बाहवोऽष्टौ विनिर्दिष्टास्तस्य देवस्य शार्ङ्गिणः ।
बलं ज्ञानं तथैश्वर्यं शक्तिश्च यदुनन्दन ।
विज्ञेयं देवदेवस्य तस्य वक्त्रचतुष्टयम् ।।
वासुदेवश्च भगवांस्तथा सङ्कर्षणः प्रभुः ।
प्रद्युम्नश्चानिरुद्धश्च बलाद्याः परिकीर्तिताः ।।
द्वौ द्वौ भुजौ च विज्ञेयौ प्रतिवक्त्रं महात्मनः ।
वासुदेवस्य करयोर्ज्ञातिव्यौ सूर्यरात्रियौ ।।
सङ्कर्षणस्य करयोस्तथा मुसललाङ्गले ।
प्रद्युम्नस्य तथा ज्ञेयौ चापबाणौ महाभुज ।।
अनिरुद्धस्य विज्ञेयौ चर्मखड्गौ विचक्षणैः ।
पुरुषप्रकृती ज्ञेयौ सूर्याचन्द्रमसावुभौ ।।
एते च वासुदेवस्य करे चक्रगदे मते ।
कालं च लाङ्गलं विद्धि मृत्युं च मुसलं तथा ।।
ताभ्यां संकर्षणो रुद्रः कर्षतीदं चराचरम् ।
प्रद्युम्नस्य करे ? शार्ङ्गं चापं च यत्स्मृतम् ।।
ध्येयं तु परमं लक्ष्यं ताभ्यां छिन्दन्ति योगिनः ।
ब्रह्मणस्त्वनिरुद्धस्य करे चर्म महाभुज ।।
अज्ञानावरणं ज्ञेयं जगत्सृष्टिप्रयोजनम् ।
वैराग्यं नन्दकं खड्गं छित्वा वै तेन बन्धनम् ।।
नन्दन्ति योगिनो यस्मात्तन्नंदकं स्मृतम्? ।
एतद्धि तस्याप्रतिमस्य रूपं तवेरितं सर्वजगन्मयस्य ।।
एवं शरीरेण जगत्समग्रं बिभर्ति देवः स जगत्प्रधानः ।

विष्णवायतनम्

ब० पृ० १२१ पूर्वे नारायणं देवं पुण्डरीकाक्षं च दक्षिणे ।
पश्चिमे चैव गोविन्दमुत्तरे मधुसूदनम् ।।
विष्णुं कुर्यात्तथैशाने चाग्नेयां तु जनार्दनम् ।
नैर्ऋत्ये पद्मनाभं च वायव्ये माधवं तथा ।।
मध्ये तु केशवः स्थाप्यो वासुदेवस्तथोच्यते ।
संकर्षणश्च प्रद्युम्नो ह्यनिरुद्धो यथाक्रमम् ।।
जलशायी तथा प्रोक्तो दशावतारसंयुतः ।
शूकरस्त्वग्रतः स्थाप्यः सर्वदेवमयः शुभः ।।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

शेषकूर्मसमायुक्तो लक्ष्मीर्वै वामपार्श्वतः ।
विष्णवायतनमित्येवं कथितं त्वपराजित ॥

(iii) रूप०

दक्षिणे पुण्डरीकाक्षं पूर्वे नारायणं न्यसेत् ।
गोविन्दः पश्चिमे स्थाप्य उत्तरे मधुसूदनः ॥
ईशाने स्थापयेद्विष्णुमाग्नेय्यां तु जनार्दनम् ।
नैर्ऋत्ये पद्मनाभं च वायव्ये माधवं तथा ॥
केशवो मध्यतस्स्थाप्यो वासुदेवोऽथवा बुधैः ।
संकर्षणो वा प्रद्युम्नोऽनिरुद्धो वा यथाविधि ॥
दशावतारसंयुक्तस्स्थाप्यो जलशयोऽथवा ।
अग्रतस्सूकरस्स्थाप्यस्सर्वदेवमयश्शुभः ॥

विष्णोरष्टप्रतीहाराः

(i) अ० पृ० २११

प्रतीहारांस्ततो वक्ष्ये ह्यष्टौ चैव चतुर्दिशम् ।
तदनुक्रमरूपं च लक्षयेवक्ष्येऽहं यस्य यादृशम् ॥
वामनाकाररूपाश्च कर्त्तव्याः सर्वथोत्तमाः ।
तर्जनी शङ्खचक्रे च दण्डश्च प्रथमो वरः ॥
चण्डाभिधानश्चाख्यातोऽसव्यासव्ये प्रचण्डकः ।
वामे चण्डः प्रकर्तव्यः प्रचण्डश्चैव दक्षिणे ॥
पद्मं खड्गः खेटकाख्यो गदा चैव प्रदक्षिणम् ।
जयोऽथ विजयः पद्मगदयोश्च विलोमतः ॥
तर्जनी वाणचापौ च गदा चैव प्रदक्षिणम् ।
धाता गदा चापसव्ये विधाता च तथोत्तमः ॥
तर्जनी पद्मशङ्खौ च गदा चैव प्रदक्षिणम् ।
भद्रश्च शस्त्रापसव्ययोगे चैव सुभद्रकः ॥

(ii) रूप०

प्रतीहारांस्ततो वक्ष्ये दिशां चतसृणां क्रमात् ।
वामनाकाररूपास्ते कर्तव्यास्सर्वतश्शुभाः ॥
तर्जनीं शङ्खचक्रे च चण्डो दण्डं दधत्क्रमात् ।
वामे स्थाप्य : प्रचण्डोऽस्त्रासपव्ये दक्षिणे शुभः ॥
पद्मं खड्गं खेटकं च करैर्विभ्रद्गदां जयः ।
विलोमे पद्मगदयोर्विजयस्तौ क्रमान्न्यसेत् ॥
तर्जनीं वाणाचापं च गदां धाता तु सृष्टतः ? ।
गदापसव्ये तैरस्त्रैर्विधाता वामदक्षयोः ॥
तर्जनीं कमलं शङ्खं गदां भद्रः क्रमाद्धत् ।
शस्त्रापसव्ययोगेन सुभद्रस्तौ क्रमान्न्यसेत् ॥

द्वितीयो पटलः समाप्तः

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तृतीयो पटलः

शैव-प्रतिमा-लक्षणम्

(लिङ्ग-प्रतिमाः रूपप्रतिमाश्च)

लिङ्ग-प्रतिमाः—लिङ्गलक्षणम्

लिङ्गव्युत्पत्तिः

(i) सु० अ०

लयं गच्छन्ति भूतानि संहारे निखिलं यतः ।
सृष्टिकाले पुनस्सृष्टिं तस्माल्लिङ्गमुदाहृतम् ॥

(ii) अ० प०
१९६.६१—६५

सृष्टयुद्भवः सयोनिश्च शिवशक्त्या चराचरम् ।
शिवलिङ्गोद्भवा शक्तिः शक्तिमांश्च शिवस्तथा॥
उभयोरपि संयोगाच्छिवशक्त्योश्चराचरम् ।
... ... ॥

आकाशं लिङ्गमित्याहुः क्षितिःस्याज्जलहारिका ।
तन्मध्ये सर्वभूतात्मलयनाल्लिङ्गमुच्येत ॥
उच्छ्रयो लिङ्गमित्याहुः पृथिवी तस्य पीठिका ।
उमा तु पीठिका ज्ञेया शङ्करो लिङ्गमुच्यते ॥

लिङ्गभेद-प्रभेदाश्च

(i) सु० आ०

लिङ्गं स्थावरजङ्गमाख्यभिदया द्वेधा तु पूर्वं पुनः
षड्भेदं क्षणिकादिभेदवशतः तत्रापि चार्काश्विनौ ।
अष्टाष्टापि च सप्तधा च नवधा भेदाःक्रमात्स्युः पुनः
प्रोक्तं मानुषके पुनर्दशविधं धारामुखाद्यैर्भवेत् ॥

(ii) का० आ०

अतः परं प्रवक्ष्यामि लिङ्गलक्षणमुत्तमम् ॥
स्थावरं जङ्गमं चैव द्विविधं लिङ्गमुच्यते ।
शिलामयं तु यद्रूपमजविष्णुहरैर्युतम् ।
त्रिसूत्रं मुकुलैर्युक्तं स्थावरं लिङ्गमुच्यते ॥
शेषाण्यन्यानि सर्वाणि जङ्गमं लिङ्गमुच्यते ।

(iii) मय०

निष्कलं सकलं मिश्रं लिङ्गं चेति त्रिधा मतम् ।
निष्कलं लिङ्गमित्युक्तं सकलं बेरमुच्यते ॥
मुखलिङ्गं तयोर्मिश्रं लिङ्गार्चाकृतिसन्निभैः ।
बिम्बमूर्तिः शरीराभा विश्वमूर्तिस्वरूपकैः ॥
छन्नदेहप्रतिच्छन्दप्रतिमाङ्कैस्तु नामभिः ।
दृश्यो देवसमाख्यातो निष्कलं वक्ष्यतेऽधुना ॥

(iv) ईशा०

अथ लिङ्गं त्रिधा ज्ञेयं निष्कलं सकलं तथा ।
मिश्रं चेति च तल्लिङ्गमचलं च चलं द्विधा ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

निष्कलं केवलं लिङ्गं सकलं प्रतिमा स्मृता ।
मिश्राख्यं मुखलिङ्गं स्यान्मिश्रलक्षणलक्षितम् ॥
शैलं रात्नं तथा लौहं दारवं मार्तिकं पुनः ।
क्षणिकं चेति षोढा स्यात् क्रमाल्लिङ्गं तु निष्कलम् ॥

(v) मान०

लिङ्गमानविधि (धिः) सम्यग्लक्षणं वक्ष्यतेऽधुना ।
शैवं पाशुपतं चैव काला (ल) मुखं महावृ (व्र)तम् ॥
वामं च भैरवं चैव लिङ्गस्य नाम षड्विधम् ।
समकर्णं वर्धमानं शिवाङ्कं स्वस्तिकं तथा ॥
एतच्चतुर्विधं लिङ्गं विप्रादीनां च योग्यकम् ।
समकर्णं भूसुराणां भूपानां वर्धमानकम् ॥
वैश्यानां च शिवाधिक्यं परेषां स्वस्तिकं भवेत् ।
विप्राणां सर्वलिङ्गं च कुर्याद्दोषो न विद्यते ॥
शिवाधिकं स्वस्तिकं प्रोक्तं लिङ्गं भूपस्य योग्यकम् ।
स्वस्तिकं च शिवाधिक्यं वैश्यानामपि योग्यकम् ।
... ... ।
स्वयम्भुलिङ्गं सर्वेषां लक्षणं वक्ष्यतेऽधुना ।
उद्भूतं दैवकं चैव मानुषं गाणवं तथा ॥
एवं चतुर्विधं लिङ्गं स्वयम्भुरिति कीर्तितम् ।
तत्स्थाप्य (प्यं)स्वयमुद्भूतं स्वयम्भुरिति कीर्तितः ॥
देवैश्च स्थापितं लिङ्गं दैविकं लिङ्गमुच्यते ।
मानुषैः रचितं लिङ्गं मानुषं चेति कथ्यते ॥
अन्येषु (न्यैः) रचितं लिङ्गं चार्षञ्चैव कथ्यते ।
गणैश्च पूजितं लिङ्गं गणं चेति प्रकथ्यते ॥
उद्भूतं श्वेतवर्णं च (कुर्या) द् दैविकं रक्तवर्णकम् ।
मानुषं पीतवर्णाभं कृष्णवर्णं च गाणवम् ॥
आर्षं युक्तसूत्रं स्यात्स्वस्तिकाकृतिरेव वा ।
उद्भूतं शङ्कराकारं रुद्राक्षरं (च) दैविकम् ॥
नगर्दभं (गोपमं) गाणवं स्याल्लिङ्गाकारमिहोच्यते ।
उद्भूतस्ता(तं स्थू)लमूलं स्यात्कृशाग्रं वा समाधिकम् ॥
अन्यथा सर्वलिङ्गानां स्थूलाग्रं कृशमूलकम् ।
दैविकं डिण्डिमाकारं मानुषं स्रुक्स्रुवाकृतिम् ॥
उद्भूतं पर्वताकारं कूष्माण्डाकार (रं) गाणवम् ।
पुण्यनद्यद्रिदेशे तु लिङ्गसंग्रहणं भवेत् ॥
एवं परार्थं लिङ्गं स्याच्छ्रुषामगमोक्तवत् ।

लिङ्गनिवेशः—लिङ्गभागाः
(i) मय० ३३

शिरसो वर्तनमधुना लिङ्गानां वक्ष्यते क्रमशः ।
छत्राभा त्रपुषाभा कुक्कुटकाण्डार्धचन्द्रसदृशा याः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

बुद्बुदसदृशाः पञ्चैवोद्दिष्टा वर्वैना मुनिभिः ।
व्यासे षोडशभागे लिङ्गस्यैकं द्विगुणयुगांशेषु ।।
सलम्ब्याधोभागानुभयोरपि पार्श्वयोः क्रमशः ।
छत्राभानि शिरांसि च चत्वारीह प्रवर्तन्ते विधिना।।
समलिङ्गे प्रथमे द्वे शैवाधिकलिङ्गके तृतीयं स्यात् ।
चतुरंशेषु यदुक्तं तत्प्रोक्तं वर्धमानस्य ।।
सङ्करमन्योन्यं वाप्यशुभं स्याद्वर्तनानां च ।
उच्चार्धं कुक्कुटजं त्र्यंशैकांशेन्दुखण्डनिभम् ।।
बुद्बुदसादृशं सार्धं त्र्यंशं व्यासेऽष्टभागे तु ।
सर्वेषामपि चैतास्सामान्यावर्तनास्तु लिङ्गानाम् ।।
शिरसो वर्तनभागं त्र्यंशैकं चाधिरोप्य निजतुङ्गे ।
लिङ्गायामयुते तेषां भागयुते तेन सार्धमतः ।।
इन्द्वशिवनिगुणभागाः प्रोक्तास्सर्वेष्वपि क्रमशः ।
अवरे मध्यमलिङ्गे श्रेष्ठे लिङ्गे ततः शिरोमानम् ।।
लिङ्गानां शिरसीप्सितांशमुभयोः संलम्ब्य पार्श्वद्वयोः
कृत्वा मत्स्ययुतं तदास्यजघनान्निष्क्रान्तसूत्रद्वयोः
तस्त्राद्यत्र च संयुतिर्मतिमता बिन्दुत्रयाढ्यं तथा
कर्तव्यं बहुवर्तनास्वभिमतं सोपायमीशोदितम् ।।

(ii) अ० पृ० २०२

अर्चालिङ्गोद्भवं मानं वेश्मांशे त्वपराजित ।
न्यूनाधिको न कर्तव्यः प्रासादः सूत्रतः क्रमात् ।।
वेश्म न्यूनाधिकं शस्तं स्वभुबाणे च रत्नजे ।
घटितेषु विधिः ख्यातो ह्यर्चालिङ्गेषु तत्त्वतः ।।
धातुजे रत्नजे चैव स्वभुबाणे च दारुजे ।
वेश्म न्यूनाधिकं प्रोक्तं वक्त्रलिङ्गे तु पार्थिवे ।।
शैलजे घाटचलिङ्गे तु विधिरुक्तश्च शास्त्रतः ।
कर्तव्यं सूत्रकारेण प्रमाणं चानुपूर्वशः ।।
मृद्दारु शैललोहानामायामो वेदयुग्मांशकैः ।
रसैः सार्धसप्तभिश्च वसुभीरन्ध्रकैस्तथा ।
चतुर्विधश्च विष्कम्भः कर्तव्यः शास्त्रपारगैः ।
सुरगणार्चिता नाद्यं आद्यं सर्वसमादि सैसकम् ।।
विष्कम्भं रहितायामं कृत्वा रुद्रांशमर्धतः ।
अष्टभि वैष्णवं ज्ञेयं चतुर्भिर्ब्रह्मणस्तथा ।।
नाहपादेन विष्कम्भं ऋषिभिर्ब्रह्मणः पदम् ।
अष्टभिर्वैष्णवं सेयं रूद्रांशं ग्रहसङ्ख्यया ।।
इत्थमन्यच्च कर्तव्यं लिङ्गं सुरगणार्चितम् ।
तस्य तावत्पुनस्त्वेवं कर्तव्यं तत्त्वनाद्यकम् ।।
विष्कम्भं सार्धसप्तांशं पादोनाष्टांशमाब्जजम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

State Museum,
LUCKNOW.

अष्टभिर्वैष्णवं शैवं सपादाष्टभिरेव च ॥
अनाद्यनामतः प्रोक्तमन्यद् मानं च वक्ष्यते ।
विष्कम्भं नवभागं स्यात् सार्धाष्टांशं "पितामहः" ॥
अष्टभिर्वैष्णवं ज्ञेयं माहेशं सार्धसप्तकम् ।
इदमन्यच्च कर्तव्यमनाद्यलिङ्गलक्षणम् ॥
मूले मध्ये तथाग्रे च विस्तारायामतः समम् ।
सर्वतः सदृशं चैव लिङ्गं वै सर्वतः समम् ॥
विवर्ताक्षं वर्द्धमानं श्रीपुञ्जं नन्दिवर्धनम् ।
चत्वार्य्युत्तमलिङ्गानि क्रमो गुरुपदेशतः ॥
वासुदेवादिकं लिङ्गं सप्तेन्दुभ्यां षडिन्दुतः ।
इषुशब्दाद्युगक्ष्माभ्यां पृथु युक्तं च लिङ्गकम् ॥
सप्तेन्दुभ्यो विवर्ताख्यं षट्चन्द्रौ वर्धमानकम ।
इषुशब्दौ च श्रीपुञ्जं युगक्ष्मे नन्दिवर्धनम् ॥
विष्कम्यं रहितायामं शेषं? (शिवं)चन्द्रांशमर्धतः ।
षट्चन्द्रायतो विष्णुः शेषं ब्रह्मण उच्यते ॥
समस्तानां हि लिङ्गानां ब्रह्मादौ चतुरस्रकः ।
कर्णसूत्रात्मुक्तकोणे विष्णुरष्टाश्रको भवेत् ॥
ब्रह्मादिस्थानतो लुप्तो वृत्ताकारसमुद्भवः ।
पूजाभाग ऊर्ध्वतः स्याद्रुद्रांशो वृत्तसंज्ञकः ॥
विस्तारं चास्य लिङ्गस्य तदन्तमुपलक्षयेत् ।
विभक्तिर्मस्तके तेषां लिङ्गानां पञ्चधा भवेत् ॥
छत्राकारमष्टमांशे सार्धद्व्यंशं षडंशके ।
त्रपुषाभं वेदभक्ते द्विभागं कुक्कुटाण्डभम् ॥
त्रिभक्ते लिङ्गविस्तारे चैकांशमर्धचन्द्रकम् ।
सार्धत्र्यंशेन तुल्यं स्यादष्टांशे बुद्बुदाकृति ॥
तस्याधो भवति व्याधी राष्टभङ्गं च वक्रके ।
मध्यहीने च दुर्भिक्षमधोहीने प्रजाक्षोभः ॥
ऊर्ध्वहीने सर्वनाशो (ह्यङ्ग) हीने प्रजाक्षयः ।
पूजाहानिर्भागदीर्घे मध्यदीर्घे प्रजाक्षयः ॥
अनावृष्टिरधोदीर्घे राष्ट्रभङ्गोऽङ्गदीर्घतः ।
सन्धिरेखाबिन्दुजालकीलकादिकलङ्ककैः ॥
गौर! छिद्रतांध? (ब?) धूलिकाकमार्जारपादतः।
विनिर्मुक्तं चाऽथलिङ्गं भुक्तिमुक्तिप्रदं भवेत् ॥

(iii) शिल्प० कुर्वीत त्रपुषीफलाग्रसदृशं छत्रोपमं मस्तकं ।
बालेन्द्वाकृति कुक्कुटाण्डसदृशं विप्रादिवर्णक्रमात् ॥
भेदाः सर्वसमांशकप्रभृतयो नाहप्रभेदान्विताः ।
तेष्वेते क्रमतः स्युरेतदनुलोमाङ्गीकृतिश्चप्यते ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विस्तारं शिवलिङ्गमूर्ध्नि वसुनन्दादित्यरुद्रांशकं
कृत्वा तत् क्रमतो विशोध्य परितो द्व्येकद्विलोकांशकान् ।
कृत्वात्यष्टितिथिप्रकृत्यतिधृतिख्यातांशयुक्तं क्रमात्
पूजाभागमिहोक्तभागमुपरिष्टाच्छोधयेद् वर्णिषु ॥

तन्मस्तके नवविभागतया विभक्ते
भागं विशोध्य परितः शिवभागदैर्ध्यम् ।
द्वात्रिंशदंशकतया परिकल्प्य भागा-
नेकैकशो द्विजमुखेषु विशोधयेद् वा ॥

छत्राभं त्रपुषाकारं कुक्कुटाण्डनिभं तथा ।
अर्धेन्दुसदृशं चाथ बुद्बुदाभं तु पञ्चमम् ॥
सर्वेषामपि लिङ्गानां शिरसो वर्तनक्रमम् ।
लिङ्गव्यासात् षोडशांशमेकद्वित्रियवाधिकम् ॥
आरोप्य चाधः संलम्ब्य लिङ्गस्योभयपार्श्वयोः ।
वर्तयेत तत्र चत्वारि छत्राभानि भवन्ति हि ॥
प्रथमं च द्वितीयं च समलिङ्गे नियोजयेत् ।
शिवाधिके तृतीयं तु चतुर्थं वर्धमानके ॥
वर्तनं सङ्करं नैव कुर्यात् तदशुभं यतः ।
षडंशे लिङ्गविस्तारे सार्धद्व्यंशेन वर्तयेत् ॥
त्रपुषाभशिरः सिद्ध्यै रामांशैः कुक्कुटाण्डकम् ।
लिङ्गव्यासतृतीयांशवर्धनादर्धचन्द्रकम् ॥
लिङ्गव्यासेऽष्टधा भक्ते सार्धांशत्रयवर्धनात् ।
बुद्बुदाभस्य लिङ्गस्य शिरः सिध्यति शोभनम् ॥
अथ लिङ्गं स्थूलमूलं स्थूलं मध्ये कृशं तथा ।
शेषं स्थूलशिरस्कं च चतुर्धेति मयोदितम् ॥

लिङ्गपीठम्
(i) मय० ३४

निष्कलानां तु लिङ्गानां सकलानामथाधुना ।
सामान्येन विधानेन वक्ष्येऽहं पीठलक्षणम् ॥
जात्यैकया विधातव्यं नेष्टमन्योन्यसङ्करम् ।
आहुः शैले द्रुमे केचित् पीठं पक्वेष्टकामयम् ॥
लोहजं मणिलिङ्गानां लोहजानां तु पैण्डिकम् ।
आदाय स्त्रीशिलां सम्यक् पीठं लिङ्गस्य निर्मितम् ॥
पूजांशं द्विगुणं हीनं श्रेष्ठं लिङ्गोन्नते समम् ।
नवैते पीठविस्तारास्तयोर्मध्येऽष्टभाजिते ॥
उत्तमा मध्यमा हीनास्त्रिभेदा प्रकीर्तिताः ।
अथवा लिङ्गतुङ्गार्धं हीनं पादोनकं वरम् ॥
तयोर्मध्येऽष्टभागे तु पीठव्यासादि पूर्ववत् ।
विष्कम्भं त्रिगुणं वाथ नाहतुल्यविशालकम् ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

गर्भागारं त्रिभागैकं चतुर्भागैकमेव वा ।
विष्कम्भकर्णद्विगुणं सार्धं च त्रिगुणं तु वा ॥
पीठविस्तारमुद्दिष्टं स्वाष्टांशोनमथोपरि ।
मण्डनाय स्वविस्ताराष्टांशेनैवाधिकं ततः ॥
सर्वेषामपि पीठानां जन्मान्तं मूलविस्तृतम् ।
अग्रव्यासं महापट्टिकान्तं सम्यक् प्रकीर्तितम् ॥
विष्णुभागसमोत्सेधं सपादं सार्धमेव वा ।
चतुरश्रं च वस्वश्रं षडश्रं द्वादशाश्रकम् ॥
द्विरष्टाश्रं सुवृत्तं च तेषामेवायतान्यपि ।
त्रिकोणमर्धचन्द्रं च चदुर्दश निभानि वै ॥
समानि यानि लिङ्गस्य चाहुः पीठं च संज्ञकम् ? ।
सायतान्यासनानीति निष्कलानां वदन्ति वै ॥
त्रिकोणमर्धचन्द्रं च निष्कले सकले क्रमात् ।
भद्रपीठं च चन्द्रं च वज्रपीठं महाम्बुजम् ॥
श्रीकरं पद्मपीठं च महावज्रं च सौम्यकम् ।
श्रीकामाख्यमिति प्रोक्ता नाम्नैता नव पीठिकाः ॥
स्वानाम्नाकृतियुक्त्या तु त्रिकोणार्धेन्दुसंयुते ।
पीठिकानामलङ्कारं क्रमशो वक्ष्यतेऽधुना ॥
गृहीतोत्सेधमानांशवशेन विविधेन च ।
त्रिः पञ्चांशे द्व्यंशि जन्मं युगांशं वप्रस्योर्ध्वं पद्मकं चांशमर्धम् ।
कम्पं द्व्यंशं क्षेपणं चार्धमूर्ध्वे सार्धं ग्रीवं पूर्ववत् क्षेपणोच्चम् ॥
द्व्यंशं पट्टं स्नेहवार्यर्धभागं तत् सामान्यं भद्रपीठं सुहृष्टम् ।
विप्रोर्वीभृद्वैश्यकानां परेषां श्रीसौभाग्यारोग्यभोग्यप्रदायि ॥
द्विरष्टभागेऽश्विनिबाणनेत्रैर्युगांशनेत्रेन्दुभिरत्र पट्टम् ।
पद्मं च वृत्तं च दलं च पट्टं स्याद् पद्मपीठं घृतवारियुक्तम् ॥
द्विसप्तांशे सार्धमर्धं गुणार्धं जन्मं निम्नं पङ्कजं तत्क्रमेण ।
पट्टं निम्नं सार्धमर्धं तु भागं वज्रं निम्नं कम्पकं पूर्ववत्स्यात् ॥
त्र्यंशं पद्मं निम्नमर्धं तदूर्ध्वे द्व्याधार्धांशा पट्टिकाज्यार्धभागा ॥
एतत् पीठं वज्रपद्मं हि नाम्ना सामान्यं तत् सर्वलिङ्गेषु शस्तम् ।
त्रिषड्भागैद्व्यर्धवेदांशकार्धैः सार्धद्व्यर्धार्धार्धकार्धानिलांशैः ॥
अर्धाध्यर्धार्धांशकैर्जन्ममब्जं निम्नं पट्टं पङ्कजं वृत्तमब्जम् ।
निम्नं पट्टं पङ्कजं (त्र्य) श्रपट्टं तत् +++ स्नेहवारिक्रमेण ।
एवं नीत्या सम्यगुक्तं महाब्जं चित्रं सद्भिःपौरुषे चार्षकेऽपि ॥
लब्धोत्सेधे षोडशांशेऽशिजन्म त्र्यंशं पद्मं पद्मतुङ्गं युगांशम् ।
हृद्भागार्धं द्व्यंशिवृत्तं धृगर्धं पद्मं त्र्यंशं पट्टिका सार्धभागा ॥
अर्धांशं तत्स्नेहवार्यर्धघातं तावद्व्यासं त्र्यंशकं वा युगांशम् ।
नालव्यासं निर्गमं तत् त्रियंशं कुर्यादग्रं श्रीकरं श्रीकरं तत् ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अध्यर्धार्धद्वयर्धकार्धार्धकार्धैः पक्षार्धैद्वर्यर्धैः खुरं निम्नमब्जम् ।
पट्टं निम्नं पट्टमब्जं तु निम्नं पट्टं निम्नं पीठपद्मं दशांशे ॥
त्रिःपञ्चांशे लब्धतुङ्गे च सार्धे चार्धं वेदद्वयर्धसार्धेन्दुभागैः ।
अर्धद्वय्र्धाद्विय्र्धकार्धैः क्रमेण जन्मं निम्नं पट्टकं तत्क्रमेण ॥
जन्मं निम्नं पङ्कजं पट्टकं तद्वज्रं वृत्तं क्षेपणं कज्जमूर्ध्वे !
पट्टं निम्नं तन्महावज्रमुक्तं नाम्ना सौम्यं सर्वसंपत्करं स्यात् ॥
वज्रं वृत्तं तुङ्गनाम्ना तदेव सौम्यं पीठं सम्पदायुष्करं स्यात् ।
द्विःषड्भागे चन्द्रनेत्रार्धभागैः सार्धार्धार्धैः सार्धसार्धार्धकार्धैः ॥
अध्यर्धेनार्धेन निम्नं तु वप्रं निम्नं पद्मं धृग्दलं वृत्तमब्जम् ।
धृक् पद्मं तत्पट्टिकानिम्नपट्टं श्रीकाम्यं तल्लब्धतुङ्गे मयोक्तम् ॥
धाम्नि प्रोक्तान्यप्यधिष्ठानकानि ।
तान्यप्यस्मिन्मण्डनीयानि युक्त्या ॥
यथाबलं यथाशोभं यथायुक्ति प्रवेशनम् ।
निर्गमं सर्वपीठानामङ्गानां परिकल्पयेत् ॥
पीठव्यासत्रिभागैकं चतुर्भागैकमेव वा ।
निर्गमं मूलविस्तारं प्रणालस्य प्रकल्पयेत् ॥
मूलादग्रं त्रिपादं वा त्रिभागैकांशमेव वा ।
प्रणालस्याग्रविस्तारं त्रिपादं व घनं समम् ॥
गजोष्ठसदृशाकारं गोमुखाकारमेव वा ।
मुखाग्रविपुलत्र्यंशव्यासं स्यात् खातनिम्नकम् ॥
इष्टदिङमुखलिङ्गस्य पीठमध्यं तदेव हि ।
नालं वामे प्रकर्त्तव्यं सधारं वा यथारुचि ॥
अग्रपट्टस्य विस्तारं स्वोच्छ्रयेण समन्वितम् ।
सपादं वाथ सार्धं वा त्रिपादं वा यथाबलम् ॥
तत्पट्टस्य घनं ख्यातं तन्मूले कारयेद् बुधः ।
क्रमेणोन्नतिमल्लिङ्गं सङ्गमात् परिकल्पयेत् ॥
शिवभागमधः पीठात् किञ्चिदप्यवलम्बनम् ।
उन्नतं यदि चेन्नित्यं सर्वेषामशुभं भवेत् ।
ज्याकारमर्धचन्द्रस्य प्रकुर्याद् द्वारसम्मुखम् ।
पीठस्यास्य त्रिकोणस्य ऋजवंशं द्वारसम्मुखम् ॥
पीठाश्रं द्वारसूत्रस्य वेधकं नेष्यते बुधैः ।
दृषदैकेन कर्त्तव्यं पीठं निःसन्धिकं शुभम् ॥
एकलाभेऽपि कर्तव्यमेकयैवोधमण्डनम् ।
क्षुद्रे महति मध्येषु चागतं सन्धिमण्डितम् ॥
उपर्युपरि पीठानां सन्धिरङ्गावसानके ।
नालमध्येऽर्धमध्ये च कर्णे सन्धिं न सन्धयेत् ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

युञ्जीयाद् दक्षिणे वामे दीर्घे दीर्घं यथाक्रमम् ।
त्रिखण्डं वाप्यनेकं वाधोगतं मुक्तितो न्यसेत् ॥
लिङ्गायामसमव्यासा श्रेष्ठा ब्रह्मशिला परा ।
पूजांशद्विगुणाष्टांशे तयोर्मध्ये तु भाजिते ॥
पूर्ववन्नवधाव्यासा सव्यासार्धोन्नता वरा ।
व्यासार्धार्धार्धका हीना तयोर्मध्ये तु पूर्ववत् ॥
अथवा लिङ्गविषकम्भद्विगणा श्रेष्ठविस्तरा ।
अध्यर्धं कन्यसी प्रोक्ता स्वव्यासार्धत्रियाद्घना ॥
व्यासोत्सेधेषु तेष्वेवं पूर्ववन्नवधा भवेत् ।
आकृतिर्ब्रह्मभागस्य संस्थानं तु यथा तथा ।
लिङ्गव्याससमं व्यासं मध्ये खातं प्रकल्पयेत ।
स्वव्यासार्धं तु वाष्टांशं गम्भीरं लिङ्गमूलवत् ॥
न्यस्तरत्नयुतं सम्यक् शिष्टं तल्लिङ्गमूलतः ।
नपुंसकाश्मना तत्र कर्त्तव्या ब्रह्मणः शिला ॥
पीठब्रह्माश्मनोर्नन्द्यावर्ताभा मध्यमे शिलाः ।
चसस्रस्ताः प्रयोक्तव्याः प्रादक्षिण्यक्रमेण तु ॥

(ii) अ०पृ० २०१

लिङ्गायामसमं पीठे पृथुत्वं तु प्रमाणतः ।
ब्रह्माद्यं चैव विष्ण्वन्तं विदुः पीठसमुच्छ्रयम् ॥
प्रणालं तु विभागेन स्कन्धतुल्यार्धकं तथा ।
त्रिधा विभक्तमग्रं वै मध्यांशे जलमार्गतः ॥
स्कन्धे तु पादमेकैकं मध्यवंशोद्भवाकृतिः ।
पृथुत्वे पीठसूर्यांशा मेखला भ्रमणाकृतिः ॥
मेखलायास्त्रिभागेन पात्रं! (खातं)कुर्यात्तथा परम् ।
याम्योत्तरं तत्सपादमग्रे वै सार्धभागिकम् ॥
कूर्मपृष्टोद्भवाकारं मस्तकं दर्पणोपमम् ।
मेखलामध्यतः कार्यं तावत् पीठं तु कामदम् ॥
उच्छ्ये चैव पीठस्य त्रिंशद्धा प्रविभाजिते ।
एकांशा भूगतिः कार्या त्रिभागा कर्णपट्टिका ॥
भागार्धं मुखपट्टी च त्रिभागा स्कन्धकोन्नतिः ।
स्कन्धस्य पट्टिका सार्धा भागार्धेऽन्तरपट्टिका ॥
सार्धंद्व्यंशं कर्णकं स्यादेकभागा तु चिप्पिका ।
सार्धद्व्यंशा कपोताली चान्तः पट्टं द्विभागकम् ॥
सार्धाःपञ्च ग्रासपट्टिः कर्तव्यं विधिपूर्वकम् ।
अर्धे तु स्कन्धपट्टयाश्च त्रिभागं स्कन्धक्षोभणम् ॥
अर्धे तु मुखपट्टयाश्च चतुर्भागं च कर्णकम् ।
क्षोभणस्याष्टभिर्भागैः कर्तव्यं तदशङ्कितः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

यावद्दीर्घं भवेल्लिङ्गं तावान् पीठस्य विस्तरः ।
उमा तु पीठिका ज्ञेया लिङ्गं शङ्कर उच्यते ॥
न्यूनाधिकं न कर्तव्यमुमायाः शङ्करस्य च ।
न्यूनाधिके कृते दोषः कुरूते राष्ट्रविभ्रमम् ॥
शुण्डिला (स्थण्डिला) च तथा वापी पक्षी वेदी तथैव च ।
मण्डला पूर्णचन्द्रा च वज्री पद्माकृतिस्तथा ॥
अर्धचन्द्रा त्रिकोणा च विज्ञेया दशपीठिकाः ।
आसां तु रूपसंस्थानं कथयामि निबोध ते ॥
स्थण्डिला चतुरश्रा च एकमेखलया युता ।
द्विमेखला भवेद्वापी यक्षी चैव त्रिमेखला ॥
चतुरश्रायता चैव वेदी सर्वार्थशोभना ।
लिङ्गेष्वेताः प्रयत्नेन वर्जनीया सदा बुधैः ॥
कार्या च मण्डलाकारा मेखलाभिरलङ्कृता ।
मण्डला सा तु विज्ञेया गणानां वृद्धिहेतवे ॥
पूर्णचन्द्रसमाकारा मध्येन्यस्तद्विमेखला ।
सा विज्ञेया पूर्णचन्द्रा रुद्राणां सततं प्रिया ॥
षडश्रा च भवेद् वज्री मेखलात्रयभूषिता ।
षोडशाश्रा भवेत् पद्मा किञ्चिद्ध्रस्वा तु मूलतः ॥
लग्नज्यधनुषाकारा अर्धचन्द्रा तु सा भवेत् ।
त्रिकोणा चोर्ध्वतो ह्रस्वा शक्त्या च सदृशी भवेत् ॥
न्यस्ता चोत्तरपूर्वेण प्रशस्ता लक्षणान्विता ।
लिङ्गस्यार्धत्रिभागेन बाहुल्यार्धसमन्विता ॥
मेखलायास्त्रिभागेन खातं चैव प्रणालतः ।
अधस्तात् पादहीनं तु कारयेच्चैव क्षोभणम् ॥
प्रमाणादधिकं कार्यं प्रणालं चोत्तरे तथा ।
पृथुपीठत्रिभागेन निष्काशं तस्य कारयेत् ॥
विस्तारस्तत्प्रमाणेन मूलार्धं च तदग्रतः ।
जलमार्गविधानं तदग्रतश्च सुशोभनम् ॥
ददाति स्थण्डिला चैव धनं धान्यं च पुष्कलम् ।
गोमहिषीप्रदा वापी यक्षी सर्वार्थसंपदम् ॥
मण्डला कीर्तिबहुला पूर्णचन्द्रा तु शान्तिदा ।
वज्री शत्रुविनाशाय पद्मा सौभाग्यदायिनी ॥
पुत्रं दद्यादर्धचन्द्रा त्रिकोणा शत्रुनाशिनी ।
देवस्य योजनार्थं तु पीठिकास्तत्र कीर्तिताः ॥
शैले नियोजयेच्छैलीं दारुजे दारुजां तथा ।
पार्थिवे पार्थिवा कार्या लोहजे लोहजोत्तमा ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

रत्नजे धातुजा शस्ता रत्नजा तु विशेषतः ।
नान्ययोनिं प्रकुर्वीत कृतायां वैरविग्रहे ॥
यावद्दीर्घं भवेल्लिङ्गं तावान् पीठस्य विस्तरः ।
मानाधिकं न कुर्वीत उमायाः शङ्करस्य च ॥
उमा तु पीठिका ज्ञेया लिङ्गं शङ्कर उच्यते ।
एवमेव समाख्यातं पीठिकाना तु लक्षणम् ॥

चलाचलप्रभेदेन द्रव्यभेदेन फलभेदप्रदर्शनपुरस्सरं क्षणिकलिङ्गलक्षणम्

(i) सु०आ०

क्षणिकं चैव मृल्लोहरत्नजं दारुजं तथा ।
शैलजं चैव विघ्नेश ! षड्भेदं लिङ्गमुच्यते ॥
शिलामयं तु यद्रूपमजविष्णुहरैर्युतम् ।
त्रिसूत्रं पुष्करैर्युक्तम स्थावरं लिङ्गमुच्यते ॥
शेषाण्यान्यानि सर्वाणि जङ्गमं लिङ्गमुच्यते ।
क्षणिकं द्वादशं प्रोक्तं मृन्मयं द्विविधं पुनः ।
दारुजं चाष्टधा प्रोक्तमष्टधा लोहजं स्मृतम् ॥
सप्तधा रत्नजं चैव शैलजं तु चतुर्विधम् ।
रत्नजं लोहजं चैव बाणलिङ्गं चलं स्मृतम् ॥
शैलजं चाचलं प्रोक्तं मृन्मयं दारुजं तथा ।
क्षणिकानां फलं वक्ष्ये सैकतं मोक्षकांक्षिणाम् ।
तण्डुलं विभवार्थीनामन्नमन्नप्रदं स्मृतम् ॥
नदीमृद्भूमिलाभं स्याद्गोमयं रोगनाशनम् ।
नवनीतं मनोह्लादं रुद्राक्षं ज्ञानवर्धनम् ॥
गन्धं सौभाग्यकांक्षीणां कूर्चं मुक्त्यर्थिनां स्मृतम् ।
आयुष्यवर्धनं पुष्पं गुलमिष्टार्थसिद्धिदम् ॥
पैष्टं पुष्टिप्रदं प्रोक्तं क्षणिकानां फलं भवेत् ।
एतेषां चैव लिङ्गानां न प्रमाणं न च स्थितिः ॥

(ii) मान० ५२

यद् यद् द्रव्येण लिङ्गं तत्तद्द्रव्येण पीठकम् ॥
नवरत्नैश्च संयुक्तं स्वर्णपीठं प्रकल्पयेत् ।
यत्तद्रत्नैश्च यल्लिङ्गे तत्तन्नाम्नैव नामकम् ॥
पीठं (ठे) तु लिङ्गके वापि नवरत्नैर्विशेषतः ।
एककर्णं चैकलिङ्गं बहुभिश्चैकलिङ्गकम् ॥
वज्रलिङ्गमिति प्रोक्तं रत्नानि-इति कथ्यते ।
एकं वा बहुरत्नं वा नवरत्नैश्च संयुतम् ॥
लिङ्गं यदुक्तं स्वर्णेन पीठे रत्नानि योजयेत् ।
अथवा केवलं स्वर्णं पीठं वा कारयेद् बुधः ॥
स्वर्णलिङ्गमिति प्रोक्तं लक्षणं पूर्ववद्भवेत् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

आचार्यहस्तेन वा लिङ्गं शिष्यस्य नाहाङ्गुलवत्
पश्चात्पूजां तथा कुर्यादाचार्योक्तोपदेशवत् ।
अथोक्तलिङ्गपूजाया फलं वक्ष्ये यथाविधि ॥
नदीपर्वतलिङ्गानां कैलासारोहणं भवेत् ।
इह लोकस्य पूज्यत्वं भुक्तिमुक्तिफलप्रदम् ॥
रत्नलिङ्गस्य पूजायां फलं मुक्तिप्रदायकम् ।
स्वर्णलिङ्गार्चनस्यैवं फलं स्वर्गापवर्गकम् ॥
स्वर्णपीठं तु तल्लिङ्गं मुक्तावलिधनमथापि वा विद्रुः ।
कर्तृ मानसवशात्कल्पयेत्प्रशस्तमिह दोषवर्जितम् ॥
तोये वा मण्डले(ण्डूरे)वापि पुष्पे वा उ(चो)त्पलेऽपि वा ।
सिकते वाथ हस्ते वा चाक्षतैर्वा गुलैस्तथा ॥
मोदके वाथ पिण्ठे वा गोमये वा यथेष्टकम् ।
सद्यः पूज्यं रचेल्लिङ्गं प्रोक्तं तत्क्षणिकं भवेत् ॥
तानि लिङ्गानि सर्वेषां यथालिङ्गाकृतिर्भवेत् ।

(iii) स०सू० इदं पक्वमपक्वं वा लोहतू? भयगर्भितम् ।
अपक्वे वज्रलेपाद्यं कर्तव्यं सिद्धिसास्नुभिः ॥
भूतये लोहजं लिङ्गं सीसकत्रपुवर्जितम् ।
काञ्चनप्रभवं शत्रुच्छेदकायथि संचितम् ॥
यास्य लिङ्गोक्तलक्ष्मैतत् त्रापुसांनागाकुन्मचात्र्यादि? ।
लोहोद्भवं वा यन्मान्तृ + + गुह्यकसिद्धिकृत् ॥
भिक्षूणां चलमेतत् स्यान्मुमुक्षूणां च वेश्मशु ।
श्रेष्ठं समस्तरान्ताढ्छं वज्रजं तदरिच्छिदे ॥
पद्मरागं महाभूत्यै सौभाग्याय तु मौक्तिम् ।
पुष्परागमहानीलौ यातीरसमुद्भवम् ॥
यशसे कुलसन्तत्यै तेजसे सूर्यकान्तकम् ।
ता+च्छं स्फाटिकं सर्वकामदं शूलारस्रो? ॥
मणिजं + + + शत्रुक्षयाय? पुलका तथा ।
सस्यकं सस्यनिष्पत्यै भोजगं दिव्यसिद्धिदम् ॥
श्रैष्ठं सारक्त ? लिङ्गमारोग्याहितचेतसाम् ।
वैक्रन्तकसहावर्तराकायस्कान्तजं हितम् ॥
क्षुद्रसिस्त्रिपु? तन्मन्त्र + + + जातिसंस्कृतम् ।
फलं सम्यग् गुणादूह्यमन्यासु मणिजातिषु ॥

मृन्मयादिलिङ्गलक्षणम्

मृन्मयलिङ्गम्
(i) सु०आ० मृन्मयं राज्यफलदं पक्वापक्वप्रभेदकम् ।
शुद्धदेशे मृदं ग्राह्य पूजाभागं सयोनिकम् ॥
कृत्वा दग्धमिदं प्रोक्तं पक्वापक्वमिहोच्यते ।
चूर्णैरालोड्य सुमृदा मासपक्षोषितं तथा ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

रत्नबीजसमायुक्तं पक्वं लिङ्गं समाचरेत् ।
(ii) का०आ० श्वेतां च मृदमादाय पयस्तैलदधिघृतम् ।
यवगोधूमचूर्णं च पयोवृक्षत्वचान्वितम् ।।
विमलेन सुगन्धेन चूर्णान्यालोड्य संमृदा ।
ग्रीवेष्टकं सर्जरसं तथा गुग्गुलुशर्कराः ।।
पञ्चनिर्याससंयुक्तमथ लोकप्रसिद्धिदम् ।
एतेषां संख्यया तुल्यं मृदं गृह्णीत देशिकः ।।

(iii) अ०पृ० २०४ पार्थिवस्य प्रवक्ष्यामि विधानं परमं शुभम् ।
पक्वं चैवमपक्वं वा पार्थिवं द्विविधं स्मृतम् ।।
तत्राऽपक्वं प्रशंसन्ति आयुष्यं श्रीवलप्रदम् ।
तदनुक्रमयोगं च कथयामस्तवान्तिके ।।
श्वेतां पीतां तथा रक्तां मृत्तिकां च समाहरेत् ।
तथा गोधूमचूर्णं तु माक्षिकं चूर्णमेव तु ।।
कपिलाया घृतं क्षीरं पञ्चक्षीरं च वृक्षजम् ।
गुडं च गुग्गुलं चैव चूर्णयित्वा च प्रक्षिपेत् ।।
वर्जयित्वान्यद्रव्याणि लाक्षाकुद्दालकाम्बिकम् ।
प्रतिक्षेपो वरण्डेषु मासं पक्षाधिकं तथा ।।
ततस्तु कारयेल्लिङ्गं विधियुक्तक्रमैस्तथा ।
व्यक्ताव्यक्तमिदं कुर्याच्छाश्वतं सर्वकामदम् ।।
अव्यक्तमिदमुक्तं तु व्यक्तमानं प्रवक्ष्यते ।
पूजाभागस्त्रिभागे तु वक्त्रस्य निर्गमं विदुः ।।
मृद्दारुलोहशैलैश्च श्वेतं लिङ्गं तु कामदम् ।
पार्श्वलिङ्गसमायुक्तं तत्तन्मानेन तत्कुरु ।।
लिङ्गार्चा पृथुमानं तद्विभक्तं द्वादशाङ्गुलम् ।
चतुर्विंशतिकोच्छ्राये वक्त्रं वै द्वादशाङ्गुलम् ।।
ललाटं द्वयङ्गुलं प्रोक्तं भ्रूनेत्रं द्वयङ्गुलं तथा ।
नासिका द्वयङ्गुला प्रोक्ताऽधरौ चैककाङ्गुलौ ।।
शङ्खाकृतिः कण्ठरेखा हनुका द्वयङ्गुलायता ।
वेदाङ्गुलं पृथुवक्त्रं द्वयङ्गुला नासिकापुटिः ।।
द्वयङ्गुलायतकं नेत्रं तन्मानं नेत्रकान्तरम् ।
चापाकारा च दृष्टिः स्याद भ्रूलता चाङ्गुलायता ।।
द्वादशाङ्गुलविस्तारे कर्णावेकैककाङ्गुलौ ।
भ्रूसमोत्सेधकौ चैव उभौ कर्णौ समानतः ।।
जटामुकुटसंयुक्तं शशाङ्ककृतशेखरम् ।
शिवाननं कुण्डलादि दिव्याभरणभूषितम् ।।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

शिवपञ्चवक्त्रध्यानम्	प्रालेयामलबिन्दुकुन्दधवलं गोक्षीरफेनप्रभम् ।
१. सद्योजात:	भस्माभ्यङ्गमनङ्गदेहदमनं ज्वालावावलीलोचनम् ।।
	ब्रह्मेन्द्रादिमरुद्गणैः स्तुतिपरैरभ्यर्यचितं योगिभः ।
	वन्देऽहं सकलं कलङ्करहितं स्थाणोर्मुखं पञ्चमम् ।।
२. वामदेव:	गौरं कुङ्कुमपिञ्जरं सुतिलकं व्यालोलगण्डस्थलम्
	भ्रूविक्षेपकटाक्षवीक्षणलसत्संसिक्तबिम्बं सकर्णोत्पलम् ।
	स्निग्धं बिम्बफलाधरं प्रहसितं नीलालकालायितम्
	वन्दे पूर्णशशाङ्कमण्डलनिभं वक्त्रं हरस्स्योत्तरम् ।।
३. अघोर:	कालाभ्रभ्रमराञ्जनद्युतिनिभं व्यावृत्तपिङ्गेक्षणम्
	भालेन्दुद्युतिभासितं सुदशनं प्रोद्भिन्नदंष्ट्राङ्कुरम् ।
	सर्वप्रोतकपालशुक्तिशकलं व्याकीर्णमाशेखरम्
	वन्दे दक्षिणमीश्वरस्य कुटिलं भ्रूभङ्गरौद्रं मुखम् ।।
४. तत्पुरुष:	संवर्ताग्नितडित्प्रतप्तकनकप्रस्पर्द्धितेजोऽरूणम्
	गम्भीरध्वनिनिःसृतं सुदशनं प्रोद्भासिताम्राधरम् ।
	बालेन्दुद्युतिलोलपिङ्गलजटाभारप्रबद्धोरगम्
	वन्दे सिद्धसुरासुरेन्द्रसुनुतं तत्पूरषस्याऽऽननम् ।।
५. ईशान:	व्यक्ताव्यक्तगुणेतरं च वरदं षट्त्रिंशतत्वाधिकम्
	तस्मादुत्तरतत्वमक्षरमिति ध्येयं सदा योगिभिः ।
	वन्दे तामसवर्जितेन मनसा सूक्ष्मातिसूक्ष्मं परम्
	शान्तं पञ्चममीश्वरस्य वदनं खव्यापि तेजोमयम् ।।
दारुजलिङ्गम्	शमीमधूकमण्डूककर्णिकारं तथैव च ।
(i) सु० आ०	तिन्दुकार्जुनकौ चैव पिप्पलोदुम्बरं तथा ।।
(ii) का० आ०	खदिरश्चन्दनस्सालो मधूकस्सरलो मतः ।
	बिल्वः कदम्बबदरौ देवदारुश्च शिंशुपा ।।
	पनसार्जुनावशोकश्च क्षीरिणो रक्तचन्दनः ।
	स्निग्धसाराश्च ये वृक्षाः पयसान्ये तु मध्यमाः ।।
(iii) अ०पृ० २००	वक्ष्यामि दारुजं लिङ्गं धर्मकामार्थमोक्षदम् ।
	तदनुक्रमयुक्तांश्च कथयाम्यपराजित ।।
	द्वयष्टकाङ्गुलमाद्यं स्यात् षड्ढस्तान्तं समुच्छ्रितम् ।।
	तन्मध्यानुक्रमं वच्मि मुक्तिकामार्थहेतवे ।
	षोडशाङ्गुलमाद्यं स्मात् क्रमात् षोडशवृद्धितः ।।
	विधेयं लिङ्गनवकं षट्करान्तं प्रकीर्तितम् ।।
	मकरेन्दुं त्यक्तमाल? पुष्पाक्षं तु सिद्धार्थकम् ।
	दण्डाख्यं पौरुषं काम्यं पुष्पकं च फलोद्भवम् ।।
	एवं च नवलिङ्गानि सर्वकामार्थदानि च ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

उक्तानि यानि वै दारु-मयानि शिवशासने ॥
चन्दनो देवदारुश्च रक्तचन्दन एव च ।
सर्पश्च शिंशपाश्चैव शिरीषाशोककौ तथा ॥
कर्पूरागरुकौ चैव हिन्तालमधुपादपाः ।
तथा खदरिकश्चैव पारिजातकपङ्कजाः ॥
श्रीफललवङ्गाक्षोराञ्जनकाश्च तथैव च ।
बीजकार्जुनकौ वृक्षा अन्ये ये च दृढात्मकाः ॥
निर्व्रणाः सुदृढाः कार्याः प्राञ्जला दोषवर्जिताः ।
शाखोद्भवादिकभेदग्रन्थिकोटरवर्जिताः ॥
षोडशाङ्गुलतो हीनं लिङ्गं कुर्यान्नि दारुजम् ।
षोडशाङ्गुलतो वृद्धिर्नवलिङ्गेषु कीर्तिता ॥
तथाष्टकनिबन्धे च षोडशाङ्गुलवृद्धितः ।
अष्टाविंशत्युत्तरञ्च शतं लिङ्गानि संख्यया ॥
पुनश्चाङ्गुलमध्येऽष्टौ लिङ्गानि मुद्गमानतः ।
पञ्चविंशत्युत्तरकसहस्रं संख्यया भवेत् ॥
निलयं दारुजं कुर्यादिष्टिकाभिस्तथोच्यते ।
निलयद्रव्यादिन्यूनं दारुजं न प्रकाश्यते ॥
शैलजे चाऽथ प्रासादे कुर्याल्लिङ्गं च शाश्वतम् ।
स्वभुवाणं तथ घाट्यं रत्नजं धातुजं तथा ॥
सर्वाणीमानि लिङ्गानि निलये शैलजे हि वै ।
दारुजे दारुजं शस्तं धातुजे धातुरत्नजम् ॥
इत्येवं मानमुद्दिष्टं दारुलिङ्गप्रमाणकम्
द्व्यष्टाकाङ्गुलमाद्यं स्यात् षट्करं चान्ततस्थता

लोहजलिङ्गम्
(i) सु० आ०

सौवर्णं राजतं ताम्रं कांस्यमारकूटं तथा ।
आयसं सीसकं चैव त्रपुकं चेति लोहजम् ।
सौवणं श्रीपदं प्रोक्तं राजतं राज्यसिद्धिदम् ॥
ताम्रं पुत्रप्रदं चैव विद्वेषं कांस्यमेव च ॥
आरकूटं तथोच्चाटे क्षयकारकमायसम् ।
सीसजं रोगहरणं त्रपुरायुष्यवर्धनम् ॥
एवं तुलोहजं प्रोक्तं..........................।

(ii) अ० पृ० १९९

लोहादिधातुजातानि वच्मि लिङ्गानि सम्प्रति ।
अष्टाङ्गुलं भवेदाद्यं त्रिहस्तान्तं च तद्भवेत् ॥
अष्टाङ्गुलादयो लिङ्गाद्वृद्धिरष्टाङ्गुलक्रमात् ।
इत्थं तु नवलिङ्गानि कनिष्ठं त्रिकरोच्छ्रितम् ॥
नवलिङ्गाभिधानानि कथयिष्याम्यनुक्रमात् ।
श्रियोद्भवं महाकान्तं प्रोद्यन्तं सम्भवं तथा ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

सोमराजं महाराजं राजलिङ्गं महान्तकम् ।
वृषध्वजं तथाख्यातं लिङ्गं च नवमं भवेत ॥
लिङ्गाष्टकनिबन्धे तु धातुलिङ्गाङ्गुलान्तरे? ।
कुर्यादाद्यं चाष्टकोर्ध्वे तच्चैकैकाङ्गुलान्तरे ॥
अष्टाभिरष्टकैरेवं चतुःषष्टिश्च संख्यया ।
एकैकाङ्गुलमध्ये तु लिङ्गाष्टकमुदाहृतमू ॥
शिवं शर्वं जयं चैव सुनाभं च जयावहम् ।
विजयं भासुरं साक्षमष्टलिङ्गाङ्गुलान्तरे ॥
अष्टकोर्ध्वे पुनस्त्वेवमभिधानान्यष्टावधि ।
पुनश्चाङ्गुलमध्येऽष्टौ लिङ्गानि मुद्गमानतः ॥
मनोहरं श्रीमुखाख्यं रुद्रतेजो महोत्सवम् ।
आनन्दं च सुवक्त्राख्यं श्रीपुंजम् नन्दिवर्धनम् ॥
इत्युक्तान्यष्टलिङ्गानि मुद्गतुल्यानि मानतः ।
अङ्गुलाङ्गुलतो वृद्धिर्लिङ्गानां कथिता क्रमात् ॥
चतुःषष्टिश्च लिङ्गानि भूयोऽष्टाङ्गुलमध्यतः ।
इत्थं लिङ्गानि द्वादशोत्तरपञ्चशतानि च ॥
अष्टलोहमयानां च लिङ्गानां तु प्रमाणकम् ।
सयोनिमानसंयुक्ते सर्वकामार्थ — साधकम् ॥
हैमं रौप्यं तथा ताम्रं कांस्यं च पित्तलं तथा ।
त्रपु नागः सप्तमः स्यात्कृष्णलोहं तथाऽष्टमम् ॥
इति चाष्टौ लोहकाद्या धातवः परिकीर्तिताः ।
कामदानि च कार्याणि अष्टलोहमयानि च ।
लोहमिश्रं च कर्तव्यं सुधेव सर्वकामदम् ।
सयोनिमानसंयुक्तमिच्छाभुक्तिप्रदायकम् ॥
लोहादिलिङ्गकायामप्रमाणं कामदं तथा ।
पुर्नविभक्तं च त्रिधा ब्रह्मविष्णुरुद्रांशकम् ॥
ब्रह्मादौ मध्यमे विष्णू रुद्रश्चान्ते प्रकीर्तितः ।
कार्यस्त्र्यंशस्तथायाम एकांशं च पृथुत्वकम् ॥
मस्तकावर्त्तनं मध्ये वाह्ये वै राष्ट्रविभ्रमः ।
मस्तकान्तोद्भवं पीठं पार्श्वाङ्गे तु प्रदक्षिणम् ॥
अष्टाङ्गुलभवं लिङ्गं पूज्यते चक्रवर्तिभिः ।
सप्ताङ्गुलं महाराजैर्महीपालैश्च भक्तितः ॥
षडङ्गुलात्मकं लिङ्गं महामण्डलकेश्वरैः ।
पञ्चाङ्गुलं तथा लिङ्गमर्च्यं वै भुक्तिकामकैः ॥
महासामन्तसंज्ञैस्तु लिङ्गं वेदाङ्गुलोच्छ्रितम् ।
त्र्यङ्गुलं चैव सामन्तै भुक्तिकामैश्च पूजितम् ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

द्व्यङ्गुलात्मकमध्यं च तथैव द्व्यङ्गुलायतम् ।
मुक्त्यर्थं यतिभिश्चैव पूजनीयमशङ्कितैः ॥
अङ्गुलद्वयमध्यं च च जनैः सर्वैर्हितार्थदम् ।
तथैवाङ्गुलिकं मध्ये सर्वकामार्थमुक्तिदम् ॥
मनोहरादितोलिङ्गं यावत्स्यान्नन्दिवर्धनम् ।
कार्यं रत्नमयं चैव धर्मकामार्थमोक्षदम् ।

शैलजलिङ्गम्

(i) सु० आ०

शिलापि च सुविज्ञया जातिभेदात्परिक्षयेत् ।
श्वेता रक्ता तथा पीता कृष्णा चेति चतुर्विधा ॥
गोक्षीरशङ्खवर्णाभा ब्राह्मणानां प्रशस्यते ।
जपाबन्धूकपुष्पाभा नृपाणां प्रोच्यते क्रमात् ॥
रजनीस्वर्णसदृशा वैश्यानां तु प्रशस्यते ।
माषगुग्गुलसंकाशा शूद्राणां तु समृद्धिदा ॥
सर्वेषां तु शिला कृष्णा सर्वसंपत्करी स्मृता ।
सा चोषररजःक्लिन्ना तप्ता चार्कस्य रश्मिभिः ॥
अग्निदग्धान्ययुक्ता या वर्जयेत्तां प्रयत्नतः ।
दिव्यं स्वायम्भुवं पूर्वं दैवतं गाणपं तथा ॥
आसुरं सुरलिङ्गं च आर्षं राक्षसकं तथा ।
मानुषं बाणलिङ्गं च लिङ्गं नवविधं भवेत् ॥
पताका झर्झराकरा रूद्राक्षाकृतिरेव च ।
आज्यं वा मधुगन्धं वा पातालात्पर्वताकृतिः ॥
इत्येतल्लक्षणं प्रोक्तं लिङ्गं स्वायम्भुवस्य तु ।
दिव्यं स्वायम्भुवं पूर्वमुत्तमोत्तममेव च ॥
दैवतं गाणपं प्रोक्तं मध्यमोत्तममेव च ।
आसुरं सुरलिङ्गं च आर्षं चैवाधमोत्तमम् ॥
मानुषं लिङ्गमेवोक्तं मध्यमं त्वधमं भवेत् ।
बाणलिङ्गस्य नैवोक्तं लक्षणं तु विसर्जयेत् ॥

(ii) म० आ०

दैविकं चार्षकं चैव गाणपं मानुषं तथा ।
एवं चतुर्विधं लिङ्गं दैविके लक्षणं शृणु ॥
दीपाकारं भवेल्लिङ्गं निम्नोन्नतसमन्वितम् ।
रेखाकोटरसंयुक्तं टङ्कशूलसमन्वितम् ॥
यवोन्नतमुखे धारा कराञ्जलिपुटाकृति ।
ब्रह्मसूत्रविहीनं च दैविकं तदिहोच्यते ॥
कूष्माण्डस्य फलाकारं मातुलङ्गफलाकृति ।
उर्वारुकफलाकारं कपित्थस्य फलाकृति ॥
तालीफलवदाकारं गाणपं लिङ्गमुच्यते ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मूलं स्थूलं भवेल्लिङ्गं नालिकेरफलाकृति ।
लिङ्गमार्षमाख्यातं ब्रह्मसूत्रविवर्जितम् ॥

द्वारं वा गर्भमानं वा हस्तमानमथापि वा ॥
शिवशास्त्रोक्तमार्गेण शिरोवर्तनया युतम् ।
ब्रह्मसूत्रसमायुक्तमेतन्मानुषमुच्यते ॥

(iii) का० आ० स्वायम्भुवं वाणलिङ्गं दैविकं चार्षकं त्विति ।
गाणपं मानुषं लिङ्गं षट्प्रकारं प्रकीर्तितम् ॥
यत्स्वेनैवोत्थितं लिङ्गं स्वायम्भुवमुदाहृतम् ।
शिवेन संस्कृतं यत्तु वाणलिङ्गमुदाहृतम् ॥
दैवेन स्थापितं देवमार्षकमृषिपूजितम् ।
गणैस्संस्थापितं लिङ्गं गाणपं तदुदाहृतम् ॥
मानुषं मनुजैश्शिष्टैः स्थापितं तदुदाहृतम् ।

(iv) लि० नि० समलिङ्गं वर्धमानं शैवाधिकं च स्वस्तिकम् ।
सार्वदेशिकलिङ्गं च त्रैराशिकसहस्रकम् ॥
धारालिङ्गं च शैवेष्टचं मुखलिङ्गमुदाहृतम् ।
लिङ्गं च दशभेदं स्यान्मानुषे तत्प्रकीर्तितम् ॥

(v) अ० पृ० २०१ अथातः सम्प्रवक्ष्यामि शैललिङ्गप्रमाणकम् ।
हस्तादि नवान्तं लिङ्गनवकं हस्तवृद्धितः ॥
हस्ताधश्च न कर्तव्यं लिङ्गं शैलमयं तथा ।
तदूर्ध्वं तु प्रकर्तव्यं प्रस्तारानुक्रमेण च ॥
सूत्रहस्तादथारभ्य पादवृद्धचा त्रिहस्तकम् ।
कनिष्ठनवलिङ्गानां पादवृद्धिरनुक्रमात् ॥
मध्यमानि च लिङ्गानि पादवृद्धचा नव क्रमात् ।
युगहस्तादितश्चैवं तथा षड्ढस्तकावधि ॥
आयामे सप्तहस्तं च नवहस्तान्तमेव च ।
उत्तमं लिङ्गनवकं पादवृद्धचा यथाक्रमम् ॥
त्रिचतुर्हस्तयोर्मध्ये षट्सप्तकरयोरपि ।
पादवृद्धचा त्रीणि त्रीणि षड्लिङ्गानां समुद्भवः ॥
संख्यातानि त्रयस्त्रिंश लिङ्गानि पादवृद्धितः ।
हस्तादि नवहस्तान्तं त्रयस्त्रिंशच्च संख्यया ॥
अभिधानक्रमं तेषां कथयाम्यपराजित ।
अनुक्रमेण ख्यातानि त्रयस्त्रिंशच्च संख्यया ॥
भवं भवोद्भवं भावं संसारभयनाशनम् ।
पाशयुक्तं महातेजो महादेवं परात्परम् ॥
ईश्वरं शेखरं शिवं शान्तं वै मनोह्लादकम् ? ।
रुद्रतेजः (सदात्मकं) वामदेवमघोरकम् ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तत्पुरुषं तथशानं मृत्युञ्जयं च विजयम् ।
किरणाक्षमघोरास्त्रं श्रीकण्ठं पुण्यवर्धनम् ॥
पुण्डरीकं सुवक्त्राख्यमुमातेजो विश्वेश्वरम् ।
त्रिनेत्रं त्र्यम्बकं नाम (घोरं) महाकालं च नामतः ॥
त्रयस्त्रिंशत् पादवृद्धया हस्तादिक नवान्तकम् ।
पादार्धवृद्धया च पुनः पञ्चषष्टिश्च संख्या ॥
त्रिकोनशतलिङ्गानि तथा द्वयङ्गुलवृद्धितः ।
तथैकाङ्गुलवृद्धया तु त्रिनवत्यधिकं शतम् ॥
एवमर्धाङ्गुलवृद्धया लिङ्गसंख्या ह्यनुक्रमात् ।
पंचाशीत्यधिकं चैव शतत्रयमुदाहृतम् ॥
अंङगुलवेदांशयुक्त्या क्रमशो वृद्धितस्तथा ।
एकोनसप्तत्युत्तर — सप्तशतान्यनुक्रमात् ॥
तथा मुद्गप्रमाणेन पूर्वमानविकल्पनात् ।
द्विचत्वारिंशदुत्तरचतुर्दशशतानि च ॥
मुद्गप्रमाणलिङ्गानामेकैक दशभेदतः ।
चतुर्दशसहस्राग्रे सविंशतिचतुःशतम् ॥
इति शास्त्रोक्तलिङ्गानां मानं संख्या समीरिता ।

रत्नजलिङ्गम्

(i) सु० अ०

मौक्तिकं च प्रवालं च वैडूर्यं स्फटिकं तथा ।
पुष्यं मरकतं नीलं रत्नजं संप्रकीर्तितम् ॥
लोहरत्नादिके लिङ्गे पूजाभागं सपीठकम् ।
यथालाभप्रमाणेन स्फटिकादीनि करयेत् ॥
स्फटिकादिषु कर्त्तव्या त्रिभागैरेव पीटिका ।
तथायामसुविस्तारपिण्डिका शुभदा स्मृता ॥
एकाङ्गुलं समारम्य आ चतुर्विंशदङ्गुलान् ।
लोहजं लिङ्गमित्याहुर्लक्षणोद्धारणं बिना ॥

(ii) अ० पृ० १९८

अत ऊर्ध्वं प्रवक्ष्यामि रत्नजादिकलक्षणम् ।
रत्नजं धातुजं चैव लोहाष्टकविनिर्मितम् ॥
तथाऽनुक्रमसूत्रं च प्रमाणं यस्य यादृशम् ।
यथाक्रमं विधातव्यं यथापंक्ति ? (प्रावर्त) पृथक् पृथक् ॥
मुद्गप्रमाणाद्योद्भव रुद्रभागेति संख्यया ? ।
येषां प्रविष्टमानाय ब्रह्माद्यैर्वैष्णवान्तिकम् ? ॥
भद्रभागोद्भवा संख्या अङगुलैर्वर्धयेत्त्रयम् ? ।
वललिङ्गस्य विधाख्या च ब्रह्मरुद्रां च कैतवम् ? ॥
एकाद्यङगुलतो वृद्धि नवान्तामुपलक्षयेत् ।
तदभिधानानुक्रमं कथयाम्यपराजित ॥
शिवं शर्वं जयं लिङ्गं सुनाभं च जयावहम् ।
विजयं भासुरं मोक्षं सर्वजं नवमं मतम् ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अभिधानप्रमाणानि लिङ्गान्युक्तानि वै नव ।
अङ्गुलाङ्गुलान्तरतः लिङ्गानां वर्धते क्रमः ॥
एकाङ्गुलोद्भवं मध्ये लिङ्गान्यष्टौ यथाक्रमम् ।
मुदगप्रमाणान्यष्टौ च शास्त्रदृष्टया ततः क्रमात् ॥
मनोहरं श्रीमुखाख्यं रूद्रतेजो महोत्सवम् ।
आनन्दं च सुवक्त्राख्यं श्रीपुञ्जं नन्दिवर्धनम् ॥
इति मुद्गप्रमाणानि लिङ्गान्युक्तानि चाऽष्ट वै ।
अङ्गुलक्रमवृद्धयाऽष्टावन्यानि कथितानि च ॥
द्वासप्ततिश्च लिङ्गानां संख्या चैव प्रमाणतः ।
अष्टाङ्गुलोद्भवान्तं च पुनर्नामानि पूर्ववत् ॥
रत्नजानां तु नामानि कथितान्यपराजित
सर्वरत्नोद्भवं लिङ्गं कर्त्तव्यं सर्वकामदम् ॥
वज्रवैडूर्यार्ककान्ति पुष्परागेन्दुकान्तिभिः ।
मणिमौक्तिकस्फाटिकराजावर्तप्रवालकै ॥
मरकतोत्पलनीलैः कर्कतै पुलकैस्तथा ।
महानीलैः सुनीलैश्च गिरिवज्रैश्च पीलुतैः ॥
गोमेदैश्च शिखादीपैरिति रत्नाभिधानकैः ।
शङ्खाद्यैर्गजदन्तैश्च लिङ्गं कुर्याच्च कामदम् ॥
सयोनिमानसंयुक्तं सर्वकामफलप्रदम् ।
विना योनिं न कर्त्तव्यं धातुजं रत्नजं तथा ॥
धर्मकाम्यं चार्थकाम्यं तथेच्छामोक्षकाम्यके ।
चतुर्विधानि काम्यानि लिङ्गयोन्यादिभेदतः ॥
यादृग्वर्णं भवेल्लिङ्गं तादृग्वर्णं च पीठकम् ।
धर्मकाम्यं च तद्यद्व धर्मार्थं स्यात सुपूजितम् ॥
नीलमर्कतजं लिङ्गं पीठिका श्वेतवर्णिका ।
अर्थकाम्यं तु तन्नाम पूजितं चार्थहेतवे ॥
श्वेतरवते यदा वर्णे इच्छाकाम्यं च नामतः ।
इच्छासिद्धिं स प्राप्नोति यस्तल्लिङ्गार्चने रतः ॥
धातुरत्नैर्विवर्णा च श्वेतपीतादितस्तथा ।
मोक्षकाम्यं तु तत्प्रोक्तं मुक्तिमार्गप्रदायकम् ॥
धर्मार्थकाममोक्षार्थं लिङ्गार्चा स्याच्चतुर्विधा ।
मूलागमे च निर्दिष्टं शास्त्रज्ञैरुक्तमेव च ॥
सर्वरत्नजलिङ्गानि पाद्यस्नानकसूत्रतः ? ।
ब्रह्मविष्णुरूद्रांशकैः क्रमाल्लिङ्गं त्रिधोदितम् ।
विना ब्रह्मविष्ण्वंशाभ्यां बाणं स्याद्रत्नधातुजम् ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

बाणलिङ्गम्
अ० पृ० २०६

अतः परं प्रवक्ष्यामि बाणलिङ्गस्य लक्षणम् ।
पूर्वमाराधितश्चेशो भक्तैश्च त्रिदशैरपि ॥
(एकस्यादि सप्तानो ग्रासीलश्चातदश्च लक्षणम्?)
एकस्माद् द्विसप्तान्तमास्यभेदस्य लक्षणम् ।
एकास्रं च स्वयं देवस्त्रिनेत्रः शूलपाणिकः ॥
उमामहेश्वरं द्व्यस्रं त्र्यस्रं त्रिपुरुषं तथा ।
ब्रह्मणा चार्चितं लिङ्गं तथा वेदास्रसंज्ञकम् ॥
पञ्चास्रं लोकपालैश्च षडश्रं शिखिकेतुना ।
सप्ताश्रं वरुणेनाऽथ चाष्टाश्रं वसुभिस्तथा ।
नवग्रहैर्नवाश्रं च दशाश्रं च दिशाधिपैः ।
एकादशास्रं विष्णुना सूर्येण द्वादशास्रकम् ॥
त्रयोदशास्रं सर्वैश्च शक्रास्रं शक्रतस्तथा ।
एकाद्यं चतुर्दशान्तं कथितं च यथाक्रमम् ॥
एकाश्रं स्थापितं लिङ्गं येन वै पृथिवीतले ।
मुच्यते सर्वपापेभ्यो ब्रह्महत्यादिभिश्च सः ॥
द्व्यश्रकं च तथा लिङ्गं स्थापितं भक्तितत्परैः ।
मोदते दिवि मुक्तःस्यात् स गोहत्यादिपातकैः ॥
त्र्यश्रकं च तथा लिङ्गं पूजितं च सुरासुरैः ।
अश्वमेधादिपुण्यं च लभते नाऽत्र संशयः ॥
पुरुषमेधजं पुण्यं चतुराश्रे च पूजिते ।
अगम्यागमनान्मुक्तो ह्यभक्ष्यस्य च भक्षणात ॥
मुक्तपापश्च विज्ञेयः पञ्चाश्रे पूजिते तथा ।
स्त्रीबालघाती शुद्धः स्याच्छिवलोकं षडश्रके ॥
सप्तास्रे बाणलिङ्गे तु पृथ्वीदानफलं लभेत् ।
अष्टाश्रं तु यदा लिङ्गं पूजितं पृथवीतले ॥
गुरुस्त्रीपापमुक्तश्च लभते शिवलोकताम् ।
नवाश्रं तु यदा लिङ्गं पूजितं च प्रयत्नतः ॥
स मुक्तः सर्वपापेभ्यो बहुस्वर्णादिकं फलम् ॥
सप्तकोटिजन्मपापं नश्येद्दर्शनतः क्षणात् ।
शिवलोकं दशाश्रे च लभते नाऽत्र संशयः ॥
एकादशाश्रं च तथा संसारभयनाशनम् ।
द्वादशाश्रं तथा लिङ्गं सूर्यतेजःसमप्रभम् ॥
त्रयोदशाश्रं लिङ्गं तु अर्चितं च सदा बुधैः ।
पृथ्वीदेवाधिपत्यं च प्राप्यते नाऽत्र संशयः ॥
चतुर्दशास्त्रं लिङ्गं तु स्वर्गादौ देवपूजितम् ।
दशाश्वमेधजन्यं च फलं प्राप्नोति मानवः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अचललिङ्गभेदेषु मानुषाचललिङ्गप्रभेदेषु—

आढ्यादिलिङ्गभेदाः

(i) का० आ०

लिङ्गायामे विकारांशे चतुर्भूतरसैः क्रमात् ।
सत्रिभागैस्त्रिरंशैस्तु सुरेढ्यानाढ्यके द्विजाः ॥
आढ्यं सर्वसमं लिङ्गं विशिष्टं परिकीर्तितम् ।
तेषां तन्मध्यमेऽष्टांशे प्रत्येकं नवधा भजेत् ॥

(ii) सि० सा०

सार्धशिवसुसार्धसिन्धुचरणोनागाद्रिसाङ्घ्र्यष्टको—
दन्वन्मङ्गलनन्ददिक्फणिनगैस्त्र्यंशोन्नतिस्त्र्यष्टके ।
दैर्घ्ये चेद्विकृतौ रसाक्षजलधित्र्यंशान्वितेष्वंशकै—
राढ्यानाढ्यसुरेढ्यसर्वसमके लिङ्गे विदुर्विस्तृतिम् ॥

समलिङ्गम्

(i) मय० ३३

आद्यं तु सर्वतोभद्रं द्वितीयं वर्धमानकम् ।
शिवाधिकं तृतीयं स्याच्चतुर्थं स्वस्तिकं भवेत् ॥
अथ जगदमराणां सर्वतोभद्रमिष्टं
सुखदमवनिपानां वृद्धिदं वर्धमानम ।
धनदमिह विशां वै शम्भुभागाधिकं य-
च्छुभदमथ परेषां स्वस्तिकं तच्चतुर्णाम् ॥
त्रिंशद्भागे सर्वतोभद्रलिङ्गे मूलेमध्ये……दशाशं क्रमेण ।
वृत्तं तुल्यं सर्वतः शम्भुभागं विप्राणां तद्भूपतीनां प्रशस्तम् ॥

(ii) अ० आ०

लिङ्गायामे त्रिभागे तु एकांशं चतुरश्रकम् ।
मध्ये व्योमं तु वस्वश्रं वृत्तं चाप्येकमंशकम् ॥
समलिङ्गमिति ख्यातं विप्रादीनां तु ऋद्धिदम् ॥

(iii) सु० आ०

चतुरश्रमधोभागमष्टाश्रं मध्यमं तथा ।
तदूर्ध्वे वृत्तमेव स्यात्त्रिभागं सर्वतस्समम् ॥
समलिङ्गमिति प्रोक्तं वर्धमानमतः श्रणु ॥

वर्धमानलिङ्गम्

(i) अं०आ०

भानुद्व्यंशे तथायामे सप्तांशं चतुरश्रकम् ।
अष्टाश्रमष्टभागेन नवांशं वृत्तमुच्यते ॥
षट्सप्तवसुभागं वा पञ्चषटसप्तभागिकम् ।
चतुष्पञ्चषडंशं वा वर्धमानं चतुर्विधम् ॥

(ii) पू० आ०

चतुःपञ्चषडंशं तु पञ्चषट्सप्तभागिकम् ।
षट्सप्ताष्टांशकं सप्तभागाष्टनवभागिकम् ॥
वर्धमानमिति प्रोक्तं विप्रादीनामनुक्रमात् ।

(iii) सु० आ०

चतुर्विंशति चायामे सप्तांशं चतुरश्रकम् ।
अष्टाश्रमष्टभागेन नवांशेनैव वृत्तकम् ॥
वर्धमानमिदं लिङ्गं शिवाधिकमतःपरम् ।

(iv) मय० ३३

वेदभूतरसभागिकैरथो भूतषण्मुनिपदैरतःपरम् ।
षट्कसप्तवसुभागया ततःसप्तनागनवभागया पुनः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वर्धमानमुदितं चतुर्विधं ब्रह्मविष्णुशिवभागतः क्रमात् ।
सर्वसंपदुपवर्धनप्रदं पुत्रवृद्धिदमिदं महीभृताम् ॥

शैवाधिक्यलिङ्गम्
(i) अ० आ०
लिङ्गायामे दशांशे तु गुणांशं चतुरश्रकम् ।
वस्वश्रं चैव तत्तुल्यं युगाशं स्याच्छिवांशकम् ॥
शैवाधिक्यमिदं ख्यातमथवान्यत्प्रकारतः ।
वेदवेदशरांशं वा पञ्चपञ्चषडंशकम् ॥
षट्षट्सप्तांशकैर्वाथ शैवाधिक्यं चतुर्विधम् ।

(ii) पू० आ०
सप्तसप्ताष्टभागं तु पञ्चपञ्चषडंशकम् ।
वेदवेदशरांशं तु गुणानलयुगांशकम् ॥
एवं शिवाधिकं प्रोक्तं द्विजादीनां क्रमाद्गृहे ।

(iii) सु० आ०
आमामं दशधा कृत्वा चतुरश्रं त्रिभागतः ॥
अष्टाश्रं च त्रिभागेन चतुरंशेन वृत्तकम् ।
शिवाधिकमिदं शस्तं भुक्तिमुक्तिफलप्रदम् ॥

(iv) मय०
सप्तसप्तवसुभागया ततः पञ्चपञ्चकषडंशकैरपि ।
वेदवेदशरभागया ततो बन्धबन्धयुगभागया पुरः ॥
उक्तमत्र हि मया चतुर्विधं तच्छिवाधिकमजाधिभागिकैः ।
सर्ववस्तुमिदं विशामलं सर्ववर्णयमिनामुदीरितम् ॥

स्वस्तिकलिङ्गम्
(i) अ० आ०
लिङ्गायामे नवांशे चतुरश्रं द्विभागया ।
वस्वश्रं तु गुणांशेन वेदांशं वृत्तमुच्यते ॥

(ii) का० आ०
नवधा लिङ्गमानेन द्वयंशं मध्ये गुणांशकम् ।
वृत्ते युगांशकं दैर्घ्यं शूद्रेऽप्येतच्च शस्यते ॥

धारालिङ्गम्
(i) सु० आ०
पञ्चधारास्सप्तधारा नवधारा द्वादशधारकाः ।
धाराष्षोडशविंशच्च त्रिरष्टावाष्टविंशतिः ॥

(ii) पू० का०
धारालिङ्गमथो वक्ष्ये श्रूयतां तु प्रजापते ।
पादादूर्ध्वकपर्यन्तं धारालिङ्गं प्रशस्तकम् ॥
अधो वेदाश्रकं कुर्यात्तदूर्ध्वे त्वष्टधारया ।
ऊर्ध्वे षोडशधाराच्च भोगार्थी लभते सुखम् ॥
एतद् द्विज महाप्राज्ञ ! सर्वकामप्रसाधनम् ।

(iii) शिल्प०
पूर्वोक्तसमलिङ्गे च धारालिङ्गं विकल्पितम् ।
चतुरश्रं द्विरष्टाश्रं तन्मूले परिकल्पयेत् ॥
वैष्णवांशे तु शैवांशे धाराद्विद्विगुणीकृते ।
सर्वेषामपि लिङ्गानां धारालिङ्गं त्रिधा मतम् ॥
मूलेऽष्टाश्रं वा कलाश्रं युगाश्रं तस्मादूर्ध्वं तद्युगास्स्युश्च धाराः।
एवं पूर्वाचार्यकैरीश्वरस्य प्रोक्तं धारालिङ्गमेतत् त्रिधैव ॥

सहस्रलिङ्गम्
(i) का० आ०
समखण्डे शिवायामे रुद्रभागविनिर्मिते ।
एकाधिकनवत्यंशे विषमांशनिवेशितम् ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सैकसाहस्रलिङ्गानां नवभागोच्चमेव वा ।

(ii) मय० ३३ — पूजाभागे सर्वतोभद्रलिङ्गे धारालिङ्गं पञ्चपञ्चक्रमेण । एकैकस्यामष्टमं चोपरिष्टात्साहस्रं तद्रेखया लिङ्गमुक्तम् ॥

(iii) शिल्प० — सर्वतोभद्रलिङ्गेषु धाराः स्युः पञ्चविंशतिः ।
सप्तपर्णदलाकारास्समास्सर्वास्समान्तराः ॥
एकैकस्यां तु धारायां चत्वारिंशत्प्रसंख्यया ।
कुर्यात्समानि लिङ्गानि स्यात्तल्लिङ्गसहस्रकम् ॥

त्रैराशिकलिङ्गम्

(i) का० आ० — कृत्वा नवांशं लिङ्गोच्चं बन्धबन्धगुणांशकम् ।
षट्सप्ताष्टकनाहं तु वृत्तेऽष्टाश्रे युगाश्रके ॥
त्रैराशिकमिदं शास्त्रे स्वस्तिकमधुनोच्यते ।

(ii) पू० कार० — अग्रे मूले च मध्ये च प्रमाणं सर्वतस्समम् ।
आयामं नवधा कृत्वा वृत्तं षड्भागमुच्यते ॥
सप्तभागमथाष्टाश्रं तुर्याश्रं वसुभागिकम् ।
त्रैराशिकमिति ज्ञेयं धनधान्यसुखावहम् ॥

(iii) मय० ३३ — रसमुनिवसुभागे वृत्तकेऽष्टाश्रकेऽन्ते ।
परिधिरथ नवांशे लिङ्गतुङ्गे तु भूयः ॥
त्रिभिरथ गुणभागैश्च त्रिभिस्तुङ्गमानं ।
ह्यजहरिहरभागे तत्तु (तत्) त्रैराशिकं स्यात् ॥

(iv) शिल्प० २९ — लिङ्गोत्सेधे तु नन्दांशे षट्सप्तवसुभागकैः ।
ब्रह्मविष्णवीशभागानां क्रमान्नाहाः प्रकीर्तिताः ॥
लिङ्गं त्रैराशिकं नाम भवेत् सर्वसमे तु तत् ।

(v) जीर्णो० — अर्चनं नवधा कृत्वा ब्रह्माद्यास्त्रिस्त्रिभागतः ।
षट्सप्ताष्टकभागैस्तु नाहो रुद्रादिषु क्रमात् ॥
त्रैराशिकमिदं लिङ्गं शूद्राणां तत्प्रशस्यते ।

मुखलिङ्गम्

(i) कार० आ० — मुखलिङ्गं ततो वक्ष्ये सर्वकामार्थसाधनम् ।
पूजाभागं समस्तं तु द्विषष्टयंशं भजेत्क्रमात् ॥
त्रयोदशाङ्गुलार्धं तु मुखमेकं प्रकीर्तितम् ।
शराननं चतुर्वक्त्रं त्रिवक्त्रं चैकवक्त्रकम् ॥
चतुर्दिक्षु चतुर्वक्त्रं त्रिवक्त्रं पृष्ठहीनकम् ।
कुर्वेकवक्त्रमूर्ध्वे तु मुखमानेन बुद्धिमन् ! ॥
मकुटेनोर्ध्ववक्त्रं तु त्रयोदशार्धाङ्गुलेन तु ।
ग्रीवामूलात् स्तनान्तं स्यादर्धाधिकं त्रयोदश ॥
स्तनसूत्राबधिर्यावत् कारयेद् द्विभुजान्वितम् ।
प्रतिमालक्षणोक्तेन मार्गेणैव समाचरेत् ॥
शेषं लिङ्गवदाकारं कारयेल्लक्षणान्वितम् ।
वक्त्रलिङ्गप्रमाणं तु प्रोक्तं पीठमथो शृणु ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

(ii) रूप०

मुखलिङ्गं त्रिवक्त्रं स्यादेकवक्त्रं चतुर्मुखम् ।
सन्मुखं चैकवक्त्रं स्यात त्रिवक्त्रे पृष्ठके नहि ॥
पश्चिमास्यं स्थितं शुभ्रं कुङ्कुमाभं तथोत्तरे ।
याम्यं कृष्णकरालं स्यात्प्राच्यां दीप्ताग्निसन्निभम् ॥
सद्यो वामं तथाघोरं तत्पुरुषं चतुर्थकम् ।
पञ्चमं च तथेशानं योगिनामप्यगोचरम् ॥

रूपप्रतिमा

टि०—रूप-प्रतिमा लिङ्गोद्भवैवेति ।

लिङ्गोद्भवम्

(i) शिल्प० २

सुखासनं तु प्रथमं स्कन्दोमासहितं ततः ।
तृतीयं चन्द्रमूर्धानं चतुर्थं वृषवाहनम् ॥
पञ्चमं नृत्तमूर्तिस्तु गङ्गाधरमतः परम् ।
सप्तमं त्रिपुरारिः स्यात् ततः कल्याणसुन्दरम् ॥
अर्धनारीश्वरं पश्चाद् दशमं गजहा तथा ।
एकादशं पाशुपतं कङ्कालं द्वादशं स्मृतम् ॥
अर्धनारायणं पश्चाद् भिक्षाटनमतः परम् ।
चण्डेश्वरप्रसादं तु दक्षिणामूर्तिरेव च ॥
ततः कालरिमूर्तिश्च लिङ्गमष्टादशं स्मृतम् ।
एवं लिङ्गेद्भवं पूर्वैः प्रोक्तं शैवपरायणैः ।

लक्षणम्

(ii) अ० आ०

अथ वक्ष्ये विशेषेण लिङ्गोद्भवविधिं शृणु ।
लिङ्गाकारस्य मध्ये तु चन्द्रशेखरमूर्तिवत् ॥
नलकात्तलपर्यन्तं लिङ्गे शूलसमन्वितम् ।
ब्रह्मापि हंसरूपेण ऊर्ध्वे वै वामपार्श्वके ॥
विष्णुर्वराहरूपेण दक्षिणऽशे त्वधोगतः ।
विष्णुर्दक्षिणपार्श्वे तु वामपार्श्वे पितामहः ॥
हृदयेऽञ्जलिसंयुक्तौ स्थितौ लिङ्गं समीक्ष्य च ।
रक्तश्यामहिरण्याभा ईशविष्णुपितामहाः ॥
एवं लिङ्गोद्भवं स्यातं वृक्षसङ्ग्रहणं ततः ।

(iii) उ० कामि०

पूर्ववत्कारयेत्सम्यक् चन्द्रशेखरमूर्तिनम् ।
लिङ्गाधः शर्वजान्वन्तभागं नेन्द्रियगोचरम् ॥
लिङ्गोर्ध्वाधः प्रदेशे तु हंससूकरमाचरेत् ।
बिम्बस्याननमानेन कारयेद्धंसमादरात् ॥
बिम्बद्विमुखमानेन भूकृष्टास्यं तु सूकरम् ।
ब्रह्मविष्णू द्विपार्श्वस्थौ नतौ तस्यानुकूलकौ ॥
तिर्यग्गतसुपादौ तौ सर्वावयवसुन्दरौ ।
लिङ्गोद्भवस्त्वति ख्यातो ब्रह्मविष्णवभिनन्दितः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ब्रह्मविष्णुविहीनो वा हंससूकरसंयुतः ।

(iv) सु० आ० लिङ्गं कृत्वोर्ध्वतो ब्रह्मा हंसरूपं तथैव च ।
विष्णुं वराहवक्त्रं तु लिङ्गस्याधः प्रकल्पयेत् ॥
हृदयेऽञ्जलिसंयुक्तौ ब्रह्मविष्णू च पार्श्वयोः ।
लिङ्गमध्ये तु कर्त्तव्यं पूर्ववच्चन्द्रशेखरम् ॥
अदृश्यौ तस्य पादाब्जौ तथैव मकुटं यथा ।

(v) कार० आ० आयामं यत्तु लिङ्गस्य भूतांशं विभजत्ततः ॥
ऊर्ध्वे व्योमांशकं त्यक्त्वा मूले चैव तथा भवेत् ।
तन्मध्ये कारयेद्धीमांश्चन्द्रशेखरमूर्तिताम् ।
अजविष्णू द्विपार्श्वे द्वौ नमस्कृत्वानुकूलकौ ॥
धर्मांशं विभजेल्लिङ्गं शरांशमुदयान्तयोः ।
लिङ्गोर्ध्वे कारयेद्धंसमधस्तात्सूकराननम् ॥
विष्णुं सङ्कल्पयेदुर्वीमाननेनैव कर्षितम् ।
बिम्बस्य द्विमुखेनैव हंसरूपं तु कारयेत् ॥
ऋज्वागतिस्थितिं वामाद्वरदाभयहस्तकम् ।
कृष्णापरशुसंयुक्तं कारयेदिन्दुशेखरम् ॥
अधोभागे तु भागेन जान्वन्तं तु न दृश्यकम् ॥
एवं लिङ्गोद्भवं कुर्याच्चन्द्रशेरमुच्यते ।

(vi) शिल्प० अथ लिङ्गोद्भवं वक्ष्ये लिङ्गाकारस्य मध्यतः
नलकात् पादस्य तलं लिङ्गे शूलसमायुतम् ॥
चन्द्रशेखरवत्सर्वं कारयेत्सुन्दराकृतिम् ।
ब्रह्मा तु हंसरूपेण ऊर्ध्वगो वामपार्श्वतः ॥
विष्णुवराहरूपेण दक्षिणांशे त्वधोगतः ।
हृदयेऽञ्जलिसंयुक्तौ रक्तश्यामनिभौ परम् ॥
वीक्षमाणौ परं लिङ्गमिदं लिङ्गोद्भवं स्मृतम् ।

(vii) श्रीतत्व० लिङ्गाकारस्य मध्ये तु चन्द्रशेखरवत्स्थिम् ।
नलकाधस्स्थितं पादं लिङ्गोद्भवसमन्वितम् ॥
विरिञ्चिर्हंसरूपेण चोर्ध्वगो वामपार्श्वके ।
दक्षे वराहरूपस्य रूपेणाधोगतो हरिः ॥
बामदक्षिणपार्श्वस्थौ कृताञ्जलिसमन्वितौ ॥
स्वरूपेण द्विपादस्थावजविष्णू विभोः परे ॥
एवं लिङ्गावतारं तु सर्वशान्तिकरं सदा ।

तुङ्गाङ्गविस्तृतिनतांसकलम्बमानैस्संपन्नचिह्नभुजभूषणवर्णभेदैः ।
शोभान्वितं शुभकरं सकलप्रजानामैश्वर्यसङ्घपरिवृद्धिकरं विदध्यात् ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

साधारणासाधारणसौम्योग्रशान्ताशान्तप्रभेदेषु——

साधारणी मूर्तिः
(i) मान०

चतुर्भुजं त्रिनेत्रं च जटामकुटमण्डितम् ।
व्याघ्रचर्माम्बरं जानुनोरूर्ध्वं च समलङ्कृतम् ॥
नीव्याञ्चलं च संयुक्तं रक्तवर्णाङ्गशोभितम् ।
हारोपग्रीववक्षस्तु कपालमालावलम्बनम् ॥
करटरत्नबन्धं स्याद् रुद्रबन्धमथापि वा ।
पत्रोदरं च बन्ध वा रत्नोरनिबन्धनम् ॥
कटकं कटिसूत्रं स्यात्केयूरं पूरिमान्वितम् ।
बाहमूलाभिदामैश्च सर्वाभरणभूषितम् ॥
वामे तु लम्बपत्रं स्यादवामे मकरकुण्डलम् ।
प्राचभयहस्तं सर्वे वरदं वामहस्तके ॥
अपरे वामसव्ये तु हरिणद्रङ्कधारणम् ।
मकुटं वामपार्श्वे तु चन्द्ररेखारसमन्वितम् ॥
दक्षिणे चार्कपुष्पैश्च नागं गङ्गा जटान्तरे ।
दूर्वाभिः सुवर्णसिन्दूरं पुस्करं स्यान्मकुटान्तरे ॥
मध्ये चान्वितवक्त्रं स्याल्ललाटे चैकनेत्रयुक् ।
ग्रीवस्य वामपार्श्वे तु कालकूटसमन्वितम् ॥
यज्ञसूत्रोत्तरीयं च सर्वरत्नाङ्गुलीयके ।
स्थानकं चासनं वपि पादं नूपुरशोभितम् ॥
एवं तु रुद्रमूर्तिः स्याद् वामभागे तु पार्वती ।
उत्तमं दशतालेन मानयेत्त्वङ्गमानकम् ॥

(ii) वि० ध०

देवदेवं महादेवं वृषारूढं तु कारयेत् ।
तस्य वक्त्राणि कार्याणि पञ्च यादवनन्दन? ॥
सर्वापि सौम्यरूपाणि दक्षिणं विकटं मुखम् ।
कपालमालिनं भीमं जगत्संहारकारकम् ॥
त्रिनेत्राणि च सर्वाणि वदनं ह्युत्तरं विना ।
जटाकलापे महति तस्य चन्द्रकला भवेत् ॥
तस्योपरिष्टाद्वदनं पञ्चमं तु विधीयते ।
यज्ञोपवीतं च तथा वासुकिं तस्य कारयेत् ॥
दशबाहुस्तथा कार्यो देवदेवो महेश्वरः ।
अक्षमालां त्रिशूलं च शरदण्डमथोत्पलम् ॥
तस्य दक्षिणहस्तेषु कर्तव्यानि महाभुज! ।
वामेषु मातुलिङ्गं च चापादर्शौ कमण्डलुम् ॥
तथा चर्म च कर्तव्यं देवदेवस्य शूलिनः ।
वर्णास्तथा च कर्तव्याश्चन्द्रांशुसदृशप्रभाः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

(iii) म० सू०

चन्द्राङ्कितजटः श्रीमान् नीलकण्ठः सुसंयतः ।
विचित्रमुकुटः शम्भुर्निशाकरसमप्रभः ॥
दोर्भ्यां द्वाभ्यां चतुर्भिर्वा युक्तो वा दोर्भिरष्टभिः ।
पट्टिशव्यग्रहस्तश्च पन्नगाजिनसंयुतः ॥
सर्वलक्षणसम्पूर्णो नेत्रत्रितयभूषणः ।
एवंविधगुणैर्युक्तो यत्र लोकेश्वरो हरः ॥
परा तत्र भवेद् वृद्धिर्देशस्य च नृपस्य च ।
यदारण्ये श्मशाने वा विधीयेत महेश्वरः ॥
एवं रूपस्तदा कार्यः कारकस्य शुभावहः ।
अष्टादशभुजो दोष्णां विंशत्या वा समन्वितः ॥
शतबाहुः कदाचिद्वा सहस्रभुज एव च ।
रौद्ररूपो गणवृतः सिंहचर्मोत्तरीयकः ॥
तीक्ष्णदंष्ट्राग्रदशनः शिरोमालविभूषितः ।
चन्द्राङ्कितशिराः श्रीमान् पीनोरस्कोग्रदर्शनः ॥
भद्रमूर्तिस्तु कर्तव्यः श्मशानस्थो महेश्वरः ।
द्विभुजो राजधान्यां तु पत्तने स्याच्चतुर्भुजः ॥
कर्तव्यो विंशतिभुजः श्मशानारण्यमध्यगः ।
एकोऽपि भगवान् भद्रः स्थानभेदविकल्पितः ॥
रौद्रसौम्यस्वभावश्च क्रियमाणो भवेद् बुधैः ।
उद्यन् यथा भवेद् भानुर्भगवान् सौम्यदर्शनः ॥
स एव तीक्ष्णतामेति मध्यन्दिनगतः पुनः ।
तथारण्यस्थितो नित्यं रौद्रो भवति शङ्करः ॥
स एव सौम्यो भवति स्थाने सौम्ये व्यवस्थितः ।
स्थानान्येतानि सर्वाणि ज्ञात्वा किम्पुरुषादिभिः ॥
प्रमथैः सहितः कार्यः शङ्करो लोकशङ्करः ।
एतद् यथावत् कथितं संस्थानं त्रिपुरद्रुहः ॥

असाधारणीषु च सदाशिवः
(i) का० आ०

सदेशस्थापनं वक्ष्ये तल्लक्षणपुरस्सरम् ।
द्रव्यैश्शिलादिभिः कुर्यात्पूर्वोक्तैस्तं विशेषतः ॥
बद्धपद्मासनं श्वेतं स्थितं पञ्चास्यसंयुतम् ।
पिङ्गलाभजटाजूटं दशदोर्दण्डमण्डितम् ॥
अभयं च प्रसादं च तथा शक्तिं त्रिशूलकम् ।
खट्वाङ्गं दक्षभागस्थैर्वहन्तं करपल्लवैः ॥
भुजङ्गं चाक्षमालां च डमरुं नीलपङ्कजम् ।
बीजपूरं च वामस्थैर्वहन्तं सुप्रसन्नकम् ॥
अर्चनाध्यायसंसिद्धध्यानान्तरयुतं तु वा ।
इच्छाज्ञानक्रियाशक्तित्रयसंक्लृप्तलेचनम् ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ज्ञानचन्द्रकलायुक्तं कलावर्षोपलक्षितम् ।
ब्रह्मसूत्रादिकं कार्यं सुवेशः प्रतिमोदितम् ॥
एवं सदाशिवः कार्यो मनोन्मन्या समन्वितः ।

(ii) अ० पृ० — पद्मासनेन संस्थाय ! योगासनकरद्वयम् ॥
पञ्चवक्त्रं भयं शक्ति शूलखट्वाङ्गधृत्करम् ।
(द्वादशकलासम्पूर्णः) — भुजङ्गसूत्रडमरूबीजपूरधरं शुभम् ॥
इच्छाज्ञानक्रियं चैव त्रिनेत्रं ज्ञानसागरम् ।

महासदाशिवः — प्रसन्नपञ्चविंशकस्फुटाननं जटाधरं ,
मान० — सुपञ्चसप्ततीक्षणं कपोलकुण्डलाङ्कितम् ।
शतार्धहस्तभूषितं वराभयान्वितं सितम् ,
भुजङ्गभूषणं परं भजे महासदाशिवम् ॥

पाशुपतः — अथ वक्ष्ये विशेषणे पाशुपतस्य लक्षणम् ।
(i) अ० आ० — समपादं स्थानकं स्याच्चन्द्रशेखरमूर्तिवत् ॥
त्रिनेत्रं चतुर्भुजं सौम्यमूर्ध्वकेशं महातनुम् ।
अभयं शूलहस्तं च दक्षिणे तु करद्वयम् ॥
वरदं चाक्षमालां च वामपार्श्वे करद्वयम् ।
प्रवालसदृशप्रख्यं सौम्यनेत्रातिशीतलम् ॥
सर्वाभरणसंयुक्तं किंचित्प्रहसिताननम् ।
नित्योत्सवाय बिम्बं तत्स्थानकं वासनं तु वा ॥

(ii) शिल्प० — अथ पाशुपतं वक्ष्ये चन्द्रशेखरवत्स्थितम् ।
चतुर्भुजं त्रिनेत्रं चाप्यूर्ध्वकेशं महातनुम्
दक्षिणेऽभयकं शूलं कपालं वरदं परे ।
प्रवालसदृशप्रख्यं सर्वाभरणभूषितम् ॥

रौद्रपाशुपतमूर्त्तिः — तदेवाग्निसमं वर्णं रक्ताक्षं कुटिलभ्रुवम् ।
अ० आ० — तीक्ष्णदंष्ट्रासमायुक्तं व्यालयज्ञोपवीतिनम् ॥
ज्वालानलशिखाकारमतिरक्तवस्त्रधृक् ।
शूलं त्वधोमुखं धृत्वा कपालं वरदोद्धृतम् ॥
अथवाभयं विना शूलमूलं धृत्वा तु तत्करे ॥
शूलाग्रं वरदेनैव गृह्य तिर्य्यगतोद्धृतम् ।
दक्षिणे त्वपरे हस्ते टङ्कं खड्गं च वामके ।
रौद्रं पाशुपतं ह्येतद्विलिलिङ्गे तु पूजितम् ॥
एतन्मूर्ति सकृद् ध्यायेत्सर्वशत्रुविनाशनम् ।
एतत्तु रौद्रमूर्तिं तु प्रतिमां तु न कारयेत् ॥

अन्यासु सौम्यासु शान्तासु च

अर्धनारीश्वरः — अथार्धनारीमूर्तिं तु वक्ष्येऽहं शृणु सुव्रत ! ।
(i) अ० आ० — चतुर्भुजं वा द्विभुजं द्विविधं परिकीर्तितम् ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सुस्थितं दक्षिणं पादमितरं कुञ्चितं भवेत् ।
वामेऽर्धं पार्वतीरूपं दक्षिणेऽर्धं महेश्वरम् ॥
अभयं परशुं सव्यहस्तौ तत्तु शिवांशकम् ।
वृषमूर्ध्नि च विन्यस्तं कूर्परं वामहस्तके ॥
तदन्यद्वामहस्तं तु कटकं पुष्पहस्तकम् ।
द्विभुजे वरदं पूर्वं परहस्तं तु पुष्पधृक् ॥
शिवस्याभरणं सव्ये वामे स्त्रीभूषणं मतम् ।
पुंस्तनं दक्षिणे पार्श्वे वामे नारीपयोधरम् ॥
अथवा कुञ्चितं सव्यं वामपादं तु सुस्थितम् ।
सव्यं शूलधरं हस्तं वामं पुष्पधरं करम् ॥
वरदं दक्षिणं हस्तं वृषमूर्ध्नि तु कूर्परम् ।
कपालं दक्षिणे हस्ते वामहस्तं प्रसारितम् ॥
दक्षिणे रौद्रदृष्टिस्स्यात् वामपार्श्वे तु शीतलम् ।
दुकूलं चोरुमध्यस्थं सव्यं गुल्फातमन्यकम् ॥
एवं समासतः प्रोक्तमर्धनारीश्वरं परम् ।

(ii) उ० कामि०

उमार्धं वामभागं तु हरार्धं दक्षिणं वपुः ।
सजटामकुटं दक्षं शश्यर्धाङ्कितमग्रजाः! ॥
करण्डमकुटं वाममलंकेन समन्वितम् ।
ललाटं दक्षिणे भागे नयनार्धेन संयुतम् ॥
पत्रं तु वामकर्णे स्याद्वालिकेनापि संयुतम् ।
सनक्रकुण्डलं सव्ये तं विना वाथ कारयेत् ॥
सव्ये टङ्कारभये हस्ते उत्पलं वामगे करे ।
देव्यध्यायोदितास्त्रं वा दर्पणासक्तलोचनम् ॥
उमाभागं स्तनोपेतं चित्रवस्त्रपरिच्छदम् ।
व्याघ्राजिनाम्बरं सव्यपादं कुञ्चितमिष्यते ॥
सुस्थितं वामचरणं नूपुरेणाप्यलङ्कृतम् ।
वामं मरकताभं स्याद्दक्षिणं मणिसन्निभम् ॥
चन्द्रशेखरवच्छेषं कर्तव्यं हि मुनीश्वराः ॥

(iii) सु० भा०

दाक्षिणार्धे हरं चैव वामार्धे पार्वती तथा ।
दक्षिणं कुञ्चितं पादं वामपादमृजु स्थितम् ॥
हरस्य दक्षिणे हस्ते कूर्परं वृषके स्थितम् ।
प्रकोष्ठ शुकसंयुक्तं हरं परशुसंयुतम् ॥
वामे कटकहस्तं तु दक्षिणे त्वभयं स्मृतम् ।
श्यामवर्णमुखां देवीं रक्तवर्णं हरं तथा ॥
व्याघ्रचर्माम्बरं देवं पार्वतीं क्षौमधारिणीम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

(iv) पू० कार०

सबालेन्दुजटाभारमैशमर्धं तु दक्षिणम् ।
उमार्ध बामभागे तु सीमन्ततिलकालकम् ।।
नयनार्धं ललाटे तु संयुक्तं दक्षिणांशके ।
दक्षिणे कुण्डलं कर्णे वामकर्णे तु पत्रकम् ।।
कुटिलं पालिका वामे टङ्काभयौ च दक्षिणे ।
उत्पलं वामहस्ते तु केयूरकटकान्वितम् ।।
उमांशे तु स्तनं कुर्यात् वह(बह्वा)कारधरं तु वा ।
श्रोण्यर्धं दक्षिणे शम्भोर्व्याघ्रचर्मकृताम्बरम् ।।
उमार्धं कटिसूत्रान्तं चित्रवस्त्रपरिच्छदम् ।
नूपुरालङ्कृतं वामे सव्यपादं तु कुञ्चितम् ।।
आभङ्गेन तथा कुर्यात्सार्धनारीश्वरं वपुः ।

(v) वि० ध०

अर्धं देवस्य नारी त कर्तव्या शुभलक्षणा ।
अर्धं तु पुरुषः कार्यस्सर्वलक्षणभूषितः ।।
ईश्वरार्धे जटाजूटं कर्तव्यं चन्द्रभूषितम् ।
उमार्धे तिलकं कुर्यात् सीमन्तमलकं तथा ।।
भस्मोद्धूलितमर्धं तु अर्धं कुङ्कुमभूषितम् ।
नागोपवीतिनं चार्धमर्धं हारविभूषितम् ।।
वामार्धे तु स्तनं कुर्यात् घनं पीनं सुवर्तुलम् ।
उमार्धे तु प्रकर्तव्यं सुवस्त्रेण च वेष्टितम् ।।
मेखलां दापयेत्तत्र वज्रवैडूर्यभूषिताम् ।
उर्ध्वलिङ्गं महेशार्धं सर्पमेखलमण्डितम् ।।
पादं च देवदेवस्य समपद्मोपरि स्थितम् ।
सालक्तकं स्मृतं वाममञ्जनेन विभूषितम् ।।
त्रिशूलमक्षसूत्रं च भुजयोस्सव्ययोस्स्मृतम् ।
दर्पणं चोत्पलं कार्य भुजयोरपसव्ययोः ।।

(vi) शिल्प०

अर्धनारीश्वरं वक्ष्ये सुस्थितं दक्षिणाङ्घ्रिकम् ।
कुञ्चितं वामपादं तु सर्वाभरणभूषितम् ।।
वामार्धं पार्वतीरूपं दक्षिणार्धं महेश्वरम् ।
अभयं परशुं दक्षहस्ते वामगतं भुजम् ।।
वृषस्य मूर्ध्नि विन्यस्तकूर्परं चारु सुन्दरम ।
पुष्पधृक्कटकं त्वन्यं चतुर्भुजमिदं स्मृतम् ।।

(vii) शिल्प० सं०

अर्धनारीश्वरो देवःकथ्यते लक्षणान्वितः ।
दक्षिणं पुरुषाकारं वामं योषिन्मयं वपुः ।।
त्रिशूलं दक्षिणे हस्ते वामहस्ते च दर्पणम् ।
उत्पलं वा प्रकुर्वीत केयूरवलयान्विते ।।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

देहं प्रवालवर्णाभं देवेशस्य विशेषतः ।
सव्ये श्यामनिभा देवी प्राग्वन्मानादिसंयुता ॥
उत्पलं वामहस्ते तु धृतं दक्षिणहस्तकम् ।
शम्भोर्हस्तेन संग्राह्यं लज्जालम्बाननान्विता ॥
पार्वत्यनुगता श्रीभूस्सर्वाभरणभूषिते ।
हस्ताभ्यां संस्पृशेदेते गौर्यास्तु कटीं द्विज ! ॥
देवाग्रे कारयेत्कुण्डे होमकर्म प्रजापतिः ।
शम्भोर्वै स्तनसीमान्तं प्रजेशस्योदयं भवेत् ॥
चतुर्भुजं चतुर्वक्त्रं सर्वाभरणभूषितम् ।
कुण्डिका चाक्षमाला च वामदक्षिणतः परे ॥
स्रुक्स्रवौ पूर्वहस्तौ द्वौ धृतौ वामेतरौ क्रमात् ।
उत्तराभिमुखासीनः पद्मपीठे प्रजापतिः ॥
प्रागग्रौ देवदेवेशौ देवी देवस्य दक्षिणे ।
दक्षिणाभिमुखो विष्णुर्होमस्योत्तरतस्स्थितः ॥
शम्भोर्वै नासिमान्तं श्रेष्ठायामं स्तनान्तकम् ।
श्यामवर्णं समभङ्गं शङ्खचक्रं परे करे ॥
हिरण्यकरकेणापः पूर्वहस्तद्वयोरपि ।
सङ्ग्राह्य वरदे हस्ते दद्यादुकपूर्वकम् ॥
अनादिगोत्रसम्भूतस्स शिवः परमेश्वरः ।
आदिगोत्रामिमां गौरी तदैवास्माद्ददाम्यहम् ॥
इत्युक्त्वा वरदे हस्ते दद्याद् भक्त्योदकं हरिः ।
अष्टविद्येशलोकेशास्सिद्धयक्षगणादयः ॥
ऋषयश्चैव गन्धर्वा मातरश्चान्यदेवताः ।
तत्तच्छक्तिसमोपेता हृदयेऽञ्जलिसंयुताः ॥
सम्भ्रान्तमनसोपेतास्संवीक्ष्य परितस्स्थिताः ।
एवं कल्याणमूर्त्तिस्तु अर्धनारीश्वरं ततः ॥

(ii) उ० कामि०

जटामकुटसंयुक्तश्चन्द्रार्धकृतशेखरः ।
त्रिदृक्चतुर्भुजश्चैव नवयौवनगर्वितः ॥
समभङ्गयुतो देवः स्थानकस्थः प्रकीर्तितः ।
सकुञ्चितसव्यसत्पादस्थितसव्येतराङ्घ्रिकः ॥
इन्दुशेखरहस्ताभपरहस्तद्वयान्वितः ।
जलसङ्ग्रहणे योग्यवरवामकरान्वितः ॥
स्वदक्षिणगृहीतो वा दक्षहस्तः ः सन्नधीः ।
पूर्ववत्कथितं देव्या मग्नं विप्रोत्तमास्त्विह ॥
देवीदृगास्यचिबुककक्षचूचुकमानता ।
तद्देव्यपरभागस्था श्रीदेवी सर्वलक्षणैः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

युक्ता देविकटिस्पृष्टकराभ्यामपि संयुता ।
देवोच्चदशभागैकभागादेकादशावधि ॥
भागमानयुतश्श्यामः किरीटमकुटान्वितः ।
गृहीतशङ्खचक्रश्च हस्ताभ्यां धृतयापि च ॥
तोयकुण्डिकयोपेतो विष्णुरेष उदाहृतः ।
तदूर्ध्वे दक्षिणं हस्तं धारापाताय कल्पितम् ॥
हरेरुक्तप्रमाणेन ब्रह्माणमपि कारयेत ।
चतुर्मुखं चतुर्बाहुं जटामकुटमण्डितम् ॥
होमोन्मुखं प्रसन्नं तं कुङ्कुमक्षोदसन्निभम् ।
मौञ्जीमेखलयोपेतं सोपवीतोत्तरीयकम् ॥
वामेतरकरावूर्ध्वौ कमण्डलक्षधारकौ ।
वराभयकरौ पूर्वौ स्यातां तौ दक्षिणेतरौ ॥
सूचिपादक्रियो (सूचीपताकयो) पेतावन्यौ तु कटकामुखौ ।
ब्रह्मरूपमितिख्यातं तथा पद्मासनस्थितम् ॥
देवस्याङ्गुलमानेन द्वाविंशत्यङ्गुलो भवेत् ।
अग्निकुण्डस्य विष्कम्भस्त्रिमेखलयुतस्य च ॥
मेखलैकाङ्गुला प्रोक्ता प्रत्येकं मुनिपुङ्गवाः ।
द्वादशाङ्गुलविस्तारदैर्घ्या सा सप्तजिह्वकः ॥
पञ्चजिह्वायुतो वाग्निः कुण्डमध्यथिस्तस्त्वयम् ।

(iii) पू० कार० सचन्द्रार्धजटामौलिसौम्यं प्रथमयौवनम् ।
चतुर्भुजं त्रिनेत्रं च हारकेयूरभूषितम् ॥
मेखलोदरबन्धं च क्षौमवस्त्रधरं शुभम् ।
वासुकिः कुण्डलं काञ्ची तक्षको हारपुष्करम् ॥
किंच त्रिभङ्गिकं कायं दक्षपादं तु कुञ्चितम् ।
वरदं वामहस्तं तु कृष्णापरशुहस्तकम् ॥
देवस्य दक्षहस्ते तु देवीहस्तं तु संयुतम् ।
नास्यन्तं वापि चास्यान्तं हिक्कासूत्रसमं तु वा ॥
पीनोरः पीतगण्डां च पीनस्तनसमन्विताम् ।
द्विबाहुकां द्विनेत्रां च सर्वाभरणभूषिताम् ॥
दुकूलवसनां देवीं कुर्याद्देवस्य सव्यके ।
देवस्यायाममानं तु विभजेद् द्वादशाङ्गुलम् ॥
रुद्रांशं वा नवांशं वा वस्वंशं वैकहीनकम् ॥
आयामं तद्धरेः प्रोक्तं तस्य बाहुसमन्वितम् ।
चिबुकान्तं वाथ कक्षान्तं लक्ष्म्यायामं प्रकीर्तितम् ॥
विष्णुबिम्बसमं वापि तद्वस्वंशैकहीनकम् ।
सप्तभागैकहीनं वा रसांशैकविहीनकम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अजायाममिदं तस्य चतुर्भागैकभागता ॥
अग्निज्वालोच्छ्रयं प्रोक्तं तस्यार्धं विस्तृतं भवेत् ।
देवीलक्षणमेवं स्याल्लक्ष्म्याश्च लक्षणं शृणु ॥
नागहस्तसमौ बाहू केयूरकटकोज्वलौ ।
शोभनाम्बरसंपन्ना श्रोणी च विपुला तथा ।
मेखला अक्षिसूत्राङ्गा उमापार्श्वेवगार्थता? ।
एवं लक्ष्मीस्समाख्याता विष्णुरूपमथोच्यते ॥
किरीरमुकुटोपेतं कटिसूत्रोदरबन्धनम् ।
केयूरकटकं चैव यज्ञसूत्रसमन्वितम् ॥
लम्बसूत्रसमायुक्तं पीताम्बरसमायुतम् ।
मकरकुण्डलोपेतं श्रीवत्सं वक्षसि स्थितम् ॥
शंखचक्रधरं कुण्डं हस्तद्वयेन धारिणम् ।
जलधारोन्मुखं किंचिद्वक्रेणैव समायुतम् ॥
विष्णुरूपं समाख्यातं ब्रह्मरूपमथ शृणु ।
चतुर्भुजं (मुखं) चतुर्बाहुं कमण्डल्वक्षधारिणम् ॥
यज्ञसूत्रोत्तरीयं तु जटामकुटसंयुतम् ।
सव्यहस्तेऽक्षमालां च वामहस्ते कमण्डलुम् ॥
स्रुवं दक्षिणहस्ते तु पताका वामहस्तके ।
अम्बुजासनकासीनं ब्रह्माणं होमसंमुखम् ॥
एवं वैवाह्यमुद्दिष्टमुमया सहितं शृणु ।

✓ (iv) शिल्प०

अथ कल्याणमूर्तेस्तु लक्षणं सर्वमङ्गलम् ।
सुस्थितं वामपादं तु दक्षिणं कुञ्चितं भवेत् ॥
दक्षिणं पूर्वहस्तं तु गौरीदक्षिणहस्तधृक् ।
वरदं वामहस्तं तु परहस्तद्वये तथा ॥
दक्षिणे परशुं वामे तथा कृष्णमृगं परम् ।
जटामकुटसंयुक्तं सर्वाभरणसंयुतम् ॥
देहं प्रवालवर्णाभं देवेशस्य विशेषतः ।
तत्र श्यामनिभा देवी प्रागवन्मानादिसंयुता ॥
उत्पलं वामहस्ते तु धृत्वा दक्षिणहस्तकम् ।
शम्भोर्हस्तेन संग्राहयं लज्जाभरणसंयुता ॥
पार्वतीमनुगा श्रीभूस्सर्वाभरणभूषिता ।
हस्ताभ्यां संस्पृशेदेवं गौरीमपि करद्वये ॥
देवाग्रे कारयेत्कुण्डे तत्र होमं प्रजापतिः ।
शम्भोर्वै स्तनसीमान्तं प्रजेशस्योदयं तथा ॥
चतुर्भुजं चतुर्वक्त्रं सर्वाभरणभूषितम् ।
प्रागग्रौ देविदेवेशौ देवी देवस्य दक्षिणे ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

दक्षिणाभिमुखो विष्णुर्होमस्योत्तरदिक्स्थितः ।
शम्भोर्वै नाभिसीमान्तं श्रेष्ठं स्तनतलोन्नतम् ॥
कन्यतं (सं?) तु तयोर्मध्ये पूर्ववन्नवधस्मृतम् ।
श्यामवर्णसमायुक्तं शंखचक्रौ परे करे ॥
हिरण्यकरकेणापः पूर्वहस्तद्वयेन तु ।
संगृह्य वरदे हस्ते दद्यादुकपूर्वकम् ॥
अष्टलोकेशविघ्नेशास्सिद्धयक्षगणादयः ।
ऋषयश्चैव गन्धर्वा मातरश्चान्यदेवताः ॥
तत्तच्छक्तिसमोपेता हृदयाञ्जलिसंयुताः ।
सम्भ्रान्तमनसोपेतास्संवीक्ष्य परितस्स्थिताः ॥

वृषवाहनमूर्तिः
(i) अ० आ०

वृषवाहनमूर्तेस्तु लक्षणं वक्ष्यतेऽधुना ।
दक्षिणं सुस्थितं पादं वामपादं तु कुञ्चितम् ॥
वृषस्य मस्तकोर्ध्वे तु न्यसेद्वै वामकूर्परम् ।
हिक्कासूत्रादधो विप्र ! कला वा द्विर्नवाङ्गुलम् ॥
तस्मादासनसीमकं वृषस्योच्छ्रयं ख्यातम् ।
पक्षषोडशमात्रं वा नतं तत्सिहकर्णवत् ॥
वक्रदण्डायुधं तस्मिन् कल्पयेत्तु चलाचलम् ।
स्थिताङ्घ्रिजानूर्ध्वसीमाद्धिक्कासूत्रान्तमुन्नतम् ॥
कनिष्ठिकापरीणाहमग्रं वक्त्रयान्वितम् ।
लोहजं दारुजं वाथ वक्रदण्डैवमाचरेत् ॥
परहस्तद्वयोश्चैव टङ्ककृष्णमृगं धरेत् ।
टङ्कं दक्षिणहस्ते तु वामहस्ते मृगं धरेत् ॥
जटामकुटसंयुक्तं जटाभारं तु लम्बितम् ।
जटाबन्धशिरो वापि कर्तुरिच्छावशान्नयेत् ॥
सर्वाभरणसंयुक्तं रक्ताभं रक्तवाससम् ।
वामपार्श्वे त्वुमादेवी दक्षिणे वा विशेषतः ॥
सुस्थितं दक्षिणं पादं वामपादं तु कुञ्चितम् ।
उत्पलं दक्षिणे हस्ते वामहस्तं प्रसारितम् ॥
स्त्रीमानोक्तविधानेन उमादेवीं तु कारयेत् ।
वृषवाहनमाख्यातं नृत्तमूर्तिमथ शृणु ॥

(ii) उ० कामि०

वृषारूढप्रतिष्ठां तु वक्ष्ये तल्लक्षणान्विताम् ।
चतुर्भुजस्त्रिनेत्रस्तु जटामकुटसंयुतः ॥
परशुर्दक्षिणे हस्ते वामहस्ते मृगो भवेत् ।
पूर्वदक्षिणहस्तस्तु कटको वक्रदण्डयुक् ॥
अस्य सव्यप्रकोष्ठं तु विन्यसेद्वृषमस्तके ।
स हस्तो हंसपक्षो वा पतकाधोमुखस्तु वा ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तन्मध्यमाङ्गुलाश्रेण नाभिसूत्रसमं भवेत् ।
तस्यैवा दक्षिणे देवीं कारयेल्लक्षणन्विताम् ॥
अस्य स्वदक्षिणे गौरीयुक्तो वा मूर्त्यपेक्षया ।
आयुधव्यतिरिक्तैस्स्वैरङ्गैस्तु विपरीतकैः ॥
संयुक्तो वा वृषारूढस्त्वेवं मुक्तिप्रदो भवेत ।
पृष्ठस्थो वृषभः कार्यो देवजानूरुकोछ्रयः ॥
मेढ्रान्तो नाभिसीमान्तश्शेषं सर्वं तु पूर्ववत् ।

[iii] सु० आ०

वृषारूढमथो वक्ष्ये वृषभं पृष्ठतस्स्थितम् ।
उमारुद्रौ स्थितौ कृत्वा कूर्परं वृषमस्तके ॥
मृगं परशुसंयुक्तं कर्त्तव्यं वृषवाहनम् ।

(iv) शिल्प०

दक्षिणं सुस्थितं पादं वामपादं तु कुञ्चितम् ।
वृषस्य मस्तकोर्ध्वे तु न्यसेद्वै वामकोर्परम् ॥
तस्य दक्षिणहस्ते तु वक्रदण्डमुदाहृतम् ।
कनिष्ठाङ्गुलिपरीणाहं मध्ये वक्रत्रयान्वितम् ॥
लोहजं दारुजं वापि वक्रदण्डं प्रकल्पयेत् ।
परहस्तद्वयोश्चैव टङ्कं कृष्णमृगं न्यसेत् ॥
जटामकुटयुक्तं वा जटाभारं तु लम्बितम् ।
जटाबन्धशिरो वापि कर्तुरिच्छानुसारतः ॥
सर्वाभरणसंयुक्तं रक्ताभं रक्तवाससम् ।
वामपर्श्वे तु वा देवी दक्षिणे वा विशेषतः ॥
सुस्थितं दक्षिणं पादं वामपादं तु कुञ्चितम् ।
उत्पलं दक्षिणे हस्ते बामहस्तं प्रलम्बितम् ॥

विषापहारमूर्तिः

(i) **उ० कार०**

अथातस्संप्रवक्ष्यामि विषापहरणेश्वरम् ।
चतुर्भुजं त्रिनेत्रं च किंचिद्दंष्टकरालकम् ॥
जटारत्ननिभं विद्यात् पूर्णचन्द्रनिभाकृतिम् ।
त्रिशूलं गण्डिकां चैव गोकर्णाकृति दक्षिणे ॥
कपालं वामहस्ते च वामे गौरीसमायुतम् ।
वामपादं तु शयनं लम्बितं सव्यपादकम् ॥
महोक्षस्थं महाभीमं कालकूटविषाशनम् ।
कण्ठमध्ये महाकालमाबध्य गौरिपाणिना ॥
व्याघ्रचर्माम्बरधरं किंकिणीमालयावृतम् ।
वृश्चिकाभरणोपेतं सर्वाभरणभूषितम् ॥
एवं महेश्वरं ध्यात्वा प्रतिष्ठां साधकोत्तमः ।

(ii) श्रीतत्व०

एकवक्त्रं त्रिनयनं जटामकुटसंयुतम् ।
चतुर्बाहुं सुरक्तं समृगं परशुधारिणम् ॥
दक्षहस्ते गरं धृत्वा पानोन्मुखमदेक्षणम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वरदं वामहस्ते तु सर्वालङ्कारसंयुतम् ।।
देवस्य वामपार्श्वे तु देवीं चैव तु कारयेत् ।
श्यामां द्विनेत्रां द्विभुजां त्रिभङ्गीं
सव्यापसव्यस्थितकुञ्चिताङ्घ्रिम् ।
कण्ठे निपीड्य स्थितसव्यलम्बां
चिन्ताकुलामीश्वरतुष्टिदात्रीम् ।।
पीतवस्त्रां द्विनयनां वाञ्छितार्थफलप्रदाम् ।

चन्द्रशेखरमूर्तिः

(i) उ० कामि०

इन्दुमौलिप्रतिष्ठां तु वक्ष्ये लक्षणपूर्विकाम् ।
आपाद्य च शिलादीनि तैः कुर्य्यात्प्रतिमां गुरुः ।।
चतुर्भुजस्त्रिनेत्रश्च समपात्स्थानके स्थितः ।
वराभसमायुक्तपूर्वस्थकरपल्लवः ।।
वरदं वामहस्ते स्यादभयं दक्षिणे करे ।
वरदं यदि तं कुर्य्यादथान्यस्सिहकर्णिकः ।।
ऊरुस्पृष्टकरो वापि कटको वा विधीयते ।
मृगटङ्ककरावन्यौ दोस्सीमान्तं व्यवस्थितौ ।।
मृगटङ्कौ तु कर्णान्तौ कर्तरीसंव्यवस्थितौ ।
पराङ्मुखौऽभिमुखो वा मृगष्टङ्कः पराङ्मुखः ।।
रत्नपत्रिकया वापि शङ्खपत्रिकयापि वा ।
पद्मपत्रिकया वापि शोभितं वामकर्णकम् ।।
सव्यं मकरसिंहाख्यपत्रकुण्डलकैर्युतम् ।।
पृष्ठतः कर्णपर्यन्तं केशवर्तिविलम्बनम् ।
पार्श्वयोर्बाहुमूलात्तु जटाग्राणां विलम्बनम् ।।
हारयुग्ग्रीवसंयुक्तं तथा कर्णिकयान्वितम् ।
वक्षस्स्थलं प्रकर्तव्यं भुजाः केयूरसंयुताः ।।
सुपत्रवलयोपेतास्सर्वरत्नोपशोभिताः ।
मुक्तादामविलम्बाश्च तदग्रं मणिभूषणम् ।।
कराग्रं कटकोपेतमङ्गुल्यो मुद्रिकान्विताः ।।
छन्नवीरोत्तरीयोपवीतैस्सोदरबन्धनः ।
समस्तरत्नपाशाढ्यकृत्रिमाननदामभिः ।।
संयुक्तकटिसूत्रोऽन्तः पादजालकसंयुतः ।
चन्द्रशेखर एवं स्याद्देव्या च सहितो न वा ।।
सापीहाभिन्नपीठा वा देवेनालिङ्गिताथवा ।
तयालिङ्गितदेवो वा अन्योन्यालिङ्गितस्तु वा ।।
आलिङ्गनयुतो वा स्यान्निरालिङ्गोऽथवा मतः ।

(ii) सु० आ०

ऋज्वागतं तु तं देवं मृगं परशुधारिणम् ।
कृत्त्यम्बरधरं देवं कर्तव्यं चन्द्रशेखरम् ।।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

(iii) पू० का०   लिङ्गं च विष्णुरूपं च विना कुविन्दुशेखरम् ।

श्रीतत्व०   अभयवरदहस्तं सौम्यश्रृङ्गारभावं
विपुलवदननेत्रं चन्द्रबिम्बांशमौलिम् ।
ऋजुतनुसमपादस्थानकं विद्रुमाभं
हरिणपरशुपाणिं पद्मपीठोपरिस्थम् ।।
श्यामां त्रिनेत्रां द्विभुजां त्रिभङ्गीं सव्यापसव्यस्थितकुञ्चिताङ्घ्रिम् ।
सव्ये तु नीलोत्पलचारुहस्ता देवस्य वामस्थितपद्मपीठाम् ।।

केवलमूर्तिः   अभयं दक्षिणं हस्तं वरदं वाममुच्यते ।
(i) अ० आ०   वरदं वामहस्तं तु अधोमुखं प्रकल्पयेत् ।।
तलमूलं कटिस्पृष्टं मेढ्राग्रान्तं तु तत्करे ।
ऊर्ध्ववक्त्रं तु वरदं पृष्ठं नाभिसमोद्धृतम् ।।
आर्जवं राजसं भावं कल्पयेद् द्विजसत्तम! ।।
कर्तरी परहस्ते द्वौ टङ्कं वै दक्षिणे करे ।
हरिणी च बाह्यवक्त्रं वाम्यन्तरमुखं तु वा ।।
जटामकुटसंयुक्तं दक्षिणार्धेन्दुसंयुतम् ।
वामेन्दुशेखरं वाथ प्रवालसदृशप्रभम् ।
त्रिनेत्रं सौम्यवदनं सर्वाभरणभूषणम् ।।
पीताम्बरं तथा देवं वस्त्राग्रौ नलकान्तगौ ।
उभयोः पार्श्वयोरेवमम्बरं तूरुमध्यगम् ।।

(ii) शिल्प०   केवलं गौरिसहिमालिङ्गं च त्रिधा भवेत् ।
केवलं समपादं तु स्थानकं परिकल्पयेत् ।।
अभयं दक्षिणं हस्तं वरदं वाममुच्यते ।
हरिणी वामहस्ते तु टङ्कं वै दक्षिणे करे ।।
जटामकुटसंयुक्तं दक्षिणेर्धेन्दुशेखरम् ।
वामेन्दुशिखरं वाथ प्रवालसदृशप्रभम् ।।
त्रिनेत्रं सौम्यवदनं सर्वाभरणभूषितम् ।
पीताम्बरधरं देवं वस्त्राग्रै नलकान्तगौ ।
उभयोः पार्श्वयोरेवं मध्यतश्चोरुमध्यगम् ।।

सुखासनमूर्तिः   चतुर्भुजं त्रिनेत्रं च जटामकुटसंयुतम् ।
(i) पू० का०   अभयं दक्षिणं हस्तं वरदं वामहस्तकम् ।।
कृष्णापरशुसंयुक्तं वामदक्षिणहस्तयोः ।
शयनं दक्षिणं पादं वामपादं तु लम्बितम् ।।
उमासहितवत्सर्वं स्कन्दगौरीविवर्जितम् ।

(ii) शिल्प० २२   आर्जवं राजसं भावं भद्रपीठो परिस्थितम् ।
वामाङ्घ्रिं शाययेत्पीठे दक्षिणाङ्घ्रिं तु लम्बयेत् ।।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

जागतं (?) तु सुखासीनं, प्रवालसदृशप्रभम् ।
त्रिनेत्रं तु प्रसन्नास्यं संपन्नं राजसैर्गुणैः ॥'
व्याघ्राजिनवरोपेतं दुकूलवसनान्वितम् ।
दक्षिणे परशुं वामे कृष्णं हस्ते समुद्धृतम् ॥
अभयं दक्षिणे वामे कटकं सिंहकर्णवत् ।
दक्षिणे मकराख्यं वा कुंडलं सिंहमेव वा ॥
पत्रकुण्डलमन्यत्र वामकर्णे विशेषतः ।
अथवा कर्णयुगले वृत्तकुण्डलकं न्यसेत् ॥
जटामुकुटसंयुक्तं नानाभरणभूषितम् ।
यज्ञोपवीतसंयुक्तं सर्पराट्कङ्कणान्वितम् ॥
एवं सुखासनं प्रोक्तं राजराष्ट्रसुखावहम् ।

उमासहितमूर्त्तिः
(i) अ० आ०

केवलं त्वेवमाख्यातं वामे गौरीसमायुतम् ।
तद्गौरीसहितं ख्यातं भिन्नपीठैकमेव वा ॥

(ii) शिल्प०

केवलं त्वेवमाख्यातं वामे गौरीसमन्वितम् ।
भिन्नपीठे विशेषेण तद्गौरीसहितं विदुः ॥

आलिङ्गनमूर्त्तिः
(i) अ० आ०

तदेव भङ्गसंयुक्तं देवीदेवौ परस्परम् ।
देवो वरदहस्तेन देवी वै... पराश्रितम् ॥
...स्तनाभ्यन्तरे वामपार्श्वमालिङ्गनं कुरु ।
पार्श्वसूत्रात्पुरो वामबाहुमालिङ्गनं तु वा ॥
देवी दक्षिणहस्तेन शम्भोर्दक्षिणपार्श्वतः ।
कटिसूत्रोपरि स्पृष्ट्वा पुष्पं वामकरे धृता ॥
अथवा प्राग्वदेवेशो देव्यास्तु दक्षिणे करे ।
रक्तोत्पलं परिग्राह्य वामहस्तं प्रलम्बिता ॥
एवमालिङ्गमूर्त्तिं च त्रिधामार्गेण कल्पयेत् ।
सर्वाभरणसंयुक्तं प्रभामण्डलमण्डितम् ॥
चन्द्रशेखरमाख्यातं वृषारूढमथ श्रृणु ।

(ii) शिल्प०

देवो वरदहस्तेन देवीं तत्पार्श्वमाश्रिताम् ।
स्तनाभ्यन्तरे वामपार्श्वमालिङ्गनं कुरु ॥
पार्श्वसूत्रात्पुरो वामबाहुमालिङ्गनं तु वा ।
देवी दक्षिणहस्तेन शम्भोर्दक्षिणपार्श्वतः ॥
कटिसूत्रोपरि तथा वामे पुष्पधृता करे ।
अथवा प्राग्वदेवेशो देवी रक्तोत्पलान्विता ॥
करे तु दक्षिणे वामहस्तमात्रं प्रलम्बयेत् ।
एवमालिङ्गमूर्तिं तु त्रिधा मार्गेण कल्पयेत् ॥
एवं पञ्चविधं प्रोक्तं चन्द्रशेखरमूर्तिनम् ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

उमामहेश्वरः

(i) वि० ध०

युग्मं स्त्रीपुरुषं कार्यमुमेशौ दिव्यरूपिणौ ।
अष्टवक्त्रं तु देवेशं जटाचन्द्रार्धभूषितम् ॥
द्विपाणिं द्विभुजां देवीं सुमध्यां सुपयोधराम् ।
वामपाणिं तु देवस्य देव्यास्स्कन्धे नियोजयेत् ॥
दक्षिणं तु करं शम्भोरुत्पलेन विभूषितम् ।
देव्यास्तु दक्षिणं पाणिं स्कन्धे देवस्य कल्पयेत् ॥
वामपाणौ तथा देव्या दर्पणं दापयेच्छुभम् ।

(ii) रूप०

उमामहेश्वरं वक्ष्ये उमया सह शङ्करम् ।
मातुलिङ्गं त्रिशूलं च धत्ते दक्षिणे करे ॥
आलिङ्गन्वामहस्तेन नागेन्द्रं द्वितीये करे ।
हरस्कन्धे उमाहस्तो दर्पणं द्वितीये करे ॥
अधस्तात् वृषभं कुर्यात् कुमारं च गणेश्वरम् ।
भङ्गिरिटिं तथा कुर्यान्निर्मांसं नृत्यसंस्थितम् ॥

सोमास्कन्दः

(i) उ० कामि०

वक्ष्यामि सोमोमास्कन्दसुखेशस्थापनं परम् ।
तल्लक्षणसमायुक्तं तच्चेदानी प्रकथ्यते ॥
चतुर्भुजस्त्रिनेत्रश्च जटामकुटमण्डितः ।
सर्वाभरणसंयुक्तो वरदाभयहस्तकः ॥
कृष्णापरशुयुक्तोर्ध्ववामेतरकरान्वितः ।
असव्यसव्यकर्णस्थपत्रिकानक्रकुण्डलः ॥
सोपवीतः प्रसन्नात्मा शयितासव्यपात्तलः ।
सालम्बदक्षपादेन वामे गौर्या च संयुतः ॥
सर्वलक्षणसंयुक्तस्सर्वाभरणभूषितः ।
वामे देव्या समायुक्तस्तदध्यायप्रसिद्धया ॥
ससोमस्सोम एव स्यात्सोमास्कन्दविधिर्भवेत् ।
देवोच्चदशभागैकभागेनाथ द्विभागतः ॥
त्रिवेदभागैर्वा कुर्यात् स्कन्दं तन्मध्यमे गुरुः ।
द्विनेत्रस्सद्विबाहुश्च करण्डमकुटान्वितः ॥
कर्णयोर्नक्रपिण्डेन सर्वाभरणभूषितः ।
दक्षभागकरस्थाब्जः प्रसारितकरोऽपरः ॥
द्विहस्तपङ्कजो वाथ नृत्तरूपयुतोऽथवा ।
देव्यरुसंस्थितो वापि निष्पङ्कजकरोऽथवा ॥
आसीनो वा स्थितो वापि स्कन्दस्त्वेवं प्रकीर्तितः ।
स्कन्दोमारहितस्त्वेष एवं स्यात्तु सुखासनः ॥
सोमे च सोमास्कन्दे च सुखशे लक्षणं मतम् ।

(ii) सु० आ०

सहासने ह्युमादेवीं सुसौम्यवदनोज्वलाम् ।
द्विभुजां पद्महस्तां तु मकुटाभरणान्विताम् ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कटकाख्यधरां वामे प्रसारितमथापि वा ।
उमाबाहुस्तनान्तं वा मानं वै षण्मुखस्य तु ॥
कण्ठे शूलसमायुक्तं छन्नवीरसमायुतम् ।
उमाशंकरयोर्मध्ये स्कन्दं वै बालरूपपिणम् ॥
आसनं स्थानकं वापि वरदं कटकान्वितम् ।
कृत्वा सुखासनं यद्वत् पूर्ववत्परमेश्वरम् ॥
देवस्य मुखमन्वीक्ष्य किंचित् गौरीं तु कारयेत् ।

(iii) शिल्प०

अथ वक्ष्ये विशेषेण सोमास्कन्देश्वरं परम्।
सुखासनं यथा प्रोक्तं तथा देवो विधीयते ॥
देवस्य वामपार्श्वे तु पार्वती च सहासने ।
शाययेद्दक्षिणं पादं वामपादं प्रलम्बयेत् ॥
वरदं वामहस्ते तु दक्षिणे चोत्पलं करे ।
दूर्वाश्यामनिभा देवी सर्वाभरणभूषिता ॥
रक्ताम्बरधरा हारमकुटोज्वलान्विता ।
वामोरुबाह्ये पीठे तु वामहस्ततलं न्यसेत् ॥
प्रह्वदुत्पलसंयुक्तमन्यमेवं करोतु वा ।
देवीदेवेशयोर्मध्ये स्थापयेत्स्कन्दमूर्तिनम् ॥
केशान्ते वापिकोपेतं करण्डमकुटोज्वलम् ।
उभयोर्हस्तयोः पुष्पं वामे वरदमेव वा ॥
कटकं वाथ तद्धस्ते सिंहकर्णमथापि वा ।
अथवा पुस्तकं दक्षहस्ते वामे पुरोक्तवत् ॥
कटिसूत्रयुतं नग्नं बाहुभूषणभूषितम् ।
आसीनं वा स्थितं वाथ नृत्तं वा स्कन्दमाचरेत् ॥
नृत्तं चेत् फलवद्वामहस्तमन्यत्र सूचिकम् ।
अथवा वामहस्तं तु फलं त्यक्त्वा प्रसारयेत् ॥
वक्ष्यमाणविधानेन स्कन्दनृत्तं समाचरेत् ।

अनुग्रहमूर्तिषु

विष्ण्वनुग्रहः
(i) उ० कार०

अथातस्संप्रवक्ष्यामि सर्वभूतहिताय च ।
चक्रदानस्वरूपं तु श्रृणु (ष्व) शरवणोद्भव! ॥
त्रिनेत्रं चतुर्भुजं शान्तं जटामकुटमण्डितम् ।
वामपादं तु शयनं लम्बितं सव्यपादकम् ॥
टङ्कं रथाङ्गं सव्ये च वर(दं) कृष्णमृगं तथा ।
वामे विष्णुसमायुक्तं कृताञ्जलिपुटान्वितम् ॥
वामे गौरीसमायुक्तमुत्तरे परमेष्ठिनम् ।
सर्वावयवसंयुक्तं सर्वलक्षणसंयुतम् ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पद्मपुष्पं समभ्यर्च्य हरिणा नेत्रपूजितम् ।
प्रभामण्डलमध्यस्थं शिरश्चक्रसमायुतम् ।।
एवं कल्प्य विशेषेण प्रतिष्ठां शृणु षण्मुख ! ।

(ii) उ० कामि०

नन्दीशानुग्रहस्त्वेवं तद्वद्विष्णुप्रसादकृत् ।
हित्वा नन्दीश्वरं तस्मिन्विष्णुं तल्लक्षणान्वितम् ।।
सचक्राञ्जलिहस्तं च शङ्खाब्जापरहस्तकम् ।
कारयेद्देव एष स्याच्चक्रदो विष्णुमूर्तिनः ।।
कारयेदेवमेवान्यप्रसादाभिमुखं शिवम् ।

(iii) श्रीतत्व०

विष्णुस्त्वीशपुरः स्थितोऽञ्जलिकरो देवस्य पादाब्जयो-
स्संस्थाप्याक्षिलसत्सुमाल्यमनिशं पीताम्बरं कौस्तुभम् ।
यस्तस्मै दयया परं पशुपतिं पद्माक्ष इत्याख्यया
दङ्कं कृष्णमृगं वरं च दधतं चक्रप्रदं तं भजे ।।

नन्दीशानुग्रहः

(i) उ० कामि०

नन्दीश्वरप्रसादे तु विशेषः कश्चिदिष्यते ।
द्विनेत्रं द्विभुजं शान्तं कृताञ्जलिपुटान्वितम् ।।
सुविकीर्णजटोपेतं जटामकुटकान्वितम् ।
आभङ्गसहितं कुर्यादागमश्रवणोन्मुखम् ।।
नन्दीश्वरप्रसन्नं तु कारयेत्पूर्वमानतः ।

विघ्नेशानुग्रहः

उ० कार०

अथातस्संप्रवक्ष्यामि विघ्नेशानुग्रहं परम् ।
सर्वभूतहितं पुण्यं सर्वाभीष्टप्रदायकम् ।।
सर्वविघ्नविनाशार्थं कारयेद्देशिकोत्तमः ।
त्रिनेत्रं चतुर्भुजं शान्तं कुण्डलाभरणोज्वलम् ।।
बकपुष्पसुकेशं च स्तबकं चूलिकाकृतिम् ।
बकपत्रसमायुक्तं बकपुष्पसमन्वितम् ।।
आरग्वधस्रजं चैव स्तबकेन परिप्लुतम् ।
अङ्कुशं त्वक्षमालां च भसितं वरदं तथा ।।
वामे गौरीसमायुक्तं सव्यभागे गजाननम् ।
गजाननस्य काले तु भसितं धार्यपाणिना ।।
दिव्यच्छत्रसमायुक्तं सर्वावयवसुन्दरम् ।
एवं संकल्प्य विधिवत्प्रतिष्ठां कारयेत्ततः ।।

अर्जुनानुग्रहः

श्रीतत्व०

चतुर्भुजं त्रिनेत्रं च जटामकुटसंयुतम् ।
सर्वाभरणसंयुक्तं दिव्याम्बरसमावृतम् ।।
धनुर्बाणयुतं रक्तं कृष्णापरशुसंयुतम् ।
उपवीतसमायुक्तं समभङ्गतनुं कुरु ।।
वामे गौरी समायुक्तं दक्षिणे त्वर्जुनं स्थितम् ।

अर्जुनश्च

एकवक्त्रं द्विनयनं जटामकुटसंयुतम् ।
सर्वाभरणसंयुक्तं कृताञ्जलिपुटं स्थितम् ।।

चण्डेशानुग्रहः

अथवक्ष्ये विशेषेण चण्डेशानुग्रहं परम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

(i) अ० आ०

उमासहितवत्सर्वं वामे किंचिन्नताननम् ॥
दक्षिणे त्वभयं वज्य तद्धस्तं वरदं भवत् ।
वामे तु कटकं वर्ज्यं तं न्यस्त्वा चण्डमूर्धनि ॥
हृदयेऽञ्जलिसंयुक्तश्चण्डेशो भक्तिसंयुतः ।
आसीनः पद्मपीठे तु चण्डेशस्स्वर्णसन्निभः ॥
देवीदेवेशयोर्मध्ये स्कन्दमूर्तिं विना बुधाः ।
चण्डेशानुग्रहं ख्यातं दक्षिणामूर्तिरुच्यते ॥

(ii) शिल्प०

चण्डेशानुग्रहं देवमुमास्कन्दवदाचरेत् ।
वाम(मे?)किंचिन्नतं चास्यं दक्षिणे त्वभयं विना॥
तद्धस्ते वरदं कार्यं वामे तु कुटं(कटक?) विना ।
चण्डेशमूर्ध्नि विन्यस्य तद्धस्तं करुणान्वितम् ॥
हृदयेञ्जजलिसंयुक्तश्चण्डेशो भक्तिसंयुतः ।
आसनाधमस्त्वपासीनो भक्तिमान् स्वर्णसन्निभः ॥

नृत्तमूर्त्तिषु

प्रथमा
(i)अ० आ०

नृत्तमष्टशतं भेदं तेष्वादौ नव उच्चते ।
उत्तमं दशतालेन सर्वाङ्गं परिकल्पयेत् ॥
ऊर्ध्वकुक्षि स्पृशेत्पूर्वसूत्रमेवं प्रकल्पयेत् ।
तत्सूत्राद्डोलबाह्वग्रमर्धाधिककलाङ्गुलम् ॥
तस्मादपरबाह्वग्रं युगाङ्गुलमुदाहृतम् ।
तस्मादग्निकराग्रान्तं साष्टत्रिंशाङ्गुलं तु वा ॥
हिक्कासूत्रसमोद्धृत्य तद्धस्ते मध्यमाग्रके ।
तद्धस्ततलमध्ये वा मध्याङ्गुलाग्रपर्वके ॥
मध्यपर्वेऽथवोद्धृत्य त्वनलं पात्रसंयुतम् ।
पात्रं विनाऽथवा त्वग्नि पञ्चांशं विस्तृतं भवेत् ॥
दक्षिणे पूर्वसूत्रात्तु बाह्वग्रं विंशदङ्गुलम् ।
तस्माड्डमरुके हस्ते मणिबन्धस्य बाह्यकम् ॥
अष्टविंशतिमात्रं वा त्रिंशदङ्गुलमेव वा ।
दक्षिणे पूर्वहस्तं तु अभयं परिकल्पयेत् ॥
तन्मध्यमाङ्गुलाग्रं तु हिक्कासूत्रसमोद्धृतम् ।
अभये प्रकोष्ठमध्ये भुजङ्गवलयं न्यसेत ॥
प्रकोष्ठमध्यनाहस्य सपादं तस्य दैर्घ्यकम् ।
तद्दीर्घादुपरिख्यातं फणं भान्वङ्गुलं भवेत् ॥
सप्ताङ्गुलविशालं तु घनं चैकाङ्गुलं भवेत् ।
पुरस्स्थितान्समीक्ष्यं तु जिह्वाद्वयसमन्वितम् ॥
भुजङ्गवलयं ह्येवं कल्पयेत्कल्पवित्तमः ।
उद्धृताङ्घ्रेस्तु जानूर्ध्वनाभिसूत्रसमं भवेत् ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सुविकीर्णजटाभारं पञ्चषं सप्त एव वा ।
रुद्रसंख्याथवा विप्र! उभयोः पार्श्वयोस्तथा ॥
जटाभारं पुष्पमाल्यैरलङ्कृत्य विशेषतः ।
नागं चैवार्कपुष्पं च दुर्धूर(धुस्तूर)कुसुमं तथा ॥
हसितशीर्षकं चैव करोटी रत्नबन्धितम् ।
भूषयित्वा तु मकुटे दक्षिणेऽर्धेन्दुशेखरम् ॥
सिन्दूरालङ्कृतोरस्कमक्षमालावलम्बितम् ।
भस्मोद्धूलितसर्वाङ्गं किंचित्प्रहसिताननम् ॥
यज्ञोपवीतसंयुक्तमुरस्सूत्रसमन्वितम् ।
व्याघ्रीचर्माम्बरोपेतमूरुत्रिशावसानकम् ॥
पादौ नूपुरसंयुक्तौ सर्वाभरणभूषितः ।
हस्तपादाङ्गुलास्सर्वे रत्नहेमाङ्गुलीयकाः ॥
मध्याङ्गुला विवर्ज्यास्तु शेषास्तु मुद्रिकान्विताः ।
दक्षिणं कुञ्चितं पादमपस्मारोपरि स्थितम् ॥
त्रिर्य्यक्पादतलं न्यस्त्वा नृत्तं कुर्य्यान्महेश्वरः ।
वामपादं ततोद्धृत्य तिर्य्यक् तद्दक्षिणानुगम् ॥
डोलहस्तमथावर्त्य त्वपस्मारमथोच्यते ।
शम्भोस्सव्ये शिरः स्थाप्य वामे पादौ विकीर्णकौ ॥
तन्मुखं तु समुद्धृत्य व्याललीलासमन्वितम् ।
व्यालं वै वामहस्ते तु दक्षिणं तस्य मुद्रया ॥
तस्य श्यामनिभाकारमपस्मारं द्विजोत्तम ! ।
तस्य पार्श्वेऽप्युमादेवीं प्रागुक्तविधिना कुरु ॥
इदं स्यात्प्रथमं नृत्तं सर्वलोकहितावहम् ।

(ii) उ० कामि०

नृत्तमूर्तिप्रतिष्ठां तु वक्ष्ये तल्लक्षणान्विताम् ।
चतुर्भुजस्त्रिनेत्रश्च संविकीर्णजटायुतः ॥
जटामकुटसंयुक्तो वक्रनागफणावृतः ।
पृष्ठगाः पार्श्वगास्तास्स्युः पञ्चाद्येकैकवृद्धितः ॥
त्रिंशत्संख्यावसानास्स्युर्जटास्तास्सान्तरालकाः ।
धुस्तूरारग्वधार्कादिपुष्पयुक्तास्सपिङ्गलाः ॥
कृताञ्जलिपुटोपेतजाह्नव्या दक्षिणस्थया ।
बालचन्द्रेण संयुक्तो वामपार्श्वस्थितेन च ॥
युक्तो वकुलमालाभिर्मुक्तादामोरगादिभिः ।
व्याघ्राजिनाम्बरो दीप्तस्संर्वाभरणभूषितः ॥
वामदोर्मूलमालम्बिद्वीपिचर्माम्बरान्वितः ।
दिव्याम्बरान्वितो वापि मृगाजिनयुतोऽपिवा ॥
कस्थब्रह्मकपालेन पुष्पैरलङ्कृतः ।
धृतबाराहत(द?) न्ताग्रश्शार्दूलनखकच्छपः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

शार्ङ्गिकैर्मणिभिः प्रोतमालया हृदि भूषितः ।
स्थितो दक्षिणपादेन वामेनोपरिवर्तिना ॥
कुञ्चितावर्तमानाङ्घ्रिः सुप्रसारितसत्करः ।
अम्बिकामुखविम्बाब्जभ्रमरीकृतलोचनः ॥
आबद्धकिङ्किणीयुक्तस्तद्वन्नूपुरशोभितः ।
वामदक्षिणकर्णाढ्यपत्रिकानक्रकुण्डलः ॥
दक्षाभयकरस्थेन भुजङ्गेनोत्फणेन च ।
वामापरकरस्थेन वह्निना दक्षकेन तु ॥
डिण्डिमेन समायुक्त उपवीतेन संयुतः ।
गोक्षीरधवलप्रख्य आदित्याङ्गुलभङ्गयुक् ॥
नानासर्पसमायुक्तस्त्वपस्मारोपरि स्थितः ।
मूर्ध्नो ललाटदक्षस्थं नासादक्षपुटस्थितम् ॥
नाभेर्दक्षिणतो गुल्फमध्ये सूत्रं प्रसारयेत् ।
ललाटमध्यं सूत्रात्तु द्विमात्रमिति कीर्तितम् ॥
हिक्कासूत्रद्वयोर्मध्ये त्रिमात्रमिति कीर्तितम् ।
श्रोणिवामोरुसंस्पृष्टं तत्सूत्रमिह संमतम् ॥
सूत्रगुल्फद्वयोर्मध्यमेकाङ्गुलमिति स्मृतम् ।
सूत्राद्धि नतजान्वन्तं भानुदिङ्नन्दमात्रकम् ।
तत्सूत्राद्वामपृष्ठान्तं सप्ताधिकदशाङ्गुलम् ।
तत्सूत्राद्वामजान्वेकचत्वारिंशदशाङ्गुलम् ॥
सूत्राद्दक्षिणतः कुक्षिरष्टाङ्गुल उदाहृतः ।
सूत्रात्तु सव्यकुक्षिस्तु रव्याङ्गुल इति स्मृतम् ॥
उरोर्दक्षिणतस्सूत्रं सप्ताधिकदशाङ्गुलम् ।
सूत्रात्तद्वामभागे तु नवमात्रमुदाहृतम् ॥
सूत्रात्तु वामकण्ठस्तु पञ्चाङ्गुल उदाहृतः ।
सूत्रास्तु दक्षकण्ठे तद्भाग इत्यभिधीयते ॥
सूत्रात्तु वामबाह्वन्तं त्र्यङ्गुलक्षयसंयुतम् ।
अथवान्यप्रकारेण सूत्रपातोऽभिधीयते ॥
कनीनिकान्तं तन्मूर्ध्नः तद्वन्नासापुटान्ततः ।
नाभेश्च दक्षवामान्तं स्थिताङ्घ्रेर्गुल्फमध्यमम् ॥
स्पृष्ट्वा यत्पतितं सूत्रं मध्यसूत्रमुदाहृतम् ।
सूत्राद्वाममुखं पञ्चमात्रं कण्ठं त्रिमात्रकम् ॥
बाह्वन्ते तिथिमात्रं स्यान्नवमात्रं तु कक्षगम् ।
मध्योदरेऽष्टमात्रं स्यात् श्रोणी विश्वाङ्गुलेन च ॥
कटिस्त्रिंश्यङ्गुलेन स्यादन्यत्र षष्टिमात्रकः ।
नवमात्रं तदूरु स्यात्पार्ष्ण्यन्तं वेदतुङ्गकम् ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सप्ताङ्गुलं मुखं नेत्रं कण्ठस्स्याद्रसमात्रकम् ।
बाह्वन्ते तु त्रिमात्रं स्यात्कक्षान्ते विश्वमात्रकम् ॥
मुन्यङ्गुलं भवेत्कुक्षौ श्रोण्यां स्याद्युगमात्रकम् ।
कट्यां च वेदमात्रं स्याज्जानुरष्टाङ्गुलं भवेत् ॥
पादाग्रे मुखमात्रं स्यादेवं बुद्ध्वा समाचरेत् ।
स्थितजानुसमं विद्यादूर्ध्वतिताङ्घ्रेस्समुच्छ्रयम् ॥
तत्पार्ष्णिजान्वोर्द्विमुखद्वयन्तरं परिकीर्तितम् ।
श्रोणीसमुच्छ्रयं वामजानोरुद्धरणं मतम् ॥
तदूरुमध्यान्नाभेश्च अन्तरं नवमात्रकम् ।
तज्जानोर्दण्डहस्तस्य मणिबन्धान्तरं मनुः ॥
तस्मादभयहस्तस्य मणिबन्धो रसाङ्गुलः
तस्य चाङ्गुष्ठमूलान्तात्स्तनाक्षद्वयन्तरं मतम् ॥
तद्दोस्समं तलोच्चं स्यात्तद्वाह्वोर्मध्यमात्पुनः ।
सप्तादशाङ्गुलं विद्याद्दण्डहस्तस्य कूर्परम् ॥
भुजान्तं साग्निहस्तोच्चं सोग्निः पञ्चाङ्गुलोच्छ्रयः ।
विस्तारः कोलकस्तस्य शिखाभिस्तिसृभिर्युतः ॥
धृताडमरुको हस्तो कर्णोच्चाद्व्यङ्गुलोऽधिकः ।
साग्नि डमरुकायामो भूतैस्तु मुखविस्तृतिः ॥
कोलको मध्यविस्तारः परितस्सूत्रयन्त्रितः ।
एकजिह्वासमायुक्तो गम्भीरध्वनिसंयुतः ॥
बाह्वोस्तु मणिबन्धान्तं चतुस्त्रिंशत्तथापरम् ।
अपस्मारोच्छ्रयं भानुरुद्रनन्दाष्टमात्रकैः ॥
देवस्य वक्त्रमानेन स्यादपस्मारमानकम् ।
वक्त्रद्वयं समारभ्य पञ्चवक्त्रावसानकम् ॥
वक्त्रार्धमानवृद्ध्या तु सप्तमानमुदाहृतम् ।
चतुस्तालेन कर्तव्यमपस्मारो द्विजोत्तमाः! ॥
उष्णीषात्पादपर्यन्तं षडष्टांशं विभाजयेत् ।
उष्णीषात्केशपर्यन्तं कोलकं चेति कीर्तितम् ॥
केशान्ताद्धनुर्पयन्तमष्टभागमिति स्मृतम् ।
गलमर्धाङ्गुलं प्रोक्तमध्यर्धः कर्ण उच्यते ॥
षडङ्गुल इति प्रोक्तो हिक्कादिहृदयान्ततः ।
तथैव तस्मान्नाभ्यन्तं षडङ्गुलमिति स्मृतम् ॥
तस्मात्तु मेढ्रमूलान्तं कौशिकाङ्गुलमुच्यते ।
ऊर्वायामं तु सप्तांशं जानूत्सेधो द्विमात्रकः ॥
जङ्घायामस्तु सप्तांशः पादोत्सेधो द्विमात्रकः ।
द्विभुजश्च द्विनेत्रश्च उर्ध्ववक्त्रस्त्वधोमुखः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

व्यालं वै वामहस्ते तु तस्य मूर्धा तु दक्षिणे ।
आवृतालङ्कृता भङ्गी सव्यपार्श्वशिरोयुतः ॥
देवस्य वक्त्रमानेन जाह्नव्यायाम उच्यते ।
द्विभुजा च त्रि(द्वि?)नेत्रा च करण्डमकुटान्विता ॥
सर्वाभरणसंयुक्ता कृताञ्जलिपुटान्विता ।
ऊर्ध्वभागादधोभागं तोयाकारेण कारयेत् ॥
गङ्गादेव्यानया देवस्संयुक्तो वा विवर्जितः ।
प्रभावकाशं विस्तारो दशाधिकशताङ्गुलम् ॥
सप्तत्रिंशच्छतायामतद्दण्डो भागविस्तरः ।
एकाद्यदशपर्यन्तमात्रैरूनाधिकापि वा ॥
द्व्यङ्गुलादङ्गुलध्यर्धा तु बालचन्द्रस्तु सप्तधा ।
तद्वशात्पार्श्वगां देवीं कल्पयेत्तद्विधानतः ॥
कुर्याद्भृङ्गिरिटिं वाथ भद्रकालीमथापि वा ।
भुजङ्गत्रास आख्यातो भुजङ्गललितस्तथा ॥
भुजङ्गत्रासवत्सर्वं विशेषः कश्चिदस्ति हि ।
उद्धृतस्य तलं कुर्यात्स्थितजानूर्ध्वतः क्रमात् ॥
द्विमात्रं वा त्रिमात्रं वा चतुर्मात्रमथापि वा ।
भुजङ्गललितः ख्यातस्तद्भैरव इहोच्यते ॥
भुजङ्गत्रासवत्सर्वं विशेषस्तत्र चोच्यते ।
उद्धृतं दक्षिणं पादं वामपदं तु वा नयेत् ॥
स पादो देहमध्यस्थ ऊर्ध्वपादतलान्वितः ।
चतुर्भुजोऽष्टहस्तो वा नानादिव्यास्त्रभूषितः ॥
शिलादिद्रव्यमासाद्य कुर्यादेवं नटेश्वरम् ।

(iii) सु० आ०

नृत्तार्धोद्धृतवामाङ्घ्रिजानुनाभिसमोत्थितम् ।
पादाङ्गुष्ठसमो जानु जान्वङ्गुष्ठसमोद्धृतम् ॥
प्रसार्य वामहस्तं च दण्डवद्दयोपरि ।
अभयं दक्षिणं हस्तं शेषं डमरूकान्वितम् ॥
कण्ठसीमान्तमुद्धृत्य यथाशोभं प्रकल्पयेत् ।
साग्निकं वामहस्तं तु बाहुसीमान्तमुद्धृतम् ॥
पादाधस्स्थमपस्मारं सर्पक्रीडासमन्वितम् ।
धुस्तूरकं करोटिं च गङ्गेन्दुबकपिच्छकम् ॥
तिस्रः पञ्चजटास्सप्त प्रसार्य कुसुमोज्वलाः ।
सव्ये त्वेवं तथा वामे दीप्ताग्निसदृशोज्ज्वलाः ॥
नृत्तरूपमिदं वत्स ! सर्वशान्त्यर्थमुच्यते ।

(iv) पू० कार०

चतुर्भुजं त्रिनेत्रं च सुविकीर्णजटान्वितम् ।
कुररीवक्षसंयुक्तं बर्हिपिच्छसमन्वितम् ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मौलेर्दक्षे तु धुर्तूरमर्धचन्द्रसमन्वितम ।
दक्षिणे तु जटाग्रे तु जाह्नवीमभिवन्दिताम् ॥
पत्रं तु वामकर्णे तु दक्षिणे नक्रकुण्डलम् ।
सर्वाभरणसंयुक्तमुपवीतसमन्वितम् ॥
व्याघ्राजिनाम्बरोपेतं पादकिङ्किणिशोभितम् ।
गजत्प्रसारितं वामे दक्षिणेऽभयहस्तकम् ॥
डमरुं सव्यहस्ते तु वह्निवैं वामहस्तके ।
वक्रं तु दक्षिणं पादमपस्मारोपरि स्थितम् ॥
उद्धृतं वामपादं तु पादाग्रं दक्षिणानुगम् ।
ललाटमध्यं दक्षे तु हित्वा सार्धाष्टकं यवम् ॥
तस्मात्तु लम्बयेत्सूत्रं दक्षनासापुटान्तकात् ।
दक्षिणाङ्घ्रेस्तु गुल्फस्य मध्यमादेव पातितम् ॥
तत्सूत्रकक्षयोर्मध्ये ऊरुस्स्मृत्यङ्गुलं भवेत् ।
तत्सूत्रकक्षयोरन्तर्वामोरोर्वसुमात्रकम् ॥
तत्सूत्राद्दक्षिणे ग्रीवा षडङ्गुलमिति स्मृतम् ।
तत्सूत्राद्वामके ग्रीवा गुणाङ्गुलमुदाहृतम् ॥
तत्सूत्राद्दक्षिणे नाभेद्वर्चन्तरं चाङ्गुलं भवेत् ।
तत्सूत्रान्मेढ्रमूलान्ताद्वामभागमिति स्मृतम् ॥
वामा स्फिक्त्रिपिण्डिका सूत्रात्सप्तानामङ्गुलं भवेत् ।
तत्सूत्राद्वक्रपादस्य जानुकं तु दशाङ्गुलम् ॥
दक्षिणे बाहुसीमान्ताद्धिक्कासूत्रस्य मध्यमम् ।
(यवद्वयसमायुक्तं विंशदङ्गुलं चेति कीर्तितम्) ॥
यवद्वयाधिकं विंशदङ्गुलं चेति कीर्तितम् ।
हिक्कामध्यं समारभ्य दोस्सीमान्तं तु वामके ॥
यवद्वयसमायुक्तं सप्तादशाङ्गुलं भवेत् ।
नाभेर्दक्षिणके कुक्षितारं भागमिति स्मृतम् ॥
नाभेर्वामे तु कुक्षौ च तारं त्रयोदशाङ्गुलम् ।
वरदाग्निधरं हस्तं दोस्समं चेति कीर्तितम् ॥
शरमात्रं पावकोत्सेधं विस्तारं तु गुणाङ्गुलम् ।
त्रिशिखाभिस्समायुक्तं कल्पयेत्तलमध्यमे ॥
बाहोश्च मणिबन्धाच्च चतुस्त्रिंशदङ्गुलं भवेत् ।
डमरुकोपेतहस्तं तु सूचीहस्तमिति स्मृतम्
तत्सूचिहस्तकस्योर्ध्वं कर्णोर्ध्वसममुच्यते ।
बाहोश्च मणिबन्धाच्च चतुर्विंशदङ्गुलं भवेत् ॥
वामाङ्घ्रेश्चैव जानूर्ध्वं नाभेस्तु सममुच्यते ।
वामाङ्घ्रेः पार्ष्णिकाधश्च वक्राङ्घ्रेर्जानुकोपरि ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तत्समं त्विति विज्ञेयं तत्पार्ष्णेर्जानुकान्ततः ।
चतुस्त्रिंशतिमात्रं तु द्व्यन्तरं चेति कीर्तितम् ॥
मणिबन्धकजान्वोश्च द्व्यन्तरं तु यवं भवेत् ।
दोर्मूलान्तसमं चैव अभयाग्रं प्रकीर्तितम् ॥
मणिबन्धकबाहोश्च द्व्यन्तरं तु यवं भवेत्
तस्य कूर्परमध्ये तु व्यालं तत्रैव विन्यसेत् ॥
चूचुकं नाभिकामूला द्व्यन्तरं तु यवं भवेत् ।
सव्यस्य वामसूत्रस्य मध्याद्वै पार्श्वयोस्तयोः ॥
वामबाहुद्वयोर्मध्ये शार्दूलाजिनकं न्यसेत् ।
त्रिवक्त्रायाममानेन अपस्मारं ततः कुरु ॥
चतुस्तालप्रमाणेन भूतरूपेण कारयेत् ।
तस्यैव वामपार्श्वे तु देवीं कुर्यात् सलक्षणम् ॥
भुजङ्गत्रासमेवं तु भिक्षाटनमथ शृणु ।

(v) शिल्प० २२ ✓

नृत्तमष्टाशतविधं तत्रादौ नव कथ्यते ।
भानुरूद्रदशांशं वा तुङ्गं नृत्तनतं भवेत् ॥
हिक्कासमानमुन्नम्य दक्षहस्ताङ्गुलाग्रकम् ।
तद्धस्ततलमध्ये वा मध्यमाङ्गुलिकाग्रके ॥
तन्मध्यपर्वगं वाथ वह्निं पात्रगतं तु वा ।
पात्रं विनाथवा कुर्यादपरे डमरूं तथा ॥
दक्षिणे त्वन्यहस्ते स्यादभयं पूर्वमुक्तवत ।
अभये प्रकोष्ठमध्ये तु भुजङ्गवलयं न्यसेत् ॥
डोलायमानं तद्वामहस्तं कुर्याद्यथोचितम् ।
स्थिताङ्घ्रिजानोर्वामाङ्घ्रिजानुनीत्रं कलाङ्गुलम् ॥
सुविकीर्य जटाभारं नानानागविचित्रितम् ।
करोटिकाभिर्धुत्तूरकुसुमैश्च भुजङ्गमैः ॥
भूषितं मुकुटं कुर्यात् दक्षिणेऽर्धेन्दुशेखरम् ।
सिन्दूरालङ्कृतोत्तंसमक्षमालावलम्बितम् ॥
भस्मधूलितसर्वाङ्गं किंचित्प्रहसिताननम् ।
यज्ञोपवीतादियुतं व्याघ्रचर्माम्बरान्वितम् ॥
दक्षिणं कुञ्चितं पादमपस्मारोपरि स्थितम् ।
चतुस्तालेन कर्तव्यमपस्मारं प्रमाणतः ॥
शम्भोस्सव्यगतं तस्य शिरः कुर्यादधोमुखम् ।
पादौ विकीर्य हस्ताभ्यां व्याललीलामुदान्वितम् ॥
व्यालं वै वामहस्ते वा दक्षिणं मुद्रयान्वितम् ।
सस्यश्यामनिभं कुर्यादपस्मारं विशेषतः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पद्मपीठमधः कुर्यात्कलाङ्गुलसमुच्छ्रयम् ।
तच्चतुर्गुणविस्तारं प्रभामण्डलसंयुतम् ॥
रविमण्डलवृत्तं तु प्रभामण्डलमत्र तु ।
तत्र वामेऽप्युमादेवीं प्रागुक्तविधिना कुरु ॥
एतत्स्यात्प्रथमं नृत्तं सर्वलोकहितावहम् ।

द्वितीया
(i) अ० आ०
तदेव दक्षिणे पार्श्वे जटाग्रे जाह्नवी भवेत् ।
स्त्रीमानोक्ताङ्गसम्पूर्णं हृदयेऽञ्जलिसंयुतम् ॥
एवं जाह्नविसंयुक्तं नृत्तं यत्तद्द्वितीयकम् ।

(ii) शिल्प०
तदेव दक्षिणे पार्श्वे जटाग्रे जाह्नवी भवेत् ।
शम्भोरुच्चाङ्गुलेनैव षोडशाङ्गुलमुन्नतम् ॥
स्त्रीमानोक्ताङ्गसम्पूर्णा हृदयेऽञ्जलिसंयुता ।
एवं जाह्नविसंयुक्तं नृत्तं यत्तद् द्वितीयकम् ॥

तृतीया
अ० आ०
तदेव वामपादं तु अपस्मारोपरि स्थितम् ।
उद्धृतं दक्षिणं पादं वामात्तुङ्गं प्रसारयेत् ॥
शेषं प्रागिव कर्त्तव्यं नृत्तं''' ''तुस्तृतीयकम ।

चतुर्थी
(i) अ० आ०
सुविकीर्णजटाभारं जटामुकुटमण्डितम् ।
जटामुकुट (मण्डल?) संयुक्तं शेषं प्रथमनृत्तवत् ॥
चतुर्थं नृत्तमेतत्स्यात् सर्वप्राणिहितावहम् ।

(ii) शिल्प०
अनुकीर्णजटाभारं जटामकुटमण्डितम् ।
जटामण्डलयुक्तं वा चतुर्थेऽन्यथादिमम् ॥

पञ्चमी
(i) अ० आ०
उष्णीषोर्ध्वकसीमान्तं सव्यपादं समुद्धृतम् ।
सुवक्रं वामपादं तु अपस्मारोपरि स्थितम् ॥
भुजाष्टकसमायुक्तमेतत्पञ्चममुच्यते ।
अभयं शूलपाशं च डमरुं दक्षिणे करे ॥
कपालं चाग्निपात्रं च घण्टां हस्तिकरोपमम् ।
गजहस्तोपमं हस्तं प्रसार्यं दक्षिणानुगम् ॥
यत्तत्प्रथमनृत्तस्य पूर्वसूत्रं प्रसारयेत् ।
पञ्चमं नृत्तमेवं स्यात्ततष्षष्ठं वदाम्यहम् ॥

(ii) शिल्प०
उष्णीषोर्ध्वकमात्रान्तं सव्यपादं समुद्धरेत् ।
सवक्रं वामपादं तदपस्मारोपरिस्थितम् ॥
(उप) भुजाष्टकसं (आ) युक्तमेतत्पंचममुच्यते ।
अभयं शूलपाशौ च डमरुं दक्षिणे करे ॥
कपालं चाग्निपात्रं च घण्टां हस्तिकरोपमम् ।

षष्ठी
(i) अ० आ०
दोर्भिष्षोडशभिर्युक्तं वामे गौरीसमायुतम् ।
स्कन्दधृग्वामहस्तेन सव्यहस्तोद्धृताञ्जलिः ॥

State Museum,
LUCKNOW.
CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स्कन्दोभयकराभ्यां तु मातुस्तनकादाहृतम् ।
एवं गौरी समीक्ष्येशं भीतातिस्नेहविस्मयात् ।।
अभयं डमरूं चैव वज्रं शूलं तथैव च ।
पाशं टङ्कं तथा दण्डं नागं वै दक्षिणे करे ।।
अभयं शूलपाशं च खड्गं डमरुकं ध्वजम् ।
वेताल सूचिहस्तं च दक्षिणेऽष्टकरं भवेत् ।।
सव्यानुगकरं डोलं वामं चैव गजोपमम् ।
अनलं मिथुनं चैव वलयं केतुरेव च ।।
घण्टा खेटकपालं च वामपार्श्वेऽष्टहस्तके ।
अनलं गजहस्ताभं खेटकं विस्मयं तथा ।।
घण्टां चैव कपालं च क्षुरिकां सूचिमेव च ।
वामे त्वष्टभुजं ख्यातं शेषं पञ्चमनृत्तवत् ।।
पादौ पञ्चमनृत्तं स्यात् यत्तत्तद्विधीयते ।
षष्ठमं ह्येवमाख्यातं सप्तमं शृण सुव्रत ।।

(ii) शिल्प० दोर्भिष्षडङ्गसंयुक्तं वामे गौरीसमायुतम् ।
स्कन्दो भयात्कराभ्यां तु मातुः स्तनहृदोदरात् ।।
निपीड्य वा कराभ्यां तु वामभागोद्धृताञ्जलिम् ।
एवं गौरी निरीक्ष्येशं भीतयातिस्नेहविस्मयात् ।।
अभयं डमरुं चैव वज्रं शूलं तथैव च ।
पाशं टङ्कं तथा दण्डं नागं वै दक्षिणे करे ।।
सजानुगकरं डोलं वामं गजकरोपमम् ।
अङ्ग (न?) लं मिथुनं चैव वलयं केतुरेव च ।।
घण्टां चैव कपालं च वामपार्श्वेऽष्टहस्तके ।
पादौ पंञ्चमनृत्तस्य विधिवत्तद्विधीयते ।।

सप्तमी
अ० आ०

त्रिनेत्रं चाष्टहस्तं च सुविकीर्णजटायुतम् ।
कुञ्चितं वामपादं तु अपस्मारोपरिस्थितम् ।।
उद्धृतं दक्षिणं पादं चाङ्गुष्ठं चाग्रसीमगम् ।
अभयं शूलपाशं च डमरूं दक्षिणे करे ।।
कपालं चाग्निपात्रं च तथा विस्मयहस्तकम् ।
गजहस्तोपमं हस्तं सव्यासव्यानुगं तथा ।।
नतमानं दशांशं स्यात् वामे गौरीसमायुतम् ।
सप्तमं नृत्तमाख्यातं जगदातिविनाशकम् ।।

अष्टमी
अ० आ०

तदेव षड्भुजोपेतमभयं डमरुं तथा ।
शूलं दक्षिणपार्श्वे तु कपालं विस्मयं तथा ।।
गजहस्तोपमं वामे सूत्रं प्रागवत्तदष्टमम् ।
पञ्चमस्य च नृत्तस्य षष्टमस्य च··· स्मृता ।।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

नेत्रद्वयमिति ख्यातं शेषाणां तु त्रिनेत्रकम् ।

नवमी — चतुर्भुजं त्रिनेत्रं च जटामकुटसंयुतम् ।

अ० आ० — अभयं डमरूं सव्ये वामेऽग्निर्गजहस्तवत् ॥
अपस्मारं विना पीठे वामाङ्घ्रिं कुञ्चितं स्थितम् ।
तत्तत्पुरस्स्थितं पीठे सव्यपादकनिष्ठिका ॥
तत्पादं कुञ्चितं युक्त्या सूत्रं युक्त्या तु लम्बयेत् ।
नवमं नृत्तमाख्यातं गङ्गाधरमथ शृणु ॥

दक्षिणामूर्तिषु

१. व्याख्यानदक्षिणामूर्तिः — अथ वक्ष्ये विशेषेण दक्षिणामूर्तिलक्षणम् ।

(i) उ० कामि० — लम्बयेद्दक्षिणं पादं वामाङ्घ्रेर्नलकाग्रकम् ॥
सव्योर्वग्रे निधातव्यं वामपादं तु शाययेत् ।
नतमध्यर्धमात्रं स्याच्चतुर्भुजसमन्वितम् ॥
दक्षिणे पूर्वहस्तं तु ज्ञानमुद्रां तु धारयेत् ।
दक्षिणे परहस्तं तु अक्षमालाधरं परम् ।
वरदं वामहस्तं स्याद्दण्डहस्तमथापि वा ।
वामजानूपरिष्टात्तु वरदे तलपृष्ठकम् ॥
वामजानूपरिष्टात्तु दण्डं चेत्कूर्परं न्यसेत् ।
वामे तु परहस्ते तु वह्निं वा व्यालमेव वा ॥
अर्धार्जववक्त्रं सर्वाङ्गमार्जवं स्फटिकोपमम् ।
विकीर्णमूर्धजं वापि जटामण्डलमेव वा ॥
.........वद्धमूर्ध्नि वा जटामकुटमेव वा ।
चतुर्भुजस्त्रिनेत्रस्तु कुन्देन्दुधवलप्रभः ॥
श्वेतविद्रुमहेमाभश्श्यामाभो वा प्रकीर्तितः ।
व्याघ्रचर्माम्बरो वापि दिव्याम्बरधरस्तु वा ॥
उत्तरीयसमोपेतश्शुक्लयज्ञोपवीतकः ।
विकीर्णमूर्धजो वापि जटामकुट एव वा ॥
पट्टिकाबन्धनोवापि सत्करोटिकया युतः ।
धुर्धूरारग्वधैर्नागपत्रैश्चन्द्रेण मण्डितः ॥
पञ्चमुद्रासमोपेतो गङ्गाकिङ्किणिसंयुतः ।
अधस्ताद्वटवृक्षस्य शैलादूर्ध्वं श्रितः पुनः ॥
व्याघ्रचर्मोपरिष्टात्तु स्थितो वीरासनोऽथवा ।
लम्बितं दक्षिणं पादं तज्जानूपरि संस्थितम् ॥
वामाङ्घ्रिनलकं कुर्यात् सव्यहस्तं तु मुद्रया ।
सन्दर्शसंज्ञयोपेतो वामहस्तस्थपुस्तकः ॥
अथवा नागसंयुक्तो वामहस्तस्समीरितः ।
वरदं तं विजानीयाज्जानुस्थमणिबन्धकः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

दण्डहस्तो यदा स स्यात्प्रकोष्ठं जानुसंस्थितम् ।
विकसत्पद्मसङ्काशस्त्वधस्ताद्वि स्तृताङ्गुलिः ॥
परहस्तद्वये चाक्षमालाज्वालासमन्वितः ।
पद्मं वा चोत्पलं वापि व्यालं वामे तु कल्पयेत् ॥
कटकौ तौ प्रकर्तव्यौ प्रसन्नसमलोचनः ।
नासाग्रदृष्टियुग्वामहस्तो वा स्यात्सुपुस्तकः ॥
सजटामुकुटा देवचूचुकास्यगलान्तकाः ।
तत्तत्कलासमोपेताश्शुक्लयज्ञोपवीतिनः ॥
शुक्लाद्यम्बरसंयुक्ता भस्मरुद्राक्षसंयुताः ।
कौशिकः काश्यपश्श्यामस्त्वितरौ पीतवर्णकौ ॥
रक्तवर्णो भरद्वाजो धूम्राभावत्रिगौतमौ ।
एषामेकद्वयं वापि त्रयं व पार्श्वयोर्न्यसेत ॥
व्याख्यानमूर्तिरेवं स्याद्गेयमूर्तिस्ततो मतः ।

(ii) पू० का०

चतुर्भुजं त्रिनेत्रं च द्वीपिचर्माम्बरान्वितम् ।
आवृतालङ्कृता भङ्गी शश्यर्ककुसुमान्वितम् ॥
सद(न्दं?)शं दक्षिणं हस्तं पुस्तकं वामहस्तके ।
सव्यके चाक्षमालां च व्यालं वै वामहस्तके ॥
पादाग्रे दृष्टिपातं तु किंचिद्भङ्गसमायुतम् ।
लम्बितं दक्षिणं पादं तस्योर्वग्रस्य चोपरि ॥
वामपादस्य नलकं संयुतं कारयेत्सुधीः ।
हिक्कामध्यं समारभ्य कटके मणिबन्धकात् ॥
द्व्यन्तरं त्रियवं प्रोक्तमृषिसङ्घैस्समावृतम् ।
अगस्त्यश्च पुलस्त्यश्च विश्वामित्रोऽङ्गिरास्तथा ॥
एवं याख्यानमूर्तिं तु गेयमूर्तिं शृणुष्वथ ।

(iii) वि० ध०

दक्षेण मुद्रां प्रतिपादयन्तं सिताक्षसूत्रं च तथोर्ध्वभागे ।
वामे च पुस्तामखिलागमाद्यां विभ्राणमूर्ध्वेन सुधाधरं च ॥
सिताम्बुजस्थं सितवर्णमीशं सिताम्बरालेपनमिन्दुमौलिम् ।
ज्ञानं मुनिभ्यः प्रतिपादयन्तं तं दक्षिणामूर्तिमुदाहरन्ति ॥

(iv) शिल्प०

दक्षिणामूर्तिमीशानं कुर्याद्वटतरोरधः ।
लम्बयेद्दक्षिणं पादं वामाङ्घ्रेर्नलकाग्रकम् ॥
सममेवं विधातव्यं वामपादं तु शाययेत् ।
दक्षिणे पूर्वहस्ते तु ज्ञानमुद्रां तु धारयेत् ॥
दक्षिणे परहस्ते तु कारयेदक्षमालिकाम ।
वरदं वामहस्ते तु दण्डं वा परिकीर्तितम् ॥
वामजानूपरिष्टात्तु दण्डं चेत्कूपरं न्यसेत् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वामे परकरे तत्र वह्निं वा मृगमेव वा ॥
विकीर्णमूर्धजं वापि जटामण्डलसंयुतम् ।
जटाभिर्वद्धमूर्तिर्वा जटामुकुटशोभितम् ॥
शुद्धस्फटिकसङ्काशं ... ... ।
वामे धुस्तूरपुष्पं च नागं च शिरसि स्मृतम् ॥
दक्षिणेन्दुकलायुक्तं सर्वाभरणभूषितम् ।
सितवस्त्रोत्तरीयं च सितयज्ञोपवीतनम् ॥
व्याघ्रचर्माम्बरोपेतं त्रिनेत्रं क्लेशवर्जितम् ।
रुद्राक्षं कण्ठमालां च हृन्मालां च विधापयेत् ॥
नारदो जमदग्निश्च वशिष्ठो दक्षपार्श्वके ।
भारद्वाजश्च शुनकस्त्वगस्त्यो वामपार्श्वके ॥
वन्दितैः किन्नराद्यैस्तु सेवितं भक्तिसंयुतैः ।
अपस्मारोपरिष्टात्तु लम्बपादतलं न्यसेत् ॥
धर्मव्याख्यानमूर्तिः स्यादेवं सर्वशुभावहम् ।

२. ज्ञानदक्षिणामूर्तिः

(i) अ० आ०

तदेव वीणाहीनं तु ज्ञानमुद्राभयान्वितम् ।
वामं प्रसारितं हस्तं वामाजानूरूकूर्परम् ।
दक्षिणे त्वपरे चाक्षमाला वामेऽब्जमुत्पलम् ।
शुद्धश्वेतनिभं वर्णं शेषं पूर्ववदाचरेत् ॥
ज्ञानमूर्तिरिति ख्यातं सर्वकारणकारणम् ।

(ii) शिल्प०

अथवा पूर्वहस्ताभ्यां ज्ञानमुद्राभयौ धृतौ ।
वामं प्रसारितं वाथ वामजानूर्ध्वकूर्परे ॥
अपरे दक्षिणे त्वक्षमालामुत्पलमन्यतः ।
ज्ञानमूर्तिरिति ख्यातं सर्वकारणकारणम् ॥

३. योगदक्षिणामूर्तिः

(i) अ० आ०

अन्योन्याङ्घ्रितलं विप्र ! स्फिक्पिण्डाधः प्रकल्पयेत् ।
ज्ञानमुद्रां हृदि स्थाने त्वभ्यन्तरमुखं करम् ॥
वरदं वामहस्तं तु मेढ्रपीठोपरि न्यसेत् ।
अपरे दक्षिणे चाक्षामालाब्जं वामहस्तके ॥
नासाग्रं तु समीक्ष्याक्षमार्जवं सूत्रदेहकौ ।
अपरे तु जटालम्ब्य ऋषिभिस्सेवितं परम् ॥
योगमूर्तिरिति ख्यातं ध्याने दुःखनिवृत्तिदम् ।
लम्बयेद्दक्षिणं पादं वाममुत्कुटिकासनम् ॥
योगपट्टिकयाबध्य देहं चोत्कुटिकाङ्घ्रिकम् ।
प्रसार्य वामहस्तं तु वामजानूपरि द्विज! ॥
प्रागिवैव कृतं शेषं सोऽप्येवं योगमूर्ति वै ।
ऊरुमूर्ध्नि समाश्रित्य अन्योन्यं पादपार्ष्णिकौ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

योगपट्टिकयोपेतं जङ्घामध्ये द्विजोत्तम! ।
प्रसार्य पूर्वहस्तौ द्वौ जानूपरि निधापितौ ॥
अपरे दक्षिणे चाक्षमाला वामे कमण्डलुम् ।
जटामण्डलसंयुक्तं ततश्चन्द्रशेखरम् ॥
नीलग्रीवासमायुक्तं शङ्खकुन्देन्दुसन्निभम् ।
अपरे शाययेद्वृक्षं नानासर्पविभूषितम् ॥
हृन्मालाकर्णमालाभ्या दूर्ववृक्षे विराजतम् ।
एवं त्वनेकभेदेन दक्षिणामूर्तिरुच्यये ॥

(ii) उ० कामि०

व्याख्यानसहितस्त्वेव संदर्शस्य समास्ययुक् ।
तत्राक्षिपातयोगेन सदाकुञ्चित्लोचनः ॥
प्रसृतो वामहस्तस्स्याद्योगमूर्तिरयं मतः ।
अथ कुञ्चितवामाङ्घ्रियुग्मस्फिग्गतपार्ष्णिकः ॥
उद्धृतं तस्य जान्वग्रं दण्डकूर्परकान्तयुक् ।
सन्दर्शदृष्टिपातश्च आभङ्गं चैव पूर्ववत् ॥
नानामृगैस्तु संकीर्णं नानाव्यालैस्तु संयुतः ।
नानामुनिगणैस्साधं सिद्धिविद्याधरैरपि ॥
भूतैश्च किन्नरैरन्यैः पुष्पवृक्षैश्च मण्डितम् ।
शैलं कुर्यात्तु तत्पार्श्वे वटवृक्षस्तु शाद्वलः ॥
फलशाखोपशाखाढ्यो नानापक्षिसमायुतः ।
तन्मूले दक्षिणे छायानिषण्णः कू (कृ)पया युतः ॥
रत्नोपशोभिते पीठे व्याघ्रचर्मोत्तरछदे ।
आसीनो मुनिभिस्सम्यक् कौशिकादिभिरादरात् ॥
शिवद्विजकुलस्यादिभूतैस्तु परितस्स्थितैः ।
आगमाहितचेतोभिः परमेशेन दीक्षितैः ॥
एवं तु दक्षिणामूर्तेमूर्तिभेदाः उदाहृताः ।
आसीनो वा स्थितो वापि ऋषिभिस्संवृतो न वा ॥
वटवृक्षविहीनो वा भूताद्यावृत एव वा ।
भूतस्थलम्बपादो वा दक्षिणेशस्समीरितः ॥

(iii) शिल्प०

अन्योन्याङ्घ्रितलं सम्यक्, स्फिक्पिण्डाधः प्रकल्पयेत् ।
ज्ञानमुद्रां हृदि स्थाने त्वभ्यन्तरमुखं करम् ॥
वरदं वामहस्तं तु मेढ्रपीठोपरि न्यसेत् ।
अपरे चोत्पलं चाक्षमालां पूर्ववदाचरेत् ॥
नासाग्रं स्वं समीक्ष्य स्वमार्जवं देहमाचरेत् ।
सुविकीर्णजटायुक्तं योगमूर्तिरिति स्मृतम् ॥
लम्बयेद्दक्षिणं पादं वाममुत्कुटिकासनम् ।
संबद्धय योगपट्टेन देहोत्कुटिकाङ्घ्रिकौ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्रसार्य वामहस्तं तु वामजानूपरि स्थितम् ।
एतच्च योगमूर्तिस्स्याच्छेषं पूर्ववदाचरेत् ॥
उरुमूलं समाश्रित्य अन्योन्याबद्धपार्ष्णिकम् ।
योगपट्टिकयोपेतं जङ्घामध्ये विशेषतः ॥
प्रसार्य पूर्वहस्तौ द्वौ जानूपरि निधापितौ ।
अपरे दक्षिणे वाक्षमालां वामे कमण्डलुम् ॥
जटामण्डलसंयुक्तं करोटचर्धेन्दुशेखरम् ।
नीलग्रीवासमायुक्तं शङ्खकुन्देन्दुसन्निभम् ॥
योगमूर्तिविशेषाख्यं शेषं प्रागिव कारयेत् ।

वीणाधरदक्षिणामूर्तिः

(i) अ० आ०

तदेव वामपादेनोत्कुटिकासनसंयुतम्॥
पूर्वहस्तद्वयोर्वीणाधृतं युक्त्या द्विजोत्तम! ॥
शेषं प्रागिव कर्तव्यमेतद्वीणाधरं भवेत् ।

(ii) उ० कामि०

ऊर्ध्वाधोमध्यकटकौ तस्यां सर्वकरावुभौ ।
वीणा तु दक्षिणे वाग्रेऽदक्षिणे कटकेस्थितः ॥
दक्षिणे कटकं चोरुस्थितायां विनिवेशयेत् ।

(iii) पू० कार०

कटकं दक्षिणं हस्तमधोमुखं तदुच्यते ।
वामहस्तं तु कटकमूर्ध्ववक्त्रं तदुच्यते ॥
तन्त्रीं निवेशयेदूरुकाग्रे दक्षिणपादके ।
वामहस्तस्य कटके सव्यहस्तं तथोपरि ॥
ऊरुबाह्य त्रिमात्रं तु कटकोर्ध्वे युगाङ्गुलम् ।
दण्डायाममिति प्रोक्तं विस्तारं तु द्विमात्रकम् ॥
वा (ला?) बुवक्त्रं तु षण्मात्रमुत्सेधं तु तदर्धकम् ।
एतदेव विशेषं तु शेषं पूर्वोक्तवद्भवेत् ॥
दक्षिणामूर्तिरेवं स्याच्छृणु मन्मथनिग्रहम् ।

(iv) शिल्प०

तदेव वामपादेनोत्कुटिकासनसंयुतम् ।
पूर्वहस्तद्वये वीणा चेत्तद्वीणाधरं स्मृतम् ॥

अशान्तोग्रमूर्तिषु संहारमूर्तयो यथा--

कामान्तकमूर्तिः

(i) उ० कामि०

अग्रे तु दक्षिणामूर्तेर्योगनिष्ठस्य मन्मथम् ।
कुर्यात्तु पतितं दृष्टिपातादेव च तत्क्षणात् ॥
भक्त्वा दशांशं देवोच्चमेकाद्यासप्तभागिकम् ।
मन्मथोत्सेधमुद्दिष्टं स तु हेमविभूषितः ॥
शुद्धजाम्बूनदप्रख्यः पुष्पपञ्चेषुसंयुतः ।
मीनकेतुस्तथैवेक्षुकार्मुकः कृ (र ?) तिसंयुतः ॥
देवभागवसन्ताख्यमित्रयुक्तोऽतिसुन्दरः ।
सम्भिनी तापिनी चैव वेदिनी द्राविणी तथा ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मारिणीति शराख्यास्स्युर्धनुर्वामे शराः परे ।
मन्मथो मिश्रयुक्तो वा युतो वैकशेरण तु ॥

(ii) सु० आ०
उग्ररूपं तु कामारिं पार्श्वे कामं प्रपातितम् ।
कार्यं कामरिपुं ह्येवं वक्ष्येऽहं कालनाशनम् ॥

(iii) पू० कार०
त्रिनेत्रं चतुर्भुजं देवं जटामकुटमण्डितम् ।
उग्रदृष्टिसमायुक्तमक्षमालोरगन्धरम् ॥
दक्षिणे तु पताका च वामहस्तं तु सूचिका ।
एतदेव विशेषं तु शेषं व्याख्यानमूर्तिवत् ॥
वेरायामरसांशाच्च त्रिभागं मन्मथायतम् ।
पीठस्थो वा रथस्थो वा कामः काञ्चनसन्निभः ॥
सर्वभूषणभूष्यं च दिव्यरूपसमन्वितम् ।
पुष्पैश्चैव शरैर्युक्तमिक्षुचापं च षड्ध्वजम्(?) ॥
मदरागवसन्तैश्च हेमबान्धवसंयुतम् ।
तापिनी दहनी विश्वमोहिनी विश्वमर्दनी ॥
मादिनी नाम निर्दिष्टास्तस्य पञ्चशरा इमे ।
कार्मुकं वामहस्ते तु बाणं तु सव्यहस्तके ॥
देदस्याभिखं कुर्यात् कामरुपं प्रपातितम् ।
कामनिग्रहमेवं स्याच्छृणु वैवाह्यमूर्तिनम् ॥

गजासुरसंहारमूर्ति
(i) अ० आ०
अथ वक्ष्ये विशेषेण गजहामूर्तिलक्षणम् ।
सर्वाभरणसंयुक्तं चतुर्दोश्चाष्ट एव वा ॥
चतुर्भुजं चेत् पाशं च गजचर्मं च दक्षिणे ।
गजश्रृङ्गं च चर्मं च वामपार्श्वे करद्वये ॥
चतुर्भुजं सम्माख्यातमष्टहस्तमथोच्यते ।
शूलं डमरूकं पाशं गजचर्मं च दक्षिणे ॥
गजश्रृङ्गं कपालं च गजचर्मं च विस्मयम् ।
एवं पार्श्वे तु चत्वारो हस्तमेवं प्रकल्पयेत् ॥
शम्भोर्वामाङ्घ्रचधस्तात्तु गजस्यैव तु मस्तकम् ।
मकुटस्योपरिष्टात्तु गजपुच्छं प्रकल्पयेत् ॥
पर्श्वयोर्गजपादांस्तु यथायुक्त्या तु कल्पयेत् ।
प्रभामण्डलवच्छेषं गजचर्मं प्रकल्पयेत् ॥
व्याघ्रचर्माम्बरोपेतं दुकूलवसनान्वितम् ।
सर्वालङ्कारसंयुक्तमतिरक्तसमप्रभम् ॥
एवं तु गजहामूर्तिं प्रथमं तु विधीयते ।
शूलं खड्गं तथा चर्म गजश्रृङ्गं च दक्षिणे ॥
कपालं खेटकं घण्टां गजचर्मं च वामके ।
सुस्थितं वामपादं तु गजस्य मस्तकोपरि ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

उद्धृतं दक्षिणं पादं तिर्यगुत्कुटिकं भवेत् ।
एवं द्विविधरीत्या तु गजहामूर्तिरुच्यते ।।
स्कन्दोद्धृताप्युमादेवी शम्भोर्वामे भयान्विता ।

(ii) शिल्प०

गजहामूर्त्तिनं वक्ष्ये सर्वाभरणभूषितम् ।
पाशं च गजचर्मं च दक्षपार्श्वं करद्वये ।।
गजस्य शृङ्गं चर्मं च वामपार्श्वे करद्वये ।
शूलं डमरुकं पाशं गजचर्मं च दक्षिणे ।।
गजशृङ्गं कपालं च पाशं चर्म च वामतः ।
शम्भोर्वामे व्यवस्तात्तु गजमस्तकमेव हि ।।
मुकुटस्योपरिष्टात्तु गजपुच्छं प्रकल्पयेत् ।
पार्श्वयोर्गजपादं तु यथायुक्त्या तु कारयेत् ।।
प्रभामण्डलवच्छेषं गजचर्मं प्रकल्पयेत् ।
व्याघ्रचर्माम्बरोपेतं दुकूलवसनान्वितम् ।।
सर्वाभरणसंयुक्तमरिक्तप्रभान्वितम् ।
सुस्थितं वामपादं तु गजवीरस्य मस्तके ।।
उद्धृतं दक्षिणं पादं कक्षसूत्रान्तमाचरेत् ।।
गौरी स्कन्दं समुद्धृत्य शम्भोर्वामे भयान्विता ।।
अथवा शूलखड्गौ च गजदन्तं च चर्म च ।
दक्षिणे वामतः कुर्यात् कपालं खेटकं पुनः ।।
घण्टां च गजचर्मं च करैरिति ··· ··· ···वामतः ।

कालारिमूर्तिः
(i) अ० आ०

अथ वक्ष्ये विशेषेण कालहामूर्तिलक्षणम् ।
देवस्य दक्षिणं पादं पद्मपीठोपरिस्थितम् ।।
प्रथमनृत्तमूर्तेस्तु दक्षिणस्थितपादवत् ।
वामपादं तदुद्धृत्य कुञ्चितं तलमुद्धृतम् ।।
अंगुष्ठमुद्धृताङ्घ्रेस्तु कालस्य हृदये न्यसेत ।
दंष्ट्रास्यं च त्रिनेत्रं च जटामकुटमण्डितम् ।।
चतुर्भुजसमायुक्तमष्टहस्तमथापि वा ।
दक्षिणे पूर्वहस्तं तु शूलं कर्णान्तमुद्धृतम् ।।
दक्षिणे परहस्तं तु परशुं वरदं तथा ।
वामे पूर्वकरं नाभिसीमान्तं सूच्यधोमुखम् ।।
वामे त्वपरहस्तं तु विस्मयं परिकल्पयेत् ।
हिक्कासूत्रसमं टङ्ककरं त्वभ्यन्तरं मुखम् ।।
उष्णीषान्तं समुद्धृत्य विस्मयेऽनामिकाग्रकम् ।
कर्णान्तं मणिबन्धान्तं शूलहस्तसमान्तकम् ।।
चतुर्दोर्ष्णेवमाख्यातमष्टहस्तमथ शृणु ।
शूलं परशुं वज्रं च खड्गं दक्षिणहस्तके ।।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विस्मयं खेटकं पाशं सूचीहस्तं तु वामके ।
विद्रुमस्य निभाकारं सर्वाभरणभूषितम् ॥
कालहामूर्तिमाख्यातमधस्तात्काल उच्यते ।
द्विभुजं च द्विपादं च सदंष्ट्रं पाशपाणिनम् ॥
करण्डमकुटोपेतमसृग्धाराविकीर्णितम् ।
महाभयसमायुक्तं सपाशहृदयाञ्जलिम् ॥
विकीर्णपादं मां दृष्ट्वा शाययेदूर्ध्ववक्त्रकम् ।
कालहामूर्तिमेवं तु प्रोक्तं लिङ्गोद्भवं ततः ॥

(ii) उ० कामि० कुञ्चितासव्यपादस्तु व्याघ्रचर्माम्बरान्वितः ।
ततोद्धृतसदक्षाङ्घ्रिस्तीक्ष्णदंष्ट्रोग्रनासिकः ॥
दक्षहस्तस्थशूलो वा वामहस्तस्थसूचिकः ।
दक्षहस्तस्थपरशुर्नागपाशोऽथवा मृगः ॥
कटाक्षदृष्टिर्देवस्य कालदेहव्यवस्थितः ।
शूलं ह्यधोमुखं प्रोक्तं कालकु (ग?) ण्डस्थमेव वा ॥
कालं तु पतितं कुर्यात्त (दु?) त्प्लुताक्षं तु मूर्च्छितम् ।
मुद्गरं र (उग्दिरद्र?) क्तवस्त्रं च तथा लोहितमूर्धजम् ॥
शूलपाशकरं चैव विकीर्णचरणान्वितम् ।
दंष्ट्राकरालवदनं रक्तभ्रूरक्तलोचनम् ॥
देवस्थ (स्य?) नाभिमानेन नवतालेन कारयेत् ।
कृताञ्जलिपुटं वापि कारयेत्कालमादरात् ॥
अथवाथ हराल्लिङ्गान्निर्गतात्पतितं नयेत् ।
कालान्त (लं तं?) लिङ्गमानाद्यं लिङ्गोद्भूतोक्तवन्नयेत् ॥
त्रिभङ्गेन स्थितश्चान्योऽधोमुखो भस्मविग्रहः ।
बद्धपुष्पाञ्जलिः पार्श्वे मार्कण्डेयः स्थितो वरः ॥
कर्तव्यः कालतो भू (भी?) तस्सन्तुष्टो न हरेण तु ।
मार्कण्डेयेन मानेन युक्तो वा वर्जितस्तु वा ॥
अपस्मारशरीरस्थ—चरणेन युतो न वा ।
कालारिरेवमाख्यातो मन्मथान्तक उच्यते ॥

(iii) सु० आ० दक्षिणे तु करे शूलं वामे सूच्यङ्गुलि स्मृतम् ।
पादं कालस्य हृदये न्यस्त्वैवं (स्यैवं?) पादसंस्थितम् ॥
कालनाशमिदं प्रोक्तं लिङ्गोत्पत्तिमतः परम् ।

(iv) पू० कार० चतुर्भुजं त्रिनेत्रं च जटामकुटसंयुतम् ।
उद्धृतं दक्षिणं पादं वामपादं तु कुञ्चितम् ॥
व्याघ्रचर्माम्बरोपेतं तीक्ष्णनासोग्रदंष्ट्रकम् ।
दक्षिणे तु करे शूलं सूचिहस्तं तु वामके ॥
परशुं दक्षिणे हस्ते नागपाशं तु वामके ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अधोमुखं भवेच्छूलं दृष्टिर्वै कालदेहके ।।
अपरे तु द्विहस्तौ तु कटकाविति कीर्तितौ ।
दोस्समं कटकाग्रं तु द्व्यन्तरं तु यवं भवेत् ।।

(v) शिल्प०

कालारिं कारयेदीशं नताङ्गं वामतो मनाक् ।
सुस्थितं दक्षिणं पादं पद्मपीठेऽन्यमङ्घ्रिकम् ।।
दक्षिणे पूर्वहस्ते तु शूलं कर्णान्तमुद्धृतम् ।
दक्षिणे परहस्ते तु परशुं वरदं तु वा ।।
वामे पूर्वकरं नाभिसूत्रान्ते सूचिमाचरेत् ।
वामे तु परहस्ते तु विस्मयं परिकल्पयेत् ।।
उष्णीषान्तं समुद्धृत्य विस्मयेऽनामिकाग्रकम् ।
शूलं परशुवज्रौ च खड्गं दक्षिणहस्तके ।।
विस्मयं खेटकं पाशं सूचीहस्तं च वामके ।
शुद्धविद्रुमसङ्काशं सर्वाभरणसंयुतम् ।।
अधस्तात् कारयेत्कालं द्विभुजं पाशहस्तकम् ।
करण्डमकुटोपेतं सदंष्ट्रं विकृतानननम् ।।
असृग्धारासमायुक्तं महाभयसमन्वितम् ।
हृदयाञ्जलिसंयुक्तं विकीर्णाङ्घ्रिद्वयं पुनः ।।

त्रिपुरान्तकः
अ० पृ० २१३

एकवक्त्रं दशभुजं नृत्यन्तं त्रिपुरान्तकम् ।
सिंहचर्मपरीधानं मृगचर्मोत्तरीयकम् ।।
रक्ताम्बरधरं देवं सूर्यकोटिसमप्रभम् ।
कपालमालाभरणं शशाङ्ककृतशेखरम् ।।
खट्वाङ्गखेटकधरं धृतखड्गकपालकम् ।
त्रिशूलादिन कण्ठा च शरशार्ङ्गविधारिणम् ।।
पाशाङ्कुशधरं देवं कुण्डलाभ्यामलङ्कृतम् ।
हरं संस्थाप्य नृत्यन्तं वलयाकारसंस्थितम् ।।

त्रिपुरान्तकमूर्त्यष्टकम्

प्रथमा
(i) अ० आ०

त्रिपुरान्तकमूर्तेस्तु लक्षणं वक्ष्यतेऽधुना ।
दक्षिणं सुस्थितं पादं वामपादं तु कुञ्चितम् ।।
दक्षिणे पूर्वहस्तोर्ध्वे नाभिसूत्रावसानकम् ।
सिंहकर्णं तु तद्धस्तं बाणमध्यं तु पीडितम् ।।
बाणायामं तु तत्सप्तत्यङ्गुलं तु विधीयते ।
कनिष्ठिकापरीणाहं देवेशस्य करस्य तु ।।
वामहस्ते धनुर्धृत्वा कक्षान्तं तत्करोर्ध्वकम् ।
पूर्णमुष्टिस्तु नाहं स्यान्मध्यादग्रौ क्रमात्कृशौ ।।
अग्रमर्धाङ्गुलव्यासं वृत्तं वर्णैर्विचित्रितम् ।
बाणनाहत्रिभागैकं रज्जुनाहं तु तन्तुना ।।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

धनोर्दीर्घाष्टभागे तु सप्तांशं रज्जुदीर्वक्रम् ।
तद्दीर्घस्यानुकूलं तु धनोर्वक्रमुदाहृतम् ॥
त्रिवक्रसहितं वाथ बालचन्द्राभमेव वा ।
धनुराकृतिरेवं स्यात् दारुजं लोहजं तु वा ॥
कर्तरी परहस्तौ तु टङ्ककृऽगमृगान्वितौ ।
गङ्कं (टंक?) दक्षिणहस्ते तु वामहस्ते मृगं धृतम् ॥
जटामकुटसंयुक्तं सर्वाभरणभूषितम् ।
प्रवालसदृशप्रख्यं वामे गौरीसमायुतम् ॥
त्रिपुरान्तकमूर्तेस्तु प्रथमं लक्षणं त्विदम् ।

(ii) उ० कामि०

पुरारिस्थापनं वक्ष्ये तदादौ लक्षणं च वै ।
चतुर्भुजस्त्रिनेत्रश्च जटामकुटसंयुतः ॥
समभाग (भङ्ग?) युतस्सम्यक् स्थापकेन समन्वितः ।
सव्यकर्णस्थमकरकुण्डलेन समन्वितः ।
कृष्णापरशुसंयुक्तपरहस्तद्वयान्वितः ।
धनुर्बाणयुतोपेतवामेतरकरान्वितः ॥
परहस्तोज्झितो वाथ द्विहस्तत्रिपुरान्तकः ।
कुर्यात्सलक्षणं वाथ वामभागे तु पार्वतीम् ॥
एवं कृत्वा पुरारिं तु प्रतिष्ठां कारयेत्तथा ।

(iii) पू० कार०

चतुर्भुजं त्रिनेत्रं च जटामकुटसंयुतम् ।
सर्वाभरणसंयुक्तं दिव्याम्बरसमायुतम् ॥
पत्रं तु वामकर्णे तु दक्षिणे कुण्डलान्वितम् ।
धनुर्बाणसमायुक्तं कृष्णापरशुसंयुतम् ।
उपवीतसमायुक्तं सभङ्गस्थानकं कुरु ।
वृषवाहनवच्छेषं कारयेत्तु विचक्षणः ॥

(iv) सु० आ०

धनुर्बाणसमायुक्तं कृष्णापरशुधारिणम् ।
उमया सहितं देवं कृत्वा तत् त्रिपुरान्तकम् ॥

(v) शिल्प०

अथाष्टधा प्रवक्ष्यामि त्रिपुरान्तकमूर्तिनम् ।
दक्षिणं सुस्थितं पादं वामपादं तु कुञ्चितम् ॥
दक्षिणे पूर्वहस्तं तु नाभिसूत्रावसानके ।
सिंहकर्णं तु तद्धस्तं बाणमध्यनिपीडितम् ॥
वामहस्ते धनुर्धृत्वा कक्षान्तोर्ध्वं समुद्धृते ।
कर्तरी परहस्तौ द्वौ टङ्ककृष्णमृगस्थितौ (गान्वितौ?) ।
टङ्कं तु दक्षिणे वामे कृष्णसारङ्गमेव हि ।
जटामकुटसंयुक्तं सर्वाभरणभूषितम् ॥
प्रवालसदृशप्रख्यं वामे गौरीसमायुतम् ।
इदं प्रथममाख्यातं द्वितीयं तु तत परम् ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

द्वितीया	तदेव वामपादं तु अपस्मारोपरि स्थितम् ।
(i) अ० आ०	शेषं प्रागिव कर्तव्यं द्वितीयं लक्षणं भवेत् ॥
(i) शिल्प०	तदेव वामपादं तदपस्मारोपरि स्थितम् ।
	शेषं प्रथमतुल्यं हि तृतीयमथ वक्ष्यते ॥
तृतीया	सुस्थितं वामपादं तु दक्षिणं कुञ्चितं भवेत् ।
(i) अ० आ०	शेषं प्रागिव कर्तव्यं सूत्रं त्वितरपार्श्वगम् ॥
	तृतीयं लक्षणं प्रोक्तं चतुर्थं लक्षणं शृणु ।
(ii) शिल्प०	सुस्थितं वामपादं तु दक्षिणं कुञ्चितं भवेत् ।
	शेषं प्रागिव कर्त्तव्यं चतुर्थं तु ततः परम् ॥
चतुर्थी	तदेव वामपादं तु अपस्मारोपरि स्थितम् ।
(i) अ० आ०	प्रागिवैव विशेषं तु चतुर्थं लक्षणं भवेत् ॥
(ii) शिल्प०	तदेव वामपादं तदपस्मारोपरि स्थितम् ।
पञ्चमी	तदेव पूर्वहस्तौ द्वौ कटकौ हृदि सीमगौ ।
(i) अ० आ०	वामदक्षिणहस्तौ द्वौ क्रमादूर्ध्वमधोमुखम् ॥
	बाणमूलधृतं सव्यं वामं बाणाग्रकं धृतम् ।
	परे तु दक्षिणे टङ्कं धनुस्तद्वामहस्तके ॥
	तद्धस्ते तु मृगं वाथ वामे गौरीसमायुतम् ।
	अपस्मारं विना पादं नतं प्रागिव सूत्रकम् ॥
	एवं चतुर्भुजोपेतं मूर्तिपञ्चविधं भवेत् ।
(ii) शिल्प०	तदेव पूर्वहस्तौ द्वौ कटकौ हृदि सीमगौ ॥
	वामं दक्षिणकं हस्तं क्रमादूर्ध्वमधोमुखम् ।
	बाणमूलधृतं सव्यं अन्यबाननोद्धृतम्? ॥
	परे दक्षिणके टङ्कं धनुषं वामहस्तके ।
	तद्धस्ते तु मृगं वाथ वामे गौरीसमायुतम् ॥
	अपस्मारं विना कार्यं पञ्चमं समुदाहृतम् ।
षष्ठी	अतिभङ्गनतोपेतमष्टहस्तसमन्वितम् ।
(i) अ० आ०	बाणं च परशुं खड्गं वज्रं वै दक्षिणे करे ॥
	धनुषं विस्मयं हस्तं खेटकं कटकं तु वा ।
	वामहस्ते समाख्यातं पूर्वसूत्रात्करान्तकम् ॥
	यथाशोभनतं तुङ्गं कल्पयेद् गौरिसंयुतम् ।
(ii) शिल्प०	षष्ठमिष्टं च बाणं च पाशं खड्गं च दक्षिणे ।
	धनुषं विस्मयं खेटं कुक्कुटं वामहस्तके ॥
	यथाशोभं तथा कुर्याद्वामे गौरीसमायुतम् ।
सप्तमी	षष्ठमं ह्येवमाख्यातं सप्तमं दशदोर्युतम् ।
(i) अ० आ०	बाणं चक्रं तथा शूलं टङ्कं वज्रं च दक्षिणे ॥
	धनुश्शङ्खं तथा सूची विस्मयं खेटकं तथा ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

(ii) शिल्प०

सप्तमे दक्षिणे बाणं चक्रं शूलं ततः परम् ।
टङ्कं वज्रं तथा वामे धनुषं सूचिविस्मये ॥
खेटान्द्र ... ...सर्वं पूर्ववदाचरेत् ।

अष्टमी

(i) अ० आ०

तदेव दक्षिणं जानु तलोपरि निधापयेत् ।
तत्पूर्वे वामपादं तु तलं न्यस्त्वा रथोपरि ॥
रथं तु मुकुलोपतं मुकुलं रज्जुना वृतम् ।
मुकुलाभ्यन्तरे ब्रह्मा चतुर्वक्त्रश्चतुर्भुजः ॥
तस्य दक्षिणहस्तौ द्वौ वेणुदण्डं कमण्डलुम् ।
कुण्डिका पद्मपाशं च वामहस्तद्वयोद्धृतम् ॥
रथस्य मुकुलाधस्ताद्वृषभं श्वेतवर्णकम् ।
रथं पवनमार्गेण कल्पयेत्कल्पवित्तमः ॥
त्रिपुरान्तकमाख्यातमष्टभेदं द्विजोत्तम ।
प्रवालसदृशं वर्णं सत्वराजसमिश्रितम् ॥
सर्वाभरणसंयुक्तमेकवक्त्रं त्रिनेत्रकम् ।
तस्य वामेऽप्युमादेवीं प्रागुक्तविधिना कुरु ॥
सामान्यलक्षणं वर्ण्यं त्रिपुरान्तकमूर्तिनः ।

(ii) शिल्प०

एवमेवाष्टमं कुर्याद्वसुधोपरि विन्यसेत् ।
दक्षिणाङ्घ्रेस्तथा जानु वामपादतलं पुनः ॥
पुरस्स्थितरथस्योर्ध्वे विन्यसेत्तु यथोचितम् ।
रथं तु मुकुलोपेतं मुकुलं रज्जुनावृतम् ॥
मुकुलाभ्यन्तरे ब्रह्मा चतुर्वक्त्रश्चतुर्भुजः ।
तस्य दक्षिणहस्तौ द्वौ वेणुदण्डं कमण्डलुम् ॥
कुण्डिकां पद्मपाशं च वामहस्तद्वयोद्धृतम् ।
रथस्य मुकुलाधस्ताद्वृषभं श्वेतवर्णकम् ॥

शरभेशः

उ० कामि०

शरभेशप्रतिष्ठां तु वक्ष्ये लक्षणपूर्विकाम् ।
पक्ष्याकारं सुवर्णाभं पक्षद्वयसमन्वितम् ॥
ऊर्ध्वपक्षसमायुक्तं रक्तनेत्रद्वयान्वितम् ।
पादैस्सिंहपदाकारैश्चतुर्भिश्च समन्वितम् ॥
सुतीक्ष्णनखसंयुक्तैरूर्ध्वस्थैर्वेदपादकैः ।
दिव्यलाङ्गूलसंयुक्तं सुविकीर्णजटान्वितम् ॥
कन्धरोर्ध्वनराकारं दिव्यमौलिसमायुतम् ।
सिंहास्य भीमदंष्ट्रं च भीमविक्रमसंयुतम् ॥
हरन्तं नरसिंहं तु जगत्संहरणोद्धृतम् ।
कृताञ्जलिपुटोपेतं निश्चेष्टितमहातनुम् ॥
नरदेहं तदूर्ध्वास्यं, विष्णुं पद्मदलेक्षणम् ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

पादाभ्यामम्बरस्थाभ्यां कुक्षिस्थाभ्यां च तस्य तु ॥
गगनाभिमुखं देवं कारयेच्छरभेश्वरम् ॥

शरभमूर्तिः
श्रीतत्व०

महामेरुसमाकारमष्टपादं रविप्रभम् ।
द्वात्रिंशत्बाहुसंयुक्तं सूर्यसोमाग्निलोचनम् ॥
दुर्गाकालद्विपक्षं च सुतीक्ष्णघनगर्जितम् ।
ऊर्ध्वकेशं महाबाहुं नानालङ्कारभूषितम् ॥
वज्रमुष्टचभयं चक्रं शक्तिं दण्डाङ्कुशौ तथा ।
खड्गखट्वाङ्गपरशूनक्षमालास्थिशूलकम् ॥
धनुश्च मुसलं चाग्निं दधानं दक्षिणैः करैः ।
वरदं पाशहस्तं च गदां बाणध्वजौ तथा ॥
ककचं क्रोडशङ्खौ च खेटं नागं च पङ्कजम् ।
कपालं पुस्तकं कुन्तं दुर्गाश्लिष्टकराम्बुजम् ॥
हलं वामे दधानं च भीषणं करपङ्कजैः ।
दंष्ट्रोल्लासं महासिंहजटाच्छटनिपीडितम् ॥

ब्रह्मशिरश्छेत्तृमूर्त्तिः
श्रीतत्व०

गौरवर्णं त्रिनेत्रं च जटामौलिविराजितम् ।
ताटङ्कं कुण्डलं सव्यवामश्रुत्योश्च बिभ्रतम् ॥
व्याघ्रचर्माम्बरधरं चतुर्भुजसमान्वितम् ।
वज्रं परशुर्रासं वामे ब्रह्मकरोटिकम् ॥
अपरे शूलहस्तं च शेषं पूर्वोक्तवत्कुरु ॥

भैरवमूर्तयः

स्वच्छन्दभैरवः
अ० पृ० २२६

स्वच्छन्दभैरवं वक्ष्ये आयुधानां तथा क्रमम् ।
गदापट्टिशपर्शू च शक्तिर्बाणो धनुस्तथा ॥
पुष्पाक्षसूत्रसर्पाश्च बीजपूरकमुद्गरौ ।
चषकं अर्धशतघ्नी कोशं डमरूमौशले ॥
शुचिस्तथा च खण्डेन्दुः पीयूषं दर्पणादिकम् ।
वामोर्ध्वक्रमेणैव गदाद्या दर्पणान्तगाः ॥
वरदं शशिनी खड्गश्चाङ्कुशं ज्ञानपुस्तकम् ।
चामरं पूर्णकलशं शूलं खट्वाङ्गमेव च ॥
न च चक्षुः? (अभयं च) विषं कुण्डी शङ्खं शूर्पश्च मोदकम् ।
मद्यपात्रं वस्रवजौ कमलं चक्रकीरके ॥
वरदाद्याः शुकान्ताश्च दक्षिणेषु प्रदक्षिणम् ।
योनिमुद्रासंयुक्तौ द्वौ करौ सकरमुद्रिकौ ॥
उपास्ते चाऽऽदिपुरुषं द्वौ भुजौ शिरसि स्थितौ ।
पञ्चास्यश्च त्रिनेत्रश्च शतार्धं भ्रामयन् करान् ॥
अर्धद्वयमृजुगतं बद्धपद्मासनद्वयम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स्वच्छन्दभैरवौ माने तालानां त्वेकविंशतिः ॥
ततस्तालांस्तु गुणयेद् द्वादशाङ्गुलकैस्तथा ।
तदङ्गुलप्रमाणेन द्विपञ्चाशच्छतद्वयम् ॥
प्रथमपङ्क्तौ नवास्यं जटायुक्तं द्वितालकम् ।
द्वितीयपङ्क्तौ तस्समा शिवयोनिः सदोदिता ॥
सप्तवक्त्राणि तस्योर्ध्वे तालमेकं द्विजोत्तम ।
शिरो विंशत्यङ्गुलकं ग्रीवा चाष्टाङ्गुला मता ॥
द्वात्रिंशंन्नाभिदेशस्तदधो गुह्यं तु विंशतिः ।
शून्यबाणा भवेज्जङ्घा गुल्फः पञ्चाङ्गुलस्तथा ॥
पञ्चाशच्चैव नलकः सप्ताङ्गुलस्तलोच्छ्रयः ।
ऊर्ध्वमानं तु कथितं तिर्यक् च शृणु सम्प्रति ॥
मुखं पूर्वोक्तमानेन द्वितालं चैव मध्यकम् ।
दशाङ्गुलं तनुबाह्ये बाहुः षोडश विस्तरे ॥
चतुर्दश तथा चाष्टौ क्रमतो बाहुविस्तरः ।
नानाविस्तरितं कार्यमष्टाविंशतिभिस्तथा ॥
सप्तवर्णाः कुशमानं कटिविस्तरतः शुभम् ।
द्वितालं जङ्घाविस्तारस्तन्मध्यं सार्धभागकम् ॥
कणिवध?तप्ताब्धौ च चतुर्विंशतिरङ्घ्रिकम् ।
तोणी?मात्रं तथाङ्गुष्ठं शेषाः सार्धाङ्गुला मता ॥
षोडशाङ्गुलमंसः स्याद्भुजसन्धिमुनिद्वयम् ।
द्वात्रिंशच्च पुनर्वाल्या चतुर्विंशतिकाग्रतः ॥
पूर्वोक्तन प्रमाणेन करं कुर्यात प्रयत्नतः ।
द्वात्रिंशल्लक्षणोपेतो रुद्रः स्वच्छन्दभैरवः ॥
पाशाङ्कुशधनुर्बाणाः शूलवज्रगदाभयम् ।
अष्टौ भैरवरूपाणि कुर्यादेव प्रदक्षिणम् ॥

भैरवः
वि० ध०

अथातो रूपनिर्माणं वक्ष्येऽहं भैरवस्य तु ।
लम्बोदरं तु कर्त्तव्यं वृत्तपिङ्गललोचनम् ।
दंष्ट्राकरालवदनं फुल्लनासापुटं तथा ।
कपालम (मा) लिनं रौद्रं सर्वतस्सर्पभूषणम् ॥
व्यालेन त्रासयन्तं च देवीं पर्वतनन्दिनीम् ।
सजलाम्बुदसङ्काशं गजचर्मोतरच्छदम् ॥
बहुभिर्बाहुभिर्व्याप्तं सर्वायुधविभूषणम् ।
बृहत्सालप्रतीकाशैस्तथा तीक्ष्णनखैश्शुभैः ॥
साचीकृतमिदं रूपं भैरवस्य प्रकीर्तितम् ।
विकीर्णलोहितजटं त्रिनेत्रं रक्तविग्रहम् ।

वटुकभैरवः
(i) व० भै० क०

शूलं कपालं पाशं च डमरूं दधतं करैः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

नानारूपैः पिशाचैश्च नानारूपगणैर्वृतम् ।
श्वानारूढं च निर्वाणं वटुकं भैरवं भजे ॥

(ii) रूप० — खट्वाङ्गमांसपाशं च शूलं च दधतं करैः ।
डमरूं च कपालं च वरदं भुजगं तथा ॥
आत्मवर्णसमोपेतसारमेय - समन्वितम् ।
ध्यात्वा जपेत्सुसंहृष्टः सर्वान्कामानवाप्नुयात् ॥

स्वर्णाकर्षणभैरवः
श्रीतत्व० — पीतवर्णं चतुर्बाहुं त्रिनेत्रं पीतवाससम् ।
अक्षय्यस्वर्णमाणिक्यगणपूरितपात्रकम् ॥
अंसाहितमहाशूलचामरं तोमरोद्वहम् ।
सन्ततं चिन्तयेद्भक्त्या भैरवं सर्वसिद्धिदम् ॥
नानाभरणशोभाढ्यमानन्दसुखरूपिणम् ।
मदोन्मत्तं सदानन्दं सर्वदेवनमस्कृतम् ॥
एवं ध्यायेच्च मन्त्रज्ञः स्वर्णाकर्षणभैरवम् ।

अष्टाष्टभैरवाः
श्रीतत्व० — इतः परं प्रवक्ष्यामि श्रृणु राजन्नशेषतः ।
अष्टाष्टकमिदं पुण्यं भैरवाणामभीष्टदम् ॥
पूर्ववद्वर्णतो ध्याने ध्येयं सर्वैः पृथक्-पृथक् ।

प्रथमाष्टकम् — आद्याष्टकं सुवर्णाभं त्रिशूलं डमरुं तथा ।
पाशं चासिं दधानं च ध्यायेत्सर्वाङ्गसुन्दरम् ॥

द्वितीयाष्टकम् — अथ द्वितीयकं ध्यायेदक्षमालामथाङ्कुशम् ।
दधानं पुस्तकं वीणां सुखेतमणिभूषणम् ॥

तृतीयाष्टकम् — ज्वालां शक्तिं गदां कुन्तं दधानं नीलवर्णकम् ।
ध्यायेत्तृतीयं शुभदमष्टकं शुभलक्षणम् ॥

चतुर्थाष्टकम् — खड्गं खेटं पट्टिसं च दधानं परशुं तथा ।
धूम्रवर्णमभिप्रेतं ध्यायेदष्टमादरात् ॥

पंचमाष्टकम् — कुन्तं खेटं च परिघं भिण्डिपालं तथैव च ।
पञ्चमाष्टकमेतद्धि श्वेतं स्यात्सुमनोहरम् ॥

षष्ठसप्तमाष्टमाष्टकानि — पीतष्षष्ठमृषीरक्तमष्टमं च तटित्प्रभम् ।
कुन्तादिकं समं प्रोक्तं षडारभ्याष्टमान्तकम् ॥

अष्टाष्ट-भैरवनामानि — असिताङ्गो विशालाक्षो मार्तण्डो मोदकप्रियः ।
स्वच्छन्दो विघ्नसन्तुष्टः खेचरः सचराचरः ॥
रुरुश्च क्रोडदंष्ट्रश्च तथैव च जटाधरः ।
विश्वरूपो विरूपाक्षो नानारूपधरः परः ॥
वज्रहस्तो महाकायश्चण्डश्च प्रलयान्तकः ।
भूमिकम्पो नीलकण्ठो विष्णुश्च कुलपालकः ॥
मुण्डपालः कामपालः क्रोधो वै पिङ्गलेक्षणः ।
अभ्ररूपो धरापालः कुटिलो मन्त्रनायकः ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

रुद्रः पितामहाख्यश्चाप्युन्मत्तो वटुनायकः ।
शङ्करो भूतवेतालत्रिणेत्रस्त्रिपुरान्तकः ॥
वरदः पर्वतावासः कपालः शशिभूषणः ।
हस्तिचर्माम्बरधरो योगीशो ब्रह्मराक्षसः ॥
सर्वज्ञः सर्वदेवेशः सर्वभूतहृदिस्थितः ।
भीषणाख्यो भयहरः सर्वज्ञाख्यस्तथैव च ॥
कालाग्निश्च महारौद्रो दक्षिणो मुखरोऽस्थिरः ।
संहारश्चातिरिक्ताङ्गः कालाग्निश्च प्रियङ्करः ॥
घोरनादो विशालाक्षो योगीशो दक्षसंस्थितः ।

अन्यसंहारमूर्तयः

वीरभद्रमूर्तिः
(i) शीतत्व०

चतुर्भुजं त्रिणेत्रं च जटामकुटसंयुतम् ।
दक्षिणे खड्गबाणौ च वामे चापं गदां धरम् ॥
दंष्ट्राकरालवदनं भीमं भैरवगर्जितम् ।
रुण्डमालासमायुक्तं पादुकोपरि सुस्थितम् ॥
भद्रकालीसमायुक्तं करालं हृदि विन्यसेत् ।

दक्षब्रह्मस्वरूपम्
"

वीरस्य दक्षभागे तु दक्षब्राह्मणमास्थितम् ।
अजवक्त्रं द्विनयनं शृङ्गद्वयविभूषितम् ॥
नमस्काराञ्जलिं विप्रं शिवध्यानपरायणम् ।

(ii) उ० कामि०

अथ वक्ष्ये विशेषेण वीरभद्रेश्वरं शृणु ।
महापातकदोषघ्नं सर्वपीडानिवारणम् ॥
वीरभद्रमितिख्यातं दक्षयज्ञहरं परम् ।
चतुर्भुजं त्रिनेत्रं च ज्वालाकेशं सुदंष्ट्रिणम् ॥
घण्टामालाधरं घोरं शिरोमालाविभूषितम् ।
बृश्चिकाभरणं चैव नागयज्ञोपवीतिनम् ॥
नूपुरं विमलं तद्वत्पादौ पादुकभूषितौ ।
नीलकण्ठं च त्र्यक्षं च उरुकञ्चुकसंयुतम् ॥
खड्गखेटधनुर्बाणं कपालं भिण्डिपालकम् ।
रक्तवर्णसमायुक्तमुग्रदृष्टिभयङ्करम् ॥
एवं ध्यात्वा विशेषेण प्रतिष्ठां धारयेत्ततः ।

जलन्धरहरमूर्तिः
श्रीतत्व०

रक्ताभमुग्रनयनं द्विभुजं च त्रिनेत्रकम् ।
उपवीतसमायुतं सर्वालङ्कारशोभितम् ॥
पादयोः पदुकायुक्तं किञ्चिद्वै गमनोन्मुखम् ।
दक्षहस्ते स्थिते छत्रं वामे पूर्णकमण्डलुम् ॥
सुविकीर्णजटाभारं गङ्गाचन्द्रसमन्वितम् ।
कर्णकुण्डलसंयुक्तमं हारनूपुरसंयुतम् ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

द्विभुजं च त्रिनेत्रं च किरीटकटकान्वितम् ।
सर्वालङ्कारसंयुक्तं कक्षे खड्गसमन्वितम् ॥
कृताञ्जलिपुटोपेतहस्ते चक्रं दधं परम् ।

मल्लारिशिवः
य० म०

मुकुटमणिमयूखप्रोज्झिताशेषरत्नं
विमलशशिकलाङ्गं सुन्दरेन्दीवराक्षम् ।
अनुकृतशशितेजः कुण्डलं चारुहासं
प्रकटदशनशोभानिर्जितानेकहीरम् ॥
अभिनवमणिमुक्ताहारचाम्पेयमाला—
विविधकुसुमगुच्छैः शोभिवक्षस्थलाढ्यम् ।
सफणपवनभुग्दोर्दण्डभूषाभिरामं
करडमरुनिनादैः पूरितद्योखगर्भम् ॥
त्रिभुवनभवनेशं पीतकौशेयवासं
दनुजदहनदक्षं प्रस्फुरत्खड्गहस्तकम् ।
भुजगफणसुगुप्तैर्भूषणैर्न्यस्तभूषं
प्रणतसुरकिरीटव्याप्तपादारविन्दम् ॥
सितहयवरपत्रं हारसंभूषिताङ्गं
परिवृतमतिघोरैः सप्तभिस्सारमेयैः ।
कनकगिरिसमाभं नैशचूर्णाभिरामं
सकलनिगमगुह्यं नौमि मल्लारिदेवम् ॥

अष्टभुजाघोरमूर्तिः
उ० कार०

अथ वक्ष्ये विशेषेण सर्वलोकैकपावनम् ।
सर्वयुद्धजयं चैव ब्रह्महत्यादिनाशनम् ॥
महापातकदोषघ्नं गुरुद्रोहनिवारणम् ।
शिवद्रव्यापहारं च उपपातकनाशनम् ॥
सर्वैश्वर्याभिवृद्ध्यर्थं परमोक्षनिरासनम् ।
अघोरास्त्रेश्वरं भीमं स्थापनं वक्ष्यते श्रुणु ॥
त्रिनेत्राष्टभुजं भीममुग्रदंष्ट्राकरालकम् ।
कालमेघसमं घोरं रक्तवस्त्रसमन्वितम् ॥
ज्वालाकेशसमायुक्तं कृशानुनयनैर्युतम् ।
अर्धचन्द्राकृतिं भस्म ललाटोपरिशोभितम् ॥
भुजाभ्यां त्रिशिखा तिर्यक् वेतालं खड्गमेव च ।
डमरूं च कपालं च खेटकं खड्गमेव च ॥
रक्तवस्त्राम्बरोपेतं रक्तपुष्पसमन्वितम् ।
रक्ताभरणसंयुक्तं खड्गमालाविभूषितम् ॥
शिरोमालाविभूष्यं च नागयज्ञोपवीतिनम् ।
वृश्चिकाभरणं कण्ठे कालाग्निसदृशप्रभम् ॥
एवं ध्यात्वा महाघोरं द्वात्रिंशल्लक्षणान्वितम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पद्मपीठोपरिस्थं च समीपे वृषभं तथा ॥
एवं संकल्प्य विधिवत् प्रतिष्ठां कारयेत्ततः ।

दशभुजाघोरमूर्तिः
(i) पाञ्च०

परशुं डमरूं खड्गखेटौ बाणशरासने ।
शूलं कपालमभयवरौ दधतमिष्टदम् ॥
त्रिलोचनं भीषणास्यं नीलाङ्गं रक्तवाससम् ।
अहिभूषितसर्वाङ्गं तमघोरमुपास्महे ॥

(ii) ललितोपा०

महाकालो घनश्यामः काल्यालिङ्गितविग्रहः ।
श्यामकञ्चुकधारी च मदारुणविलोचनः ॥
ब्रह्माण्ड - चषके पूर्णं पिबन्विश्वरसासवम् ।
महाकालीं घनश्यामामनङ्गाद्रामिपाङ्गयन् ॥
सिंहासने समासीनः कल्याणकलनात्मके ।
कालमृत्युमुखैर्युक्तस्सर्वलोकैकभक्षकः ॥
ललिताध्यानसम्पन्नो ललितापूजनोत्सुकः ।
वितन्वन्ललिताभक्तेष्वायुषो दीर्घदीर्घताम् ॥

द्वात्रिंशद्भुजाघोरमूर्तिः
शिवतत्त्वर०

एकवक्त्रं सदानन्दं द्वात्रिंशद्भुजसंयुतम् ।
जटामकुटसंयुक्तं त्रिनेत्रं चन्द्रशेखरम् ॥
अभयं खड्गशूलं च चक्रं डमरुकं तथा ।
दधानमस्थिबाणौ च गदां पद्मं कपालकम् ॥
ज्ञानमुद्रां कुन्तहस्तमङ्कुशं चाक्षमालिकाम् ।
खट्वाङ्गं परशुं चैव दधानं दक्षिणैः करैः ॥
वरं च फलकं चैव टङ्कं पाशं च मुद्गरम् ।
नागमग्निं मृगं घण्टां धनुश्च कटिहस्तकम् ॥
रत्नं च कुमुदं कुम्भं मुसलं पुस्तकं तथा ।
एतदायुध—संयुक्तं रुण्डमाला—विभूषितम् ॥
कालमुण्डस्य शिरसि स्थितम् सर्वाभयप्रदम् ।

कङ्कालभिक्षाटनमूर्ती यथा

१. कङ्कालमूर्तिः
(i) अ० आ०

अथ कङ्कालमूर्तेस्तु लक्षणं वक्ष्यतेऽधुना ।
पादौ तु पादुकोपेतौ वामपादं तु सुस्थितम् ॥
गमनापेक्षया सव्यपादमीषत्समुद्धृतम् ।
शुद्धश्वेतनिभं वर्णं सर्वाभरणभूषितम् ॥
रक्तकञ्चुकबद्धाङ्गं जटामकुटमण्डितम् ।
धुर्धूरपुष्पनागं च वामे सव्येन्दुशेखरम् ॥
हसितं वक्त्रसन्धार्य्यं सुगेयगणसेवितम् ।
किञ्चित्प्रकाशितान्तस्स्थदशनांशुविलासितम् ॥
गेयशृङ्गाररसंयुक्तमास्यमेवं प्रकल्पयेत् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कर्णौ कुण्डलसंयुक्तौ वामे शङ्खदलं तु वा ।।
पूर्वहस्तद्वयोर्वामे ढक्काकसव्ये प्रहारकम् ।
दक्षिणं हरिणीवक्त्रे व्यापितं? सिंहकर्णवत् ।।
वामहस्ते तु पिञ्छं च कङ्कालास्थि च धारयेत् ।
तदस्थ्याकृति निर्मांसं द्विपादं द्विकरान्वितम् ।।
कृष्णश्यामनिभाकारमपाने दण्डवेशनम् ।
दण्डे कङ्कालपादौ द्वौ रज्जुना बन्धयेद्बुधः ।।
केतुकिङ्किणिनेत्राभ्यां निष्क्रान्तरुधिरं तु वा
एतत्कङ्कालनाम्ना तु वामस्कन्धोपरि न्यसेत् ।।
अनेकभूतैर्जायाभिस्सेवितं त्वादरान्वितैः ।
बलिपात्रधृतं भूतं वामेऽग्रे गमनान्वितम् ।।
दर्व्या त्वन्नं तु तत्पात्रे निश्चयाकृतिजायया ।
किञ्चित्प्रकाशितं योनिसंयुक्तानतवाससा ।।
सम्भ्रान्तमनसोपेता जायास्सर्वास्त्वनेकशः ।
व्याघ्रचर्माम्बरोपेतं दुकूलवसनान्वितम् ।।
दक्षिणे कटिपार्श्वे तु छुरिकां चैव बन्धयेत् ।
उभयोर्पार्श्वयोर्हस्तं नानानागविभूषितम् ।।
ऋषिभिर्देवगन्धर्वसिद्धविद्याधरादिभिः ।
हृदयेऽञ्जलिसंयुक्तैस्संभ्रान्तमनसान्वितैः ।।
आत्मानीतस्वमानान्तं सेवितं तैः सुपूजितम् ।
वीथीस्संमार्जयेद्वायुः पर्जन्यो जलसेचनम् ।।
पुष्पवृष्टिकृतो देवा ऋषयः स्तोत्रपाठकाः ।
ऋग्यजुस्सामाथर्वश्च स्तुति कुर्यात्पदेपदे ।।
चर्मबन्धं च कंसं च कदम्बं सुषिरं तथा ।
श ध्वनिसमायुक्तं पञ्चशब्दा महारवे ।।
तुम्बुरुनारदादेश्च गेयकर्म सलक्षणम् ।
छत्रं धृत्वा रविश्चन्द्रश्चामरान्दिव्ययोषितः ।।

(ii) उ० कामि०

पादे पादुकसंयुक्तं चतुर्दोर्भिस्समन्वितम् ।
सयज्ञसूत्रं शान्तं च गमनोन्मुखमीश्वरम् ।।
आबद्धक्षुरिकं सौम्यं कपर्दमुकुटोज्ज्वलम् ।
क्षौमाम्बरं सितं कुर्यात्सुन्दरं तं विभूषणम् ।।
सशङ्खपत्रिका वामे दक्षिणे नक्रकुण्डलम् ।
दक्षिणं कुञ्चितं पादं वामपादं तु सुस्थितम् ।।
सभङ्गयुतं वामे कान्तियुक्तनिजाङ्गकम् ।
प्रहरं दक्षिणे हस्ते ढक्कां वामे तु पूर्वयोः ।।
सव्यमध्याङ्गुलाग्रं तु कृष्णाजिह्वाग्रगं भवेत् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वामे करे परे पिञ्छदाडकं कालदण्डकम् ।।
उभयोर्दण्डयोर्मूलं स्कन्धमूलोपरि स्थितम् ।
नानागणसमायुक्तं नानाभूतसमाकुलम् ।।
स्वसव्ये भूतमूर्धस्थबलिपात्रेण संयुतम् ।
नानारूपधरैर्भूतैरनेकैः परिवारितम् ।।
भेरिकाकाहलाद्याढ्यैर्गाननृत्तरवाकुलैः ।
योषितश्चानवद्याङ्ग्यो मत्प्रेक्षावश्यमोहिताः ।।
स्रस्तभूषणवस्त्राद्या बलिदानसमुन्मुखाः ।
आशीर्वादान्विताः काश्चित् काश्चिदालिङ्गनोन्मुखाः ।।
योषितो देववक्षास्यस्तननाभ्यन्तसीमकाः ।

(iii) पू० कार०

चतुर्भुजं त्रिनेत्रं च कपर्दमकुटान्वितम् ।
पादे पादुकसंयुक्तं किञ्चिद्वै गमनोन्मुखम् ।।
सर्वाभरणसंयुक्तं यज्ञसूत्रोपशोभितम् ।
शङ्खं तु वामकर्णे तु दक्षिणेन च कुण्डलम् ।।
क्षौमवस्त्रधरं कुर्याद्दक्षिणे क्षुरिकायुधम् ।
डमरुं वामहस्ते तु प्रहरं दक्षिणे करे ।।
कङ्कालदण्डमूलं तु पिञ्छदण्डस्य मूलकम् ।
वामे त्वपरहस्तेन सङ्गृहीतं तु कल्पयेत् ।।
उभयोर्दण्डकाग्रं तु अंसकोपरि विन्यसेत् ।
कृष्णामुखगतं हस्तं दक्षिणेऽपरहस्तकम् ।।
नानानागसमायुक्तं किंचित्प्रहसिताननम् ।
बलिपात्रधरं भूतदेवं वामे तु कारयेत् ।।
भिक्षादानोन्मुखस्त्रीभिर्मोहिताभिस्समाकुलम् ।
नानाभूतसमायुक्तं नानालीलासमन्वितम् ।।
ढक्कासंयुक्तहस्तं तु वरदं चेति कीर्तितम् ।
हरिणीजिह्वया हस्तस्याग्रमालेपितं कुरु ।।
कङ्कालधारिणं हस्तं कटकं चेति कीर्तितम् ।
कक्षतुल्यं तु तस्याग्रं यमं दोर्मणिबन्धयोः ।।
बिम्बस्य त्रिमुखं वापि सार्धत्रिमुखमेव वा ।।
कारयेद्भूतरूपाणि पञ्चतालेन बुद्धिमान् ।।
देवस्तनसमोच्चं वा कक्षोच्चं वा विशेषतः ।
नारीस्संकल्पयेद्धीमानुभयोः पार्श्वयोरपि ।।

(iv) शिल्प०

कङ्कालमूर्तिनं वक्ष्ये पादयोः पादुकान्वितम् ।
सुस्थितं वामपादं तु गमनापेक्षयापरम् ।।
पादमीषत्समुद्धृत्य करोत्वधिकसुन्दरम् ।
शुद्धश्वेतनिभं चारु सर्वाभरणभूषितम् ।।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कर्णौ कुण्डलसंयुक्तौ वामे शङ्खदलं तु वा ॥
पूर्वहस्तद्वयोर्वामे ढक्काकसव्ये प्रहारकम् ।
दक्षिणं हरिणीवक्त्रे व्यापितं? सिंहकर्णवत् ॥
वामहस्ते तु पिञ्छं च कङ्कालास्थि च धारयेत् ।
तदस्थ्याकृति निर्मांसं द्विपादं द्विकरान्वितम् ॥
कृष्णश्यामनिभाकारमपाने दण्डवेशनम् ।
दण्डे कङ्कालपादौ द्वौ रज्जुना बन्धयेद्बुधः ॥
केतुकिङ्किणिनेत्राभ्यां निष्क्रान्तरुधिरं तु वा
एतत्कङ्कालनाम्ना तु वामस्कन्धोपरि न्यसेत् ॥
अनेकभूतैर्जायाभिस्सेवितं त्वादरान्वितैः ।
बलिपात्रधृतं भूतं वामेऽग्रे गमनान्वितम् ॥
दर्व्या त्वन्नं तु तत्पात्रे निधायाकृतिजायया ।
किञ्चित्प्रकाशितं योनिसंयुक्तानतवाससा ॥
सम्भ्रान्तमनसोपेता जायास्सर्वास्त्वनेकशः ।
व्याघ्रचर्माम्बरोपेतं दुकूलवसनान्वितम् ॥
दक्षिणे कटिपार्श्वे तु छुरिकां चैव बन्धयेत् ।
उभयोर्पार्श्वयोर्हस्तं नानानागविभूषितम् ॥
ऋषिभिर्देवगन्धर्वसिद्धविद्याधारादिभिः ।
हृदयेऽञ्जलिसंयुक्तैस्संभ्रान्तमनसान्वितैः ॥
आत्मानीतस्वमानान्तं सेवितं तैः सुपूजितम् ।
वीथीस्संमार्जयेद्वायुः पर्जन्यो जलसेचनम् ॥
पुष्पवृष्टिकृतो देवा ऋषयः स्तोत्रपाठकाः ।
ऋग्यजुस्सामाथर्वश्च स्तुतिं कुर्यात्पदेपदे ॥
चर्मबन्धं च कंसं च कदम्बं सुषिरं तथा ।
श ध्वनिसमायुक्तं पञ्चशब्दा महारवे ॥
तुम्बुरुनारदादेश्च गेयकर्म सलक्षणम् ।
छत्रं धृत्वा रविश्चन्द्रश्चामरान्दिव्ययोषितः ॥
(ii) उ० कामि० पादे पादुकसंयुक्तं चतुर्दोर्भिस्समन्वितम् ।
सयज्ञसूत्रं शान्तं च गमनोन्मुखमीश्वरम् ॥
आबद्धक्षुरिकं सौम्यं कपर्दमुकुटोज्ज्वलम् ।
क्षौमाम्बरं सितं कुर्यात्सुन्दरं तं विभूषणम् ॥
सशङ्खपत्रिका वामे दक्षिणे नक्रकुण्डलम् ।
दक्षिणं कुञ्चितं पादं वामपादं तु सुस्थितम् ॥
सभङ्गयुतं वागि कान्तियुक्तनिजाङ्गकम् ।
प्रहरं दक्षिणे हस्ते ढक्कां वामे तु पूर्वयोः ॥
सव्यमध्याङ्गुलाग्रं तु कृष्णाजिह्वाग्रगं भवेत् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वामे करे परे पिञ्छदाडकं कालदण्डकम् ।
उभयोर्दण्डयोर्मूलं स्कन्धमूलोपरि स्थितम् ।
नानागणसमायुक्तं नानाभूतसमाकुलम् ॥
स्वसव्ये भूतमूर्धस्थबलिपात्रेण संयुतम् ।
नानारूपधरैर्भूतैरनेकै:परिवारितम् ॥
भेरिकाकाहलाद्याढ्यैर्गानिनृत्तरवाकुलैः ।
योषितश्चानवद्याङ्ग्यो मत्प्रेक्षावश्यमोहिताः ॥
स्रस्तभूषणवस्त्राद्या बलिदानसमुन्मुखाः ।
आशीर्वादान्विताः काश्चित् काश्चिदालिङ्गनोन्मुखाः ॥
योषितो देववक्षास्यस्तननाभ्यन्तसीमकाः ।

(iii) पू० कार० चतुर्भुजं त्रिनेत्रं च कपर्दमकुटान्वितम् ।
पादे पादुकसंयुक्तं किञ्चिद्वै गमनोन्मुखम् ॥
सर्वाभरणसंयुक्तं यज्ञसूत्रोपशोभितम् ।
शङ्खं तु वामकर्णे तु दक्षिणेन च कुण्डलम् ॥
क्षौमवस्त्रधरं कुर्याद्दक्षिणे क्षुरिकायुधम् ।
डमरूं वामहस्ते तु प्रहरं दक्षिणे करे ॥
कङ्कालदण्डमूलं तु पिञ्छदण्डस्य मूलकम् ।
वामे त्वपरहस्तेन सङ्गृहीतं तु कल्पयेत् ॥
उभयोर्दण्डकाग्रं तु अंसकोपरि विन्यसेत् ।
कृष्णामुखगतं हस्तं दक्षिणेऽपरहस्तकम् ॥
नानानागसमायुक्तं किंचित्प्रहसिताननम् ।
बलिपात्रधरं भूतदेवं वामे तु कारयेत् ॥
भिक्षादानोन्मुखस्त्रीभिर्मोहिताभिस्समाकुलम् ।
नानाभूतसमायुक्तं नानालीलासमन्वितम् ॥
ढक्कासंयुक्तहस्तं तु वरदं चेति कीर्तितम् ।
हरिणीजिह्वया हस्तस्याग्रमालेपितं कुरु ॥
कङ्कालधारिणं हस्तं कटकं चेति कीर्तितम् ।
कक्षतुल्यं तु तस्याग्रं यमं दोर्मणिबन्धयोः ॥
बिम्बस्य त्रिमुखं वापि सार्धत्रिमुखमेव वा ॥
कारयेद्भू तरूपाणि पञ्चतालेन बुद्धिमान् ॥
देवस्तनसमोच्चं वा कक्षोच्चं वा विशेषतः ।
नारीस्संकल्पयेद्धीमानुभयोः पार्श्वयोरपि ॥

(iv) शिल्प० कङ्कालमूर्तिनं वक्ष्ये पादयोः पादुकान्वितम् ।
सुस्थितं वामपादं तु गमनापेक्षयापरम् ॥
पादमीषत्समुद्धृत्य करोत्वधिकसुन्दरम् ।
शुद्धश्वेतनिभं चारु सर्वाभरणभूषितम् ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

रत्नकञ्चुकबद्धाङ्गं जटामकुटमण्डितम् ।
धुर्धूरपुष्पं नागं च वामे दक्षेन्दुशेखरम् ॥
किंचित्प्रकाशितान्तस्थदशनांशुविराजितम् ।
दक्षिणं हरिणीवक्त्रे व्यापितं सिंहकर्णवत् ॥
वामहस्ते च दण्डं तु कङ्कालास्थि च धारयेत् ।
तदस्थ्यकृतिनिर्मांसं द्विपादं द्विकरान्वितम् ॥
कृष्णश्यामनिभाकारमपाने दण्डवेशनम् ।
दण्डे कङ्कालपादौ द्वौ रज्जुना बन्धयेद्बुधः ॥
केतुदण्डेन नेत्राभ्यां निष्क्रान्तं रुधिरं तु वा ।
एवं कङ्कालदण्डं तु वामस्कन्धोपरि न्यसेत् ॥
बलिपात्रधृतं भूतं वामेऽग्रे गमनान्वितम् ।
दक्षिणेऽन्नं तु तत्पार्श्वे निधाय कृतजायया ॥
किञ्चित्प्रकाशितं योनिसंयुतानतवाससा ।
संभ्रान्तमनसोपेतं जायास्तत्र्वास्त्वनेकशः ॥
व्याघ्रचर्माम्बरोपेतं दुकूलवसनान्वितम् ।
दक्षिणे कटिपार्श्वे तु क्षुरिकाश्चैव बन्धयेत् ॥
क्षुरिका हैमसंकाशा रूपबंधसमन्विता ।
यक्षकिन्नरसिद्धाद्यैस्सेवितं पूजितं नुतम् ॥
चामरैरर्कचन्द्राभ्यां वीजितं रत्नभूषितैः ।
अण्डानां सुस्थितार्थं तु सर्वलोकोपकारकम् ॥
कङ्कालमोचनार्थं तु स्यात् कङ्ककाभिधः ।

२. भिक्षाटनमूर्तिः
(i) अ० आ०

अथ वक्ष्ये विशेषेण भिक्षाटनमहेश्वरम् ।
पादौ पादुकसयुक्तौ वामपादं तु सुस्थितम् ॥
ईषदुद्धृत्य सव्यं तु पादं तु गमनोत्सुकम् ।
ललाटमध्यमासव्ये नवाष्टौ वा यवान्तरे ॥
पादौ पादुकसंयुक्तौ पादुकारहितौ तु वा ।
सुविकीर्णजटाभारं जटामण्डलमेव वा ॥
वृत्तबन्धजटा वाथ नग्नरूपं नताननम् ।
ललाटपट्टसंयुक्तं करोत्वर्धेन्दुशेखरम् ॥
सर्वाभरणसंयुक्तं कटिसूत्रविवर्जितम् ।
शुद्धश्वेतनिभं वर्णं नानानागविभूषितम् ॥
दक्षिणे पूर्वहस्तं तु मृगस्यास्यान्तिकं भवेत् ।
वामे तु पूर्वहस्तं तु वरदं स्यात्कपालधृक् ॥
दक्षिणे परहस्ते च डमरुं च धरेद् द्विज! ।
वामे तु शिखिपिञ्छं च कर्तव्यं त्वतिशीतलम् ॥
सितवस्त्रोत्तरीयं च नागेन कटिवेष्टितम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

श्वेतयज्ञोपवीतं तु नीलकण्ठं त्रिपुण्डधृक् ॥
पद्मपीठोपरिष्टात्तु शेषं कङ्कालरूपवत् ।
(ii) उ० कामि० एष एव परो देवः नग्नः कङ्कालवर्जितः ।
विकीर्णोभयपार्श्वस्थजटालकविभूषितः ॥
कटिदेशे प्रकर्तव्यः फणिसूत्रेण वेष्टितः ।
सत्कपालं च वरदं वामहस्तं तु कल्पयेत् ॥
दिव्यढक्कासमायुक्तं वामस्थमपरं करम् ।
शिखिपिञ्छधरं कुर्यात्सव्यस्थमपरं करम् ॥
व्यालपार्श्वस्थितः कार्यः पूर्वसव्यो मृगास्यगः ।
सव्यं कोणसमायुक्तमथवा परिकल्पयेत् ॥
कपालहस्तपृष्ठं तु नाभिदघ्नं प्रकल्पयेत् ।
डमरूच्चं तु कर्णान्तं तद्धस्तमणिबन्धनात् ॥
कर्णान्तं षोडशैर्मात्रैः शेषं कङ्कालवद्भवेत् ।
भिक्षाटनो हरः प्रोक्तः प्रथग्विष्णुयुतो न वा ॥
(iii) सु० आ० सृष्टिमूर्तेः कपालं तु स्थितिमूर्तेः कलेबरम् ।
डमरुकसमोपेतं भस्मसर्परैलङ्कृतम् ॥
कण्ठे (स्कन्धे) शूलसमायुक्तं छन्नवीरसमायुतम् ।
पादुकोपरि पादौ च सर्वभूतसमावृतम् ॥
एवं भिक्षाटनं वत्स ! कामनाशमथ श्रृणु ॥
(iv) कार० आ० त्रिनेत्रं चतुर्भुजं नग्नरूपं किंचित्स्मिताननम् ।
आवृतालङ्कृताभङ्गी पादे पादुकसंगुतम् ॥
दक्षिणे तु कराग्रं तु हरिणास्यानुगं भवेत् ।
दक्षिणापरहस्तं तु डमरुकयुतं भवेत् ॥
वामे कपालहस्तं तु अपरं पिञ्छधारिणम् ।
कुञ्चितं दक्षिणं पादं वामपादं तु सुस्थितम् ॥
सभङ्गस्थानकं कुर्याद् गमनोन्मुखरूपकम् ।
कपालोपेतहस्तस्य पृष्ठं नाभिसमं भवेत् ॥
शेषं सर्वं विशेषेण कङ्कालस्योक्तवद्भवेत् ।
(v) शिल्प० अथ भिक्षाटनं वक्ष्ये पादौ पादुकसंयुतौ ।
सुस्थितं वामपादं तु गन्तुं दक्षिणमुद्धृतम् ॥
सुविकीर्णजटाभारं जटामण्डलमेव वा ।
विवृथ (वृत्त)बन्धजटा वाथ उपानरहितं तु वा ॥
ललाटपट्टसंयुक्तं करोत्वर्धेन्दुशेखरम् ।
सर्वाभरणसंयुक्तं को (क) टिसूत्रविवर्जितम् ॥
शुद्धश्वेतनिभं प्रोक्तं नानानागविभूषितम् ।
दक्षिणं पूर्वहस्तं तु मृगस्यास्यान्तिकं भवेत् ॥
वामे तु पूर्वहस्तं तु वरदं तु कपालधृक् ।
दक्षिणे परहस्ते तु डमरुं चर्मघाटितम् ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वामे तु शिखिपिञ्छं तु सितवस्त्रोत्तरीयकम् ।
श्वतयज्ञोपवीतं तु कटौ नागेन वेष्टितम् ॥
नीलकण्ठं त्रिपुण्ड्राढ्यं पद्मपीठोपरि स्थितम् ।
कङ्कालमूर्तिवच्छेषं सर्वमत्र विशेषतः ॥

रुद्राः

एकादशरुद्राः—स्वरूपम्
(i) अ० आ०

चतुर्भुजास्त्रिनेत्राश्च जटामकुटमण्डिताः ।
शुक्लवस्त्रधरास्सर्वे शुक्लवर्णाः प्रकीर्तिताः ॥
सपादस्थानकास्सर्वे पद्मपीठोपरिस्थिताः ।
सर्वाभरणसंयुक्ताः सर्वपुष्पैरलङ्कृताः ॥
अभयं परशुं सव्ये कृष्णं वरदवामके ।

नामानि

महादेवश्शिवो रुद्रः शङ्करो नीललोहितः ॥
ईशानो विजयो भीमो देवदेवो भवोद्भवः ।
कपालीशश्च विज्ञेया रुद्रा एकादशा:? पराः ॥

(ii) विश्व०

अजैकपादहिर्बुध्नो विरुपाक्षश्च रेवतः ।
हरश्च बहुरूपश्च त्र्यम्बकश्च सुरेश्वरः ॥
रुद्रा एकादश प्रोक्ता जयन्तश्चापराजितः ।

१. अजः ✓
(i) विश्व०

अथ रुद्रान्प्रवक्ष्यामि बाहुषोडशकान्वितान् ।
अजनामा महारुद्रो धत्ते शूलमथाङ्कुशम् ॥
कपालं डमरुं सर्पं मुद्गरं च सुदर्शनम् ।
अक्षसूत्रमधो दक्षे तथा वामे कराष्टके ॥
तर्जनीमूर्ध्वतस्तत्र खट्वाङ्गं तदधः करे ।
गदां च पट्टिशं घण्टां शक्तिपरशुकुण्डिकाः ॥

२. एकपादः ✓
(i) विश्व०

एकपादाभिधो बिभ्रत्क्ष्वेडादः स्याद्वहन् शरम् ।
चक्रं डमरुकं शूलं मुद्गरं तदधो वरम् ॥
अक्षसूत्रमधो वामे खट्वाङ्गं चोर्ध्वहस्तके ।
धनुर्घण्टां कपालं च कौमुदीं तर्जनीं घटम् ॥
परशुं चक्रमाधत्ते क्रमाद्वाह्वष्टके त्विति ।
अनेकभोगसंपत्तिं कुरुते यजनात्सदा ॥

(ii) श्रीतत्व०

ध्यायेत्कोटिरविप्रभं त्रिनयनं शीतांशुगङ्गाधरम्
हस्ते टङ्कमृगं वराभयकरं पादैकयुक्तं विभुम् ।
शंभोर्दक्षिणवामकक्षभुजयोर्ब्रह्माच्युताभ्यां स्थितं
तत्तत्लक्षणमायुधैः परिवृतं हस्तद्वयाढ्याञ्जलिम् ॥
ब्रह्माण्डप्रलये सुसंस्थितपदं ब्रह्माण्डमध्यस्थितं
ह्येवं लक्षणसंयुतं पुरहरं पादैकमूर्तीकृतम् ।

टि०—एकपादमितिख्यातं सुखासीनम् । रक्तवर्णः पक्षान्तरे श्वेतवर्णोऽपि प्रसिद्धः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

३. अहिर्बुध्न: विश्व०
अहिर्बुध्नो गदां चक्रं चासिं डमरुमुद्गरौ ।
शूलाङ्कुशाक्षमालाश्च दक्षोर्ध्वाधः करैः क्रमात् ॥
तोमरं पट्टिशं चर्म कपालं तर्जनीं घटम् ।
शक्तिं परशुकं वामे दक्षवद्धारयत्यसिम् ॥

४. विरुपाक्ष: विश्व०
विरुपाक्षस्ततः खड्गं शूलं डमरुकाङ्कुशौ ।
सर्पं चक्रं गदामक्षसूत्रं विभ्रत्कराष्टके ॥
खेटं खट्वाङ्गकं शक्तिं परशुं तर्जनीं घटम् ।
घण्टाकपालकौ चेति वामोर्ध्वादिकराष्टके ॥

५ रेवत: विश्व०
रेवतो दक्षिणे चापं खड्गं शूलं गदामहिम् ।
चक्राङ्कुशाक्षमालास्तु धारयन्नूर्ध्वमादितः ॥
धनुः खेटं च खट्वाङ्गं घण्टातर्जनिकां ततः ।
परशुं पट्टिशं पात्रं वामबाह्व (ष्ट) केऽर्कवत् ॥
सर्वसंपत्करो ह्येष जायते वार्चनाद्भृशम् ।

६. हर: विश्व०
हराख्यो मुद्गरं चैव डमरुं शूलमङ्कुशम् ।
गदा सर्पाक्षसूत्रणि धारयन् दक्षिणोर्ध्वतः ॥
पट्टिशं तोमरं शक्तिं परशुं तर्जनीं घटम् ।
खट्वाङ्गं पट्टिकां चेति वामोर्ध्वादिक्रमेण तु ॥

७. बहुरूप: विश्व०
वहुरूपो दधद्दक्षे डमरुं च सुदर्शनम् ।
सर्पं शूलाङ्कुशौ चैव कौमुदीं जपमालिकाम् ॥
घण्टाकपालखट्वाङ्गं तर्जनीं कुण्डिकां धनुः ।
परशुं पट्टिशं चैव वामोर्ध्वादिकराष्टके ॥

८. त्र्यम्बक: विश्व०
त्र्यम्बकोऽपि दधच्चक्रं डमरुं मुद्गरं शरम् ॥
शूलाङ्कुशाहिजाप्यं च दक्षोर्ध्वादिक्रमेण हि ।
गदाखट्वाङ्गपात्राणि कार्मुकं तर्जनीघटौ ॥
परशुं पट्टिशं चैव वामोर्ध्वादिकराष्टके ।

९. सुरेश्वर: विश्व०
सुरेश्वरो हि डमरुं चक्रं शूलाङ्कुशावपि ।
शरं च मुद्गरं चापि दक्षबाह्वष्टके त्विति ॥
पङ्कजं परशुं घण्टां पट्टिशं तर्जनीं धनुः ।
खट्वाङ्गं कारयेत्पात्रं वामेऽष्टकरपल्लवे ॥

१० जयन्त: विश्व०
जयन्तो दशमो रुद्रोऽप्यङ्कुशं चक्रमुद्गरौ ।
शूलाहिडमरुं बाणमक्षसूत्रं यमे त्विति ॥
गदाखट्वाङ्गपरशुं कपालं शक्तिं तर्जनीम् ।
धनुः कुण्डीमथोर्ध्वादिवामबाह्वष्टके दधत् ॥

११. अपराजित: विश्व०
अथापराजितो दक्षे तोमरं खड्गमङ्कुशम् ।
शूलाहिचक्रडमरुमक्षमालां दधत्क्रमात् ॥
शक्तिं खेटं गदां पात्रं तर्जनीं पट्टिशं कजम् ।
घण्टामुत्तरतश्चाथ धारयन्नूर्ध्वमादितः ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

(iii) अ० पृ० २१२ सद्योवामोऽघोर तत्पुरुषावीशान एव च ।
मृत्युञ्जयश्च विजयः किरणाक्षोऽघोरास्त्रकः ।।
श्रीकण्ठश्च महादेवो रुद्राश्चैकादश स्मृताः ।

१. सद्योजातः शुक्लाम्बरधरं देवं शुक्लमाल्यानुलेपनम् ।
शुक्लोष्णीषं शुक्लनेत्रं शुक्लयज्ञोपवीतिनम् ।।
जटाभारसमायुक्तं वालेन्दुकृतशेखरम् ।
त्रिलोचनं सौम्यमुखं चतुःकुण्डलभूषितम् ।।
दिव्यदेहं महाकायं नवयौवनमण्डितम् ।
महाभुजं महोत्साहं वरदाभयपाणिकम् ।।

२. वामदेवः रक्ताम्बरधरं देवं रक्तयज्ञोपवीतिनम् ।
रक्तोष्णीषं रक्तनेत्रं रक्तमाल्यानुलेपनम् ।।
जटायां कृतचन्द्रं च त्रिनेत्रं तुङ्गनासिकम् ।
महारक्तं महाबाहुं शूलखट्वाङ्गधारिणम् ।।
रक्तास्यं रक्तनयनं ? रक्तकुण्डलधारिणम् ।
सर्वालङ्कारसम्युक्तं सर्वाभरणभूषितम् ।।

३. अघोरः करालदंष्ट्रं विकटास्यं सर्पशीर्षं त्रिलोचनम् ।
मुण्डमालाधरं देवं सर्पकुण्डलमण्डितम् ।।
भुजङ्गकेयूरधरं सर्पंहारोपवीतिनम् ।
गोनसं कटिसूत्रं च गले वृश्चिकमालिकाम् ।।
नीलोत्पलदलश्याममतसीपुष्पसन्निभम् ।
भृङ्गभ्रूभङ्गजटिलं शशाङ्ककृतशेखरम् ।।
तक्षकं कर्कोटकं च पायूनेत्रे पुरौ कृतौ ।
अघोरसंज्ञकं हेतुं कालरूपमिवापरम् ।।
महावीर्यं महोत्साहमष्टबाहुं महाबलम् ।
रिपुसैन्यं त्रासयन्तं निवेशो यत्र भूतले ।।
खट्वाङ्गं च कपालं च खेटकं पाशमेव च ।
वामहस्तचतुष्केण शस्त्राणां च चतुष्टयम् ।।
त्रिशूलं कलशं खड्गं दण्डञ्चैवारिमर्दनम् ।
करेषु वै दक्षिणेषु चैतदस्त्रचतुष्टयम् ।।

४. तत्पुरुषः पीताम्बरधरं देवं पीतयज्ञोपवीतिनम् ।
मातुलिङ्गं करे वामे अक्षसूत्रं च दक्षिणे ।।

५. ईशानः शुद्धस्फटिकसङ्काशं जटाचन्द्रविभूषितम् ।
त्रिनेत्रं शूलहस्तं च वामे धृतकपालकम् ।।

६. षड्भुजो मृत्युञ्जयः कपालमालिनं श्वेतं शशाङ्ककृतशेखरम् ।
व्याघ्रचर्मधरं रुद्रं नागेन्द्रोरुविभूषितम् ।।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

त्रिशूलं चाक्षसूत्रं च विभर्ति दक्षिणे करे ।
कपालं कुण्डिकां वामे योगमुद्रां करद्वये ॥

७. विजयः
एकवक्त्रं त्रिनेत्रं च शशाङ्कृतशेखरम् ।
बृहल्ललाटकापोलं कम्बुग्रीवं सुशोभनम् ॥
चतुर्भुजं महाबाहुं शूलपङ्कजधृत्करम् ।
दिव्यरूपधरं देवं वरदाभयपाणिकम् ॥

८. किरणाक्षः
चतुर्भुजं महावक्षःशुक्लाक्षं सूत्रपाणिकम् ।
पुस्तकाभयहस्तं च वरदाक्षं त्रिलोचनम् ॥

९. अघोरास्त्रः
ज्वलत्प.वकसङ्काशं खड्गहस्तं त्रिशूलिनम् ।
महाक्रोधकरं देवं मायाकृतमहाग्रहम् ॥

१०. श्रीकण्ठः
चित्रसूत्रवस्त्रधरं चित्रयज्ञोपवीतिनम् ।
चित्ररूपं महासत्यं चित्रैश्वर्यसमन्वितम् ॥
चतुर्बाहुं चैकवक्त्रं सर्वालङ्कारभूषितम् ।
खड्गं धनुः शरं खेटं शशाङ्कृतशेखरम् ॥

११ महादेवः
त्रिलोचनश्चतुर्बाहुः शुक्लाक्षः सुकरद्वयः ।
दक्षेण पाणिना पूर्णं वंशामृतरसं पिवत् ॥
धृतमुक्ताक्षसूत्रश्च महादेवो धनोर्जितः ।
महाश्चर्यप्रदायी च रुद्रश्चैकादशः स्मृतः ॥

विद्येश्वराः

(i) वि० ध०—स्वरूपम्
दिग्वर्णा जटिलस्त्र्यक्षाश्शरत्रिशूलधारिणः ।
पुटाञ्जलिकरास्सर्वे विद्येशाश्चैकवक्त्रकाः ॥

नामानि
अनन्तश्च त्रिमूर्तिश्च सूक्ष्मः श्रीकण्ठ एव च ।
शिवश्शिखण्डयेकनेत्र एकरुद्रश्च ते क्रमात् ॥

(ii) पू० का० „
अनन्तेशस्तथा सूक्ष्मश्शिवोत्तमश्चैकनेत्रकः ।
एकरुद्रस्त्रिमूर्तिश्च श्रीकण्ठश्च शिखण्डिनः ॥

स्वरूपम्
अष्टविद्येश्वरा ह्येते त्रिनेत्राश्च चतुर्भुजाः ।
अभयं वरदोपेताष्टङ्कशूलधरास्तथा ॥
रक्तकुन्दस्तथा नीलं पीतं कृष्णं च कुङ्कुमम् ।
अरुणं भिन्नाञ्जनप्रख्यं क्रमाद्विद्येशवर्णकम् ॥
जटामकुटसंयुक्ता उपवीतसमन्विताः ।
सर्वाभरणसंयुक्ताश्शान्तवक्त्रसमन्विताः ॥
विद्येशाकृतिरेवं स्याद दिक्पालाकृतिरुच्यते ।

१ अनन्तः
अ० आ०
अनन्तश्चतुर्भुजस्सौम्यस्सर्वाभरणभूषितः ।
जपापुष्पनिभाकारः करण्डमकुटान्वितः ॥
सितवस्त्रधरः शान्तस्त्रिनेत्रः पद्मसंस्थितः ।
अभयवरदोपेतो गङ्गा (टङ्क?) शूलधरश्शुचिः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

२· त्रिमूर्ति (i) अ० आ० (ii) उ० कामि०

एकरुद्रमिवात्रैव त्रिमूर्तिं चैव कारयेत् ।
रक्तवर्णस्त्रिनेत्रश्च वरदाभयहस्तकः ।
कृष्णापरशुसंयुक्तो जटामकुटमण्डितः ॥
ऋज्वागतस्तथैकेन पादेनापि समन्वितः ।
दक्षिणोत्तरयोश्चैव पार्श्वयोरुभयोरपि ॥
कटिप्रदेशादूर्ध्वे तु ब्रह्मविष्णूर्ध्वकाययुक् ।
स्त्रीमानवत्तयोर्मानं ब्रह्मविष्ण्वोस्तु कल्पयेत् ॥
कृताञ्जलिपुटावेकपादयुक्तौ च वा मतौ ।
अथवा शिवलिङ्गस्य पार्श्वयोन्तर्गतौ कृतौ ॥
अथवा तौ पृथक् स्थाप्यावेकविष्टरमास्थितौ ।
अथवा मध्यमे लिङ्गं पृथगालयसंस्थितम् ॥
तस्य सव्येऽप्यसव्ये च ब्रह्माविष्णू तथा मतौ ।
पृथग्धामस्थिता वैकधामस्था वा त्रिमूर्तयः ॥
संश्लिष्टधामयुक्ता वा ब्रह्मविष्णुशिवा मताः ।
पूर्वास्याः पश्चिमास्या वा परिवारादिसंयुताः ॥
भिन्नप्राकारगा वापि एकप्राकारसंस्थिताः ।
नृत्तमूर्त्यादिदेवा वा स्थापनीयास्तु मध्यमे ॥
एवं लक्षणमादिष्टं प्रतिष्ठाविधिरुच्यते ।

३. सूक्ष्मः अ० आ०

सूक्ष्मो नीलनिभश्शान्तो हेमवस्त्रधरः परः ।
चतुर्भुजस्त्रिनेत्रश्च सर्वाभरणभूषितः ॥
अभयवरदोपेतटङ्कशूलधरस्तथा ।

४. श्रीकण्ठः अ० आ०

अभयवरदोपेतटङ्कशूलधरः परः ।
रक्तवस्त्रसमायुक्तः पद्मपीठोपरि स्थितः ॥
श्रीकण्ठं ह्येवमाख्यातं नागदेवमथोच्यते ।

५. शिवोत्तमः अ० आ०

शिवोत्तमः श्वेतवर्णश्चतुर्दोर्भिस्समन्वितः ।
सर्वाभरणसंयुक्तश्शुक्लवासोपवीतकः ॥
नेत्रद्वयसमायुक्तः करण्डमकुटान्वितः ।
अभयवरदोपेतश्शूलपाशधरश्शुचिः ॥
पद्मपीठोपरिष्टात्तु स्थानकस्समपादकः ।

६. शिखण्डी अ० आ०

शिखण्डिस्त्वञ्जनाभस्तु चतुर्भुजसमन्वितः ।
करण्डमकुटोपेतस्सर्वाभरणभूषितः ॥
रक्तवस्त्रधरश्शान्तस्त्वभयवरदान्वितः ।
खड्गखेटकसंयुक्तः पद्मपीठोपरिस्थितः ॥

७. एकनेत्रः अ० आ०

एकनेत्रश्चतुर्बाहुर्नेत्रत्रयसमन्वितः ।
क्षौमवस्त्रधरश्शान्तो ··· ··· ··· ··· कसमप्रभः ॥
जटामकुटसंयुक्तस्सर्वाभरणभूषितः ।
अभयवरदोपेतष्टङ्कशूलसमन्वितः ॥

८. एकरुद्रः—अ० आ०

एकाक्षसदृशं त्वेकरुद्रं कुर्याद्विशेषतः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मूर्त्यष्टकम्

(i) वि० ध०—नामानि शर्वो भीमो महादेवो रुद्रः पशुपतिर्भवः ।
उग्र ईशान इत्यष्टौ मूर्तयश्शिवसन्निभाः ॥
स्वरूपम् मृगाङ्कचूडामणयो जटामण्डलमण्डिताः ।
त्रिनेत्रा वरखट्वाङ्गत्रिशूलवरपाणयः ॥

(ii) पू० का०—नामानि भवश्शर्वस्तथेशानपशुपत्युग्रकस्तथा ।
रुद्रो भीमो महादेवः कीर्तितास्त्वष्टमूर्तयः ॥
स्वरूपम् चतुर्भुजास्त्रिनेत्राश्च जटामकुटधारिणः ।
अभयं वरदोपेताष्टङ्कक्रुष्णधरास्स्मृताः ॥
सर्वाभरणसंयुक्ता रक्तक्षौमधरा इमे ।
वर्णाः शुक्लं श्यामं च रक्तं च कृष्णं गोक्षीरसन्निभम् ॥
काश्मीरं विद्रुमं नीलं भवादीनां तु वर्णकम् ।

तेषु केचन अष्टमूर्त्याकृतिर्ह्येवं वसूनामाकृतिं शृणु ॥

१. शर्वः शर्वश्चतुर्भुजश्शान्तस्सर्वाभरणभूषितः ।
अ० आ० जटामकुटसंयुक्तश्शङ्खकुन्देन्दुसन्निभः ॥
अभयवरदोपेतः खड्गखेटकधारितः ।
पद्मपीठोपरिष्टात्तु स्थानकश्शर्व एव हि ॥

२. भीमः भीमश्चतुर्भुजो रौद्रस्सर्वाभरणभूषितः ।
अ० आ० जटामकुटसंयुक्तो ह्यतिरक्तसमप्रभः ॥
अभयं वरदं चैव शूलं पाशं च धारयेत् ।
सितवस्त्रधरश्चैव रौद्रदृष्टिस्सदंष्ट्रकः ॥

३. पशुपतिः अ० आ० पशुपतिं शर्ववत्कृत्वा स्थापयेद्देशिकोत्तमः ।

४. भवः अ० आ० भवश्चतुर्भुजश्शान्तो जटामकुटमण्डितः ।
अतिरक्तसमप्रख्यस्सर्वाभरणभूषितः ॥
अभयवरदोपेतः शूलपाशधरो भवः ।

ईशानादयः पञ्चमूर्तयः

ईशस्तत्पुरुषाघोरवामजातक्रमेण तु ।
सा० लक्षणम् सितपीतकृष्णरक्ताश्चतुर्वर्णा प्रकीर्तिताः ॥
वि० ध० पंचवक्त्रास्स्मृतास्सर्वे दशदोर्दण्डभूषिताः ।
खड्गखेटधनुर्बाणकमण्डल्वक्षसूत्रिणः ॥
वराभयकरोपेताश्शूलपङ्कजपाणयः ।
शुद्धस्फटिकसङ्काशो जटाचन्द्रविभूषितः ।

१. ईशानः अक्षत्रिशूलहस्तश्च कपालं वामतोऽभयम् ॥
(i) रूप० वेदाभयेष्टाङ्कुशपाशटङ्ककपालढक्काक्षकशूलपाणिः ।
(ii) शै० कार० सितद्युतिः पञ्चमुखोऽवतान्मामीशान ऊर्ध्वं परमप्रकाशः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

२. तत्पुरुषः	पीताम्बरस्तत्पुरुषः पीतयज्ञोपवीतवान् ।
(ii) रूप०	मातुलिङ्गं करे वामेऽक्षमाला दक्षिणे तथा ॥
(ii) शं० कार०	प्रदीप्तविद्युत्कनकावभासो विद्यावराभीतिकुठारपाणिः ।
	चतुर्भुजस्तत्पुरुषस्त्रिनेत्रः प्राच्यां स्थितो रक्षतु मामजस्रम्॥
३. अघोरः	दंष्ट्राकरालवदनं सर्पशीर्षं त्रिलोचनम् ।
(ii) रूप०	रुण्डमालाधरं देवं सर्पकुण्डलमण्डितम् ॥
	भुजङ्गकेयूरधरं सर्पहारोपवीतिनम् ।
	यो वस्ते कटिसूत्रं च गले वृश्चिकमालिकाम् ॥
	नीलोत्पलदलश्यामं अतसीपुष्पसन्निभम् ।
	पिङ्गाक्षं पिङ्गजटिलं शशाङ्ककृतशेखरम् ॥
	तक्षकः पुष्टिकश्चैव पादयोस्तस्य नूपुरौ ।
	अघोररूपकं कुर्यात्कालरूपमिवापरम् ॥
	महावीर्यं महोत्साहमष्टबाहुं महाबलम् ।
	त्रासयन्तं रिपोस्सङ्घं निवेशो यत्र भूतले ।
	खद्वाङ्गं च कपालं च खेटकं पाश एव च ।
	वामहस्तेषु कर्तव्यमिदं शस्त्रचतुष्टयम् ।
	त्रिशूलं परशुः खड्गो दण्डश्चैवारिमर्दनः ।
	शस्त्राण्येतानि चत्वारि दक्षिणषु करेषु च ॥
(ii) शं० कार०	कुठारखेटाङ्कुशपाशशूल — कपालढक्काक्षगुणान्दधानः ।
	चतुर्मुखो नीलरुचिस्त्रिनेत्रः पायादघोरो दिशि दक्षिणस्याम् ॥
४. वामदेवः	रक्ताम्बरधरं देवं रक्तयज्ञोपवीतिनम् ।
(i) रूप०	रक्तोष्णीषं रक्तनेत्रं रक्तमाल्यानुलेपनम् ॥
	जटाचन्द्रधरं कुर्यात्त्रिनेत्रं तुङ्गनासिकम् ।
	वामदेवं महाबाहुं खड्गखेटकधारिणम् ॥
	सर्वालङ्कारसंयुक्तं रक्तकुण्डलधारिणम् ।
(ii) शं० कार०	वराक्षमालाभयटङ्कहस्त — स्सरोजकिञ्जल्कसमानवर्णः ।
	त्रिलोचनश्चारुचतुर्मुखो मां पायादुदीच्यां दिशि वामदेव ।
५. सद्योजतः	शुक्लाम्बरधरं देवं शुक्लमाल्यानुलेपनम् ।
(i) रूप०	जटाभारयुतं कुर्याद्बालेन्दुकृतशेखरम् ॥
	त्रिलोचनं सौम्यमुखं कुण्डलाभ्यामलङ्कृतम् ।
	सद्योजातं महोत्साहं वरदाभयपाणिकम् ॥
(ii) शं० कार०	कुन्देन्दुशङ्खस्फटिकावभासो
	वेदाक्षमालावरदाभयाङ्कः ।
	त्र्यक्षश्चतुर्वक्त्र उरुप्रभाव—
	स्सद्योऽधिजातोऽवतु मां प्रतीच्याम् ॥
महेशः महादेवो वा	पञ्चमूर्धं चतुर्वक्त्रं नेत्रैर्द्वादशभिर्युतम् ।
सु० आ०	चतुरास्यं चतुर्नासी वसुश्रोत्रं चतुर्गलम् ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तनुरेतद्विपादं हि सायुधं दशबाहुकम् ।
शुद्धस्फटिकसङ्काशं सूर्यकोटिसमप्रभम् ॥
चन्द्रांशुहिमशीतं च सर्वाभरणभूषितम् ।
शुक्लाम्बरधरं देवं शुक्लयज्ञोपवीतिनम् ॥
अभयं शूलपरशु वज्रं खड्गं च दक्षिणे ।
खेटकाङ्कुशपाशं च घण्टां वरदवामके ॥
कुर्यादेवं महेशं तु शक्तेस्तु लक्षणं शृणु ।
चतुर्भुजां त्रिनेत्रां च सर्वालङ्कारसंयुताम् ॥
नितम्बतटविस्तीर्णां मध्यक्षामां स्तनोन्नताम् ।
दक्षिणे चोत्पलोपेतां वामहस्ते स्रजं धरीम् ।
वरदाभयहस्तां वै दुकूलवसनान्विताम् ।
करण्डमकुटोपेतामीश्वरस्य तु वामके ॥
पीठे चैकासने युक्तां तत्प्रभामण्डले स्थिताम् ।
चन्द्रार्काग्निप्रतीकाशां जगन्मङ्गलकारकाम् ॥
कारयेदीश्वरीमेवं वामादीनां शृणुष्व हि ।

शिवस्य गणादयः

नन्दी

(i) उ० कामि०

बिभ्राणं परशुं मृगं करतले ईशप्रमाणाञ्जलिं
भस्मोद्धूलितपाण्डुरं शशिकलागंगाकपर्द्दोज्वलम् ।
परियायत्रिपुरान्तकं प्रथमतः श्रेष्ठं गणैर्वन्दितं
ब्रह्मेन्द्राच्युतपूजिताङ्घ्रिकमलं श्रीनन्दिकेशं भजे ॥

(ii) वि० ध०

नन्दी कार्यस्त्रिनेत्रस्तु चतुर्बाहुर्महाभुजः ।
सिन्दूरारुणसङ्काशो व्याघ्रचर्मपरिच्छदः ॥
त्रिशूलभिन्दिपालौ च करयोस्तस्य कारयेत् ।
शिरोगतं तृतीयं तु तर्जयन्तं तथापरम् ॥
आलोकयानं कर्तव्यं दूरादागामिनं जनम् ।

(iii) अ० पृ०

अथातः सम्प्रवक्ष्यामि नन्दिकेश्वरलक्षणम् ।
तस्य स्वरूपसंस्थानं कथयामि तु सम्प्रति ॥
ब्रह्माद्यं विष्णुभागान्तं कल्पयेत्तस्य चोच्छ्रयम् ।
पादाधिको भवेज्जेष्ठः कनिष्ठः पादवर्जितः ॥
तदुच्छ्रयं च विभजेत् भागैः पञ्चभिरेव च ।
तत्र भागप्रमाणेन सप्तभागायतो भवेत् ॥
द्विभागं च भवेद् वक्त्रमायामे चोच्छ्रयं विदुः ।
अधोभागे मस्तकस्य भोगसूत्रे च सक्थिनी ॥
शृङ्गं पादं तु विस्तारे विस्तारादुच्छ्रयोऽधिकः ।
शृङ्गाधश्चार्धभागेन कर्णः पादोनभागिकः ॥
भागमेकं भवेद्ग्रीवा पृथु कम्बलतः सह ।
अधोभागे मस्तकाच्च पृष्ठस्कन्धं च भागिकम् ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

त्रिभागायतकं पृष्ठं त्रिभागं पृथु कुक्षयोः ।
द्विभागमुच्चैरुदरं च परमारुतत्युत्तमम् ? ॥
अर्धभागैक अग्रं च ? खुरिका चार्धभागतः ।
पुच्छमूलं भागपादमग्रं कुर्यात्तदर्धतः ।
चतुर्भागायतं पुच्छं भागैकं चाग्रचामरम् ॥
तदुत्तमं च सोत्साहं पादैकं चोच्छ्रितं क्रमात् ।
घण्टाचामर घर्घरमालाङ्कारभूषितम् ॥
शृङ्गाभरणमप्येवं कुडिकाग्रे समोदका ।
मोदका वृषवक्त्राग्रे तापसौवदुकाकारम् ॥
प्रासादमानतश्चान्तर्लिङ्गस्थानादि कल्पितम् ।
एकद्वित्रिचतुःपञ्च षट्सप्ताङ्गुलकान्तरे ॥
मूर्तिस्थाने तु कर्तव्या मूलस्तम्भैश्चतुष्किका ।
वृषस्य चोच्छ्रयः कार्यो विष्णुभागान्तदृष्टिकः ॥
पादं जानु कटिं यावदर्चाया वाहनस्य दृक् ।
गुह्यनाभिस्तनान्तं वा सूर्ये व्योमस्तनान्तकम् ॥
विलोमे कुरुते पीडामधोदृष्टिः सुखक्षयम् ।
स्थानं हन्यादूर्ध्वदृष्टिः स्वस्थाने मुक्तिदायिका ॥

चण्डेशः चण्डनाथो वा
(i) उ० कामि०

चण्डेशस्थापनं वक्ष्ये तल्लक्षणपुरस्सरम् ।
परस्वतन्त्रभेदेन द्विविधं तच्च संमतम् ॥
पुरादौ मध्यमे वाष्टदिक्षु चण्डेश्वरालयः ।
धामेशानेऽथ सौम्ये वा सोमेशेन्द्रान्तरेऽथवा ॥
अन्तर्मण्डलदेशेऽन्तर्हारायां वेष्टशालके ।
अथैकादित्रयस्त्रिंशद्धस्तविस्तारसंयुतः ॥
धामलक्षणसंसिद्धधामेनापि समन्वितः ।
एकादिसप्तभूम्यन्तं भूमिभागसमन्वितः ॥
धामोक्ताकारसंयुक्तो दिक्षु चण्डेश्वरान्वितः ।
इष्टदेवान्वितो वा स्यात्केवलो वा वृषान्वितः ॥
प्रागुक्तविधिनानीतगर्भाद्येष्टकया युतः ।
मूर्धेष्टकासमायुक्तः स्थूपिस्थापनसंयुतः
दक्षिणद्वारसंयुक्तः पराङ्गश्चेन्मुनीश्वराः! ।
स्वतन्त्रस्थापने दक्षपूर्वपश्चिमदिङ्मुखः ॥
दिङ्न्यस्तामरविन्यस्तमध्यकुम्भयुतेन च ।
धामसंस्थापनेनाढ्यः प्रागुक्तविधना सह ॥
प्रागुक्तगर्भमानाद्यं सर्वमत्र प्रयोज्यताम् ।
प्राकारमण्डपोपेतः परितः परिवारयुक् ॥
रुद्रभक्तस्ततो रुद्रचण्डश्चण्डप एव च ।
महाबलस्तथा वीर्यष्टङ्कपाणीशसेवकौ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

रुद्रकोपज इत्यष्टमूर्तय: परिवारगा: ।
एते श्वेता महाकाया: कृताञ्जलिपुटान्विता ॥
सटङ्कास्तद्विहीना वा वीराद्यासनसंस्थिता: ।
कृत्तिवासोऽन्विता वाथ चण्डरूपधरास्तु वा ॥
इन्द्राद्या वा तदर्थं तु पीठं वा पूर्वतो वृष: ।
बलिपीठादिपीठान्तं पूर्ववत्कल्पयेत्तु वा ॥
द्वारस्थौ द्वारपौ कार्यौ द्विकरौ दण्डधारकौ ।
चण्डानुगश्चण्डभृत्यौ नेष्टौ वा देशिकाग्रजा:! ॥
द्रव्यैश्शिलादिभि: कार्य: पूर्वषल्लक्षणान्वित: ।
मध्येन दशतालेन दशतालाधमेन वा ॥
प्रतिमालक्षणप्रोक्तमानेनायादिसंयुत: ।
बद्धपद्मासनश्चण्डनाथो दुदर्शभीषण: ॥
व्यालयज्ञोपवीती च मुखोद्गीर्णमहानल: ।
करालकज्जलाभासो जटिलश्चन्द्रशेखर: ॥
चतुर्वक्त्रश्चतुर्बाहुश्चाक्षमालात्रिशूलवान् ।
टङ्कं कमण्डलुं वामे भानुरक्तार्कलोचन: ॥
अथवा शङ्खवर्णाभश्चतुर्बाहुस्त्रिलोचन: ।
चन्दार्धमण्डित: कृत्तिवासा वीरासनस्थित: ॥
पिनाकामोघबाणाभ्यां व्यग्रपाणितलद्वय: ।
वराभयप्रदनाभ्यामन्यत्र परिमण्डित: ॥
अथवा द्विभुजश्शुक्लवस्त्रस्त्र्यक्षोऽञ्जनप्रभ: ।
जटामकुटयुक्तो वा तुलसीकृतमूर्धज:? ॥
स्थानको वासनस्थो वा शयितासव्यपात्तल: ।
सलम्बसव्यपादस्तु वामहस्तस्तु जानुग: ॥
वरहस्तोऽथवा स स्यादितरष्टङ्कसंयुत: ।
वामेतरकरष्टङ्कयुक्तोऽञ्जलिपुटोऽथवा ॥
शङ्करेक्षणसंपन्नश्शोकनम्रशिरास्तु वा ।
उत्कुटासनयुक् शान्तो जटिलष्टङ्कधृक्कर: ॥
एवं वा चण्डनाथस्तु कार्यस्त्विष्टासनान्वित: ।
अथवाभयटङ्काभ्यां पाशशूलद्वयेन तु ॥
चतुर्भुजस्तु वा कार्यश्शङ्कराज्ञानुपालक: ।
विशेषस्सिंहले देशे कश्चिदत्राभिधीयते ॥
कृतेऽयमष्टहस्तस्स्यात्त्रेतायां षड्भुजो मत: ।
द्वापरे च चतुर्हस्त: कलौ तु द्विकरो मत: ॥
अन्यदेशे तु सर्वत्र विभागो नायमीरित: ।
अथवा चण्डनाथस्तु देव्या तु सहितो न वा ॥
सा देवी श्यामला हस्तद्वयाखिलविभूषिता ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

धर्मनीत्याख्यया ख्याता धृतनीलोत्पला वरा ॥
एवमापाद्य बेरं तु मनुभिस्स्थापनं नयेत् ।
(ii) सु० आ० अथातस्संप्रवक्ष्यामि चण्डेशस्थापनं परम् ।
उद्भवं प्रथमं तस्य द्वितीयं स्थापनं क्रमात् ॥
रुद्रस्यैव तु रुद्रांशं तत्सर्वं चण्डनामतः ।
गणेशावरणे स्थित्वा दशांसेनायुतेन तु ॥
प्रचण्डादिर्विनिष्क्रान्ता पञ्चमूर्तिविधानतः ।
प्रचण्डचण्डः प्रथमं ततो विक्रान्तचण्डकः ॥
तृतीयो विभुचण्डस्तु वीरचण्डश्चतुर्थकः ।
एवं वै पञ्चचण्डेशाः पञ्चब्रह्मसमुद्भवाः ॥
कृतयुगाधिपत्यं तु प्रचण्डमिदमुच्यते ।
विक्रान्तचण्डनामा तु त्रेतायामधिपस्स्मृतः ॥
द्वापरे चाधिपत्यं हि विभुश्चण्डेश उच्यते ।
कलौ तु वीरचण्डेशस्याधिपत्यं प्रकीर्तितम् ॥
एवं वै पञ्चभेदेन चण्डनाम विधीयते ।
आलयस्यैशदिग्भागे विमानं पूर्ववत्क्रमात् ॥
त्रिनेत्रं चतुर्भुजं वापि द्विनेत्रं द्विभुजं तु वा ।
भीमं जटासमायुक्तं सर्वाभरणभूषितम् ॥
अभयं शान्तदेहं च पाशं वै परशुं तथा ।
द्विभुजं यदि कर्त्तुं चेच्छान्त?टङ्कयुतं तथा ॥
शुक्लयज्ञोपवीतं च शुक्लाम्बरधरं तथा ।
स्थानकं चासनं प्रोक्तं पूर्वोक्तविधिना ततः ॥
(iii) पू० कार० चण्डश्च चण्डेश्वरो रक्तश्वेतमिश्रश्च विस्तरः ।
द्विबाहुस्सजटाजूटशेखरः कर्णकुण्डलः ॥
धृतयज्ञोपवीतश्च शुक्लाम्बरधरश्शुचिः ।
सर्वभूषणसंभूष्यष्टङ्कपाणिरथापि वा ॥
अर्धचन्द्रासनासीनः पुष्पमालावलम्बितः ।
चण्डेशस्याकृतिर्ह्येवं क्षेत्रपालाकृतिं श्रृणु ॥
(iv) अ० पृ० २०८ पादोने वा त्रिभागोने पीठिकोच्छ्यमानतः ।
उच्छ्र्ये चण्डकं कुर्यात् स्थूलं भीष्माननं तथा ॥
पिबन्तं च तथा माक्षं विकृताननमूर्ध्वगम् ।
चण्डिकाग्रकेशैश्चैव निबद्धोपरि चण्डिका? ॥
हारकैयूरसम्यक्तं कङ्कणाभ्यामलङ्कृतम् ।
पदतश्चाष्टमं गत्वा तपनाक्षं पद्मकृतिम् ॥
रुचकं भद्रकं चैव हंसं वा बर्धमानकम् ।
जगत्युपरि कुर्याद्वै बाह्ये वै वामतस्तथा ॥
एवं विधं तु कर्तव्यं चण्डनाथस्थ लक्षणम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

क्षेत्रपालः

(i) अ०आ०

त्रिविधः क्षेत्रपालस्तु सात्विको राजसस्तमः ।
श्वेतं रक्तमथो कृष्णं सात्विकादिगुणं भवेत् ॥
द्विभुजं वा चतुर्बाहुं शान्तं सात्विकमुच्यते ।
षड्बाहु चोग्रवदनमुग्रं स्याद्राजसं स्मृतम् ॥
तामसं चाष्टबाहुं च एते वै समपादकाः ।
स्थानकं पद्मपीठे तु भद्रपीठे तु वा यथा ॥
शूलं दक्षिणहस्ते तु कपालमितरे धृतम् ।
द्विभुजं ह्येवमाख्यातं चतुर्हस्तमथोच्यते ॥
परहस्ते तु सव्ये तु खड्गं घण्टां तदन्यके ।
अथवा पूर्वहस्ते तु अभयं वरदान्वितौ ॥
पूर्ववत्परहस्तौ द्वौ घण्टां वा वामहस्तके ।
सात्विकं ह्येवमाख्यातं राजसं श्रृणु सुव्रत ॥
शूलं खड्गं च घण्टां च दक्षिणे तु करत्रये ।
खेटकं च कपालं च नागं वा पाशवामके ॥
तामसे तु धनुर्बाणं दक्षिणेऽदक्षिणे धृतम् ।
शेषं राजसवत्ख्यातं रक्तकेशोर्ध्वमण्डलम् ॥
उग्रदृष्टिसमायुक्तं नानानागविभूषितम् ।
त्रिनेत्रं नग्नरूपं च क्षेत्रपालं प्रकल्पयेत् ॥

(ii) मु०आ०

अथातस्सप्रवक्ष्यामि क्षेत्रशस्य विधिक्रमम् ।
ईश्वरस्यायुतांशेन क्षेत्रपालोद्भवं तथा ॥
ग्रामादावैशदिग्भागे लोकरक्षार्थकारणम् ।
प्रासादं प्रतिमां तत्र पूर्वोक्तविधिना तथा ॥
द्वारं तु पश्चिमे मुख्यं दक्षिणे मध्यमं स्मृतम् ।
कन्यसं चेन्द्रदिग्द्वारं प्रतिमालक्षणं ततः ॥
चतुर्भुजं त्रिनेत्रं वा षड्भुजं चाष्टहस्तकम् ।
सुदष्ट्रं भैरवाकारं कृष्णवर्णं दिगम्बरम् ॥
सर्पयज्ञोपवीतं च शिरोमालाकरोटिकम् ।
ऊर्ध्वकेशं सुवृत्ताक्षं नागाभरणभूषितम् ॥
त्रिशूलं दक्षिणे हस्ते वामहस्ते कपालकम् ।
खड्गं च दक्षिणे हस्ते वामहस्ते तु खेटकम् ॥
एवं चतुर्भुजं विद्धि षड्भुजं च ततः श्रृणु ।
नागं च दक्षिणे पाणौ तोमरं वामहस्तके ॥
प्रागुक्तायुधसंयुक्तं षडभुजं त्विति कीर्तितम् ।
शूलं डमरूखट्वाङ्गं दक्षिणे वामहतस्के ॥
एवमष्टभुजं प्रोक्तं षड्भुजायुधसन्निभम् ।

(iii) पू० कार०

रक्तोग्रेक्षणः कलमेघवर्णो वापि महाबली ।
द्विबाहुर्वा चतुर्बाहुरष्टबाहुरथापि वा ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कपालशूलो द्विभुजो घण्टापाशसमायुतः ।
चतुर्बाहुः क्रमात्क्षेत्रपालो वामे च दक्षिणे ।।
अग्निटङ्कौ च खट्वाङ्गं भयमष्टभुजे क्रमात् ।
रक्तपद्मासनारूढः श्यामवर्णोग्ररूपकः ।।
विसृतोर्ध्वो(र्ध्व?)रक्तकेशः श्यामवर्णोग्ररूपकः ।
नग्नरूपः शिरोमालाभूषितस्तीक्ष्णदंष्ट्रकः ।।

आर्य शास्ता वा — आर्य्यश्चतुर्भुजश्शान्तस्त्रिनेत्रः पद्मसंस्थितः ।
(i) अ० आ० — हिरण्यसदृशप्रख्यो दुकूलवसनान्वितः ।।
अभयवरदोपेतः खड्गखेटकधारितः ।
सुस्थितः पद्मपीठे तु आर्य्यमेवं प्रकल्पयेत् ।।

(ii) सु० आ० — अथातस्संप्रवक्ष्यामि शास्तृस्थापनमुत्तमम् ।
शास्ता सर्वस्य लोकस्य तस्माच्छास्तेति चोच्यते।।
समुद्रमथने काले परिगृह्यामृतं तथा ।
हरिर्बभूव स्त्रीरूपा मोहिनीनाम नामतः ।।
तां मोहिनीमहं दृष्ट्वा संगतोऽस्मि कदाचन ।
जातस्तदा महाशास्ता मेध्यहाम्रवतीश्वराः ।।
द्विनेत्रं द्विभुजं कृत्वा सर्वाभरणभूषितम् ।
श्यामवर्णयुतं तेषां शुक्लयज्ञोपवीतिनम् ।।
श्वानकुकुटमेषाद्यैः क्रीडन्तं सर्वसिद्धिदम् ।
मदनावर्णनीदेव्यौ पोनोरससमन्विते ।।
सर्वाभरणसंयुक्ते पार्श्वयोर्विन्यसेत्ततः ।
वामे दमनकं न्यस्त्वा तद्वेषं विकृतं स्मृतम् ।।
द्विभुजं दक्षिणे हस्ते चक्रदण्डमथेश्वरम् ।
फलपल्लवहस्तं च कुञ्चिताङ्घ्रिकरद्वयम् ।।
भूताकारं बृहत्कुक्षिं नीलालकविभूषितम् ।

(iii) पू० कार० — शास्तुश्च लक्षणं प्रोक्तं स्थापनं शृणु तत्वतः ।।
मोहिनीतनयश्शान्तो द्विबाहुश्श्यामसन्निभः ।
पीठालम्बितशायितौ वामदक्षिणपादकौ ।।
वामाङ्घ्रिजानुकोर्ध्वे तु वामहस्तं स्थितं कुरु ।
मण्डलीभूतदण्डाग्रो वज्रदण्डधरो युवा ।।
स्निग्धनीलाञ्जनाकीर्णकुन्तलीभूतमूर्धजः ।
गजवाहनकेतुस्स्याद्विलासी सविलासिनी ।।
नीलश्वेताश्ववृषभवाहनो वा चतुर्भुजः ।
रक्तचूडध्वजो वापि सर्वत्र परिकीर्तितः ।।
ज्ञानी योगासनासीनो वेदाध्यायी पवित्रकः ।
सोभयांसोपवीतस्स्यान्यूनावीरासनास्थितः ।।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

लीलाविगीतभावी स्यात्सुखभावी सुखासनः ।
वामोरूपरि विन्यस्ता वामपादतलेक्षणः ॥
आर्यस्याकृतिरेवं तु शक्रस्याकृतिरुच्यते ।

शिवभक्ताः

उ० कामि०

वक्ष्यामि शिवभक्तानां प्रतिष्ठां भोगमोक्षदाम् ।
ब्राह्मणा क्षत्रिया वैश्याश्शूद्रा वा ह्यन्तरालजाः ॥
स्त्रियो वा गुरवश्चैषामभिषिक्तो नृपोऽथवा ।
शिवभक्तिसमोपेता जीवन्तो वा मृतास्तु वा ॥
तेषां प्रतिकृतिं कृत्वा प्रतिष्ठाप्य समर्चयेत् ।
स्वप्रधानं पराङ्गं च द्विविधं स्थापनं मतम् ॥
ग्रामादौ वा नदीतीरे पुष्करिण्यास्तटेऽपि वा ।
वने चोपवने वापि पर्वते वा मनोरमे ॥
स्थानेऽन्यत्र च कर्त्तव्यं स्वप्रधानस्य मन्दिरम् ।
देवालयान्तस्सालादौ तत्र कल्पितमन्दिरे ॥
परिवारसमोपेतं स्वप्रधानं प्रकीर्तितम् ।
देवालयादौ सर्वत्र मालिकामण्डपादिषु ॥
परिवारविहीनं यत्कल्पितं त्वङ्गमिष्यते ।
तदर्थं शिवलिङ्गं वा प्रतिमा वा शिवस्य तु ॥
स्कन्दनन्द्यादिरूपं वा मृतप्रतिकृतिं तु वा ।
कुर्यादायादिसंयुक्तं शिलाद्यैरुक्तवस्तुभिः ॥
शैलं लोहं तथा वार्क्षं मृन्मयं मणिजं तु वा ।
अर्धचित्रमथाभासं पटादिपरिकल्पितम् ॥
लिङ्गं चेत्तद्विधानोक्त्या प्रतिमा च तथैव च ।
तदुक्ततालभेदेन कर्तव्यं स्याद् द्विजोत्तमाः! ॥
मृतप्रतिकृतिं चोक्तामष्टतालेन कारयेत् ।
आसीनं स्थानकं वापि वाहनारूढमेव वा ॥
आसने स्थानके वाथ पद्मसिंहासनं तु वा ।
अधस्तात्कल्पयेद्विद्वानुभयं वा विधीयताम् ॥
यथेष्ठासनयुक्तं वा समाश्रं वा यथाश्रकम् ।
आसनोन्मानविस्तारायामं तद्वदलङ्कृतिम् ॥
प्रतिमोक्तप्रकारेण प्रागुक्तविधिना नयेत् ।
शिखी वा बद्धकेशी वा मुण्डितो जटिलोऽथवा ॥
अभिषिक्तो नृपश्चेत्तु किरीटमकुटान्वितः ।
यथेष्टायुधयुक्तो वा नमस्कारयुतोऽथवा ॥
सर्वलक्षणसंपन्नस्सर्वाभरणभूषितः ।
गायका नृत्तयुक्ता वा पूजका वा यथेष्टकाः ॥
स्त्रियश्चेत्तस्यानुरूपेण भूषणैरुपभूषिताः ।
एवं लक्षणमाख्यातं प्रतिष्ठाद्यं निगद्यते ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

शैवलाञ्छनरहस्यम्

वि० ध०

सद्योजातं वामदेवमघोरं च महाभुज ।
तथा तं पुरुषं ज्ञेयमीशानं पञ्चमं मुखम् ॥
सद्योजातं मही प्रोक्ता वामदेवं तथा जलम् ।
तेजस्त्वघोरं विद्यात्तं वायुस्तत्पुरुषं मतम् ॥
ईशाने च तथाकाशमूर्ध्वस्थं पञ्चमं मुखम् ।
विभागेनाथ वक्ष्यामि शम्भोवर्दनपञ्चकम् ॥
महादेवमुखं ज्ञेयं पूर्वं शम्भोर्महात्मनः ।
नेत्राणि त्रीणि तस्याङ्ग सोमसूर्यहुताशनाः ॥
दक्षिणं तु मुखं रौद्रं भैरवं तत्प्रकीर्तितम् ।
पश्चिमं यन्मुखं तस्य नन्दिवक्त्रं तदुच्यते ॥
उमा वक्त्रं च विज्ञेयं तस्य देवस्य चोत्तरम् ।
सदाशिवाख्यं विज्ञेयं पावनं तस्य पञ्चमम् ॥
त्रिलोचनानि सर्वाणि वामदेवं द्विलोचनम् ।
महादेवमुखं भूमिस्ततः स्याद्भैरवं मुखम् ॥
नन्दिवक्त्रं तथा वायुरौद्रेयं चाप उच्यते ।
सदाशिवमुखं ज्ञेयमाकाशं युदुनन्दन! ॥
दिशो दश भुजास्तस्य विज्ञेयं वदनं प्रति ।
महादेवकरे ज्ञेया त्वक्षमाला कमण्डलू ॥
सदाशिवमुखे ज्ञेया चापबाणौ महाभुज ।
माहेश्वरं ततश्चापं पिनाकमिति शब्दितम् ॥
तेषां तु पूर्वमेवोक्तं व्याख्यानं रिपुसूदन ।
दण्डश्च मातुलुङ्गश्च करयोर्भैरवस्य तु ॥
मृत्युदण्डौ विनिर्दिष्टौ मातुलुङ्गा तथा करे ।
जगद्वीजस्य सर्वस्य ये राजन्परमाणवः ॥
तैः पूर्णं बीजरत्नं तु भैरवस्य करे स्मृतम् ।
चर्मशूले करे ज्ञेये नन्दिनो यदुनन्दन ॥
पूर्वमेव च ते प्रोक्तं धर्मव्याकरणं मया ।
त्रिशूलदण्डमव्यक्तं शूलेषु व्यक्ततां गतम् ॥
सत्त्वं रजस्तमश्चैव विज्ञातव्यं नृपोत्तम ।
दर्पणेन्दीवरे ज्ञेये तथा देव्याः करद्वये ॥
आदर्शं निर्मलं ज्ञानं वैराग्यं च तथोत्पलम् ।
महादेस्य देवस्य व्याख्याता ब्राह्मणा जटाः ॥
ऐश्वर्यं तु कला चान्द्री मूर्ध्नि शम्भोः प्रकीर्तिता ।
त्रैलोक्यशमनः क्रोधो वासुकिर्नामतः स्मृतः ॥
तृष्णा विशाला चित्रा च व्याघ्रचम प्रकीर्तितम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वृषो हि भगवान्धर्मश्चतुष्पादः प्रकीर्तितः ॥
जगदुत्पादकं वस्तु प्रकृतिः सा प्रकीर्तिता ।
शुक्ला च प्रकृति सर्वा तेन शुक्लो महेश्वरः ॥
एतद्धि तस्याप्रतिमस्य रूपं तवेरितं सर्वजगन्मयस्य ।
एवं शरीरेण जगत्समग्रं स धारयत्येव जगत्प्रधानः ॥

अ० पृ० १२१

शिवायतनम्

एकद्वारम्

वामे गणपतिश्चैव दक्षिणे पार्वती स्थिता ।
नैर्ऋत्ये भास्करं विद्याद् वायव्ये च जनार्दनम् ॥
मातृभ्यो मातृसंस्थानं दक्षिणस्यां हि कारयेत् ।
सौम्ये शान्तिगृहं कुर्यात् पश्चिमे जलशायिनम् ॥

चतुर्मुखम्

वामे स्नानगृहं कुर्यात् सोमद्वारं तु दक्षिणे ।
मध्ये रूद्रः प्रतिष्ठाप्यो मातृस्थानं च दक्षिणे ।
वामे देवीं महालक्ष्मीमुमां वै भैरवीं तथा ।
ब्रह्मविष्णू तथा रूद्रं पृष्ठदेशे तु कारयेत् ॥
चन्द्रादित्यौ स्थितौ कर्णे ह्याग्नेय्यां स्कन्द एव च ।
ईशाने विघ्नराजस्तु धूम्रमीशानगोचरे ॥

शिवायतनेऽष्टप्रतीहाराः

अ० पृ०

मातुलिङ्गं च नागेन्द्रं डमरूं शूलमेव च ।
नन्दी मुकुटशोभाढ्यः सर्वाभरणभूषितः ॥
खट्वाङ्गं च कपालं च डमरूं बीजपूरकम् ।
दंष्ट्राकरालवदनो महाकालस्तु दक्षिणे ॥
तर्जनीं त्रिशूलं चैव गदां डमरूकं तथा ।
हेरम्बो वामभागे हि भृङ्गिणं दक्षिणे स्मृतः ॥
गदाडमरूखट्वाङ्गं तर्जनीं वामहस्तके ।
उभौ वा दक्षिणद्वारे भृङ्गी दक्षिणतः शुभः ॥
त्रिशूलं डमरूं चैव खट्वाङ्गं बीजपूरकम् ।
पश्चिमे दुर्मुखो वामे तद्वक्त्रं गोमुखाकृति ॥
पश्चिमद्वारि कार्यः स पाण्डुरोऽस्याथ दक्षिणे ।
खट्वाङ्गं च कपालं च डमरूं बीजपूरकम् ॥
मातुलिङ्गं मृणालं च खट्वाङ्गं पद्मदण्डकम् ।
सितश्चैवोत्तरे द्वारे वामे चैव व्यवस्थितः ॥
पद्मखण्डं च खट्वाङ्गं मृणालं बीजपूरकम् ।
असितो दक्षिणे भागे उत्तरे द्वार एव च ॥

तृतीयो पटलः समाप्तः

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

चतुर्थो पटलः

गाणपत्यप्रतिमा-लक्षण

अ. गणपतिः गणेशः

(i) बृ० सं० प्रमथाधिपो गजमुखः प्रलम्बजठरः कुठारधारी स्यात् ।
एकविषाणो विभ्रन्मूलककन्दं सुनीलदलकन्दम् ।।

(ii) अ० पु० गजाननं चतुर्बाहुं त्र्यक्षं पुरुषरूपिणम् ।
एकदन्तं महाचण्डं व्यालयज्ञोपवीतिनम् ।।
स्वदन्तं दक्षिणे हस्ते परशुं चाऽपरे करे ।
उत्पलं चोर्ध्वतो वामे तस्याधो मोदकं स्थितम् ।।
सिन्दूररक्तं कुम्भं च कुङ्कुमारुणविग्रहम् ।
कुर्याच्च मूषकारूढं सिद्धिदं सर्वकामदम् ।।

(iii) रूप० दन्तं च परशुं पद्मं मोदकांश्च गजाननः ।
गणेशो मूषकारूढो विभ्राणस्सर्वकामदः ।।

विनायकः
(i) अ० आ० स्थानकं वासनं वापि पद्मपीठे विशेषतः ।
स्वदन्तं दक्षिणे हस्ते वामहस्ते कपित्थकम् ।।
मोदकं गजहस्ते तु अङ्कुशं दक्षिणे परे ।
वामहस्ते तु पाशं वा नागं वाप्यक्षमालिका ।।
त्रिनेत्रं चतुर्भुजं ह्येवं दुकूलवसनान्वितम् ।
आभङ्गं समभङ्गं वा स्थानके तु प्रकल्पयेत् ।।
आसने त्वासनं चेत्तु वामपादं तु शाययेत् ।
वामेतरेणोरुमूर्ध्नि पादेनोत्कुटिकासनम् ।।
ईषद्वक्रतनुर्वामे कर्त्तव्यस्तु विशेषतः ।
व्यालयज्ञोपवीतो च किरीटमुकुटान्वितः ।।
सर्वाभरणसंयुक्तो महाकायो महोदरः ।

(ii) उ० कामि० गजवक्त्रो गणाधीशो भूतरूपो महोदरः ।
नागयज्ञोपवीतस्तु घनपिण्डोरुजानुकः ।।
नीलनीररूहाभस्तु चतुर्दोर्दण्डमण्डितः ।
अवामवामावर्तेभहस्तः पद्मासने स्थितः ।।
स्वदन्तं परशुं कुर्यात्स्वदक्षिणकरद्वये ।
लड्डुकं चाक्षमालां च वामपाणावथोत्पलम् ।।
रक्तवस्त्रधरं वापि श्यामाभं कनकप्रभम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पीतकञ्चुकसंछन्नं किरीटमुकुटोज्ज्वलम् ।।
शुक्लयज्ञोपवीतं च सर्वाभरणभूषितम् ।
स्वं शृङ्गं वाङ्कुशं दक्षे वामे पाशं च लड्डुकम् ।।
स्थानकं वासनं वाथ गणेशं कारयेत्ततः ।
त्रिभिर्विराजितं नेत्रैर्नेत्राभ्यामथवा द्विजाः! ।।
पद्मस्थं वापि पीठस्थं मूषिकस्थमथापि वा ।
इष्टासनस्थितो वापि प्रभादिपरिमण्डितः ।।
एवं स्यात्केवलो विघ्नराजश्शक्त्यान्वितोऽथवा ।
गणेशो भारतीश्रीभ्यां वामेऽवामे युतोऽथवा ।।
शक्त्यैकया युतो देवो यदि तल्लक्ष्म कथ्यते ।
आसीनमासने रत्नमुकुटादिविभूषितम् ।।
श्यामवर्णं तथा शक्तिं धारयन्तम् दिगम्बरम् ।
उत्सङ्गे निहितां देवीं सर्वाभरणभूषिताम् ।।
दिगम्बरां सुवदनां भुजद्वयसमन्विताम् ।
विघ्नेश्वरीति विख्यातां सर्वावयवसुन्दरीम् ।।
पाशहस्तां तथा गुह्यं दक्षिणेन करेण तु ।
स्पृशन्तीं देवमप्येवं चिन्तयेन्मन्त्रनायकम् ।।
चतुर्भुजं त्रिनेत्रं च पाशाङ्कुशधरं विभुम् ।
इक्षुखण्डकरोपेतं वामेन देविगुह्यकम् ।।
स्पृशन्तं पुष्करेणापि खण्डमिक्षोस्तु हे द्विजाः! ।
एवं सम्पाद्य तन्मन्त्रैः प्रतिष्ठामारभेद्द्विजाः ! ।।

(iii) सु० आ०

अथातः संप्रवक्ष्यामि विघ्नेशस्थापनं परम् ।
आदौ त्वहमुमासार्धं क्रीडार्थं हिमवद्वने ।।
करेणश्च गजेन्द्रेण सम्भोगमकरोत्ततः ।
यदृच्छया तु तं दृष्ट्वा तदाकारमगामहम् ।।
करेणोराकृतिं चोमां तदाक्रीडमहं भृशम् ।
तस्यां तु गर्भमदधां तस्मिन्काले तवोद्भवः ।।
फलं दक्षिणहस्ते तु वामहस्ते स्वश्रृङ्गकम् ।
पादाङ्कुशावूर्ध्वहस्ते तु गजहस्ते तु लड्डुकम् ।।
करण्डमुकुटं प्रोक्तं सर्वाभरणभूषितम् ।
शिरश्चक्रप्रभां कृत्वा पद्मपीठोपरिस्थितम् ।।
दाडिमीपुष्पसङ्काशं सर्वाभरणभूषितम् ।
आसनं स्थानकं वापि कारयेद्विघ्ननायकम् ।।

(iv) हे० व्र०; वि० ध०

विनायकस्तु कर्त्तव्यो गजवक्त्रश्चतुर्भुजः ।
स्थलकं चाक्षमाला च तस्य दक्षिणहस्तयोः ।।
पात्रं मोदकपूर्णं च परशुश्चैव वामतः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

दन्तश्चास्य न कर्तव्यो वामे रिपुनिषूदन! ॥
पादपीठकृतः पाद एक आसनगो भवेत् ।
पूर्णे मोदकपात्रे च कराग्रं तस्य कारयेत् ॥
लम्बोदरस्तथा कार्यस्स्तब्धकर्णश्च यादव ! ।
व्याघ्रचर्माम्बरधरस्सर्पयज्ञोपवीतवान् ॥

(v) शिल्प०
विनायकस्य वक्ष्यामि मूर्त्तिं चित्रोपयोगिनीम् ।
गजवक्त्रं त्रिनेत्रं च चतुर्बाहुं महोदरम् ॥
भग्नैकदन्तसंयुक्तं स्तब्धकर्णं समालिखेत् ।
नागोपवीतिनं कुब्जं पीनस्कन्धाङ्घ्रिपाणिकम् ॥
भग्नदन्तधरं चैकमन्यमुत्पलसंयुतम् ।
दक्षिणे विलिखेद्वामे सकुठारसलस्पृकौ ॥ (?) ॥
पार्श्वे बुद्धिकुबुद्धिभ्यामधस्तादधुनान्वितम् ।
आसीनमुत्तमे पीठे सिन्धुराननविग्रहम् ॥

बीजगणपतिः शिल्प०
रक्तो रक्ताङ्गरागांशुककुसुमयुतस्तुन्दिलश्चन्द्रमौलि—
र्नेत्रैर्युक्तस्त्रिभिर्वामनकरचरणो बीजपूरात्तनासः ।
हस्ताग्रक्लृप्तपाशाङ्कुशरदवरदो नागवक्त्रोऽहिभूषो
देवः पद्मासनो वो भवतु नतसुरो भूतये विघ्नराजः ॥

हेरम्बः
(i) रूप०
वरं तथाङ्कुशं दन्तं दक्षिणे च परश्वधः ।
वामे कपालं बाणाक्षपाशं कौमोदकीं तथा ॥
धारयन्तं करैरेभिः पञ्चवक्त्रं त्रिलोचनम् ।
हेरम्बं मूषकारूढं कुर्यात्सर्वार्थिकामदम् ॥

(ii) शिल्प०
सिंहोपरि स्थितं देवं पञ्चवक्त्रं गजाननम् ।
दशबाहुं त्रिनेत्रं च जाम्बूनदसमप्रभम् ॥
प्रसादाभयदातारं पात्रं पूरितमोदकम् ।
स्वदन्तं सव्यहस्तेन बिभ्रतं चापि सुव्रते! ॥
करकं चाक्षसूत्रं च परशुं मुद्गरं तथा ।
पाशाङ्कुशकरां शक्तिं देवं लम्बोदरं शुभम् ॥
पीवरं चैकदन्तं च तुम्बुरूणां गणान्वितम् ।

(iii) क्रियाक्र०
अभयवरदहस्तं पाशदन्ताक्षमाला—
परशुमथ त्रिशीर्षैर्मुद्गरैर्मोदकं च ।
विदधतु वरसिंहः पञ्चमातङ्गवक्त्रः,
कनकरुचिरवर्णः पातु हेरम्बनामा ॥

वक्रतुण्डः
रूप०
लम्बोदरं त्रिनयनं पाशाङ्कुशधरं परम् ।
वरदाभयहस्तं च लसत्कर्णं सचामरम् ॥

बालगणपतिः
(i) शिल्प०
बालः प्रसूतमात्रोऽयमम्बिकाङ्के निवेशितः ।
अतिरक्तो गजमुखो द्विरदो रत्नभूषितः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

चषकं पुष्करे बिभ्रत् सृणिपाशौ करद्वये ।
द्वाभ्यां कल्पलतां दोर्भ्यां दोलयन्रत्नवर्षिणीम् ॥
एवं ध्यात्वा जपेन्मन्त्रं बालाख्यं गणनायकम् ।

(ii) क्रियाक्र० — करस्थकदलीचूतपनसेक्षुकपित्थकम् ।
बालसूर्यप्रभाकारं वन्दे बालगणाधिपम् ॥

तरुणगणपतिः क्रियाक्र० — पाशाङ्कुशापूपकपित्थ जम्बूफलं तिलान्वेणुमपि स्वहस्तैः ।
धत्ते स दाथः तरुणोऽरुणाभः पायात्स युष्मांस्तरुणो गणेशः ।

भक्तविघ्नेशः क्रियाक्र० — नालिकेराम्रकदलीगुलपायसधारिणम् ।
शरच्छशाङ्कसदृशं भजे भक्तगणाधिपम् ॥

वीरविघ्नेशः क्रियाक्र० — वेतालशक्तिशरकार्म्मुकखेटखड्ग —
खट्वाङ्गमुद्गरगदाङ्कुशनागपाशान् ।
शूलं च कुन्तपरशुध्वजमुद्वहन्तं ।
वीरं गणेशमरुणं सततं स्मरामि ॥

शक्तिगणेशः (i) क्रियाक्र० — आलिङ्गय देवीं हरितां निषण्णां परस्परस्पृष्टकटीनिवेशाम् ।
सन्ध्यारुणं पाशसृणिं वहन्तं भयावहं शक्तिगणेशमीडे ॥

(ii) म० म० — विषाणाङ्कुशावक्षसूत्रं च पाशं
दधानं करैर्मोदकं पुष्करेण ।
स्वपत्न्या युतं हेमभूषाम्बराढ्यं
गणेशं समुद्यद्दिनेशाभमीडे ॥

ध्वजगणाधिपः क्रियाक्र० — यः पुस्तकाक्षगुणदण्डकमण्डलुश्री—
निर्वर्त्यमानकरभूषणमिन्दुवर्णम् ।
तं घोरमाननचतुर्भुजशोभमानं
त्वां संस्मरेद् ध्वजगणाधिपते! स धन्यः ॥

पिङ्गलगणापतिः क्रियाक्र० — पक्वचूतफलकल्पमञ्जरीमिक्षुसारतिलमोदकैः सह ।
उद्वहन्परशुहस्त ते नमः श्रीसहाययुत देवपिङ्गल! ॥

उच्छिष्टगणपतिः (i) क्रियाक्र० — लीलाब्जं दाडिमं वीणाशालिपुञ्जाक्षसूत्रकम् ।
दधदुच्छिष्टनामानं गणेशं वीरमेव च ॥

(ii) मं०म० — शरं धनुः पाशसृणी स्वहस्तैर्दधानमारक्तसरोरुहस्थम् ।
विवस्त्रपत्न्या सुरतप्रवृत्तमुच्छिष्टमम्बासुतमाश्रयेऽहम् ॥
चतुर्भुजं रक्ततनुं त्रिनेत्रं पाशाङ्कुशौ मोदकपात्रदन्तौ ।
करैर्दधानं सरसीरुहस्थमुन्मत्तमुच्छिष्टगणेशमीडे ॥

विघ्नराजगणपतिः (ii) क्रियाक्र० — पाशाङ्कुशौ धरन्नाम्रफलाशी चाखुवाहनः ।
विघ्नं विहन्तु नस्सर्वं रक्तवर्णो विनायकः ।

लक्ष्मीगणेशः (i) क्रियाक्र० — बिभ्राणश्शुकबीजपूरकमलं माणिक्यकुम्भाङ्कुशा—
न्पाशं कल्पलतां च बाणकलिकास्रोतस्सरो निस्सरः (?) ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

श्यामो रक्तसरोरुहेण सहितो विद्वन्नयेनान्तिके (?)
गौराङ्गो वरदादिहस्तकमलो लक्ष्मीगणेशो महान् ॥

(ii) मं०म० दन्ताभये चक्रधरं दधानं कराग्रगस्वर्णघटं त्रिनेत्रम् ।
धृताब्जयालिङ्गितमब्धिपुत्र्या लक्ष्मीगणेशं कनकाभमीडे ॥

महागणेशः बिभ्राणोब्जकबीजपूरकगदा दन्तेक्षुवाणैस्समं
क्रियाक्र० बिभ्राणो मणिकुम्भशालिकणिशं पाशं च वक्त्रान्वितम् ।
गौराङ्ग्या रुचिरारविन्दयुतया देव्या सनाथान्तिक—
श्शोणाङ्गश्शुभमातनोतु भवतां नित्यं गणेशो महान् ॥

भुवनेशगणपतिः शङ्खेक्षुचापकुसुमेषुकवामदन्त—
क्रियाक्र० पाशाङ्कुशैः कलममञ्जरिकासनाथैः ।
पाणिस्थितैः परिसमावृतभूषणश्री—
विघ्नेश्वरो विजयते कमनीयगौरः ॥

नृत्तगणपतिः पाशाङ्कुशापूपकुठारदन्तचञ्चत्करं वलय ··· मङ्गुलीयकम् ।
क्रियाक्र० पीतप्रभं कल्पतरूस्तं भजामि नृत्तैकपदं गणेशम् ॥

ऊर्ध्वगणेशः कल्हारशालिकणिशेक्षुकचापबाण—
क्रियाक्र० दन्तप्ररोहकभरः कनकोज्वलाङ्गः ।
आलिङ्गनोद्यतकरस्तटिदाभकट्या
देव्या दिशत्वभयमूर्ध्वगणेश्वरस्ते ॥

प्रसन्नगणेशः उद्यद्दिनेश्वररुचिं निजहस्तपद्मैः
मं० र० पाशाङ्कुशाभयवरान्दधतं गजास्यम् ।
रक्ताम्बरं सकलदुःखहरं गणेशं
ध्यायेत्प्रसन्नमखिलाभरणाभिरामम् ॥

उन्मत्तविनायकः चतुर्भुजं रक्ततनुं त्रिनेत्रं पाशाङ्कुशौ मोदकपात्रदन्तौ ।
मं० म० करैर्दधानं सरसीरुहस्थमुन्मत्तमुच्छिष्टगणेशमीडे ॥

हरिद्रागणेशः पाशाङ्कुशौ मोदकमेकदन्तं करैर्दधानं कनकासनस्थम् ।
मं० र० हारिद्रखण्डप्रतिमं त्रिनेत्रं पीतांशुकं रात्रिगणेशमीडे ॥

गणेशायतनम्

(i) अ० पृ० वामे तु गजकर्णं च सिद्धिं दद्याच्च दक्षिणे ।
द्वौ पृष्ठकर्णयोश्चैव धूम्रको बालचन्द्रमाः ।
उत्तरे तु सदा गौरी याम्ये चैव सरस्वती ॥
पश्चिमे यक्षराजस्तु बुद्धिः पूर्वे तु संस्थिता ।

(ii) रूप० वामाङ्गे गजकर्णं तु सिद्धिं दद्याच्च दक्षिणे ।
पृष्टिकर्णेस्तथाद्वौ ? च धूम्रको बालचन्द्रमाः ॥
उत्तरे तु सदा गौरी याम्ये चैव सरस्वती ।
पश्चिमे यक्षराजश्च बुद्धिः पर्वक्संस्थिता ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

गणेशप्रतीहाराः

(i) अ० पृ०

अविघ्नो विघ्नराजश्च सुवक्त्रो बलवानथ।
गजकर्णश्च गोकर्णः सौम्यश्चभयदाकः ॥
सर्वे तु वामनाकाराः सौख्यदाः पुरुषाननाः।
तर्जनी परशुः पद्मं दण्डौ हस्तेष्वविघ्नकः ॥
तर्जनी दण्डापसव्ये स भवेद्विघ्नराजकः।
पूर्वद्वारोभयभागे सर्वविघ्नविनाशकः ॥
तर्जनी खड्गखेटौ तु दण्डो हस्तैः सुवक्त्रकः।
तर्जनी दण्डापसव्ये बलवांश्च समीरितः ॥
तर्जनी बाणचापौ च दण्डश्चक्राब्जकर्णकः।
तर्जनी दण्डपसव्ये गोकर्णः पश्चिमस्थितः ॥
तर्जनीपद्माङ्कुशाश्च दण्डश्चैव स सौम्यकः ॥
शस्त्रापसव्ये च तथा भवेदभयदायकः ॥
द्वारपक्षौ सर्वदिक्षु स्थाप्या विघ्नविनाशनाः।
इत्यष्टौ च प्रतीहारा नृपाणां शान्तिमिच्छता ॥

(ii) रूप०

सर्वे च वामनाकारास्सौम्याश्च परुषाननाः।
तर्जनी परशुः पद्ममविघ्नो दण्डहस्तकः ॥
तर्जनीदण्डापसव्ये स भवेद्विघ्नराजकः।
तर्जनी खड्गखेटं तु दण्डहस्तस्सुवक्त्रकः ॥
तर्जनी दण्डापसव्ये दक्षिणे बलवान्भवेत्।
तर्जनी बाणचापं च दण्डं च गजकर्णकः ॥
तर्जनी दण्डापसव्ये गोकर्णः पश्चिमे स्मृतः।
तर्जनीपद्माङ्कुशं च दण्डहस्तः सुसौम्यकः ॥
तर्जनीदण्डापसव्ये स चैव शुभदायकः।
पूर्वद्वारादिके सर्वे प्राच्यादिष्वष्ट संस्थिताः ॥

ब. सेनापतिः कार्तिकेयः

सेनापतिः
(i) कु० त०

नौम्यादित्यप्रदीप्तं द्विदशनयनकं षण्मुखं मन्दहासं
वामाङ्के सुस्थितायास्सरसिरूहधृतालिङ्गितायाः प्रियायाः।
उत्तुङ्गोरुस्तनाग्रे विहितकरतलभीतिखेटादिशूल—,
ह्लादिन्युद्दीप्तशक्तीष्वसनघनगदाकुक्कुटाब्जेषुहस्तम् ॥

(ii) श्रीतत्व०

एकवक्त्रं द्विनयनं शङ्खचक्रवराभयान्।
सर्वाभरणसंयुक्तं दिव्यगन्धानुलेपनम् ॥
श्यामवर्णं प्रभुं चव शुक्लयज्ञोपवीतिनम्।
सुस्मितं चारूवदनं देवसेनापतिं भजे ॥

कर्तिकेयः
(i) कु० त०

वरदकुलिशखेटं वामहस्तत्रये च
दधतमभयशक्तिं खड्गममन्यत्त्रये च।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तरुणरविसमाभं साधुभिः पूज्यमानं,
कमलवदनषट्कं कार्तिकेयं नमामि ॥

(ii) श्रीतत्व० त्रिनेत्रं दशहस्तं च मस्तके विल्वधारिणम् ।
शक्तिं शूलं तथा चक्रमङ्कुशाभयमन्यके ॥
वरदं तोमरं पाशं शङ्खं वज्रं च वामके ।
मयूरवाहनारूढं सर्वाभरणभूषितम् ॥
बालसूर्यप्रतीकाशं कार्तिकेयं शिवात्मजम् ।

(iii) स० सू० कार्त्तिकेयस्य संस्थानमिदानीमभिधीयते ।
तरुणार्कनिभो रक्तवासाः पावकसप्रभः ॥
ईषद्बालाकृतिः कान्तो मङ्गल्यः प्रियदर्शनः ।
प्रसन्नवदनः श्रीमानोजस्तेजोऽन्वितः शुभः ॥
विशेषान्मुकुटैश्चित्रैः मुक्तामणिविभूषितः ।
षण्मुखो वैकवक्त्रो वा शक्ति रोचिष्मतीं दधत् ॥
नगरे द्वादशभुजः खेटके षड्भुजो भवेत् ।
ग्रामे भुजद्वयोपेतः कर्तव्यः शुभमिच्छता ॥
शक्तिश्शरस्तथा खड्गो मुसृण्ठी मुद्गरोऽपि च ।
हस्तेषु दक्षिणेष्वेतान्यायुधान्यस्य दर्शयेत ॥
एकः प्रसारितश्चान्यः षष्ठो हस्तः प्रकीर्तितः ।
धनुः पताका घण्टा च खटः कुकुटकस्तथा ॥
वामहस्तेषु षष्ठस्तु तत्र संवर्धनः करः ।
एवमायुधसम्पन्नः संग्रामस्थो विधीयते ॥
अन्यदा तु विधातव्यः क्रीडालीलान्वितश्च सः ।
छागकुक्कुटयुक्तः शिखियुक्तो मनोरमः ॥
नगरेषु सदा कार्यः स्कन्दः परजयैषिभि : ।
खेटके तु विधातव्यः षण्मुखो ज्वलनप्रभः ॥
तथा तीक्ष्णायुधोपेतः स्रग्दामभिरलङ्कृतः ।
ग्रामेऽपि द्विभुजः कार्यः कान्तिद्युतिसमन्वितः ॥
दक्षिणे च भवेच्छक्तिर्वामे हस्ते तु कुक्कुटः ।
विचित्रपक्षः सुमहान् कर्तव्योऽतिमनोहरः ।
एवं पुरे खेटके च ग्रामे······शुभम् ।
कार्तिकेय कुर्यादाचार्यः शास्त्रकोविदः ॥
अविरुद्धेषु कार्येषु खेटे ग्रामे पुरोत्तमे ।
कार्तिकेयस्य संस्थानमेतद् यत्नेन कारयेत् ॥

(iv) अ० पृ० षड्वक्त्रं द्वादशभुजं लोचनत्रयसंयुतम् ।
शिखिपारूढं मांसलं च कुमारं कुमाराकृतिम् ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

शरं शक्तिञ्च खड्गं च अङ्कुशं दण्डमेव च ।
अक्षसूत्रं षडेतानि वामकेषु भुजेषु च ॥
शृङ्गं धनुः पाशखेटं वरदञ्चकमण्डलुम् ।
दक्षिणेषु भुजेष्वेवमस्त्राणां षट्कमेव च ॥

सेनानी: कु० त०
अभयमसिरथाङ्गं चाङ्कुशं शक्तिशूलं
वरदकुलिशपाशं पद्मदण्डौ गदां च ।
दधतमुभयपक्षद्वादशायामहस्तै—
र्द्विदशकमलनेत्रं देवसेनान्यमीडे ॥

कुमार: (i) वि० ध०
कुमारष्षण्मुखः कार्यश्शिखण्डकविभूषणः ।
रक्ताम्बरधरः कार्यो मयूरवरवाहनः ॥
कुक्कुटश्च तथा घण्टा तस्य दक्षिणहस्तयोः
पताका वैजयन्ती च शक्तिः कार्या च वामयोः ॥

(ii) श्रीतत्व०
चतुर्भुजं चैकुवक्त्रं करण्डमकुटान्वितम् ।
शक्तिं चाभयद दक्षे सव्ये वरदवज्रके ॥
पद्मपुण्पं धरं कण्ठे देवं बालस्वरूपकम् ।

(iii) कु० त०
सव्यद्वये निशितशक्त्यसिमादधानं
वामद्वयेऽभिमतकुक्कुटखेटकं त्वाम् ।
वल्लीपतिं विबुधलोचनपूर्णचन्द्रं
कल्याणदाननिरतं कलये कुमारम् ॥

स्कन्द: (i) बृ० स०
स्कन्दः कुमाररूपश्शक्तिधरो वर्हिकेतुश्च ।

(ii) पू० का०
रक्ताम्दरसुदृक् स्तोकबालो बालार्कसन्निभः ।
शिखण्डमणिको ग्रीवमांसलः प्रियदर्शनः ॥
शक्तिस्तु विलसत्खडगचक्रपाशप्रसारितः ।
दक्षिणेऽदक्षिणे रक्तचूडखेटककार्मुकः ॥
पताका पिञ्छिकामुष्टिस्तर्जनी च प्रसारिता ।
गुहो द्वादशबाहुस्स्यात्पुरीखेटकपत्तने ॥
चतुर्दोर्भिर्वाथ षड्दोर्भिस्संयुक्तं परिकल्पयेत् ।
सशक्तिस्साभयस्सासिस्साक्षमालस्सकुक्कुटः ॥
सखेटश्च सषड्बाहुश्चतुर्दोस्सासिखेटकः ।
सशक्तिकुक्कुटस्स्वेकवक्त्रकः कुङ्कुमच्छविः ॥
मयूरारोहसर्वत्र भ्रामराह्यद्विबाहुकः? ।
वासिकाबद्धमकुटस्सुब्रह्मण्यस्सुसुन्दरः ॥
स्कन्दस्याकृतिरेवं तु आर्यस्याकृतिरुच्चते ।

(iii) कु० त०
कल्पद्रुमं प्रणमतां कमलारुणाभं,
स्कन्दं भुजद्वयमनामयमेकवक्त्रम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कात्यायनीसुतमहं कटिबद्धदाम
कौपीनदण्डधरदक्षिणहस्तमीडे ॥

सामान्यस्कन्दः
(iii) सु० आ०

अथातस्संप्रवक्ष्यामि स्कन्दस्य स्थापनं परम् ।
तस्योद्भवं समासेन शृणु पूर्वं गजानन:! ॥
देहत्यागेऽपि तां दृष्ट्वा तद्योगमहमभ्यसन् ।
सती चाङ्गं पुनर्गत्वा सुता हिमवतस्तथा ॥
गिरिपार्श्वे तपः कृत्वा तत्सुता पार्वती भवेत् ।
आवयोस्सङ्गमं तत्र देवैस्सम्प्रार्थितो यतः ॥
रेतो वह्निस्तु संग्राह्य क्षिप्त्वा शरवणे च तु ।
तस्माच्छरवणोभावो नाम इत्यपि कीर्तितः ॥
षट्कृत्तिकायां स्तन्यपानःत् षण्मुखस्त्वभिधीयते ।
तेनैव कार्तिकेयस्तु बालानां हितकृद्भवेत् ॥
प्रासादं विधिवत्कृत्वा प्रतिमां तदनन्तरम् ।
शिलामृद्दारुलोहैर्वा नवतालेन मानयेत् ॥
द्विहस्तो वा चतुर्बाहुरष्टबाहुरथापि वा ।
द्विभुजं पद्महस्तं तु वज्रं शक्तिं तथापरे ॥
अभयं वरदं पूर्वे चतुर्बाहुरिति स्मृतम् ।
खड्गखेटकमूर्ध्वे तु पाशं पद्मं तथाष्टकम् ॥
आसनं स्थानकं वापि यानं वै त्रिविधं तथा ।
आसनं द्विभुजं प्रोक्तं स्थानकं स्याच्चतुर्भुजम् ॥
यानमष्टभुजे कुर्यात्स्थापनं परिवारिके ।
स्कन्दं पद्मगजारूढमुपवीतसमन्वितम् ॥
दाडिमीपुष्पसङ्काशं सर्वाभरणभूषितम् ।
सर्वलक्षणसंयुक्तं पूर्वोक्तेन विधानतः ॥
विद्यामेधा च सहिते शुक्लश्यामनिभे तथा ।
सर्वालङ्कारसंयुक्ते द्विभुजे पद्मधारिके ॥

स्कन्द-षण्मुखः
(i) अ० आ०

अथ वक्ष्ये विशेषेण षण्मुखस्य तु लक्षणम् ।
पञ्चतालोत्तमेनैव स्कन्दं कुर्याद्विशेषतः ॥
द्विभुजं वा चतुर्हस्तं षड्भुजं भानुहस्तकम् ।
शक्तिं बाणं च खड्गं च चक्रं पाशं प्रसारितम् ॥
सव्ये वाम तु पिञ्छं च खेटकं कुक्कुटं तथा ।
धनुर्दण्डं हलं चैव भानुहस्तान्यतोद्धृतम् ॥
षड्भुजे त्वभयं खड्गं शक्तिर्दक्षिणपार्श्वके ।
खेटकं चाक्षमाला च कुक्कुटं वामहस्तके ॥
चतुर्भुजेऽभयं शक्तिर्दक्षिणे तु करद्वये ।
कुक्कुटं चाक्षमाला च वामहस्तोद्धृतं शुभम् ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

द्विभुजे कुक्कुटं वामे शक्तिर्दक्षिणहस्तके ।
अत्रानुक्तं तु तत्सर्वमुमास्कन्दोक्तवत्कुरु ॥

(ii) वृ० त० वन्दे सिन्दूरकान्तिं शरविपिनभवं श्रीमयूराधिरूढं
षड्वक्त्रं देवसैन्यं मधुरिपुतनयावल्लभं द्वादशाक्षम् ।
शक्तिं वाणं कृपाणं ध्वजमपि च गदां चाभयं सव्यहस्ते
चापं वज्रं सरोजं कटकमपि वरं शूलमन्यैर्दधानम् ॥

(iii) शिल्प० विलिखेत् षण्मुखं देवं मयूरवरवाहनम् ।
तरुणादित्यसङ्काशं बालभूषणभूषितम् ॥
स्थानीये खेटके वापि कुमारो लिख्यते यदा ।
भुजान् द्वादश कुर्वीत खर्वटे चतरो भुजान् ॥
ग्रामे वने द्विवाहुस्स्याल्लेखनीयो विचक्षणैः ।

(iv) श्रीतत्व० शक्तिं शरं च खड्गं च चक्रं पाशाभयौ तथा ।
कुक्कुटं च धनुः खेटं शङ्खं धत्ते हलं वरम् ॥
मयूरवाहनोपेतं सर्वलक्षणसंयुतम् ।
जया च विजया चैव वामदक्षिणपार्श्वयोः ॥
सर्वालङ्कारसंयुक्तं सर्वाभरणभूषितम् ।
षण्मुखं चेति विख्यातं... ... ... ॥

पञ्चविधः स्कन्दः
उ० कामि० ईशाने कल्पयेत्स्कन्दचण्डं वेदकरं वरम् ।
अभयं वज्रपद्मे च वहन्तं द्विभुजं तु वा ॥
शाकल्यसंज्ञया ख्यातं तदर्थं पीठमेव वा ।
लक्षणं तस्य संक्षेपाच्छृणुध्वं द्विजसत्तमाः! ॥
द्रव्यैश्शिलादिभिः कुर्यात्प्रतिमालक्षणोदितैः ।
प्रतिमालक्षणे प्रोक्तं विश्वमानं गुहस्य तु ॥
योजनीयं द्विजा गर्भद्वारस्तम्भादिसंयुतम् ।
द्विभुजश्च द्विनेत्रश्च सुब्रह्मण्यस्सुसुन्दरः ॥
पद्मधृक् सव्यसत्पाणिर्लम्बितेतरसत्करः ।
बालरूपी प्रतिष्ठाप्यो ग्रामस्यैवाभिवृद्धये ॥
द्विहस्तो यज्ञसूत्राढ्यस्सशिखस्सत्रिमेखलः ।
कौपीनदण्डधृकसव्यपाणिः कटचाश्रितोऽपरः ॥
स्थाप्योऽयं ज्ञानदस्स्कन्दः पर्वतेषु वनादिषु ।
चतुर्भुजस्त्रिनेत्रश्च कर्णयोः पत्रपिण्डयुक् ॥
नक्रकुण्डलयुक्तो वा ह्यक्षशक्तिकरद्वयः ।
वरदाभयसंयुक्तश्शक्तिद्वययुतो न वा ॥
शक्त्यैकया युतो वा स्यात्तयोर्लक्षणमुच्यते ।
द्विनेत्रे द्विभुजे शान्ते पद्मोत्पलकरद्वये ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

श्यामरक्तनिभे सव्यवामपार्श्वे व्यवस्थिते ।
गौरीलक्षणसंयुक्ते कल्पयेत्तु शिवानने ॥
गजेति गजवल्लीति नाम्ना ख्यातेऽतिसुन्दरे ।
इत्थं लक्षणयुक्स्थाप्यः पुरे वा नगरेऽपि वा ॥
षडाननश्च षड्बाहुरर्कश्रोत्रेक्षणान्वितः ।
षट्कर्णस्त्वर्ककर्णो वा षड्भिर्मौलिभिरन्वितः ॥
सशक्तिस्साभयस्सासिस्साक्षमालस्सकुक्कुटः ।
सखेटकस्त्वयं स्थाप्यो वृद्धये राजधानिके ॥
रक्ताम्बरसमायुक्तो बालचन्द्रसमप्रभः ।
करण्डमकुटोपेतो नेत्रत्रयसमन्वितः ॥
शक्तिं च मुसलं खड्गं चक्रं पाशाभये वहन् ।
दक्षिणेऽदक्षिणे वज्रं कार्मुकं खेटकं तथा ॥
मयूरं च ध्वजं चैवमङ्कुशं वरदं वहन् ।
सोपवीतो मयूरस्थश्शक्तिद्वयसमायुतः ॥
ग्रामादौ स्थापनीयोऽयं प्रसादादौ च सिद्धये ।
एवं पञ्चविधः स्कन्दविभागस्स्थानभेदतः ॥
द्वापरे स्यान्त वान्यत्र सर्वे सर्वत्र वा मताः ।

विविधबाहुयुक्तः विविधवर्णश्च स्कन्दः कु० त०

चतुर्भुजं द्विबाहुं च शान्तं सिद्धिप्रदं स्मृतम् ।
द्विभुजश्च चतुर्बाहुष्षड्भुजोऽष्टभुजः पुनः ॥
द्विषड्भुजः पञ्चभेदा एतेषां लक्षणं शृणु ।
द्विहस्ते पञ्चभेदोऽस्ति कटिबद्धाभयं तु वा ॥
पद्मधृक् सकबद्धं वा दण्डेन कटिबद्धकम् ।
शक्तिवज्रधरं वापि शक्तिकुक्कुटमेव च ॥
चतुर्भुजस्सप्तभेदं वज्रशक्तिवराभयम् ।
अभयं वरदं पश्चादक्षमालाकमण्डलुम् ॥
ततो वै कुण्डि अक्षस्रुक् कटिबन्धाभयान्वितम् ।
पश्चादभीतिवरदं शक्तिकुक्कुटसंयुतम् ॥
ततोऽभयं च शक्तिं च कुक्कुटं चाक्षमालिकाम् ।
शक्तिं कमण्डलुं पश्चात् कटिवद्धाभयं तु वा ॥
पश्चात्कुक्कुटशक्तिभ्यामसिखेटसमायुतम् ।
षड्भुजे त्वभयं खड्गं शक्तिं दक्षिणपाणिषु ॥
खेटकं चाक्षमालां च कुक्कुटं वामपाणिषु ।
अष्टबाहुं ततो वक्ष्ये वराभीवज्रशक्तयः ॥
खड्गखेटशरं चापं द्विषड्भुजमथ शृणु ।
द्विषड्भुजेऽपि षड्भेदं तत्तद्भेदं वदाम्यहम् ॥
सव्ये शक्तिशरं खड्गध्वजं चैव गदाभयम् ।
वामे वज्रं धनुः खेटं पद्मं शूलं वरं पुनः ॥
शक्तिं बाणं च खड्गं च चक्रं पाशं प्रसारितम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सव्ये वामेऽपि चक्रं च शङ्खं वै कुक्कुटं तथा ॥
धनुर्दण्डं हलं चैव विश्वामित्रमहामुने! ।
शक्तिं च मुसलं खड्गं चक्रं पाशं तथाभयम् ॥
वज्रं धनुर्ध्वजं खेटमङ्कुशं वरदं तु वा ।
शक्तिं खड्गं ध्वजं पद्मं कुक्कुटं प्रासदण्डके ॥
वराभयधनुर्बाणा टङ्कमेतैर्युतं तु वा ।
वज्रं शक्तिं च दण्डं च चक्रं पाशाङ्कुशं गदाम् ॥
शूलं च चक्रपद्मे च वरदाभयसंयुतम् ।
शक्तिं चर्ममसिं शूलं विशिखाभीतिकार्मुकम् ॥
चक्रं पाशं कुक्कुटं च वरदं द्वादशैः करैः ।
दधानं षण्मुखं शान्तं प्रतिवक्त्रं त्रिलोचनम् ॥
एवं विधानं षड्वक्त्रमेकास्यं वाथ कल्पयेत् ।
कुङ्कुमाभं द्वादशाक्षं सर्वाभरणभूषितम् ॥
आसनं स्थानकं वापि यानकं त्रिविधं स्मृतम् ।
आसनं द्विभुजं प्रोक्तं स्थानकं च चतुर्भुजम् ॥
द्विषड्भुजं चाष्टबाहुं षड्बाहुं ध्यानरूपकम् ।
योगं भोगं च यानं बेरं तु त्रिविधं पुनः ॥
आसनं योगबेरं स्यात् स्थानकं भोगबेरकम् ।
यानकं यानबेरं स्यान्नागरादिक्रमं तथा ॥
सात्विकं द्विभुजं बेरं राजसं स्याच्चतुर्भुजम् ।
तामसं द्वादशभुजमेवं स्यादर्चनाविधौ ॥
पीतं वा रक्तवर्णं वा श्यामवर्णमथापि वा ।
स्कन्दं पद्मासनस्थं वा मयूरारूढमेव वा ॥
गजेन्द्रयानकं वापि शक्त्येकासहितं तु वा ।
शक्तिं विनापि कर्तव्यं सोपवीतं सुयौवनम् ॥
छन्नवीरसमायुक्तं पादनूपुरसंयुतम् ।
पत्रकर्णयुतं कान्तं नानाकुण्डलकं तु वा ॥
मन्दस्मितं बालवेषं शोभनाङ्गं शुभेक्षणम् ।
करण्डमकुटोपेतं सर्वलक्षणसंयुतम् ॥
शक्तिद्वययुतं वापि शक्त्यैकसहितं तु वा ।
शक्तिं विनापि कर्तव्यं योगबेरं तदीरितम् ॥
देव्योरुत्सेधमद्यैव शृणु कौशिक सुव्रत! ।
कर्णान्तं वास्य सीमान्तं हन्वन्तं बाहुतुङ्गकम् ॥
हिक्कान्तं वा स्तनान्तं वा कल्पयेदुत्तमानि च ।
मध्यमं दशतालेन देव्यौ च परिकल्पयेत् ॥
महावल्लयाकृतिं वक्ष्ये श्याममन्दस्मिताननम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स्थितं वै सव्यपादं तु वामपादं तु कुञ्चितम् ॥
पद्मधृग्वामहस्तं च सव्यहस्तं प्रलम्बितम् ।
देवसेनाकृतिं वक्ष्ये रक्तं मन्दस्मिताननम् ॥
स्थितं वै वामपादं तु दक्षपादं तु कुञ्चितम् ।
उत्पलं सव्यहस्तं च वामहस्तं प्रलम्बितम् ॥

सुब्रह्मण्यः
(i) कु० त०

सिन्दूरारुणमिन्दुकान्तिवदनं केयूरहारादिभि—
र्दिव्यैराभरणैर्विभूषिततनुं स्वर्गादिसौख्यप्रदम् ।
अम्भोजाभयशक्तिकुक्कुटधरं रक्ताङ्गरागांशुकं
सुब्रह्मण्यमुपास्महे प्रणमतां भीतिप्रणाशोद्यतम् ॥
एकवक्त्रं द्विदोर्दण्डं कटिबद्धाभयान्वितम् ।
तरुणारुणसङ्काशं सुब्रह्मण्यमुपास्महे ॥

(ii) श्रीतत्व०

चतुर्भुजं द्विनेत्रं च श्वेतपद्मासनस्थितम् ।
कुक्कुटाभयवज्राणि दधतं वरदं करे ॥
किञ्चित्केशशिखाबद्धपुष्पमालाभिरावृतम् ।
मेखलाम्बरसंवीतं रत्नभूषणभूषितम् ॥
धूम्रवर्णप्रभं स्कन्दं प्रभामण्डलमण्डितम् ।

ज्ञानशक्तिसुब्रह्मण्यः
श्रीतत्व०

एकवक्त्रं द्विनेत्रं च जटामकुटसंयुतम् ।
श्वेतार्कपुष्पमालं च हेमरत्नकिरीटिनम् ॥
चतुर्भुजैर्वज्रशक्तिंकुक्कुटाभयधारिणम् ।
दिव्यगन्धानुलिप्ताङ्गं शुक्लयज्ञोपवीतिनम् ॥
शिवशक्तिज्ञानयोगं ज्ञानशक्तिस्वरूपकम् ।

अग्निजातसुब्रह्मण्यः
श्रीतत्व०

द्विमुखं चाष्टबाहुं च श्वेतं वा श्यामकन्धरम् ।
स्रुवाक्षमालां खड्गं च स्वस्तिकं दक्षिणे करे ॥
कुक्कुटं खेटकं वज्रमाज्यपात्रं तु वामके ।
अग्निहोत्रविधिं देवमग्निजातस्वरूपकम् ॥

सौरभेयसुब्रह्मण्यः
श्रीतत्व०

चतुर्वक्त्राष्टनयनं भुजाष्टकमलासनम् ।
कुञ्चितं वामपादं च सुस्थितं दक्षिणं पदम् ॥
शक्त्युत्पले पुष्पबाणमभयं दक्षिणे करे ।
वज्रं चेक्षुधनुश्शूलं वरदं वामके दधम् ॥
पद्मपुष्पनिभं चैव सौरभेयस्वरूपकम् ।

गाङ्गेयसुब्रह्मण्यः
श्रीतत्व०

एकवक्त्रं त्रिनयनं दाडिमीकुसुमप्रभम् ।
करण्डमकुटोपेत कुक्कुटध्वजधारिणम् ॥
नीलोत्पलधरं वन्दे मकरारूढमव्ययम् ।
परशुं पूर्णकुम्भं च सव्यहस्ते तु धारिणम् ॥
अरणिं कुक्कुटं वामे गाङ्गेयसमरूपकम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

गुहसुब्रह्मण्य: श्रीतत्व०	चतुर्भुजं त्रिनेत्रं च हेमरत्नकिरीटिनम् । शूलं वज्रं धरं सव्ये वराभयकमन्यके ॥ श्वेतवस्त्रधरं देवं सर्वेषां रक्षणोन्मुखम् । जायया वामपार्श्वे तु कल्याणोत्सवविग्रहम् ॥ पादाम्बुजं हृदि ध्यात्वा गुहरूपं समाश्रये ।
ब्रह्मचारिसुब्रह्मण्य: श्रीतत्व०	द्विनेत्रं द्विभुजं चैव बालसूर्यधरं प्रभुम् । दक्षभागे दण्डहस्तं वज्रवामोरुहस्तकम् ॥ सव्यापसव्यपादं तु स्थितं वा कुञ्चितं तु वा । शिखायज्ञोपवीताढयं मौञ्जीकौपीनसंयुतम् ॥ मेखलोपरिवडयाणं रक्तपद्मोपरि स्थितम् । दिव्यरूपधरं देवं ब्रह्मचारिणमाश्रये ॥
देशिकसुब्रह्मण्य: श्रीतत्व०	षड्भुजं चैकवदनं करण्डमकुटान्वितम् । शक्तिहस्तद्वयं चैव जपमालाधरं शुभम् ॥ मयूरवाहनारूढं वराभयकराम्बुजम् । इत्येवं विधिवद् ध्यायेच्छिवदेवस्य 'देशिकम् ॥
शक्तिधर: कु० त०	एकास्यं द्विभुजं वामे वज्रं दक्षिणजे करे । इच्छाज्ञानक्रियाशक्तिरूपं शक्तिधरं भजे ॥
गजवाहन: कु० त०	एकाननं द्विनयनं वरकुक्कुटौ च वामद्वये निशितशक्त्यभयद्वयं च । बिभ्राणमीश्वरसुतं तपनायुताभं नित्यं नमामि गजवाहनमिष्टसिद्धयै ॥
शरवणभव: (i) कु०त०	शक्तिं घण्टां ध्वजसरसिजे कुक्कुटं पाशदण्डौ टङ्कं बाणं वरदमभयं कार्मुकं चोद्वहन्तम् । पीतं सौम्यं द्विदशनयनं देवसङ्घरूपास्यं सद्भिः पूज्यं शरवणभवं षण्मुखं भावयामि ।
(i) श्रीतत्व०	षड्भुजं चैकवदनं बालसूर्यसमप्रभम् । सर्वाभरणसंयुक्तं सिंहस्थं दधतं भजे ॥ त्रिनेत्रं भसितोद्धूलं पुष्पबाणेक्षुकार्मूकम् । खड्गं खेटं च वज्रं च कुक्कुटध्वजधारिणम् ॥
तारकारि: (i) कु० त०	वरदमङ्कुशध्वजे च कटकौ चापवज्र— मभयपाशचक्रखड्गमुसलशक्तिमन्वहम् । द्विदशपाणिभिर्दधानमरुणकोटिसन्निभं भजत तारकारिमत्र भवविनाशकारणम् ॥
(ii)श्रीतत्व०	एकवक्त्रं त्रिनयनं गजपृष्ठोपरि स्थितम् । षण्मुखं चाभयं खड्गं शक्तिं वामेतरे दधम् ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

खेटकं चाक्षमालां च कुक्कटं वामहस्तके ।
तारकारिं भजे ख्यातं ……………………………… ॥

ब्रह्मशास्ता
कु० त०

वामे करे च युगले करकुण्डिके च
सव्येऽक्षसूत्रमभयं दधतं विशाखम् ।
वल्ल्या युतं वनजलोचनमेकवक्त्रं
वन्दामहे वनजसंभवशासितारम् ॥

वल्लीकल्याणसुन्दरः
कु० त०

हस्तद्वन्द्वेऽक्षमालामभयमपि धृतं कुण्डिकां श्रोणिबन्धं
सव्येवामे निषण्णस्स्रुवधृतविधिना हूयमानेन युक्तम् ।
सर्वालङ्कारयुक्तं जलकलशधृता विष्णुना चारुणाभं
वल्लीकल्याणमूर्तिं सकलसुरगणैस्स्तूयमानं प्रपद्ये ॥

बालस्वामी
कु० त०

पद्मसव्यकटिसंयुतवामं पद्मकान्तिनिभमेकमुखं च ।
बालवृद्धिकरमीश्वरसूनुं बालमुन्नतभुजं प्रणतोऽस्मि ।

क्रौञ्चभेत्ता
(i) कु०त०

अभयशितकृपाणौ शक्तिबाणौ च सव्ये
वरदकुलिशचापं खेटकं चान्यहस्ते ।
दधतममरसेनानायकं चाष्टबाहुं
कमलवदनषट्कं क्रौञ्चभेत्तारमीडे ॥

(i) श्रीतत्व०

चतुर्भुजं त्रिनेत्रं च स्थितं सिंहासनोपरि ।
वरदाभयसंयुक्तपुष्पबाणेक्षुकार्मुकम् ॥
मयूरवाहनारूढं नमस्ये रक्षणोन्मुखम् ।
क्रौञ्चभेदकरद्वन्द्वं क्रौञ्चभेदिस्वरूपकम ॥

शिखिवाहः
(i) कु० त०

विद्रुमप्रभमेकमुखं विभुं वज्रशक्तिवरदाभयपाणिम् ।
देवलोकरिपुघ्नमविघ्नदं नौमि रुद्रभवं शिखिवाहम् ॥
दाडिमीपुष्पसङ्काशं गुञ्जाभं कुङ्कुमाकृतिम् ।
षड्वक्त्रसहितं देवं द्वादशाक्षं सुयौवनम् ॥
चतुर्भुजमुदाराङ्गं यज्ञसूत्रेण संयुतम् ।
वरदाभयसंयुक्तं कमण्डल्वक्षधारिणम् ॥
नक्रकुण्डलसंयुक्तं करण्डमकुटोज्ज्वलम् ।
हारकेयूरकटककटिसूत्रैर्विभूषितम् ॥
रत्नविद्रुमभूषाढ्यं द्यन्नवीरसमायुतम् ।
पादनूपुरसंयुक्तं सर्वाभरणभूषितम् ॥
सर्वलक्षणसंयुक्तं कुमारं शङ्करात्मजम् ।
महावल्लीदेवसेनायुक्तं सुरगणप्रियम् ॥
इत्थं रूपं यजेन्नित्यं सर्वलोकहितावहम् ।
चतुर्भुजं बालवेषं स्कन्दं कनकसप्रभम् ॥
शक्तिकुक्कुटहस्तं च वरदाभयसंयुतम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विद्रुमनिभ द्विदशहस्त रविनेत्र
शक्तिशरखड्गमभयध्वजगदां च ।
वामकरचापकुलिशाब्जवरशूल—
खेटधरसव्यकर षण्मुख नमस्ते ॥

षड्वक्त्रं शिखिवाहनं त्रिनयनं रक्ताम्बरालङ्कृतं
शक्तिं चर्म च खड्गशूलविशिखाभीतिं धनुश्चक्रकम् ।
पाशं कुक्कुटमङ्कुशं च वरदं दोर्भिर्दधानं तथा
ध्यायेदीप्सितसिद्धिदं शशिधरं स्कन्दं सुराराधितम् ॥

लोकालोकान्धकारप्रतिहतकिरणैर्भानुकोटिप्रकाशं
भूमिन्यस्तैककोटीष्वसनमपि शरं लम्बमानोर्ध्वकायम् ।
हस्ताभ्यां चेतराभ्यां धृतमथ कुलिशं शक्तिमम्भोरुहाक्षं
सर्वालङ्कारयुक्तं भजत सुरपुरीपालकं बाहुलेयम् ॥

(ii) श्रीतत्व०
चतुर्भुजं चैकवक्त्रं त्रिनेत्रमभयं वरम् ।
पाशाङ्कुशदधं चैव ज्वालाकेशशिखण्डकम् ॥
इन्द्रनीलरथारूढं रक्तोत्पलसमप्रभम् ।
चतुर्दशादिभवनं शिखिवाहनमाचरेत् ॥

सुब्रह्मण्यायतनम्

उ० कामि०
गुहस्य स्थापनं वक्ष्ये तल्लक्षणपुरस्सरम् ।
पुरादेर्मध्यमे वाग्नौ यमे वा मध्यमे तयोः ॥
नैऋते वरुणे वायौ सोमे शर्वेऽथवा भवेत् ।
अन्तरालेऽथवा तेषां शिवधाम्न्येवमेव वा ॥
अन्यदेवालयेप्येवमथवा पर्वतोपरि ।
पर्वतस्यान्तिके वापि नद्युद्यानादिकेऽथवा ॥
राजधान्यादिके वाथ पुण्यक्षेत्रे गृहेषु वा ।
प्रासादमण्डपादीनां देशे पुण्यतरुष्वथ ॥
कुमारालय इष्टस्स्याद्धामलक्षणलक्षितः ।
अथैकादित्रयस्त्रिंशद्धस्तविस्तारसंयुतः ॥
त्रेतायां नवहस्तोर्ध्वं विस्तारो नेष्यते द्विजाः! ।
दिङ्न्यस्तस्कन्दरूपाढ्यः केवलो व तदालयः ॥
रुद्रोमाविघ्नरूपाढ्यस्त्वथवा हंसकोणयुक् ।
गजकोणोऽथवा स स्यात् केवलो वा गुहालयः ॥
एकभूम्यादिसप्तान्ततलेष्विष्टतलान्वितः ।
शिवोक्तमार्गसंक्लृप्तगर्भाद्येष्टकयान्वितः ॥
तद्वन्मूर्धेष्टकास्थूपिप्रतिष्ठाभ्यां समायुतः ।
धाम्नस्संस्थापनेनाढ्यः प्रागुक्तविधिना सह ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्रागुक्तमण्डपाद्यैश्च प्राकाराद्यैश्च मण्डितः ।
पूर्वास्यः पश्चिमास्यो वा दक्षोत्तरमुखस्तु वा ॥
परिवारामरैर्युक्तः कथ्यन्ते ते प्रसङ्गतः ।
यक्षेन्द्रो राक्षसेन्द्रश्च पिशाचेन्द्रश्च भूतराट् ॥
गन्धर्वः किन्नरो दैत्यनायको दानवाधिपः ।
क्रमात्पूर्वादिशर्वान्तस्थिता ते चतुर्भुजाः ॥
वरदाभयसंयुक्ताः खड्गखटसमन्विताः ।
खड्गखेटसमायुक्ता द्विभुजा वाञ्जनप्रभाः ॥
भीमरूपास्सुशान्ता वा वद्धकेशास्तु वा मताः ।
शकुनी पूतना चैव रेवती चार्धपूतना ॥
वक्त्रमण्डिनि शान्ता च एता देवाष्टमूर्तयः ।
षण्मुखश्शक्तिपाणिश्च कार्तिकेयो गुहस्ततः ॥
स्कन्दो मयूरवाहस्स्यात्सेनानीश्शक्तिहस्तवान् ।
एते वा मूर्तिपास्तस्य कृताञ्जलिपुटान्विताः ॥
वज्रपद्मधरास्सर्वे स्कन्दोक्तलक्ष्मसंयुताः ।
चतुर्भुजा द्विहस्ता वा षड्वक्त्राश्चैकवक्त्रकाः ॥
एते वा परितस्स्थाप्याः क्रमात्पूर्वादियोगतः ।
इन्द्रादीन्वाष्टपीठ वा मयूरं वाग्रतो गजम् ॥
विघ्नेशं क्षेत्रपं भानुं महापीठं प्रकल्पयेत् ।
बलिपीठं च शर्वोक्तान्परिवारांस्तु वान्यसेत् ॥
बलिपीठदलेष्विन्द्रपूर्वान्मध्ये ग्रहेश्वराः ।

सुब्रह्मण्यद्वारपालकौ

सुदेहसुमुखौ विप्रौ गुहस्य द्वारपालकौ ।
(i) कु० त० एकवक्त्रौ द्विबाहू च गदाभयकरौ स्मृतौ ॥
चतुर्भुजौ चेत्तस्योर्ध्वे वज्रशक्तिधरौ तथा ।
रक्तश्यामलवर्णाढ्यौ सर्वाभरणभूषितौ ॥
सुदंष्ट्रौ स्मितवक्त्रौ च करण्डमकुटोज्वलौ ।
दक्षिणे तु सुदेहं च सुमुखं च तथोत्तरे ॥
(ii) उ० कामि० द्वारपौ कल्पयेद्द्वारे श्यामरक्तनिभौ क्रमात् ।
दक्षवामगतौ द्वाराद् द्विभुजौ वा चतुर्भुजौ ॥
खड्गखेटधरौ सूचिमुद्राविस्मयसंयुतौ ।
श्यामाभौ रक्तवर्णौ वा सितकृष्णौ भयङ्करौ ॥
जयाख्यविजयाख्यौ द्वौ द्वारपौ विकृताननौ ।

चतर्थो पटलः समाप्तः

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पञ्चमो पटलः

देवी-प्रतिमा-लक्षणम्

शाक्त-प्रकरणम्

टि० ब्राह्म-वैष्णव-शैव-पुरुष-प्रतिमालक्षणानुक्रममधिकृत्य ब्रह्मणश्शक्तेस्सरस्वत्या एव प्रथमं लक्षणं दीयते।

१. ध्यानम्

या कुन्देन्दुतुषारहारधवला या शुभ्रवस्त्रावृता
या वीणावरदण्डमण्डितकरा या श्वेतपद्मासना।
या ब्रह्माच्युतशङ्करप्रभृतिभिर्देवैः सदा वन्दिता
सा मां पातु सरस्वती भगवती निःशेषजाड्यापहा॥

२. ,, शिल्प०

देवीं कुन्देन्दुगौराममृतकरकलास्मेरकोटीरबन्धां
मुद्राबोधाक्षमालावरकलितकरां पुस्तकाक्रान्तहस्ताम्।
शुभ्राकल्पां त्रिनेत्रां त्रिभुवननमितामक्षराधीनमूर्तिं
बन्दे वाग्देवतां तां जगदुदयकरीं मातृकां विश्वयोनिम्॥

३. ,, ,,

शान्तां शारदनीरदेन्दुविमलामालेखिनीपुस्तक—
व्यासङ्गोद्यतबाहुमूर्जितवचोविज्ञानबोधात्मिकाम्।
शुभ्राकल्पविभूषितां त्रिनयनां भास्वज्जटाशेखराम्
सम्बोधाय सरस्वतीं भगवतीं बन्दे मनोज्ञाकृतिम्॥

सरस्वत्यर्चनम्

मठेऽथवा गृहे चोक्ता देवार्चा वेदिकोत्तमा।
तत्रस्थां पूजयेद्देवीं वाग्वाणीं (वाग्देवीं) चैव भैरवीम्॥
भद्रकं मण्डलं कृत्वा सूर्यकोणैरलङ्कृतम्।
तन्मध्यसूत्रतः कुर्याद् द्वाराणि च चतुर्दिशम्॥
द्वारपालाः प्रपूज्याश्च क्षेत्रपालास्ततो नृभिः।
पूज्यास्तथाऽष्टदिक्पाला क्रमतश्च प्रदिक्षणम्॥
महापद्मं चाऽष्टदलं तन्मध्ये कर्णिकां तथा।
पत्रान्तरे च भैरव्याः कुलदेव्याश्च कर्णिकाः॥
तत्केशरमध्यपङ्क्तौ चतुर्वर्णाः सितादिकाः।
श्वेतरक्तपीतकृष्णाः पुनरप्येव वर्णकाः॥
षट्कोणकभिदं व्योम षड्दूतिकार्चने मतम्।
तत्र मध्ये भवेच्छक्तिः पृथिवी सृष्टिरूपिका॥
कामाख्या निलयीभूता बद्धपद्मासना स्थिता।
अक्षमाला तथा वीणा पुस्तकं च कमण्डलुः॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

नीलकण्ठी श्वेतभुजा श्वेताङ्गी चन्द्रशेखरा ।
महाविद्या महावाणी भारती च सरस्वती ।।
सम्पूज्या मन्त्रतः कृत्वा तोरणानां चतुष्टयम् ।
वस्त्रान्ते (वेश्मान्ते) पीठिकायुक्तं वितानादिविभूषितम् ।।
मुष्टिमात्रैकैकग्रासपरेणाग्रदिनेषु च ।
कार्यमेकाग्रमनसा प्रायश्चितं च धीमता ।।
श्वेतवस्त्रान्तरे स्नाप्यं शुद्धे लग्ने दिने पुनः ।
श्वेतवस्त्रैर्युतं शिष्यमानयेत्तोरणान्तिकम् ।।
सुलग्नवेलामुहूर्ते अन्तर्वेद्यां तु स्थापयेत् ।
निरीक्षयेतु वाग्देवीं प्रसीद परमेश्वरि ।।
अर्चयित्वा ततो देवीं पुष्पाञ्जलिमथार्पयेत् ।

अत्र मन्त्रः "ॐ ह्रीं कौशिनी पादान्नमः । ॐ ह्रीं उपकेशनी पादान्नमः ।।
आँ ह्रीं सर्वकेशीपादान्नमः । आँ ह्रां ह्रीं सरवस्ती पादान्नमः ।।

मूलमन्त्रः

आ ह्रीं हृदयाय नमः ।। ॐ ह्रीं शिरसे स्वाहा ।।
आँ ह्रीं शिखाय वषट् । ॐ ह्रीं कवचाय हम ।।
ह्रौं नेत्रत्रयाय वौषट् । ॐ ह्रः अस्त्राय फट ।।

इत्यङ्गन्यासः

आं गं गणपतये नमः । आं बं बटुकनाथाय नमः ।।
आँ दिं दिक्पालेभ्यो नमः । आँ द्वं द्वारपालाय नमः ।।
आँ क्षें क्षेत्रपालायनमः । आँ कं कलविद्यायै नमः ।।
आँ ह्रीं शक्तिबीजाय नमः । आँ राँरीं रूपायै नमः ।।

शक्तिबीजत्रयम्

आँ ह्रीं ह्रा ह्रीं ह्रं हंसवीजाय नमः ।।
आँ ह्रां ह्रीं नमः ।। इति जाप्य
आँ ह्रीं वद वद वाग्वादिनि नमः ।
सारस्वतजपः १०००० ८ ।।
होमः कुर्याद्दशांशेन पुष्पैर्वे ब्रह्मवृक्षजैः ।
होमः १०००८ इति अन्यः स्यात् सारस्वतः ।।
लिखितं पाठयेच्चैव चित्राद्यं रूपसाधकम्" ।

(i) लक्षणम् सरस्वती चतुर्हस्ता श्वेतपद्मासनान्विता ।
ब० भा० जटामुकुटसंयुक्ता शुक्लवर्णा सिताम्बरा ।।
यज्ञोपवीतसंयुक्ता रत्नकुण्डलमण्डिता ।
व्याख्यानं चाक्षसूत्रं च दक्षिणे तु करद्वये ।।
पुस्तकं पुण्डरीकं च त्रिनेत्रा चारुरूपिणी ।
ऋज्वागता कृतास्सर्वे मुनिभिस्सेविता वरा ।।
एवं लक्षणसंयुक्ता वाग्देवी परिकीर्तिता ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

(ii) पू० का० श्वेतपद्मासनसीनां शुक्लवर्णां चतुर्भुजाम् ।
जटामकुटसंयुक्तां मुक्ताकुण्डलमण्डिताम् ॥
यज्ञोपवीतिनीं हारमुक्ताभरणभूषिताम् ।
दुकूलवसनां देवीं नेत्रत्रयसमन्विताम् ॥
सुदण्डं दक्षिणे हस्ते वामहस्ते तु पुस्तकम् ।
दक्षिणे चाक्षमाला च करकं वामकरे करे ॥
वागीशाकृतिराख्याता ... ... ।

(iii) वि० ध० देवी सरस्वती कार्या सर्वाभरणभूषिता ।
चतुर्भुजा सा कर्तव्या तथैव च समुत्थिता ॥
पुस्तकं चाक्षमाला च तस्या दक्षिणहस्तयोः ।
वामयोश्च तथा कार्या वैणवी च कमण्डलुः ॥
समपादप्रतिष्ठा च कार्या सौम्यमुखी तथा ।

(iv) स्क० पु० जटाजूटधरा शुद्धा चन्द्रार्धकृतशेखरा ।
पुण्डरीकसमासीना नीलग्रीवा त्रिलोचना ॥

(v) मान० पद्मपीठोपरि स्थापयित्वा देवीं पद्मासनासनाम् ।
शुद्धस्फटिकसंकाशं मुक्ताभरणभूषणम् ॥
चतुर्बाहुं द्विनेत्रां च केशबन्धां च मौलिनीम् ।
शुद्धश्वेताङ्गुलोपेतां ग्राहकुण्डलभूषणाम् ॥
ललाटे भ्रमरकं स्यान्मौक्तिकपट्टमेव वा ।
कर्णपुष्पैश्च मौक्त्येन कर्णदामभिरलङ्कृतम् ॥
हारोपग्रीवसंयुक्तां मुक्तारत्नावलीं तथा ।
कुचबन्धनसंयुक्ता बाहुमालाविभूषणी ॥
केयूरकटकैर्युक्तां प्रकोष्ठवलयां तथा ।
मणिबन्धकटकां वा मौक्तिकपूरमेव च ॥
मध्याङ्गुलं विना सर्वे मूलतो रत्नाङ्गुलीयकैः ।
नीवीं च लम्बनं चैव मौक्तिकपट्टयुक्तिका ॥
पादजालां भुजङ्गानां गुल्फस्योपरि भूषणीम् ।
पादनूपुरसंयुक्तां पादरत्नाङ्गुलीयकैः ॥
मौक्तिकोत्तरीयसंयुक्तां सर्वालङ्कारभूषणीम् ।
पुरतः सव्ये संदर्शं पुस्तकं वामहस्तके ॥
दक्षिणे परहस्ते तु चाक्षमालावधारणीम् ।
कुण्डिका वामहस्ते च धारयेत्तु सरस्वती ॥
अथवा द्विभुजं कुर्यात्कुन्तलं मुकुटं भवेत् ।
दक्षिणं वरदं हस्तं वामहस्ते च पद्मकम् ॥
करण्डमकुटं वापि हेमवर्णाङ्गशोभितम् ।
पीताम्बरं यथारत्नं मुक्ताभरमेव च ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कर्णयोः स्वर्णताटङ्कं सूत्रयुक्तां सुमङ्गलाम् ।
द्विनेत्रीं प्रसन्नवदनां सर्वाभरणभूषणीम् ॥
पितामहस्य पार्श्वे तु स्थानकं चासनं तु वा ।
वामभागे तु सावित्रीं श्वेतरक्तामथापि वा ॥
श्यामाङ्गकर्णमेवं वा द्विभुजं च द्विनेत्रकम् ।
स्थानकं चासनं वापि करण्डमकुटान्वितम् ॥
अथवा केशबन्धं वा कर्णे मकरकुण्डलम् ।
दुकूलाम्बरधरं वापि पीताम्बरमथापि वा ॥
सर्वाभरणसंयुक्तां वरदां वामहस्तके ।
दक्षिणे चोत्पलं कुर्याच्छेषं प्रागुक्तवन्नयेत् ॥
सरस्वतीं च सावित्रीं दशतालेन कारयेत् ।

(vi) रूप०

एकवक्त्रा चतुर्हस्ता मुकुटेन विराजिता ।
प्रभामण्डलसंयुक्ता कुण्डलान्वितशेखरा ॥
अक्षाब्जवीणापुस्तकं महाविद्या प्रकीर्तिता ।
वराक्षाब्जं पुस्तकं च सरस्वती शुभावहा ॥

महालक्ष्मीः
ध्यानम्
च० क०

अक्षस्रक्परशुं गदेषु कुलिशं पद्मं धनुष्कुण्डिकाम्
दण्डं शक्तिमसिं च चर्म जलजं घण्टां सुराभाजनम् ।
शूलं पाशसुदर्शने च दधतीं हस्तैः प्रवालप्रभां
सेवे सैरिभमर्दनीमिह महालक्ष्मीं सरोजस्थिताम् ॥

लक्षणम्
(i) विश्व०

कोल्लापुरं विनान्यत्र महालक्ष्मीर्यदोच्यते ।
लक्ष्मीवत्सदा कार्या रूपाभरणभूषिता ॥
दक्षिणाधः करे पात्रमूर्ध्वे कौमोदकी ततः ।
वामोर्ध्वे खेटकं धत्ते श्रीफलं तदधः करे ॥
बिभ्रती मस्तके लिङ्गं पूजनीया विभूतये ।

(ii) मान०

रक्ताब्जं पीठतश्चोर्ध्वे देवी पद्मासना भवेत् ।
चतुर्भुजं त्रिनेत्र च मकुटं कुन्तलं भवेत् ॥
प्रसन्नवदना देवीं शुद्धकाञ्चनसन्निभाम् ।
पीताम्बरधरां रक्तमंशुकभरणीम् ॥
विशालाक्षमायतं कुर्यादपाङ्गकोणे स्मिताननाम् ।
दक्षिणे त्वभयं पूर्वे डिण्डिमं वामहस्तके ॥
अपरे दक्षिणे पद्मं चाक्षमालामथापि वा ।
वामे नीलोत्पलं वापि रक्तपद्ममुद्धृतं तु वा ॥
पीनोन्नतस्तनतटां फाले भ्रमरकान्विताम् ।
अथवा रत्नपट्टं स्यात्स्वर्णताटङ्कं कर्णयोः ॥
मकरं कुण्डलं वापि कर्णयोः स्वर्णदामयुक् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

हारोपग्रीवसंयुक्तां ससूत्रैश्च सुमङ्गलीम् ।।
कुचतटैश्च रत्नैश्च हेमपट्टविभूषणीम् ।
रत्नानि छन्नवीरं स्यात्स्वर्णरत्नोत्तरीययुक् ।।
केयूरकटकस्वर्णरत्नपूरिमसंयुताम ।
प्रकोष्ठवलयं रत्नैः कटकं मणिबन्धकैः ।।
रत्नेन कटिसूत्रं स्याद्रत्नदामादिभूषिणीम् ।
रत्नहेम्ना च वस्त्रेण कुर्यान्नीव्यं च लम्बयेत् ।।
नलकान्तं त्रिलम्बं स्यात्सर्वरत्नानि (त्न) शोभितम् ।
भुजङ्गाङ्गवलयं पादौ चोर्ध्वाधो रत्नबन्धनम् ।।
पादनूपुरसंयुक्ताङ्गुलीरत्नाङ्गुलीयकाम् ।
बाहुमूलादि संभूष्य सर्वाभरणभूषिणीम् ।।
अथवा द्विभुजं चैव वामहस्ते च डिण्डिमम् ।
दक्षिणे रत्नपद्मं स्याच्छेषं प्रागुक्तवन्नयेत् ।।
एवं प्रोक्तां महालक्ष्मीं स्थापयेत्सर्वहर्म्यके ।

√लक्ष्मीः

(i) अंशु० आ०

लक्ष्मीः पद्मासनासीना द्विभुजा काञ्चनप्रभा ।
हेमरत्नोज्वलैर्नक्रकुण्डलैः कर्णमण्डिता ।।
सुयौवना सुरम्याङ्गी कुञ्चितभ्रूसमन्विता ।
रक्ताक्षी पीनगण्डा च कञ्चुकाच्छादितस्तनी ।।
शिरसो मण्डनं शङ्खचक्रसीमान्तपङ्कजम् ।
अम्बुजं दक्षिणे हस्ते वामे श्रीफलमिष्यते ।।
सुमध्या विपुलश्रोणी शोभनाम्बरवेष्टिता ।
मेखला कटिसूत्रं च सर्वाभरणभूषिता ।।

(ii) पू० कार०

पद्मपत्रासनासीना पद्माभा पद्महस्तिनी ।
हेमरत्नोज्वलं नक्रकुण्डलं कर्णमण्डनम् ।।
चन्द्रबिम्बामलमुखी कर्णपूर्णायतेक्षणी ।
सुयौवना सुरम्याङ्गी कुञ्चितभ्रूसविभ्रमा ।।
रक्तोष्ठी पीनगण्डा च कञ्चुकाच्छादितस्तनी ।
शिरसो मण्डनं शङ्खचक्रसीमान्तपङ्कजम् ।।
नागहस्तसमौ बाहू केयूरकटकोज्वलौ ।
पङ्कजं श्रीफलं चैव वामके दक्षिणेऽपि च ।।
शोभनाम्बरसंपन्ना श्रोणी च विपुला मता ।
मेखलाकटिसूत्राङ्गा लक्ष्मीर्लक्ष्मीविवर्धनी ।।

(iii) वि० ध०

हरेस्समीपे कर्तव्या लक्ष्मीस्तु द्विभुजा नृप ।
दिव्यरूपाम्बरधरा सर्वाभरणभूषिता ।।
गौरी शुक्लाम्बरा देवी रूपेणाप्रतिमा भुवि ।
पृथक् चतुर्भुजा कार्या देवी सिंहासना शुभा ।।
सिंहासनस्थं कर्तव्यं कमलं चारुकर्णिकम् ।
अष्टपत्रं महाभाग ! कर्णिकायां तु सा स्थिता ।।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विनायकवदासीना देवी कार्या महाभुजा ।
बृहन्नालं करे कार्यं तस्याश्च कमलं शुभम् ॥
दक्षिणे यादवश्रेष्ठ ! केयूरप्रान्तसंस्थितम् ।
वामेऽमृतघटः कार्यस्तथा राजन् ! मनोहरः ॥
तस्याश्च द्वौ करौ कार्यौ बिल्वशङ्खधरौ द्विज! ।
आवर्जितघटं कार्यं तत्पृष्ठे कुञ्जरद्वयम् ॥
देव्याश्च मस्तके पद्मं तथा कार्यं मनोहरम् ।

(iv) मान०

सामान्यां लक्ष्मीं कुर्याद् द्विभुजां च द्विनेत्रकाम् ।
रक्तपद्मोद्धृतौ हस्तौ सर्वाभरणभूषिणीम् ॥
शेषं तु पूर्ववत्कुर्याद् देवीपार्श्वे विशेषतः ।
ऐरावतद्वयं चैव कुर्यादाराधयेत्सुधीः ॥
सर्वेषामालये द्वारे मध्यरङ्गे तु पूजयेत् ।
अथवा विष्णुपार्श्वे तु लक्ष्मीलक्षणमुच्यते ॥
द्विभुजां च द्विनेत्रां च करण्डमकुटान्विताम् ।
अथवा केशबन्धं स्याद्वामहस्तोद्धृताब्जकम् ॥
दक्षिणं हस्तं वरदं चाथवा लम्बनं भवेत् ।
स्थानकं चासनं वापि स्थापयेद् विष्णुदक्षिणे ॥
कुर्यात्तु सर्वलक्ष्मीनां मध्यमदशतालके ।
सर्वाभरणसंयुक्तां हेमवर्णाङ्गशोभिताम् ॥

श्रीः

(i) वि० ध०

(i) स० सू० ७७

पद्मस्था पद्महस्ता च गजोत्क्षिप्तघटप्लुता ।
श्रीः पद्ममालिनी चैव कालिकाकृतिरेव च ॥
पूर्णचन्द्रमुखा शुभ्रा बिम्बोष्ठी चारुहासिनी ।
श्वेतवस्त्रधरा कान्ता दिव्यालङ्कारभूषिता ॥
कटिदेशनिविष्टेन वामहस्तेन शोभना ।
सपद्मेन वान्तेन दक्षिणेन शुचिस्मता ॥
कर्तव्या श्रीः प्रसन्नास्या प्रथमे यौवने स्थिता ।

(ii) शिल्प०

श्रियं देवीं प्रवक्ष्यामि नवयौवनशालिनीम् ।
सुलोचनां चारुवक्त्रां गौराङ्गीमरुणाधराम् ॥
सीमन्तं विबुधीशीवो (?) मणिकुण्डलधारिणीम् ।
श्रीफलं दक्षिणे पाणौ वामे पद्मं तु बिभ्रतीम् ॥
पद्मे पद्मां समासीनां श्वेतवस्त्रविभूषिताम् ।
कञ्चुकाबद्धगात्रीं च मुक्ताहारविभूषिताम् ॥
चामरैर्वीज्यमानां च योषिद्भ्यां पार्श्वयोर्द्वयोः ।
समानैस्स्नाप्यमानां च भृङ्गारसलिलोत्करैः ॥

टि० भूमिः वैष्णवी शक्तिरिति हतोऽत्रैव वर्ण्यते ।

भूमिः

(i) अ०आ०

सस्याङ्कुरनिभाभूमिर्नीलालकसमन्विता ।
करण्डमकुटोपेता सर्वाभरणभूषिता ॥
पीताम्बरधरा चैव प्रसन्नवदनान्विता ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पद्मं वाप्युत्पलं वाथ उभयोर्हस्तयोर्धृतम् ॥
पद्मपीठोपरिष्टात्तु आसीना वा स्थितापि वा ।

(ii पू० कार० — श्यामवर्णनिभा भास्वद्राजीवसमलोचना ॥
हेमयज्ञोपवीता च द्विभुजा च द्विनेत्रका ।
सर्वाभरणसंयुक्ता करण्डमकुटान्विता ॥
रक्ताम्बरधरा चैव दक्षहस्तोत्पलान्विता ।
धरण्याकृतिरेवं स्यात् ··· ··················· ॥

(iii) वि०ध० — शुक्लवर्णा मही कार्या दिव्याभरणभूषिता ।
चतुर्भुजा सौम्यवपुश्चन्द्रांशुसदृशाम्बरा ॥
रत्नपात्रं सस्यपात्रं पात्रमोषधिसंयुतम् ।
पद्मं करे च कर्तव्यं भुवो यादवनन्दन ॥
दिग्गजानां चतुर्णां च कार्या पृष्ठगता तथा ।
सर्वौषधियुता देवी शुक्लवर्णा ततस्स्मृता ॥

(iv) मान० — एषाः चेन्दिराः प्रोक्तास्तु महीशक्तिरिहोच्यते ।
द्विभुजां च द्विनेत्रां च करण्डमकुटान्विताम् ॥
दुकूलवसनोपेतां मकुटं कुन्तलं तु वा ।
स्थानकं चासनं वापि विष्णुमूर्तेरपसव्यके ॥
दक्षिणे चोत्पलं धृत्वा वामभागं तु लम्बनम् ।
अथवा वरदं वामे श्यामवर्णाङ्गशोभितम् ॥
मानयेद् दशतालेन सर्वं शेषं तु पूर्ववत् ।
मकरकुण्डलसंयुक्तां सर्वाभरणभूषणीम् ॥

टि०—विष्णुप्रिया तुलसीति हेतोस्सापि वैष्णवी देवी ।

तुलसीदेवी
तु० मा० — ध्यायेच्च तुलसीं देवीं श्यामां कमललोचनाम् ।
प्रसन्नां पद्मकल्हारवराभयचतुर्भुजाम् ॥
किरीटहारकेयूरकुण्डलादिविभूषिताम् ।
धवलांशुकसंयुक्तां पद्मासननिषेदुषीम् ॥

महाकाली
ध्यानम् च०क० — खड्गं चक्रगदेषु चापपरिघाञ्छूलं भुशुण्डीं शिरः
शङ्खं संदधतीं करैस्त्रिनयनां सर्वाङ्गभूषावृताम् ।
नीलाश्मद्युतिमास्यपाददशकां सेवे महाकालिकां
यामस्तौत्स्वपिते हरौ कमलजो हन्तुं मधुकैटभम् ॥

लक्षणम्
(i) कार० आ० — अष्टबाहुर्महाकाया कालमेघसमप्रभा ।
शङ्खचक्रगदाकुम्भमुसलाङ्कुशपाशयुक् ॥
वज्रं करे बिभ्रती सा महाकाली मुदेऽस्तु नः ।

(ii) वि० ध० — सा भिन्नाञ्जनसङ्काशा दंष्ट्राङ्कितवरानना ।
विशाललोचना नारी बभूव तनुमध्यमा ॥
खड्गपात्रशिरःखेटैरलङ्कृतचतुर्भुजा ।
कबन्धहारं शिरसा बिभ्राणा हि शिरस्स्रजम् ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

काली — घनश्यामा ततः काली ताम्ररक्तनिभानना ।
(i) भ० पु० — कपालकर्णिकाहस्ता विज्ञेया भयनाशिनी ॥
(ii) दे० पु० — 'काली करालरूपा च चण्डपाशोद्यता भवेत्'

भद्रकाली — अष्टादशभुजा कार्या भद्रकाली मनोहरा ।
वि० ध० — आलीढस्वासनस्था च चतुस्सिहे रथे स्थिता ॥
अक्षमाला त्रिशूलं च खड्गश्चन्द्रश्च यादव ।
बाणचापे च कर्त्तव्ये शङ्खपद्मे तथैव च ॥
स्रुकस्रुवौ च तथा कार्यौ तथोदककमण्डलू ।
दण्डशक्ती च कर्त्तव्ये कृष्णाजिनहुताशनौ ॥
हस्तानां भद्रकाल्यास्तु भवेच्छान्तिकरः करः ।
एकश्चैव महाभाग ! रत्नपात्रधरो भवेत् ॥

दुर्गा — चतुर्भुजा त्रिनेत्रा च सा स्याच्छ्यामनिभा वरा ।
(i) अ० आ० — सौम्या पीताम्बरोपेता पीनोरुजघनस्तना ॥
करण्डमकुटोपेता सर्वाभरणभूषिता ।
अभयं दक्षिणं हस्तं कटकं वामहस्तकम् ॥
परहस्ते तु सव्ये तु चक्रं वामे तु शङ्खधृक् ।
समपादस्थिता चैव पद्मपीठोपरि स्थिता ॥
नागेन्द्रेण स्तनं बध्वा रक्तकञ्चुकधारिणी ।
एवं दुर्गा समाख्यता विष्णुलक्षणमुच्यते ॥

(ii) सु० आ० — आदिशक्तेस्समुद्भूता विष्णुप्राणानुजा शुभा ।
शङ्खचक्रधरा देवी धनुस्सायकधारिणी ॥
खड्गखेटकसंयुक्ता शूलपाशसमायुता ।
चतुर्भुजां वा कुर्वीत सर्वभरणभूषिताम् ॥
श्यामवर्णां सुवदनां महिषस्य शिरस्स्थिताम् ।
सिंहारूढां च वा कुर्यात्पद्मासनसमागताम् ॥

(iii) पू० कार० — ललाटलोचनं तस्यास्तिलकं च शिखामणिः ।
शशिखण्डकिरीटं वा मकुटं सकरण्डकम् ॥
सनक्रकुण्डलं रत्नमण्डनं कर्णमण्डनम् ।
कर्णावतंसकाकर्णचूलिकापालिकान्वितम् ॥
चतुर्भुजसमायुक्ताष्टाभिर्दोर्भिरन्विताम् ।
शूलं खड्गं शरं चक्रं दक्षिणेषु करेषु च ॥
पाशखेटकशार्ङ्गश्च शङ्खं वामकरेषु च ।
चतुर्भुजे च वामे तु शङ्खं वरदहस्तकम् ॥
चक्रं चभयहस्तं च दक्षिणे तु समायुता ।
द्विनेत्रा सौम्यवदना महिषस्य शिरस्स्थिता ॥
दुर्गायास्त्वाकृतिर्ह्येवं ब्रह्मण्याकृतिरुच्यते ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

(iv) वि० ध० शक्तिं बाणं तथा शूलं खड्गं चक्रं च दक्षिणे ।
चन्द्रबिम्बमधो वामे खेटमूर्ध्वे कपालकम् ॥
शूलं चक्रं च बिभ्राणा सिंहारूढा च दिग्भुजा ।
एषा देवी समुद्दिष्टा दुर्गा दुर्गापहारिणी ॥

नव दुर्गाः नवपद्मान्विते स्थाने पूज्या दुर्गास्स्वमूर्तितः ।
(i) भ० पु० आदौ मध्ये तथेन्द्रादौ नवतत्वाक्षरैः क्रमात् ॥
अष्टादशभुजैका तु पीनवक्षोरुहोरुहा ।
सर्वालङ्कारसंयुक्ता सर्वसिद्धिप्रदायिनी ॥
मूर्धजं खेटकं घण्टमादर्शं तर्जनीं धनुः ।
ध्वजं डमरुकं पाशं बिभ्रती वामपाणिभिः ॥
शक्तिमुद्गरशूलानि वज्र शङ्खमथाङ्कुशम् ।
शलाकां मार्गणं चक्र दधाना दक्षिणैः करैः ॥
जयमिच्छद्भिरित्येताः पूजनीया महात्मभिः ।
शेषाष्षोडशहस्ताश्च शलाकां मार्गण विना ॥
रुद्रचण्डा प्रचडा च चण्डोग्रा चण्डनायिका ।
चण्डा चण्डवती चैव चण्डरुपातिचण्डिका ॥
नवमी चोग्रचण्डा च मध्यस्था वह्निसन्निभा ।
रोचनाभारुणा कृष्णा नीला शुक्ला च धूम्रिका ॥
पीता च पाण्डुरा ज्ञेया आलीढस्था हरिस्थिता ।
महिषस्था सशस्त्रीका दैत्यमूर्धजमुष्टिका ॥
पद्माकृतिरथस्थाप्या इत्युक्तं स्कन्दयामले ।

(ii) अ० पृ० अथाऽतोऽनन्तरं वक्ष्ये दुर्गाणां नवकं तथा ।
आदौ तत्र महालक्ष्मीर्नन्दा क्षेमकरी तथा ॥
शिवदूती महार(च)ण्डा भ्रमरी सर्वमङ्गला ।
रेवती हरसिद्धिश्च नवदुर्गाः प्रकीर्तिताः ॥
क्रमतः पृथगेकैकाः कथयाम्यपराजित ।
वरं त्रिशूलं खेटं च पानपात्रं च बिभ्रती ॥
नागं तथा नीलकण्ठे महालक्ष्मीः सुखप्रदा ।
अक्षसूत्रं खड्गखेटौ पानपात्रं तथैव च ॥
नन्दा नाम सुविख्याता पूज्या चानन्दहेतवे ।
वरं त्रिशूलं पद्मं च पानपात्रं करेषु च ॥
क्षेमङ्करीति तन्नाम क्षेमारोग्यप्रदायिनी ।
कमण्डलुश्चक्रखेटौ पानपात्रं तथोत्तमम् ।
शिवदूतीति तन्नाम सर्ववृद्धिप्रदायिनी ॥
खड्गत्रिशूलौ घण्टा वै अथो चर्म तथोत्तमम् ॥
महार(च)ण्डा तथा नाम वन्दिता त्रिदशैरपि ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

खड्गं डमरूकं खेटं बिभ्रती पानपात्रकम् ॥
भ्रमरी च तथा नाम भ्रामयेद्दुष्टचेतसः ।
अक्षसूत्रं तथा वज्रं घण्टा पात्रं तथोत्तमम् ॥
सर्वमङ्गलमाङ्गल्या सर्वविघ्नविनाशिनी ।
दण्डं त्रिशूलं खट्वाङ्गं पानपात्रं च बिभ्रती ॥
रेवतीति तदा नाम सर्वशान्तिप्रदायिनी ।
कमण्डलुश्च खड्गश्च डमरुः पानपात्रकम् ॥
हरसिद्धिरिति ख्याता सर्वेषां सिद्धिहेतुका ।

रूद्रांशदुर्गा
का० आ०
रक्ताम्बरां श्यामलिनों द्विनेत्रां किरीटरत्नाङ्कितहेमभूषाम् ।
सशूलखड्गां धृतशङ्खचक्रां मृगेन्द्रयानां रविचन्द्रभूषाम् ॥

वनदुर्गा
आम्ना०
अरिशङ्खकृपाणखेटबाणान्सधनुश्शूलकतर्जनीं दधाना ।
मम सा महिषोत्तमाङ्गसंस्था नवदूर्वासदृशी श्रियेऽस्तु दुर्गा ॥

अग्निदुर्गा
शा० ति०
विद्युद्दामसमप्रभां मृगपतिस्कन्धस्थितां भीषणां
कन्याभिः करवालखेटविलसद्धस्ताभिरासेविताम् ।
हस्तैश्चक्रवरासिखेटविशिखांश्चापाङ्कुशौ तर्जनीं
बिभ्राणामनलात्मिकां शशिधरां दुर्गां त्रितेत्रां भजे ॥

जयदुर्गा
शा० ति०
कालां स्फारां कटाक्षैररिकुलभयदां मौलिबद्धेन्दुरेखां
शङ्खं चक्रं कृपाणं त्रिशिखमपि करैरुद्वहन्तीं त्रिनेत्राम् ।
सिंहस्कन्धाधिरूढां त्रिभुवनमखिलं तेजसा पूरयन्तीं
ध्यायेद्दुर्गां जयाख्यां त्रिदशपरिवृत्तां सेवितां सिद्धिकामैः ॥

विन्ध्यवासिनी दुर्गा
शा० ति०
सौवर्णाम्बुजमध्यगां त्रिनयनां सौदामिनीसन्निभां
शङ्खं चक्रवराभयानि दधतीमिन्दोः कलां विभ्रतीम् ।
ग्रैवेयाङ्गदहारकुण्डलधरामाखण्डलाद्यैस्स्तुतां
ध्यायेद्विन्ध्यनिवासिनीं शशिमुखीं पार्श्वस्थपञ्चाननाम् ॥

रिपुमारिणी दुर्गा
शा० ति०
तर्जनीं त्रिशिखं दोर्भ्यां धारयन्तीं भयङ्करीम् ।
रक्तां ध्यात्वा रवेर्बिम्बे प्रजपेदयुतं मनुम् ॥
मारयेदचिरादेव रिपून्बन्धुसमन्वितान् ।

कात्यायनी
(i) मयदी०
कात्यायिन्याः प्रवक्ष्यामि रूपं दशभुजं तथा ।
त्रयाणामपि देवानामनुकारानुकारिणीम् ॥
जटाजूटसमायुक्तामर्धेन्दुकृतलक्षणाम् ।
लोचनत्रयसंयुक्तां पूर्णेन्दुसदृशाननाम् ॥
अतसीपुष्पसङ्काशां सुप्रतिष्ठां सुलोचनाम् ।
नवयौवनसम्पन्नां सर्वाभरणभूषिताम् ॥
सुचारुदशनां तद्वत्पीनोन्नतपयोधराम् ।
त्रिभङ्गिस्थानसंस्थानां महिषासुरमर्दनीम् ॥
त्रिशूलं दक्षिणे दध्यात्खड्गं चक्रं तथैव च ।
तीक्ष्णबाणं तथा शक्तिं वामतो विनिबोधत ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

खेटकं पूर्णपात्रं च पाशमङ्कुशमेव च ।
घण्टां च परशुं चापि चामरं सन्निवेशयेत् ॥
अधस्तान्महिषं विद्याद्विशिरस्कं प्रदर्शयेत् ।
शिरश्छेदोद्भवं तद्वद्दानवं खड्गपाणिकम् ॥
हृदि शूलेन निर्भिन्नं निर्यदन्त्रविभूषणम् ।
रक्तरक्तीकृताङ्गं च रक्तविस्तारितेक्षणम् ॥
वेष्टितं नागपाशेन भ्रुकुटीभीषणाननम् ।
सपाशवामहस्तेन धृतकेशं च दुर्गया ॥
वमद्रुधिरवक्त्रं च देव्यास्सिहं प्रदर्शयेत् ।

(ii) अ० पृ० २२३ कात्यायनीमतो वक्ष्ये क्षत्रयोद्गतशासनी ।
तेजः प्रतापदा नित्यं नृपाणां मुखबोधिनी ॥
शूलखड्गौ वज्रचक्रे बाणो दक्षिणबाहुषु ।
चापखेटकपाशाश्च घण्टा वामेषु चाङ्कुशम् ॥
अधस्तान्महिषं कुर्याद् विशिरस्कं च पादयोः ।
विद्याद्दक्षिणपादं तु महिषस्योपरिष्ठितम् ॥
पादपद्माय पादौ च वामपादं प्रदापयेत् ।
तथा छिन्नशिरस्कं च दैत्यन्तं रक्तवाससम् ॥
गृहीत्वा चैव केशाग्रे वामकेन तथेश्वरी ।
हृदि शूलेन निर्भिन्नं महिष-कुक्षौ सुदर्शनम् ॥
देव्यास्तु वाहनं सिहः संलग्नो महिषोपरि ।
कात्यायनी नामिका च कर्तव्या चैवमेव हि ॥

(iii) रूप० कात्यायनीं ततो वक्ष्ये दशहस्तां महाभुजाम् ।
तेजः प्रतापदा नित्यं नृपाणां सुखबोधिनी ॥
त्रिभङ्गिस्थानसंस्थाना महिषासुरसूदनी ।
दक्षे त्रिशूलं खड्गं च चक्रं बाणं च शक्तिकाम् ॥
खेटकं पूर्णचापं च पाशमङ्कुशमेव च ।
घण्टा च वामतो दध्याद्दैत्यमूर्धजधृक्करी ॥
अधस्तान्महिषं तद्वद्विशिरस्कं प्रदर्शयेत् ।
शिरश्छेदोद्भवं तद्वद्दानवं खड्गपाणिनम् ॥
हृदि शूलेन निर्भिन्नं निर्यदन्त्रविभूषितम् ।
रक्तरक्तीकृताङ्गं च रक्तविस्फारितेक्षणम् ॥
देव्यास्तु दक्षिणं पादं समं सिंहोपरि स्थितम् ।
किञ्चिदूर्ध्वं तथा वाममङ्गुष्ठं महिषोपरि ।

(iv) मा० चतुर्भुजां द्विनेत्रां च श्यासवर्णाङ्गशोभिताम् ।
किरीटमकुटोपेतां सर्वाभरणभूषिणीम् ।
पूर्वेऽभयं करे सव्ये चक्रं चापरदक्षिणे ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ऊरुमूलाश्रितं वामवरदं वा करपूर्वके ।
वामे चान्यकरे शङ्खं पीताम्बरधरं भवेत् ॥
एवं कात्यायनो प्रोक्ता शेषं प्रागुक्तवन्नयेत् ।

(v) शिल्प० सं०

वक्ष्ये कात्यायनीं देवीं शिवनारायणान्विताम् ।
बाहुभिर्दशभिर्युक्तां जटामकुटमण्डिताम् ॥
लोचनत्रयसंयुक्तामर्धेन्दुकृतशेखराम् ।
अतसीपुष्पसंकाशामिन्दीवरदलेक्षणाम ॥
पीनोन्नतकुचाम्भोजां तनुमध्येन शोभिताम् ।
त्रिभङ्गिस्थानसंस्थानां महिषासुरमर्दनीम् ॥
त्रिशूलं दक्षिणे खङ्गं शक्तिं चक्रधरं (?) तथा ।
अधिज्यं कार्मुकं वामे पाशमङ्कुशखेटकम् ॥
घण्टां च परशुं चापि धारयन्तीं समालिखेत् ।
अधस्तान्महिषं चास्याश्छिन्नग्रीवं समालिखेत् ॥
छिन्नस्थाने समुत्पन्नं खङ्गखेटकधारिणम् ।
हृदि शूलेन निर्भिन्नं रुधिरारुणविग्रहम् ॥
प्रबद्धं नागपाशेन भ्रुकुटीभीषणेक्षणम् ।
नाभेरुर्ध्वं विनिष्क्रान्तं दानवं दारुणं लिखेत् ॥
दक्षिणं चरणं देव्यास्सिंहपृष्ठे प्रतिष्ठितम् ।
उत्तुङ्गमञ्चितं वामं महिषस्योपरि स्थितम् ॥

कौशिकी
स० सू० ७७

गृहीतशूलपरिघपाहिका? पट्टिसध्वजा ।
बिभ्राणा खेटकोपेतलघुखड्गं च पाणिना ॥
घण्टामेकां च सौवर्णीं दधती घोररूपिणी ।
कौशिकी पीतकौशेयवसना सिंहवाहना ॥
सेचोष्टौ ? विधातव्याः शुक्लाम्बरधराः ।
शोभमानाश्च मुकुटैर्नानारत्नविभूषितैः ॥

चण्डिका
(i) वि० ध०

निगद्यते ह्यथो चण्डी हेमाभा सा सुरुपिणी ।
त्रिनेत्रा यौवनस्था च क्रुद्धा चोर्ध्वस्थिता मता ॥
कृशमध्या विशालाक्षी चारुपीनपयोधरा ।
एकवक्त्रा तु सुग्रीवा बाहुविंशतिसंयुता ॥
शूलासिशङ्खचक्राणि बाणशक्तिपवीनपि ।
अभयं डमरुं चैव छत्रिकां दक्षिणे करे ॥
ऊर्ध्वादिक्रमयोगेन बिभ्रती सा सदा शुभा ।
नागं पाशं तथा खेटं कुठाराङ्कुशकार्मुकम् ॥
घण्टाध्वजगदादर्श मुद्गरं वाम एव च ।
तदधो महिषश्छिन्नमूर्धा पतितमस्तकः ॥
शस्त्रोद्यतकरस्तद्धस्तद्ग्रीवासंभवः पुमान् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

शूलभिन्नो वमद्रक्तो रक्तभ्रूमूर्धजेक्षण: ।।
सिंहेन खाद्यमानश्च पाशबद्धो गले भृशम् ।
याम्याङघ्राक्रान्तसिंहा च सव्याङघ्रचालीढगासुरे ।
चण्डी चोद्यतशस्त्रेयं चाशेषरिपुनाशिनी ।

(ii) रूप० चण्डिका क्रूररूपा च पिङ्गकेशा कृशोदरी ।
रक्ताक्षी भग्ननेत्रा च निर्मांसा विकृतानना ।।
व्याघ्रचर्मपरीधाना भुजङ्गाभरणान्विता ।
कपालमालिनी कृष्णा शवारूढा भयावहा ।।
त्रिशूलं खेटकं खड्गं धनु: पाशाङ्कुशे शर: ।
कुठारो दर्पणं घण्टा शङ्खश्चक्रं गदा पवि: ।।
दण्डो मुद्गर इत्यैतैर्यथास्थानायुधैर्युता ।
बाहुषोडशसंयुक्ता चण्डमुण्डविघातिनी ।।

चण्डिकाया अष्टौ प्रतीहारा: चण्डिकायास्तथैवोक्तान् कथयिष्याम्यनुक्रमात् ।
अ० पृ० २२० वेताल: कोटरश्चैव पिङ्गाक्षो भृकुटिस्तथा ।।
धूम्रक: कंकटश्चैव रक्ताक्षश्च सुलोचन: ।
दंष्ट्रास्यविकटा: कोपे स्फुरद्दशनकोज्ज्वला: ।।
वर्वरीकाश्च कृष्णाङ्गा मरक्ताक्षा महाबला: ।
तर्जनी चैव खट्वाङ्गो डमरूर्दण्ड आयुधम् ।।
वैताल: स समाख्यातो ह्यपसव्ये तु कोटर: ।
अभयखड्गखेटकं दण्ड: पिङ्गाक्ष एव च ।।
अभयापसव्ययोगे भवेत् भृकुटिनामक: ।
तर्जनी वज्राङ्कुशा वै दण्डो धूम्रकनामक: ।।
सव्यापसव्ययोगेन भवेत् कंकटनामक: ।
तर्जनी च त्रिशूलं च खट्वाङ्गो दण्ड एव च ।।
रक्ताक्षस्स च नाम्ना वै वामे दक्षे त्रिलोचन: ।
दिशाद्वारपक्षयुग्मो स्थिता विघ्नविनाशना: ।।
इत्यष्टौ च प्रतीहारा: देवीनां सर्वसम्मता: ।

गौरी गौरी कुमारिकारूपा ध्यायमाना महेश्वरै: ।
(i) वि०ध० वरदाभयहस्ता सा द्विभुजा श्रेयसे सदा ।।
अक्षसूत्राभये पद्मं तस्याधश्च कमण्डलु: ।
गौर्या मूर्तिश्चतुर्बाहु: कर्तव्या कमलासना ।।

(ii) मान० भूशक्तिलक्षणं प्रोक्तं गौरीलक्षणमुच्यते ।
द्विभुजां च द्विनेत्रां च कुर्यादासने स्थानके तु वा ।।
करण्डं केशबन्धं वा कुन्तलं मकुटं भवेत् ।
दक्षिणे चोत्पलं वामे वरदं स्थानमेव वा ।।
अथवा लम्बहस्तं स्याद् गोबालाकारवद् भवेद् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

दुकूलवसनोपेतां पीताम्बरधरामेव वा ॥
दीर्घबाहु विशालाक्षीं श्यामवर्णां महोदराम् ।
स्तनतटोत्तुङ्गा विस्तीर्णश्रोणिदेशोद्भवा भवेत् ॥
कटि चोरु विशालं स्यान्मध्यकञ्चीनलम्ववत् ।
विशालमास्यं सुग्रीवं तुङ्गतुण्डं स्मिताननम् ॥
चन्द्ररेखावतंसं स्याद् भ्रमरावृतमालिकम् ।
अथवा फालपट्टं स्यात्कर्णयोर्ग्राहकुण्डली ॥
कर्णपुष्पैश्च दाम स्याद्धेमसूत्रं सुमङ्गली ।
हारोपग्रीवसंयुक्तां बाहुमालाविभूषिणीम् ॥
कटकं कटिसूत्रं स्यात्केयूरपुरिमान्वितम् ।
रक्तांशुकोत्तरीयं स्यान्मौक्तिकोत्तरीयमेव च ॥
प्रकोष्ठवलयं चैव वलयैर्मणिवन्धकैः ।
भुजङ्गकटकाङ्घ्रिकौ पादनूपुरसंयुतम् ॥
सर्वाङ्गुलमुक्तवज्ज्ञात्वा कुर्याद्रक्ताङ्गुलीयकैः ।
दक्षिणे कुञ्चितं पादं वामपादं तु लम्बितम् ॥
पुष्पं च वरदं स्थाने हस्तं वामेऽथ चासने ।
दक्षिणं स्वस्तिकं पादं वामादन्तकरान्तकम् ॥
कुञ्चितं वामपादं स्याद् दक्षिणं कुञ्चितं तु वा ।
पुष्पधृक् लम्बहस्तं स्यात्स्थानकं च त्रिभागिकम् ॥
मानयेदङ्गमानं च मध्यमं दशतालके ।
लिङ्गस्य वामपार्श्वं तु विग्रहाणां तु वामके ॥
स्थापयेत्स्थावरे गौरीं तथा जङ्गममेव च ।
गौरीं चा पार्वतीं चैव... .. ..॥

(iii) अ०पृ० २२२
अ. गौरीद्वादशमूर्तयः

गौर्य्याश्च सम्प्रवक्ष्यामि प्रमाणं मूर्तिलक्षणम् ।
ब्रह्मसूत्रोद्भवं सर्वं भजेदेकशताङ्गुलम् ॥
त्रयोदशाङ्गुलं मुख ग्रीवा स्यादङ्गुलत्रयम् ।
अष्टाङ्गुलौ स्तनौ वृत्तौ हिक्का? च चतुरङ्गुला ॥
द्वादशाङ्गुलिका नाभिरुदरं चतुरङ्गुलम् ।
वलिकात्रयसम्युक्तं गुह्यं सप्ताङ्गुलं तथा ॥
द्वाविंशत्यङ्गुला जङ्घा जानु स्यादङ्गुलत्रयम् ।
जङ्घामानेन नलकः पादमूलं तु जानुवत् ॥
चतुर्भुजा त्रिनेत्रा च सर्वाभरणभूषिता ।
गोधासनोपरिष्ठा च कर्तव्या सर्वकामदा ॥
उमा च पार्वती गौरी ललिता च श्रियोत्तमा ।
कृष्णा हेमवती रम्भा सावित्री च तथैव च ॥
त्रिषंडा तोतला चैव त्रिपुरा द्वादशी मता ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

एवं द्वादशमूर्तीश्च कुर्याद्वै शिवशासनी: ।।
अक्षसूत्रं चाम्बुजं च दर्पणश्च कमण्डलु: ।
एवं भवेदुमामूर्ति: पूजिता त्रिदशैरपि ।।
अक्षसूत्रं शिवो देवो गणाध्यक्ष: कमण्डलु: ।
पक्षद्वये चाग्निकुण्डं पार्वती पर्वतोद्भवा ।।
अक्षसूत्राभयपद्मं तदधश्च कमण्डलु: ।
गौर्य्यामूर्तिस्तथा चैव कर्तव्या शिवशासनी ।।
शूलाक्षसूत्रवीणाश्च तथैव च कमण्डलु: ।
ललिता चैव तन्नाम सिद्धचारणसेविता ।।
अक्षपद्माभयवरं गोधिकासनसंस्थिता ।
श्रियामूर्तिस्तु तन्नाम गृहे पूज्या श्रिये सदा ।।
अक्षसूत्रं कमण्डलु हृदये संपुटाञ्जलि: ।
मध्ये पञ्चाग्निकुण्डानां कृष्णा नाम तु शोभना ।।
हिमवान् शैलराजस्तु तस्यापत्यं गिरीन्द्रजा ।
पद्मदर्पणसम्युक्ता विवाहे तु महेश्वरी ।।
कमण्डल्वक्षवज्राश्च अङ्कुशो गजसंस्थिता ।
तथाऽप्रतिमरूपा च रम्भा नाम तु कामदा ।।
अक्षसूत्रं पुस्तवाब्जे तदधश्च कमण्डलु: ।
चतुर्वक्त्रा तु सावित्री श्रोत्रियाणां गृहे स्थिता ।।
अक्षसूत्रं वज्रशक्ती तदधश्च कमण्डलु: ।
त्रिषण्डा (श्रीखण्डा) वृद्धये पूज्या सर्वकामफलप्रदा ।।
अक्षसूत्रं तथा दण्ड: खेटकं चामरं तथा ।
श्वेता ध्यानार्चनाद्देवी तोतला विषनाशिनी ।।
पाशङ्कुशाभयवरा धनेस्या?च्च चतुर्भुजा ।
त्रिपुरा नाम संपूज्या वन्दिता त्रिदशैरपि ।।

ब. गौरी-पञ्च-ललीया-मूर्तय:

ललीया: पञ्च वक्ष्यामि शस्त्रभेदै: प्रभेदिता: ।
लीलया लीला लीलाङ्गी ललिता च लीलावती ।।
प्रोक्तास्तथाऽनुक्रमत: स्वासनस्था?श्चतुर्भुजा: ।
तप्तकाञ्चनवर्णाभा बालसूर्यसमप्रभा: ।।
सुवक्त्राश्च सुनेत्राश्च सुरूपा रूपदायिका: ।
रक्तोष्ठा: कम्बुग्रीवाश्च कर्णपूरायतेक्षणा: ।।
अक्षसूत्रकमण्डलू अधोहस्तेषु कामदा: ।
सर्वासामीदृशौ हस्तौ कथ्येते चोर्ध्वहस्तकौ ।।
मृणालयुग्मं ललीया लीला पद्मं च पुस्तकम् ।
लीलाङ्गी पाशपद्मे च ललिता वज्रमङ्कुशम् ।।
पाशाङ्कुशौ लीलावती ललीया: पञ्च चेरिता: ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

(iv) रूप० गौरीमूर्तयः

अथ गौर्याः प्रवक्ष्यामि प्रमाणं मूर्तिनिर्णयम् ।
चतुर्भुजा त्रिनेत्रा च सर्वाभरणभूषिता ॥
अक्षसूत्राम्बुजे धत्ते दर्पणं च कमण्डलुम् ।
उमानाम्नी भवेन्मूर्तिर्वन्दिता त्रिदशैरपि ॥
अक्षसूत्रं शिवं देवं गणाध्यक्षं कमण्डलुम् ।
पक्षद्वयेऽग्निकुण्डे च मूर्तिस्सा पार्वती स्मृता ॥
अक्षसूत्रं तथा पद्ममभयं च वरं तथा ।
गोधासनाश्रिता मूर्तिर्गृहे पूज्या श्रिये सदा ॥
कमण्डल्वक्षसूत्रं च बिभ्राणा बज्रमङ्कुशम् ।
गजासनस्थिता रम्भा कर्तव्या सर्वकामदा ॥
शूलाक्षसूत्रदण्डाश्च बिभ्राणा श्वेतचामरम् ।
तोतला कथिता चेयं सर्वपापप्रणाशिनी ॥
नागपाशाङ्कुशौ चैवाभयदं वरदं करम् ।
त्रिपुरा नाम संपूज्या बन्दिता त्रिदशैरपि ॥

गोर्यायतनम् अ० पृ० १२१

गौर्यायाः सम्प्रवक्ष्यामि देवतानामनुक्रमम् ।
दक्षे मातृः श्रिया सौम्ये सावित्रीं पश्चिमे विदुः ॥
द्वे पृष्ठकर्णयोश्चैव भगवती सरस्वती ।
गणेशं च कुमारं च त्वीशाने चाग्निगोचरे ॥
कुण्डलाभ्यामलङ्कृत्वा सर्वाभरणभूषिता ।
मध्ये देवी प्रतिष्ठाप्या महेशस्य सदा प्रिया ॥

गोर्याः अष्टद्वारपालिकाः

जया च विजया चैव अजिता चापराजिता ।
निभक्ता मङ्गला चैव मोहिनी स्तम्भिनी तथा ॥
अभयाङ्कुशपाशाश्च दण्डः प्रदक्षिणं जया ।
सव्यापसव्ये शस्त्राणां विजया सा प्रकीर्तित ॥
अभयाब्जपाशा दण्डोऽजिता सव्येऽपराजिता ।
अभीवज्राङ्कुशदण्डा विनिभक्ताऽसव्यैर्मङ्गला? ॥
अभयशङ्खाब्जदण्डा मोहिनीत्येव नामतः ।
शस्त्रापसव्ययोगेन सा भवेत् स्तम्भिनी तथा ॥
गौर्यायनने शस्ता अष्टौ स्युर्द्वारपालिकाः ।

सप्तमातरः (i) सु० आ०

अथातस्संप्रवक्ष्यामि मातृणां स्थापनं परम् ।
नैर्ऋतस्य वधार्थाय ब्रह्मणा चापि निर्मिताः ॥
ब्रह्माणीं ब्रह्मवत्कुर्यान्महेशीमीश्वरोपमाम् ।
कुमारवच्च कौमारीं विष्णुवद्वैष्णवीं तथा ॥
क्रोधाननां तु वाराहीं वामनीं तु हलायुधाम् ।
शक्राणीं शक्रवत्कुर्याच्चामुण्डीमुग्ररूपिणीम् ॥
सुविकीर्णजटाभारां श्यामवर्णां चतुर्भुजाम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कपालशूलहस्तां च चामुण्डीं कारयेत्ततः ॥
वरदाभयहस्तास्तु तत्तदायुधधारिणः ।
तत्तद्वर्णसमायुक्ता वाहनध्वजसंयुताः ॥
चतुर्भुजास्तु सर्वाश्च नलिनासनसंस्थिताः ।

(ii) मा० पु० ब्रह्मेशगुहविष्णूनां तथेन्द्रस्य च शक्तयः ।
शरीरेभ्यो विनिष्क्रम्य तद्रूपैश्चण्डिकां ययुः ॥
यस्य देवस्य यद्रूपं यथा भूषणावाहनम् ।
तद्वदेव हि तच्छक्तिरसुरान्योद्धुमाययौ ॥
हंसयुक्तविमानाग्रे साक्षसूत्रा कमण्डलुः ।
आयाता ब्रह्मणः शक्तिर्ब्रह्माणी साभिधीयते ॥
माहेश्वरी वृषारूढा त्रिशूलवरधारिणी ।
महाहिवलया प्राप्ता चन्द्ररेखाविभूषणा ॥
कौमारी शक्तिहस्ता च मयूरवरवाहना ।
योद्धुमभ्याययौ दैत्यानम्बिका गुहरूपिणी ॥
तथैव वैष्णवी शक्तिर्गरूडोपरि संस्थिता ।
शङ्खचक्रगदाशार्ङ्गखड्गहस्ताभ्युपाययौ ॥
यक्षवाराहमतुलं रूपं या बिभ्रतो हरेः ।
शक्तिस्साप्याययौ तत्र वाराहीं बिभ्रती तनुम् ॥
नारसिंही नृसिंहस्य बिभ्रती सदृशं वपुः ।
प्राप्ता तत्र सटाक्षेपक्षिप्तनक्षत्रसंहतिः ॥
वज्रहस्ता तथैवेन्द्री गजराजोपरि स्थिता ।
प्राप्ता सहस्रनयना यथा शक्रस्तथैव सा ॥
ततः परिवृत्तास्ताभिरीशानो देवशक्तिभिः ।
हन्यन्तामसुराश्शीघ्रं मम प्रीत्याह चण्डिकाम् ॥
ततो देवीशरीरात्तु विनिष्क्रान्तातिभीषणा ।
चण्डिका शक्तिरत्युग्रा शिवाशतनिनादिनी ॥

(iii) मान० बाराही चैव कौमारी चामुण्डी भैरवी तथा ।
माहेन्द्री वैष्णवी चैव ब्रह्माणी सप्तमातरः ॥
एतासां सर्वशक्तीनां नवतालेन कारयेत् ।
भद्रपीठोपरि स्थाप्या चासने सप्तमातरः ॥
शयने दक्षिणे पादान् वामपादान्प्रलम्बयेत् ।
चतुर्भुजां त्रिनैत्रेश्च सर्वाभरणभूषिणीम् ।
चामुण्डी चैव रूद्राणी सा च शक्तिस्त्रिलोचनी ।
ब्रह्माणी चैव रुद्राणी जटामुकुटमण्डिते ।
वाराही पोत्रवक्त्री स्यात् किरीटमकुटान्विता ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कौमारी करण्डमौली च किरीटिनी वैष्णवी तथा ।।
चामुण्डी जटामौली च भैरवी पिबरालका ।
शूलं मरुद्गणं चैव पूर्वं चापरदक्षिणे ।।
कपालं पूर्वहस्ते च पाशं चापरहस्तके ।
एवं तु बाणमुद्धृत्य चामुण्डी भैरवी उभौ ।।
चामुण्डी श्यामवर्णाभा भैरवी रक्तवर्णिनी ।
केचित्तु भैरवी पूर्वे वरदाभयहस्तकौ ।।
शूलं डमरुकं चैव सव्यवामकेऽपरे ।
रक्ताम्बरधरा पार्श्वे कुचाभौ रक्तकञ्चुकौ ।।
चामुण्डी च शिरोमाला सर्वाभरणभूषिणी ।
कृष्णाम्बरधरा कृष्णलम्बकूर्चासिभैरवी ।।
वैष्णवी चैव वाराही श्यामवर्णा विशोभिनी ।
चक्रं च दक्षिणे हस्ते शङ्खं वामकरेऽपरे ।।
पूर्वे च वरदं वामे दक्षिणे त्वभयमुभौ ।
पीताम्बरं च संरक्तां सर्वाभरणभूषिणीम् ।।
एवं तु वैष्णवी प्रोक्ता बाराही दक्षिणे हलम् ।
वामहस्ते परे पाशं दक्षिणे त्वभयं करे ।।
वरदं वामहस्ते तु सर्वाभरणभूषिणीम् ।
पीताम्बरधरा चैव कौमारी रक्तवर्णिनी ।।
वरदं चाभयं पूर्वे वामे तु द्वारहस्तकौ ।
दक्षिणे च कपालं स्याच्छक्ति च वामहस्तकौ ।।
श्यामवर्णाम्बरा चैव सर्वाभरणभूषिणीम् ।
कौमारीलक्षणं प्रोक्तं ब्रह्माणी च चतुर्मुखी ।।
वरदाभयहस्तौ च कुण्डिकासाक्षमालाधृक् ।
वामेत्ववामपूर्वे तु चाक्षमाला यथाक्रमम् ।।
शुद्धरक्ताम्बरयुक्तां सर्वाभरणभूषिणीम् ।
एवमुक्ता तथा ब्राह्मी रुद्राणी श्वेतवर्णिनी ।।
वरदाभयहस्तौ च पूर्वे च वामदक्षिणे ।
वामे च हरिणं सव्ये परुशं परहस्तके ।।
चर्माम्बरधरायुक्ता सर्वाभरणभूषिणी ।
वामे तु शङ्खपत्रं स्यादवामे कर्णकुण्डलम् ।।
रुद्राणीलक्षणं प्रोक्तं चामुण्डी वामकर्णके ।
शङ्खपत्रं चावामे तु शङ्खकुण्डलसंयुताम् ।।
अन्यासां सर्वशक्तीनां ग्राहकुण्डलभूषणम् ।
हारोपग्रीवसंयुक्तां केयूरकटकान्विताम् ।।
मणिबन्धनवलयादिसर्वरत्नाङ्गुलीयकैः ।

CC-0. Agamnigam Digital Preseyation Foundation, Chandigarh

बाहुमूल्यादिसंभूष्यां साकं चुलकान्विताम् ॥
उक्तानां सर्वशक्तीनां सर्वाभरणभूषणम् ।
भद्रपीठोपरि देशे महिषोहतशिराः ॥
तदूर्ध्वे तारकां देवीं स्थानकां ऋजुं भावयेत् ।

(iv) अ०पृ० २२३ मातृणां च ततो वक्ष्ये भैरवादिगणांस्तथा ।
वीरेशं कारयेद्वत्स वीणाहस्तं सनर्त्तनम् ॥
गणनाथं ततः कुर्यात् गजवक्त्रं महोत्कटम् ।
आदौ तु गणनाथं च ह्यन्ते कुर्यात्तु भैरवम् ॥
मातृणां च तथा मध्ये पंक्तौ स्युश्चण्डिकादयः ।
प्रवक्ष्येऽनुक्रमं तत्र शृणु चैकाग्रमानसः ॥
कर्णे कपालमाला च मुण्डखट्वाङ्गशूलकाः ।
निर्मांसा क्रूररूपा च चामुण्डा दशनोज्ज्वला ॥
अक्षसूत्रं च खड्गश्च घण्टा चैव कमण्डलुः ।
महिषस्था शूकरास्या वाराही सर्वकामदा ॥
गजासना चाक्षसूत्रं दण्डः पाशः कमण्डलुः ।
ऐन्द्री देवी च लर्तव्या चामुण्डा प्रेतगा तथा ॥
अक्षसूत्रं च शक्तिश्च ताम्रचूडः कमण्डलुः ।
मयूरस्था च कौमारी षड्वक्त्रा च प्रकीर्तिता ॥
अक्षस्रचौ पुस्तकं च तथा चैव कमण्डलुः ।
चतुर्वक्त्रा ब्रह्माणी हंसारूढा च कामदा ॥
गदाचक्रे शङ्खपद्मे कुण्डलाभ्वामलङ्कृता ।
गरुडासनसंस्था च वैष्णवी सर्वकामदा ॥
वृषस्थाक्षशूलखड्गाः खट्वाङ्गं मातुलिङ्गकम् ।
जटाकिरीटेन्दुयुक्ता श्वेताङ्गी च महेश्वरी ॥

१. ब्राह्मी चतुर्वक्त्रा चतुर्बाहुसंयुक्ता हेमसिन्नभा ।

(i) अ० आ० दक्षिणेऽभयशूलं च वरदं चाक्षमालिका ॥
रक्तपद्मासनासीनां हंसवाहनकेतुकाम् ।
जटामकुटसंयुक्तां पीताम्बरधरां वराम् ॥
ब्रह्माणीं ह्येवमाख्यातां ब्रह्मवृक्षसमाश्रिताम् ।

(ii) पू०कार० चतुर्भुजा विशालाक्षी तप्तकाञ्चनसन्निभा ।
वरदाभयहस्ता च कमण्डलवक्षमालिका ॥
हंसध्वजा हंसरूढा जटामकुटधारिणी ।
रक्तपद्मासनासीना ब्रह्माणी ब्रह्मरूपिणी ॥

(iii) वि० ध० तत्र ब्राह्मी चतुर्वक्त्रा षड्भुजा हंससंस्थिता ।
पिङ्गला भूषणोपेता मृगचर्मोत्तरीयका ॥
वरं सूत्रं स्रुवं धत्ते दक्षबाहुत्रये क्रमात् ।
वामे तु पुस्तकं कुण्डीं बिभ्रती चाभयप्रदा ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

(iv) रूप० ब्रह्माणी हंसमारूढा साक्षसूत्रकमण्डलुः ।
सुचं तु पुस्तकं धत्ते ऊर्ध्वहस्तद्वये शुभा ॥

२. माहेश्वरी

(i) अ० आ० चतुर्भुजा त्रिनेत्रा च अतिरक्तसमप्रभा ।
शूलाभयकरा सव्ये वामे वरदसंयुता ॥
जपमालासमायुक्ता जटामकुटसंयुता ।
ईश्वरेणोपमा ह्येषा शिवा माहेश्वरी स्मृता ॥

(ii) पू० कार० त्रिनेत्रा शुक्लवर्णा च शूलपाणिर्वृषध्वजा ।
वरदाभयहस्ता च साक्षमालकरान्विता ॥
जटामकुटिनी शम्भोर्भूषणी सा महेश्वरी ।

(iii) वि० ध० माहेश्वरी वृषारूढा पञ्चवक्त्रा त्रिलोचना ।
शुक्लेन्दुभृज्जटाजूटा शुक्ला सर्वसुखप्रदा ॥
षड्भुजा वरदा दक्षे सूत्रं डरूमकं तथा ।
शूलघण्टाभयं वामे सैव धत्ते महाभुजा ॥

(iv) रूप० माहेश्वरी प्रकर्तव्या वृषभासनसंस्थिता ।
कपालशूलखट्वाङ्गवरहस्ता चतुर्भुजा ॥

३. वैष्णवी

(i) अ० आ० शङ्खचक्रधरा देवी वरदाभयपाणिनी ।
सुस्तना चारुवदना श्यामाभा च सुलोचना ॥
पीताम्बरधरा देवी किरीटमकुटान्विता ।
राजवृक्षं समाश्रित्य गरुडध्वजवाहिनी ॥
वैष्णवी पीठगा देवं (?) विष्णुभूषणभूषिता ।

(ii) पू० का० पद्मपत्रविशालाक्षी, श्यामवर्णा महाबला ।
शङ्खचक्रगदापद्मधरबाहुचतुष्टयी ॥
गरूडध्वजसंयुक्ता वैष्णवी विष्णुभूषणी ।

(iii) वि० ध० वैष्णवी तार्क्ष्यगा श्यामा षड्भुजा बनमालिनी ।
वरदा गदिनी दक्षे बिभ्रती चाम्बुजस्रजम् ॥
शङ्खचक्राभयान्वामे सा चेयं विलसद्भुजा ।

(iv) दे० पु० सुसिद्धा वैष्णवी कार्या. शङ्खचक्रगदाम्बुजा ।
वनमालाकृतापीडा पीतवस्त्रा सुशोभिता ॥

(v) रूप० वैष्णवी विष्णुसदृशी गरुडोपरि संस्थिता ।
चतुर्बाहुश्च वरदा शङ्खचक्रगदाधरा ॥

४. कौमारी

(i) अ० आ० चतुर्भुजा त्रिनेत्रा च रक्तवस्त्रसमन्विता ।
सर्वाभरणसंयुक्ता वाचिकाबद्धमाकुटी (?) ॥
शक्तिकुक्कुटहस्ता च वरदाभयपाणिनी ।
मयूरध्वजवाही स्यादुदुम्बरद्रुमाश्रिता ॥
कौमारी चेति विख्याता सर्वकामफलप्रदा ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

State Museum,
LUCKNOW.

(ii) पू० का० कुमारसदृशा कन्या वर्णवाहनकेतुभिः ।
वासिकाबद्ध मकुटा(?) शक्तिकाङ्कुशधारिणी॥
रक्तवस्त्रा महावीर्या हारकेयूरभूषणी ।
वरदाभयहस्ता च कौमारी कुङ्कुमप्रभा ॥

(iii) वि० ध० कौमारी रक्तवर्णा स्यात् षडवक्त्रा सार्कलोचना ।
रविर्बाहुर्मयूरस्था वरदा शक्तिधारिणी ॥
पताकां बिभ्रती दण्डं पात्रं बाणं च दक्षिणे ।
वामे चापमथो घण्टां कमलं कुक्कुटं त्वधः ॥
परशुं बिभ्रती तीक्ष्णं तदधस्त्वभयान्विता ।

(iv) दे० पु० कौमारी चैव कर्तव्या मयूरासनशक्तिभृत् ।
त्रिदण्डी कालरूपा च रक्तमाल्या सकुक्कुटा ॥

(v) रूप० कुमाररूपा कौमारी मयूरवरवाहना ।
रक्तवस्त्रधरा तद्वच्छूलशक्तिगदाधरा ॥

५. वाराही

(i) अ०आ० वराहवक्त्रसदृशा प्रलयाम्बुदसन्निभा ।
करण्डमकुटोपेता विद्रुमाभरणान्विता ॥
हलं च वरदं सव्ये वामे अभयशक्तिके ।
कल्पद्रुमं समाश्रित्य गजध्वजसवाहिनीम् ॥
वाराही चेति विख्याता नाम्ना सर्वफलप्रदा ।

(ii) पू० का० कृष्णा पीताम्बरा शार्ङ्गी सर्वसम्पत्करी नृणाम् ।
पवित्रालङ्कृतोरस्का पादनूपुरसंयुता ॥
सव्येऽभयहलं चैव मुसलं वर (द) मन्यके ।
वराहवक्त्री वाराही यमभूषणभूषणी ॥

(iii) वि० ध० कृष्णवर्णा तु वाराही सूकरास्या महोदरी ।
वरदा दण्डिनी खड्गं बिभ्रती दक्षिणे सदा ॥
खेटपाशाभयान्वामे सैव चापि लसद्भुजा ।

(iv) दे० पु० 'सूकरास्या कपालेऽसृक् पिवन्ती दण्डधारिणी'

(v) रूप० वाराहीं तु प्रवक्ष्यामि महिषोपरि संस्थिता ।
वराहसदृशी देवी घण्टाचामरधारिणी ॥
गदाचक्रधरा तद्वद्दानवेन्द्रविघातिनी ।
लोकानां च हितार्थाय सर्वव्याधिविनाशिनी ॥

६. इन्द्राणी

(i) अ० अ० चतुर्भुजा त्रिनेत्रा च रक्तवर्णा किरीटिनी ।
शक्तिवज्रधरा चैव वरदाभयपाणिनी ॥
सर्वाभरणसंयुक्ता गजध्जसवाहिनी ।
इन्द्राणी चेति विख्याता कल्पद्रुमसमाश्रिता ॥

(ii) पू० का० वज्रहस्ता गजारूढा लोचनद्वयसंयुता ।
वस्त्रालङ्कारसंपन्ना गजेन्द्रध्वजवाहना ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वरदाभयशक्त्याप्तबाहुकैन्द्री प्रकीर्तिता ।

(iii) वि० ध० ऐन्द्री सहस्रदृक्सौम्या हेमाभा गजसंस्थिता ।
वरदा सूत्रिणी वज्रं विभ्रत्यूर्ध्वं तु दक्षिणे ॥
वामे तु कलशं पात्रं त्वभयं तदधः करे ।

(iv) दे० पु० ऐन्द्री सुरवराध्यक्षा गजराजोपरि स्थिता ।
वज्राङ्कुशधरा देवी हारकेयूरभूषिता ॥

(v) रूप० इन्द्राणी चेन्द्रसदृशी वज्रशूलगदाधरा ।
गजासनगता देवी लोचनैर्बहुभिर्वृता ॥

७. चामुण्डा

(i) अ० आ० चतुर्भुजा त्रिनेत्रा च रक्तवर्णोर्ध्वकेशिका ।
कपालशूलहस्ता च वरदाभयपाणिनी ॥
शिरोमालोपवीता च पद्मपीठोपरि स्थिता ।
व्याघ्रचर्माम्बरधरा वटवृक्षसमाश्रिता ॥
चामुण्डीलक्षणं ह्येवमेकबेरे च तत्समम् ।
वामपादस्थितास्सर्वास्सव्यपादप्रलम्बिताः ॥

(ii) पू० का० दीर्घजिह्वोर्ध्वकेशा च कृष्णगका कृष्णदंष्ट्रिका ।
निर्मांसा व्यावृतमुखी चण्डी खण्डेन्दुमण्डिता ॥
काली कपालमाला च शवारूढा कृशोदरी ।
कौशिकारोहिणी वासौ चामुण्डा गृध्रकेतुका ॥
मांसखण्डसुसंपूर्णं कपालं वामपणिभाक् ।
शूलाही दक्षिणे चैव बह्निर्वामकरस्थकः ॥
व्याघ्रचर्माम्बरा काली त्रिनेत्री शङ्खकुण्डली ।
लोकानां मातरस्सप्तमातरः कथिता इमाः ॥

(iii) वि० ध० चामुण्डा प्रेतगा रक्ता विकृतास्याहिभूषणा ।
दंष्ट्रोग्रा क्षीणदेहा च गर्ताक्षी भीमरूपिणी ॥
दिग्बाहुः क्षामकुक्षिश्च मुसलं कवचं शरम् ।
अङ्कुशं विभ्रती खड्गं दक्षिणे त्वथ वामतः ॥
खेटं पाशं धनुर्दण्डं कुठारं चेति विभ्रती ।

(vi) अ० पु० २२३ या चण्डघातिनी देवी चामुण्डलक्षणं श्रृणु ।
निर्मांसा क्रूररूपा च उग्रनासा कृशोदरी ॥
कपिला चोर्ध्वकेशी च नीलाङ्गी रक्तलोचना ।
स्फुरन्नयनदंष्ट्रा च विकृतनखराननना ॥
त्रिशूलखड्गखेटाश्च धनुर्बाणश्च पाशकः ।
अङ्कुशश्चैव घण्टा च तथा दर्पणवज्रकौ ॥
दण्डः कुठारशङ्खौ च चक्रं गदा च मुद्गरः ।
सृविकणी कपालमालालङ्कृतिं विभ्रती तथा ॥
शवारुढा तु चामुण्डा जङ्घे घण्टावलम्बिके ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

व्याघ्रचर्मपरीधाना भुजङ्गाभरणान्विता ॥
सुनूपुरा घननादा दैत्यकाल इवापरः ।

बारूणी चामुण्डा
वि० ध०

लम्बोदरी तु कर्तव्या रक्ताम्बरपयोधरा ।
शूलहस्ता महाभागा भुजप्रहरणा तथा ॥
कार्पासकलुषा देवी वारुणी चातिसुन्दरी ।
बृहन्नखा च कर्तव्या बहुबाहुस्तथैव च ॥
चामुण्डा कथिता चैव सर्वसत्ववशङ्करी ।

रक्तचामुण्डा
रूप०

खड्गं पात्रं च मुसलं लाङ्गलं च विभर्ति सा ।
आख्याता रक्तचामुण्डा देवी योगीश्वरीति च ॥
अनया व्याप्तमखिलं जगत्स्थावरजङ्गमम् ।
इमां यः पूजयेद्भक्त्या स व्याप्नोति चराचरम् ॥
अधीते य इमां नित्यं रक्तदन्त्यावपुस्तकम् (?) ।
तं सा परिचरेद्देवी पतिं प्रियमिवाङ्गना ॥

देवीभेदप्रभेदेषु–

नन्दा
वि० ध०

नन्दा भगवती देवी भारद्वाजाभिनन्दजा ।
वरपाशाङ्कुशाब्जानि विभ्रती च चतुर्भुजा ॥
गौरवर्णा गजस्था वा खड्गखेटवराभया ।

भूतमाता
वि० ध०

श्यामवर्णा विशालाक्षी क्षीरारूणनिभानना ।
द्विभुजा विभ्रती लिङ्गं चर्म शस्त्रं तु दक्षिणे ॥
सिंहासनोपविष्टेयं मुक्ताभरणमूर्धजा ।
भूतप्रेतपिशाचाद्यैस्सेविता तु विशेषतः ॥
इन्द्रयक्षैश्च गन्धर्वैस्सिद्धविद्याधरादिभिः ।
अश्वत्थस्याप्यधो देवी भूतमातेति विश्रुता ॥

योगनिद्रा
वि० ध०

निद्रा तु शयनारूढा सुसौम्या मुकुलेक्षणा ।
पानपात्रधरा चेयं द्विभुजा परिकीर्तिता ॥

वामा
भ० पु०

वृत्तस्था जटिला त्र्यक्षा वह्निज्वालासमप्रभा ।
कपालाभयहस्तोग्रा वामा वामफलप्रदा ॥
द्विबाहुरेकवक्त्रैषा विधातव्या विपश्चिता ।

रौद्री
भ० पु०

रक्तवस्त्रा तथा रौद्री कपालचमरीकरा ।
शेषपूर्वा तु विज्ञेया कृष्णवक्त्रा सुभीषणा ॥

कलविकर्णिका
भ० पु०

नीलशुभ्रा महादेवी विकर्णी कलपूर्विका ।
कपालशक्तिहस्तेयं भयहृच्च शुभप्रदा ॥

बलविकर्णिका
भ० पु०

बभ्रुवर्णा विशालाक्षी कपालं जपमालिकाम् ।
बिभ्राणा शान्तिदा भूत्यै बलपूर्वा विकर्णिका ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

बलप्रमथनी ताम्राभा श्वेतवर्णा स्याद्बलप्रमथनी शुभा ।
भ० पु० कपालपाशिनी चेयं सर्वशत्रुक्षयङ्करी ॥
अम्बा वि० ध० 'अम्बा कुमुदवर्णाभा पाशाब्जाभीतिपात्रिणी'
अम्बिका सिंहारूढाम्बिका त्र्यक्षा भूषिता दर्पणोद्वहा ।
ल० स० (वामभुजे दर्पणोद्वहा दक्षिणे वरयुक्ता, यदुक्तम्—
दक्षिणे तु करे प्रोक्तो वरस्साधारणस्सदा ।
खड्खेटधरा द्वाभ्यां कर्तव्या च चतुर्भुजा ॥

मङ्गला सिंहासनस्थिता देवी जटामुकटमण्डिता ।
दे० पु० शूलाक्षसूत्रधरा च वरदाभयचापधृक् ॥
दर्पणं शरखेटं च खड्गचन्द्रधरा शिवा ।
सुरूपा लक्षणोपेता सुस्तनी चारुहासिनी ॥
सर्वाभरणभूषाङ्गी सर्वशोभासमन्विता ।

सर्वमङ्गला चतुर्बाहुः प्रकर्तव्या सिंहस्था सर्वमङ्गला ।
(i) वि० ध० अक्षसूत्रं कजं दक्षे शूलकुण्डीधरोत्तरे ॥
(ii) श० त० हेमाभां करुणाभिपूर्णनयनां माणिक्यभूषोज्ज्वलां
द्वात्रिंशद्दलषोडशाष्टदलयुक्पद्मस्थितां सुस्मिताम् ।
भक्तानां धनदां वरं च दधतीं वामेन हस्तेन त-
द्दक्षेणाभयमातुलङ्गसुफलं श्रीमङ्गलां भावये ॥

कालरात्रिः एकवेणी जपाकर्णपूरा नग्ना खरस्थिता ।
वि० ध० लम्बोष्ठी कर्णिकाकर्णी तैलाभ्यक्तशरीरिणी ॥
वामपादोल्लसल्लोहलताकण्टकभूषणा ।
वर्धन्मूर्ध्वध्वजा कृष्णा कालरात्रिर्भयङ्करी ॥

ललिता शङ्खमुग्धकरादर्शं बिभ्रती वामपार्श्वतः ।
वि० ध० याम्ये फलाञ्जनीहस्ता ललितोर्ध्वा सुभूषणा ॥

सर्वभूतदमनी जपाकुसुमवर्णाभा दंष्ट्रिणी च महोदरी ।
भ० प० कपालवज्रिणी भूतदमनी सर्वपूर्विका ॥

मनोन्मनी नीलताम्रारूणा भासा पृथुवक्त्रा मनोन्मनी ।
(i) विश्व० कपालखड्गिनी भूत्यै शत्रूणां भयवर्धनी ॥
(ii) मान० चतुर्भजां त्रिनेत्रां च जटामुकुटमण्डिताम् ।
समपदस्थानकां देवीं दशतालेन मानयेत् ॥
दक्षिणे चाभयं पूर्वे वरदं वामहस्तके ।
अपरे दक्षिणे चाब्जं वामहस्ते तु चोत्पलम् ॥
श्वेतरक्तं च वर्णं वा श्यामवर्णाङ्गशोभिताम् ।
केचित्तु कुन्तलनिभं तुङ्गं मकुटं कुन्तलं तु वा ॥
वामे बालशशिनं कुर्यादवामे तुरगमन्वितम् ।
दुकूलवसनोपतां सर्वाभरणभूषिताम् ॥
तदेव वृषमाश्रित्य पृष्ठे देवी त्रिभागिकम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

दक्षिणं स्वस्तिकं पादं वामपादं तु कुञ्चितम् ॥
पुरतो वामहस्ताग्रे शिरस उपरि विन्यसेत् ।
शेषं तु पूर्ववद् देवीं च चोत्पलं वासनाभयम् ॥
तदेव परहस्तौ च वामे रक्ताब्जधारिणीम् ।
दक्षिणे चाक्षमालां च कुर्यात्प्रोक्तं पुरातनैः ॥
एवं मनोन्मनीं शक्तिं स्थापयेच्छिवहर्म्यके ।

शिवदूती — तथैवार्तमुखी शुष्का शुष्ककाया विशेषतः ।
(i) म० पु० — बहुबाहुयुता देवी भुजगैः परिवेष्टिता ॥
कपालमालिनी भीमा तथा खट्वाङ्गधारिणी ।
शिवदूती तु कर्तव्या श्रृगालवदना शुभा ॥
आलीढासनसंस्थाना तथा राजंश्चतुर्भुजा ।
असृक्पात्रधरा देवी खड्गशूलधरा तथा ॥
चतुर्थस्तु करस्तस्यास्तथा कार्यस्तु सामिषः ।

(ii) श्रीतत्व० — वामाधो रत्नपात्रं तदुपरि च गदां खेटपाशौ दधानां
दक्षैः पद्मं कुठारं तदुपरि च महाखड्गमप्यङ्कुशं च ।
मध्याह्नार्कप्रभाभां नवमणिविलसद्भूषणामष्टहस्तां
दूतीं नित्यां त्रिनेत्रां सुरगणमुनिभिस्स्तूयमानां भजेऽहम् ॥

योगेश्वरी — दशबाहुस्त्रिनेत्रा च शस्त्रशक्तचसिडामरुम् ।
ल०स० — बिभ्रती दक्षिणे हस्ते वामे घण्टां च खेटकम् ॥
खट्वाङ्गं च त्रिशूलं च देवी योगेश्वरी मता ।

भैरवी — एवंरूपा भवेदन्या पाशाङ्कुशयुतारुणा ।
विश्व० — भैरव्याख्या यदीष्टा तु भुजैर्द्वादशभिर्युता ॥

त्रिपुरभैरवी — उद्यद्भानुसहस्रकान्तिमरुणक्षौमां शिरोमालिनीं
शा० ति० — रक्तालिप्तपयोधरां जपवटीं विद्यामभीतिं वरम् ।
हस्ताब्जैर्दधतीं त्रिनेत्रविलसद्वक्त्रारविन्दश्रियं
देवीं बद्धहिमांशुरत्नमकुटां वन्देऽरविन्दस्थिताम् ॥

शिवा — शिवा वृषासना कार्या त्रिनेत्रा वरपाणिका ।
दे० पु० — डमरूरगधारी च त्रिशूलाभयदायिका ॥

कीर्तिः — सुमध्यां कारयेत्कीर्तिं नीलोत्पलव्यस्थिताम् ।
दे० पु० — सर्वाभरणभूषाङ्गीं कलशोत्पलधारिणीम् ॥
मदिरौदनगन्धाढ्यां महार्घमणिभूषणाम् ।

सिद्धिः — सिद्धिर्देवी प्रकर्तव्या सिद्धार्थकवरप्रदा ।
दे० पु० — सितचन्दनगन्धाढ्या सितपङ्कजभूषिता ॥
सितासनस्थिता देवी प्रतिहारोपशोभिता ।

ऋद्धिः — सुन्दरीं कारयेदृद्धिं पर्यङ्कासनसंस्थिताम् ॥
दे० पु० — दर्पणालोकसुरतां तिलकालकभूषिताम् ।
मालाचामरशोभाढ्यां वेणुवीणासदाप्रियाम् ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

क्षमा	क्षमा तु सुमुखी कार्या योगपट्टोत्तरीयका ।
दे० पु०	पद्मासनकृताधारा वरदोद्यतपाणिका ॥
	शूलमेखलसंयुक्ता प्रशान्ता योगसंस्थिता ।
दीप्तिः—दे०पु०	'तेजोऽधिका प्रकर्तव्या दीप्तिश्चन्द्रासनस्थिता'
रतिः	कमनीया रतिः कार्या वसन्तोज्वलभूषणा ।
दे० पु०	नृत्यामाना शुभा देवी समस्ताभरणैर्युता ॥
	वीणावादनशीला च मदकर्पूरचर्चिता ।
	दण्डाक्षसूत्रधरा च व्रतस्था योगसंस्थिता ॥
श्वेता—दे० पु०	'श्वेता पूर्णेन्दुसदृशा श्वेतपङ्कजसंस्थिता'
भद्रा	भद्रा सुभद्रा कर्तव्या भद्रासनव्यवस्थिता ।
दे० पु०	नीलोत्पलफलहस्ता शूलसूत्राक्षधारिणी ॥
जयाविजये	जयां च विजयां कुर्याच्छूलपद्माक्षधारिणीम् ।
दे० पु०	वरोद्यतां च सिंहस्थां सवकर्मप्रसाधनीम् ॥
घण्टाकर्णी दे० पु०	'घण्टाकर्णी प्रकर्तव्या घण्टात्रिशूलधारिणी'
जयन्ती	जयन्ती सुन्दरी कार्या कुन्तशूलासिधारिणी,
दे० पु०	खेटकव्यग्रहस्ता च पूजनीया शुभान्वितैः ॥
दितिः	दितिर्दैत्यनुता देवी सदा पूज्या महामुने! ।
दे० पु०	दण्डासनस्थिता भद्रा सर्वाभरणभूषिता ॥
	फलनीलोत्पलकरा चोत्सङ्गशिशुभूषिता ।
अरुन्धती	अक्रोधारून्धती देवी सितवस्त्रा व्रतस्थिता ।
दे० पु०	पत्रपुष्पोदककरा चन्दनेन सुर्चचिता ॥
अपराजिता	अपराजिता च कर्तव्या सिंहारूढा महाबला ।
(i) दे० पु०	पिनाकेषुकरा चैव खड्गखेटकधारिणी ॥
	त्रिनेत्रेन्दुजटाभारा कृतवासुकिकङ्कणा ।
(ii) ना० सं०	नीलोत्पलनिभां देवीं निद्रामुद्रितलोचनाम् ।
	नीलकुञ्चितकेशाग्रां निम्ननाभीवलित्रयाम् ॥
	वराभयकराम्भोजां प्रणतार्तिविनाशिनीम् ।
	पीताम्बरोपेतां भूषणस्रग्विभूषिताम् ॥
	वरशक्त्याकृतिं सौम्यां परसैन्यप्रभञ्जनीम् ।
	शङ्खचक्रगदाभीतिरम्यहस्तां त्रिलोचनाम् ॥
	सर्वकामप्रदां देवीं ध्यायेत्तामपराजिताम् ।
सुरभिः	सुरभिर्गोमुखी देवी सुरूपा सर्वभूषणा ।
वि० ध०	घासमुष्टिं तथा कुण्डीं विभ्राणा मूर्तिपुष्टिदा ॥
कृष्णा	अक्षसूत्रं च कुण्डीं च हृदयाग्रे पुटाञ्जलिम् ।
मा० पु०	पञ्चाग्निकुण्डमध्यस्थां कृष्णां तामनुधारयेत् ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

इन्द्राक्षी
इ०क०

इन्द्राक्षीं द्विभुजां देवीं पीतवस्त्रद्वयान्विताम् ।
वामहस्ते वज्रधरां दक्षिणेन वरप्रदाम् ।।
इन्द्राक्षीं सहयुवतीं नानालङ्कारभूषिताम् ।
प्रसन्नवदनाम्भोजामप्सरोगणसेविताम् ।।

अन्नपूर्णा
का० आ०

वामे माणिक्यपात्रं मधुरसभरितं विभ्रतीं पाणिपद्मे
दिव्यैरन्नैः प्रपूर्णां धृतमणिवलये दक्षिणे रत्नदर्वीम् ।
रक्ताङ्गी पीनतुङ्गस्तनभरविलसत्तारहारां त्रिनेत्रां
वन्दे पूर्णेन्दुविम्बप्रतिनिधिवदनामम्बिकामन्नपूर्णाम् ।।
सिन्दूराभां त्रिनेत्राममृतशशिकलां खेचरीं रक्तवस्त्रां
पीनोत्तुङ्गस्तनाढ्यामभिनवविलसद्यौवनारम्भरम्याम् ।
नानालङ्कारयुक्तां सरसिजनयनामिन्दुसंक्रान्तमूर्ति ।
देवीं पाशाङ्कुशाढ्यामभयवरकरामन्नपूर्णां नमामि ।।

बाला
त्रि० सु० क०

जपाकुसुमसङ्काशा फुल्लपद्मासनस्थिता ।
अक्षस्रक्पुस्तकाभीतिवरहस्ता तु बालिका ।।

राजमातङ्गी
राज०क०

रत्नासनां श्यामगात्रीं शृण्वतीं शुकजल्पितम् ।
अञ्जन्यस्तैकचरणां चारुचन्द्रावतंसकाम् ।।
वीणामालापयन्तीं च तिलकोद्भासिफालकाम् ।
सौगन्धिकस्रक्कलिकाचूलिकां रक्तवाससम् ।।
विभूषणैर्भूषितां च मातङ्गीं प्रणमाम्यहम् ।

अश्वारूढा
महा० र०

अश्वारूढां कराग्रे नवकनकमयीं वेत्रयष्टिं दधाना
दक्षे वामेऽपि चैवं खलिनतनुलतापाशबद्धा सुसाध्या ।
देवी नित्यं प्रसन्ना शशधरविलसत्केशपाशा त्रिनेत्रा
दद्यादद्यानवद्या सकलसुखकुलप्राप्तिहृद्यां श्रियं नः ।।

भुवनेश्वरी
महा० र०

उद्याद्भास्वत्समाभां विजितनवजपामिन्दुखण्डावनद्धां
ज्योतिर्मालां त्रिनेत्रां विविधमणिलसत्कुण्डलां पद्मसंस्थाम् ।
हारग्रैवयकाञ्चीमणिगणवलयैस्संयुतामम्बराढ्या-
माद्यां पाशाङ्कुशाभ्यामभयवरकरां भावये भुवनेशीम् ।।

ज्येष्ठा
(i) अ०ग्रा०

द्विभुजाञ्जनसङ्काशा लम्बोष्ठा तुङ्गनासिका ।
लम्बमानस्तना कुक्षौ नीलं वा रक्तवाससी ।।
उत्पलं दक्षिणे हस्ते पीठे वा मकरस्थितः ।
भद्रपीठस्थिता वापि द्विपादं चैव लम्बिनि ।।
सर्वाभरणसंयुक्ता वाचिकाबद्धमाकुटी (?) ।
काकध्वजसमायुक्ता सालका तिलकान्विता ।।
तस्या दक्षिणपार्श्वे तु वृषो वै वृषवाहना ।
द्विभुजो दक्षिणे हस्ते दण्डं वामे तु सूत्रकम् ।।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

लम्बयेद्दक्षिणं पादं वाममुत्कुटिकासनम् ।
श्वेतवर्णमहाकाया सर्वाभरणभूषिता ॥
किरीटमुकुटोपेता दुकूलवसनान्विता ।
वृषं वै दक्षिणे त्वेवं वामे त्वग्निमथोच्यते ॥
सुस्तना यौवनाङ्गा च सर्वाभरणभूषिता ।
कृष्णाञ्जननिभा रक्तवस्त्रेणैव तु भूषिता ॥
करण्डमुकुटाढ्य चक्षी वाम ··· ··· ··· ··· न्विता ।
सव्येनोत्कुटिकासीना हस्तादुत्पलधारिणी ॥

(ii) सु० आ०

अथातस्संप्रवक्ष्यामि ज्येष्ठायास्स्थापनं परम् ।
आदिशक्तेस्समुत्पन्ना पश्चादुदधिसंभवा ॥
उदधौ मथ्यमाने तु चोत्थिता सा गजानना ।
कालाञ्जननिभा देवी सर्वाभरणभूषिता ॥
खरारूढा कलेः पत्नी मुखासीना हिता तनुः ।
जानुपार्श्वे मणिर्वाथ वृषास्यं वृषभं तथा ॥
वषभो रक्तवर्णस्तु मणिः काञ्चनसप्रभा ।
रूपाण्येतानि कृत्वा तु प्रतिष्ठां सम्यगाचरेत् ॥

(iii) पू० कार०

पीनोरू पीनगण्डा च पीनस्तनभरोदरी ।
नीलकालकसीमन्ता सधम्मिल्लशिरोरूहा ॥
स्निग्धाञ्जनिनिभा रक्ता बिम्वोष्ठी तुङ्गनासिका ।
द्विभुजा च द्विनेत्रा च कुमुदं दक्षिणे करे ॥
कन्यापुत्रान्विता देवी दक्षिणेऽदक्षिणेऽपि च ।
देव्या बाहुसमं कुर्यात् कन्यकापुत्रकौ क्रमात् ।
पुत्रो वृषभवक्त्रस्तु द्विभुजौ च द्विनेत्रकौ ।
ज्येष्ठाया आकृतिर्ह्येवं षद्मजाकृतिरुच्यते ॥

(iv) वि० ध०

तुङ्गनासा च लम्बोष्ठी लम्बमानस्तनोदरी ।
आलोहिता स्मृता ह्येषा ज्येष्ठाऽलक्ष्मी रिति श्रिये ॥
उत्पालाभयहस्तेयं द्विभुजा वीरवन्दिता ।
रक्तज्येष्ठा च नीला च भूतलार्पितपादिका ॥
भूतलं स्पृशते दोर्भ्यां द्विभुजा वीरवन्दिता ।

(v) भ० पु०

पाटलाभा भवेदष्टाकपालशरधारिणी ॥
उग्रा महाबला भूत्यै शत्रुघ्नी शेषपूर्वजा ।

पञ्चमो पटलः समाप्तः

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

षष्ठो पटलः

सौर-प्रतिमा-लक्षणम्

सूर्यादयः दिग्पालाश्च

द्वादशादित्याः

(i) अ० आ०

द्विभुजाःपद्महस्ताश्च रक्तपद्मासने स्थिताः ।
रक्तमण्डलसंयुक्ताः करण्डमकुटान्विताः ॥
रक्ताम्बरधरास्सर्वे सर्वाभरणभूषिताः ।
छन्नवीरसमायुक्ता भास्करा द्वादशा इमे ॥
वैवस्वतो विवस्वांश्च मार्तण्डो भास्करो रविः ।
लोकप्रकाशकश्चैव लोकसाक्षी त्रिविक्रमः ॥
आदित्यश्च तथा सूर्य्यः अंशुमांश्च दिवाकरः ।
एते वै द्वादशादित्याश्चोत्तमादिक्रमात्स्थिताः ॥

(ii) सु० आ०

अर्यमा चेन्द्रवरूणौ पूषा विष्णुर्भगस्तथा ।
अजघन्यो जघन्यश्च मित्रो धाता इति स्मृताः ॥
विवस्वांश्चैव पर्जन्यस्त्वादित्या द्वादश स्मृताः ।
द्विभुजाः पद्महस्ताश्च रक्तपद्मासने स्थिताः ॥
रश्मिमण्डलसंयुक्तास्सुरक्ता लोकनायकाः ।

(iii) पू० का०

वैकर्तनो विवस्वांश्च मार्तण्डो भास्करो रविः ।
लोकप्रकाशकश्चैव लोकसाक्षी त्रिविक्रमः ॥
आदित्यश्च तथा सूर्यः अंशुमांश्च दिवाकरः ।
एते वै द्वादशादित्या एवमाकृतिरूच्यते ॥
द्विभुजाश्च द्विनेत्राश्च पद्मस्थाः पद्महस्तकाः ।
रक्ताम्बरसुवर्णाश्च प्रभामण्डलमण्डिताः ॥
उपवीतसमायुक्तास्सर्वाभरणभूषिताः ।

(iv) अ० पु०

वरूणस्सूर्यनामा च सहस्रांशुस्तथा परः ।
धाता तपनसंज्ञश्च सविताथ गभस्तिमान् ॥
रविश्चैवाथ पर्जन्यस्त्वष्टा मित्रोऽथ विष्णुकः ।
मेषादिराशिसंस्थाश्च मार्गादिकार्तिकान्तगाः ॥
कृष्णो रक्तो मनाग्रक्तः पीतः पाण्डुरकस्सितः ।
कपिलः पीतवर्णश्च शुकाभो धवलस्तथा ॥
धूम्रो नीलः क्रमाद्वर्णाश्शवतयः केसराग्रगाः ।
इडा सुषुम्ना विश्वार्चिरिन्दुसंज्ञा प्रमर्दिनी ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

प्रहर्षणी महाकली कपिला च प्रबोधनी ॥
नीलाम्बरा घनान्ता च अमृताख्या च शक्तयः ।

(v) विश्व० शृणु वत्स प्रवक्ष्यामि सूर्यभेदांस्तु ते जय ।
यावत्प्रकाशकस्सूर्यो जायते मूर्तिभिर्यथा ॥
दक्षिण पौष्करी माला करे वामे कमण्डलुः ।
पद्माभ्यां शोभितकरा सा धात्री प्रथमा स्मृता ॥
शूलं वामकरे चाख्या दक्षिणे सोम एव च ।
मैत्री नाम त्रिनयना कुशेशयविभूषिता ॥
प्रथमे तु करे चक्रं तथा वामे च कौमुदी ।
मूर्तिरार्यम्णी ज्ञेया सपद्मैः पाणिपल्लवैः ॥
अक्षमाला करे सव्ये चक्रं वामे प्रतिष्ठितम् ।
सा मूर्ती रौद्री ज्ञातव्या प्रधाना पद्मभूषिता ॥
चक्रं तु दक्षिणे यस्या वामे पाशस्सुशोभनः ।
सा वारूणी भवेन्मूर्तिः पद्मव्यग्रकरद्वया ॥
कमण्डलुर्दक्षिणतो माला चाक्षमयी भवेत् ।
सा भवेत्सम्मता सूर्यमूर्तिः पद्मविभूषिता ॥
यस्या दक्षिणतश्शूलं वामहस्ते सुदर्शनः ।
भगमूर्तिस्समाख्याता पद्महस्ता शुभा जय !
अथ वामकरे माला त्रिशूलं दक्षिणे स्मृतम् ।
विवस्वन्मूर्तिरेषा स्यात्पद्मलाञ्छनलक्षिता ॥
पूषाख्यस्य भवेन्मूर्तिर्द्विभुजा पद्मलाञ्छिता ।
सर्वपापहरा ज्ञेया सर्वलक्षणलक्षिता ॥
दक्षिणे तु गदा यस्या वामे चैव सुदर्शनः ।
पद्मव्यग्रा तु सावित्री मूर्तिस्सर्वार्थसाधनी ॥
स्रुवं च दक्षिणे हस्ते वामे होमजकालिकम् ।
मूर्तिस्त्वाष्ट्री भजेत्सा स्यात्पद्मरूद्धकरद्वया ॥
सुदर्शनकरा सव्ये पद्महस्ता तु वामतः ।
एषा स्याद् द्वादशी मूर्तिर्विष्णोरमिततेजसः ॥
धाता मित्रोऽर्यमा रूद्रो वरूणस्सूर्य एव च ।
भगो विवस्वान् पूषा च सविता दशमस्स्मृतः ॥
एकादशस्तथा त्वष्टा विष्णुर्द्वादश उच्यते ।

सूर्यः
(i) बृ० सं० नासाललाटजङ्घोरूगण्डवक्षांसि चोन्नतानि रवेः ।
कुर्यादुदीच्यवेषं गूढं पादादुरो यावत् ॥
बिभ्राणस्स्वकररुहे पाणिभ्यां पङ्कजे मुकुटधारी ।
कुण्डलभूषितवदनः प्रलम्बहारो वियद्गवृतः ॥
कमलोदरद्युतिमुखः कञ्चकगुप्तस्स्मितप्रसन्नमुखः ।
रत्नोज्ज्वलप्रभामण्डलश्च कर्तुश्शुभकरोऽर्कः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सौम्या तु हस्तमात्रा वसुदा हस्तद्वयोच्छ्रिता प्रतिमा ।
क्षेमसुभिक्षाय भवेत्त्रिचतुर्हस्तप्रमाणायाम् ॥

(ii) वि० ध० मत्स्यपुराण

पद्मासनः पद्मकरः पद्मगर्भदलद्युतिः ।
सप्ताश्वरथसंस्थश्च द्विभुजश्च सदागतिः ॥

(iii) अ० पु० चौखम्बा प्रकाशन - म. उपाध्याय ५१.१-२. ६५ अ. श्लोक पृ.

ससप्ताश्वे सैकचक्रे रथे सूर्यो द्विपद्मधृक् ।
मषीभाजनलेखन्यौ विभ्रत्कुण्डी तु दक्षिणे ॥
वामे तु पिङ्गलो द्वारि दण्डभृत्स रवेर्गणः ।
बालव्यजनधारिण्यौ पार्श्वे राज्ञी च निष्प्रभा ॥
अथवाश्वसमारूढः कार्य एकस्तु भास्करः ।

(iv) म० पु० विष्णुधर्मोत्तर पुराण

रविः कार्यश्शुभश्मश्रुः सिन्दूरारूणसुप्रभः ।
उदीच्यवेषस्स्वाकारस्सर्वाभरणभूषितः ॥
चतुर्बाहुर्महातेजाः कवचेनाभिसंवृतः ।
कर्तव्या रशना चास्य पानीयाङ्गेति संज्ञिताः ॥
रश्मयस्तस्य कर्तव्या वामदक्षिणहस्तयोः ।
ऊर्ध्वे स्रग्दामसंस्थाना सर्वपुष्पचिता शुभा ॥
स्वरूपस्स्वाकारो दण्डः कार्योऽस्य वामतः ।
दक्षिणे पिङ्गलो भागे कार्तव्यश्चातिपिङ्गलः ॥
आपीच्यवेषौ कर्तव्यौ तावुभावपि यादव! ।
तयोर्मूर्ध्नि च विन्यस्तौ करौ कार्यौ विभावसोः ॥
लेखनीपत्रके कार्ये पिङ्गलश्चातिपिङ्गलः ।
चर्मशूलधरो देवस्तथा यत्नाद्विधीयते ॥
सिंहो ध्वजश्च कर्त्तव्यस्तथा सूर्यस्य वामतः ।
चत्वारश्चास्य कर्तव्यास्तनयास्तस्य पार्श्वयोः ॥
रेवन्तश्च यमश्चैव मनुद्वितयमेव च ।
ग्रहराजो रविः कार्यो ग्रहैर्वा परिवारितः ॥
राज्ञी सवर्णा छाया च तथा देवी सुवर्च्चसा ।
चतस्रश्चास्य कर्तव्याः पत्न्यश्च परिपार्श्वयोः ॥
एकचक्रे च सप्ताश्वे षडश्रे वा रथोत्तरे ।
उपविष्टस्तु कर्तव्यो देवो ह्यरूणसारथिः ॥

(v) सु० आ०

अदितेः पुत्रभावत्वादादित्यस्त्विवति चोच्यते ।
ईश्वरस्यार्धभागे तु जगच्चक्षुरिति स्मृतः ॥
द्विभुजं पद्महस्तं तु रक्तवर्णं सुरूपकम् ।
करण्डमुकुटोपेतं सर्वाभरणभूषितम् ॥
मकुटद्विगुणं तारं प्रभामण्डलमध्यगम् ।
उषाश्च प्रत्युषोदेवी सव्यासव्ये तु संस्थिते ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अरुणं चाग्रतः कृत्वा पङ्गुवत् तत्स्वरूपकम् ।
सप्ताश्वरथमध्यस्थं भास्वरं पापनाशनम् ॥
रक्तपद्मासनस्थं हि आसनं तत्र कल्पयेत् ।
पूर्वोक्तविधिना सर्वमादित्यं परिकल्पयेत् ॥

(vi) पू० का० एकचक्रससप्ताश्वससारथिमहारथम् ।
कृत्वा तु स्थापयेत्सूर्यं पुरूषाकृतिरूपिणम् ॥
तदर्धं वामतश्श्यामं नारीरूपसमन्वितम् ।
कृत्वा तु स्थापयेत्सम्यक्सर्वाभरणभूषितम् ॥
आकुञ्चितसुकेशं तु प्रभामण्डलसंयुतम् ।
मकुटं वा विधातव्यन्यत्सर्वं सुमण्डलम् ॥
हस्तद्वयलसत्पद्मं कञ्चुकाञ्चितविग्रहम् ।
एकवस्त्रं द्विदोर्दण्डं स्कन्धे सक्तकराम्बुजम् ॥
रथोपेतं विना वाथ केवलं पद्मसंस्थितम् ।
पादौ सकटकौ तस्य स्थिरं पद्मासने स्थितम् ॥
जातिहिङ्गुल्यवर्णस्था? सस्थाप्यं सूर्यमण्डलम् ।

(vii) शिल्प रक्तवर्णो महातेजा द्विबाहुः पद्मभृद्रविः ।
सप्तभिस्तुरगैर्युक्ते सर्वरज्जुसमन्विते ॥
एकचक्रे रथे तिष्ठन्पादाक्रान्तसरोरूहः ।
माणिक्यकुण्डलोपेतः पद्मरागकिरीटकः ॥
रक्ताम्बरधरो रम्यस्सुव्यक्ताङ्गो मनोहरः ।
अनूरूसारथिः कार्यः प्रतिहारौ च पार्श्वयोः ॥
दण्डपिङ्गलनामानौ खड्गखेटकधारिणौ ।

(viii) अ० पृ० आदित्यस्य प्रवक्ष्यामि मूर्ति... ... ।
रक्तवर्णो महातेजाः शतपद्मोपरिस्थितः ॥
सर्वलक्षणसंयुक्तः सर्वाभरणभूषितः ।
द्विभुजश्चैकवक्त्रश्च श्वेतपङ्कजधृत्करः ॥
तेजोवर्तुलबिम्बस्य मध्यस्थो रक्तवाससः ।
इदमादित्यरूपं स्यात् सर्वपापप्रणाशनम् ॥

(ix) रूप० सर्वलक्षणसंयुक्तं सर्वाभरणभूषितम् ।
द्विभुजं चैकवक्त्रं च श्वेतपङ्कजधृत्करम् ॥
वर्तुलं तेजसो बिम्बं मध्यस्थं रक्तवाससम् ।
आदित्यस्य त्विदं रूपं कुर्यात्पापप्रणाशनम् ॥

आदित्यपरिवाराः—नवग्रहाःनवग्रहमूर्तयश्च

सामान्यलक्षणम्

(i) अ० पु० तेजश्चण्डो महावक्रो द्विभुजः पद्मखड्गभृत् ।
कुण्डिकाजप्यमालीन्दुः कुजश्शक्त्यक्षमालिकः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

बुधश्चापाक्षपाणिस्स्याज्जीवः कुण्डचक्षमालिकः ।
शुक्रः कुण्डचक्षमाली स्यात्किङ्किणीसूत्रवाञ्छनिः ॥
अर्धचन्द्रधरो राहुः केतुः खड्गी च दीपभृत् ।

(ii) अ० पु०
श्वेतवर्णो भवेत्सोमो रक्तो ह्यङ्गारकस्तथा ।
बुधश्च पीतवर्णाभस्ताद्दृग्रूपं गुरोस्तथा ॥
गोक्षीरधवलः शुक्रः कृष्णवर्णः शनैश्चरः ।
राजावर्तनिभो राहुर्धूम्रः केतुः सदा भवेत् ॥
सोमः कमलहस्तः स्यात् कुजो दण्डकमण्डलू ।
योगासनस्थश्च बुधो गुरुश्चाऽक्षकमण्डलू ॥
अक्षं कमण्डलुं शुक्रः शनिर्दण्डकमण्डलू ।
अर्धकायः स्थितो केतुः करपुटाकृतिः ॥
सप्ताश्वरथ आदित्यश्चन्द्रो दशहयः स्मृतः ।
मेषारूढोऽङ्गारकश्च बुधः सर्पासनस्थितः ॥
हंसारूढं गुरुं विद्यात् शुक्रं दर्दुरवाहनम् ।
शनिं च महिषारूढं राहुं वै कुण्डमध्यगम् ॥
सर्पपुच्छाकृतिं केतुं शनिं दंष्ट्राकरालकम् ।
किरीटमालाशोभाढ्याः सर्वाभरणभूषिताः ॥

(iii) रू० म०
श्वेतस्सोमः कुजो रक्तः बुधः पीतो गुरूस्तथा ।
शुक्रश्श्वेतश्शनिः कृष्णो राहुर्धूम्रास्तु केतवः ॥
पद्महस्तो भवेत्सोमः कुजे दण्डः कमण्डलुः ।
योगासनो बुधो देवो गुरौ चाक्षकमण्डलू ॥
अक्षः कमण्डलुश्शुक्रे शनौ दण्डकमण्डलू ।
अर्धकायस्थितो राहुः केतुः करपुटाकृतिः ॥
सप्ताश्वरथ आदित्यश्चन्द्रो दशहयस्स्थितः ।
मङ्गलो मेषमारूढो बुधस्सर्पासनस्थितः ॥
हंसारूढं गुरुं विद्याद्भेकारूढं च भार्गवम् ।
शनिं महिषमारूढं राहुं कुण्डस्य मध्यगम् ॥
सर्पपुच्छाकृतिं केतुं शनिं दंष्ट्राकरालितम् ।
ग्रहाः किरीटिनः कार्या रक्तकुण्डलशोभिताः ॥
सूर्यस्यायतने स्थाप्या वह्निकोणादितः क्रमात् ।
कुजो जीवस्तमश्शुक्रः केतवो ज्ञश्शनिश्शशी ॥

१. सोमः
(i) म० पु०
चन्द्रश्श्वेतवपुः कार्यश्श्वेताम्बरधरः प्रभुः ।
चतुर्बाहुर्महातेजास्सर्वाभरणभूषितः ॥
कुमुदौ च सितौ कार्यौ तस्य देवस्य हस्तयोः ।
कान्तिर्मूर्तिमती कार्या तस्य पार्श्वे तु दक्षिणे ॥
वामे शोभा तथा कार्या रूपेणाप्रतिमा भुवि ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

	चिह्नं तथास्य सिंहाङ्कं वामपार्श्वेऽर्कवद्भवेत् ।।
	दशाश्वे च रथे कार्यो द्विचक्रे वरसारथौ ।
(ii) वि० ध०	श्वेतश्श्वेताम्त्ररधरश्श्वेताश्वश्श्वेतभूषणः ।
	गदापाणिर्द्विबाहुश्च कर्तव्यो वरदश्शशी ।।
(iii) अ० आ०	सोमस्सिंहासनासीनः कुन्दशङ्खसमद्युतिः ।
	प्रभामण्डलसंयुक्तो द्विभुजस्सौम्यवक्त्रकः ।।
	आसीनो वा स्थितो वापि कुमुदोज्वलकं करः ।
	हेमयशोपवीताङ्गस्सर्वाभरणभूषितः ।।
	शुक्लवस्त्रधरश्शान्तस्सर्वपुष्पैरलङ्कृतः ।
	सोम एवं समाख्यातः ··· ··· ··· ··· ··· ··· ···।।
(iv) शिल्प०	चन्द्रश्चित्रे विधातव्यश्श्वेताम्बरसमावृतः ।
	दशश्वेताश्वसंयुक्तमारूढं स्यन्दनं शुभम् ।।
	द्विभुजं दक्षिणे पाणौ गदां विभ्रत्पथूदरीम् ।
	वामस्तु वरदो हस्तश्शशाङ्कस्य निरूच्यते ।।
२. भौमः	रक्तमाल्याम्बरधरश्शक्तिशूलगदाधरः ।
(i) वि० ध०	चतुर्भुजो मेषगमो वरदस्स्याद्धरासुतः ।।
(ii) म० पु०	'भौमोऽग्नितुल्यः कर्तव्यस्त्वष्टाश्वे काञ्चने रथे'
(iii) शिल्प०	धरापुत्रस्य वक्ष्यामि लक्षणं चित्रकर्मणि ।
	चतुर्भुजो मेषगमश्चाङ्गारकसमद्युतिः ।।
	दक्षिणं तद्वरं हस्तं वरदं परिकल्पयेत् ।
	ऊर्ध्वं शक्तिसमायुक्तं वामौ शुक्लगदाधरौ ।।
३. बुधः (i) वि० ध०	'विष्णुतुल्यो बुधः कार्यो भौमतुल्ये तथा रथे'
(ii) शिल्प०	सिंहारूढं संप्रवक्ष्ये कर्णिकारसमप्रभम् ।
	पीतमाल्याम्बरधरं स्वर्णभूषणभूषितम् ।।
	वरदं खड्गसंयुक्तं खेटकेन समन्वितम् ।
	गदया च समायुक्तं बिभ्राणं दोश्चतुष्टयम् ।।
	एवं लिखेच्चन्द्रसूनुं बुधं ग्रहपतिं शुभम् ।
४-५. देवगुरु-शुक्रौ	तप्तजाम्बूनदाकरो द्विभुजश्च बृहस्पतिः ।
(i) वि० ध०	पुस्तकं चाक्षमाला च करयोस्तस्य कारयेत् ।।
	सर्वाभरणयुक्तश्च तथा पीताम्बरो गुरुः ।
	अष्टाश्वे काञ्चने दिव्ये रथे दृष्टिमनोरथे ।।
	शुक्रश्श्वेतवपुः कार्यश्श्वेताम्बरधरस्तथा ।
	द्वौ करौ कथितौ तस्य निधिपुस्तकसंयुतौ ।।
	दशाश्वे वा रथे कार्यो राजते भृगनन्दनः ।
(ii) शिल्प०	ततो देवगुरूर्लेख्यश्शुक्रश्च भृगुनन्दनः ।
	चतुर्भिबाहुभिर्युक्तश्चित्रकर्मविशारदैः ।।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वरदौ साक्षसूत्रौ च कमण्डलुधरौ तथा ।
दण्डिनौ च तथा बाहौ विभ्राणौ परिकल्पयेत् ॥

६. शनैश्चरः
(i) वि० ध०
कृष्णवासास्तथा कृष्णश्शनिः कार्योऽसितानन: ।
दण्डाक्षमालासंयुक्त: करद्वितयभूषणः ॥
कार्ष्णायसे रथे कार्यस्तथैवाष्टतुरङ्गमे ।

(ii) अ० आ०
शनैश्चर: कृष्णवर्णो द्विभुजस्सितवाससा ।
करण्डकुटोपेतस्सर्वाभरणभूषण: ॥
दण्डं दक्षिणहस्ते तु वरदं वाममुच्यते ।
स्थानकं पद्मपीठे तु शक्लवस्त्रधरश्शुचिः ॥
ईषत्पङ्गुरिव स्थाने ईषद्ह्रस्वतनुस्स्मृत: ।

७. राहुः
(i) वि० ध०
रौप्ये रथे तथाष्टाश्वे राहु: कार्यो विचक्षणै: ।
कम्बलं पुस्तकं कार्यं भुजेनैकेन संयुतम् ॥
करमेकं तु कुर्याच्च शस्त्रशून्यं तु दक्षिणम् ।

(ii) शिल्प०
सिंहासनगतं राहुं करालवदनं लिखेत् ।
वरदं खड्गसंयुक्तं खेटशूलधरं क्रमात् ॥

८. केतव:
(i) विश्व०
भौमवच्च तथा रूपं केतो: कार्यं विजानता ।
केवलं चास्य कर्तव्या दश राजंस्तुरङ्गमा: ॥

(ii) शिल्प०
धूम्रा द्विबाहवस्सर्वे वरदाश्च गदाधरा: ।
गृध्रपृष्ठसमारूढा लेखनीयास्तु केतवः ॥
गृध्राः किरीटिन: कार्या नवतालप्रमाणका: ।
रक्तकुण्डलकेयूरहाराभरणभूषिता: ॥

सौरमायतनम्

अ०पृ० १२१
अग्नेय्यां तु कुजः स्थाप्यो गुरुर्याम्ये प्रतिष्ठित: ।
नैर्ऋत्ये राहुसंस्थानं पश्चिमे चैव भार्गवः ॥
वायव्ये केतुसंस्थानं सौम्यायां बुध एव च ।
ईशाने च शनिं दद्यात् प्राच्यां चैव तु चन्द्रमाः ॥

सौरप्रतीहारा:

(i) भ० पु०
भूयस्तव प्रवक्ष्यामि दण्डनायकपिङ्गलौ ।
राज्ञस्रौषादयश्चान्ये दिग्देवा दिण्डिना सह ॥
मया सह समागम्य पुरा दैवैर्विचारितम् ।
एष कारुणिकस्सूर्यो युध्यते दानवैस्सह ॥
ते तु लब्धवरा भूत्वा अमात्याद्या ह्यभीक्ष्णशः ।
आदित्यं मन्यमानास्ते तपन्तं हन्तुमुद्यता: ॥
तस्मात्तेषां विघातार्थं प्रवराश्च भवामहे ।
अस्माभिः प्रतिरूद्धास्ते न द्रक्ष्यन्ति दिवाकरम् ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

संमत्यैवं ततस्स्कन्दो वामपार्श्वे रवेस्स्थितः ।
दण्डनायकसंज्ञस्तु सर्वलोकस्य स प्रभुः ॥
उक्तश्च स तदार्केण त्वं प्रजादण्डनायकः ।
दण्डनीतिकरो यस्मात्तस्मात्त्वं दण्डनायकः ॥
लिखते यः प्रजानां च सुकृतं यच्च दुष्कृतम् ।
अग्निर्दक्षिणपार्श्वे तु पिङ्गलत्वात्स पिङ्गलः ॥
अश्विनौ वापि सूर्यस्य पार्श्वयोरूभयोस्स्थितौ ।
अश्वरूपात्समुत्पन्नो तेन तावश्विनौ सुरौ ॥ –
द्वारपालौ स्मृतौ तस्य राज्ञः श्रेष्ठौ महाबलौ ।
कार्तिकेयस्स्मृतो राज्ञा श्रेष्ठश्चापि हरस्स्मृतः ॥
राजृदीप्तौ स्मृतो धातुर्नकारस्तस्य प्रत्ययः ।
सुरसेनापतित्वेन स यस्माद्दीप्यते सदा ॥
तस्मात्स कार्तिकेयस्तु नाम्ना राज्ञ इति स्मृतः ।
स्रुगतौ च स्मृतो धातुर्यस्य स प्रत्ययस्स्मृतः ॥
गच्छतीति रहस्तस्मात्पर्यायात्स्रौष उच्यते ।
प्रथमं यद्भवेद्द्वारं धर्मार्थाभ्यां समाश्रितम् ॥
तत्रैतौ संस्थितौ देवौ लोकपूज्यौ द्विजोत्तमाः! ।
द्वितीयां तु कक्ष्यायामप्रधृष्टौ व्यवस्थितौ ॥
पक्षिप्रेताधिपौ नाम्ना स्मृतौ कल्माषपक्षिणौ ।
वर्णस्य शबलत्वाच्च यमः कल्माष उच्यते ॥
पक्षावस्येति यः पक्षी गरुडः परिकीर्तितः ।
स्थितो दक्षिणतस्तस्य दण्डहस्तसमन्वितः ॥
उत्तरेण स्थितोऽर्कस्य कुबेरश्च विनायकः ।
कुबेरो धनदो ज्ञयो हस्तिरूपो विनायकः ॥
कुत्सया कुप्यता शप्तं कुशरीरमजायत् ।
कुबेरः कुशरीरत्वात्स नाम्ना धनदस्स्मृतः ॥
नायकस्सर्वसत्वानां तेन नायक उच्यते ।
विविधं नयते यस्मात् स तु तस्माद्विनायकः ॥
रेवतश्चैव दिण्डिश्च तौ रेवेः पूर्वतस्स्थितौ ।
ततो दिण्डिस्स्मृतो रुद्रो रेवतस्तनयो रवेः ॥
प्लुतं गच्छत्यसौ यस्मात्सर्वलोकनमस्कृतः ।
रेवृप्लवगतौ धातूरेवतस्तेन स स्मृतः ॥
डिङ्गतावस्य वै धातोर्दिण्डिशब्दो निपात्यते ।
डयतेऽसौ सदा दिण्डी तेन दिण्डिः प्रकीर्तितः ॥
इत्येते प्रवराः प्रोक्ता धात्वर्था नैगमैश्शुभैः ।
एषां संक्षेपतो भूयस्सख्यां वो निगदामि वै ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अश्विनौ तौ ततो ज्ञेयौ दण्डनायकपिङ्गलौ ।
तौ सूर्यद्वारपौ ज्ञेयौ राज्ञस्रोषौ ततस्स्मृतौ ॥
रेवतश्चैव दिण्डिश्च इत्येते प्रवरा मया ।
अष्टादश समाख्यातास्संक्षेपात्संख्यया मया ॥

(ii) अ० पृ०
दण्डी च पिङ्गलश्चैव ह्यानन्दो नन्दकस्तथा ।
चित्रो विचित्रो ज्ञातव्याः किरणाक्षःसुलोचनः ॥
सर्वे ते पुरुषाकाराः कर्तव्यः शान्तिमिच्छता ।
अष्टौ स्युश्च चतुर्द्वाःसु सव्यदक्षिणतः क्रमात् ॥
तर्जनी किरणश्चैव ताम्रचूडश्च दण्डकः ।
दण्डी नाम तथा वामे शृणु पिङ्गलकस्य च ॥
शक्तिश्च किरणस्थाने ताम्रचूडपदेंऽशकः ।
पूर्ववत् तर्जनीदण्डौ पिङ्गलः पूर्वदक्षिणे ॥
तर्जन्यौ द्वे वज्रदण्डावानन्दक इति स्मृतः ।
तर्जनी दण्डापसव्ये संभवे दन्तकस्तथा ॥
द्वे तर्जन्यौ पद्मदण्डौ वामातश्चित्रकः स्मृतः ।
तर्जनी दण्डापसव्ये विचित्रो दक्षिणे स्थितः ॥
तर्जन्यौ किरणों दण्डः किरणाक्षस्तथैव च ।
तर्जनी दण्डापसव्यौ प्रतीहारः सुलोचनः ॥
इत्यष्टौ च प्रतीहाराः सर्वविघ्नप्रणाशनाः ।
सर्वे तेजोमया नित्यं सूर्यदेवप्रत्यात्मकाः ॥

(iii) रूप०
तर्जन्यंशुताम्रचूडदण्डैर्दण्डी तु वामतः ।
तर्जनीशक्तिकिरणदण्डैस्स्यात्पिङ्गलः परः ॥
द्वे तर्जन्यौ वज्रदण्डावानन्दो वामगो दधत् ।
तर्जनीदण्डापसव्ये विचित्रो दक्षिणे स्थितः ॥
द्वे तर्जन्यौ पद्मदण्डौ चित्रो धत्ते स वामतः ।
तर्जनीदण्डापसव्ये विचित्रो दक्षिणे स्थितः ॥
तर्जन्यौ किरणं दण्डः किरणाक्षस्तु धारयेत् ।
तर्जनीदण्डापसव्ये प्रतीहारस्सुलोचनः ॥
चतुर्द्वारिषु संस्थाप्या दिशास्वेते प्रदक्षिणम् ।

दिग्पालाः लोकपालाः वा

सामान्यलक्षणम्

(i) स० सू०
त्रिदेशेशः सहस्राक्षो वज्रभृत् सुभुजो बली ।
किरीटी सगदः श्रीमान् श्वेताम्बरधरस्तथा ॥
श्रोणिसूत्रेण महता दिव्याभरणभूषितः ।
कार्यो राजश्रिया युक्तः पुरोहितसहायवान् ॥
वैवस्वस्तु विज्ञेयः कालेः केसं? परायणः ।
तेजसा सूर्यसङ्काशो जाम्बूनदविभूषितः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सम्पूर्णचन्द्रवदनः पीतवासा शुभेक्षणः ।
विचित्रमुकुटः कार्यो वराङ्गदविभूषितः ॥
तेजसा सूर्यसङ्काशः कर्तव्यो बलवाञ्छुभः ।
धन्वन्तरिर्भरद्वाजः प्रजानीयतयस्तथा? ॥
दक्षार्थाः सदृशाः कार्या कार्यो रूपाणि···रपि ।
अर्चिष्मान् ज्वलनः कार्यः यत्कण्ठाश्वसमीरणः ॥

(ii) अ० पृ० वरं वज्राङ्कुशौ चैव कुण्डीं धत्तै करैस्तु यः ।
गजारूढः सहस्राक्ष इन्द्रौ वै पूर्वतः स्थितः ॥
वरदः शक्तिहस्तश्च समृणालकमण्डलुः ।
ज्वालापुञ्जनिभो देवो मेषारूढो हुताशनः ॥
लेखनीं पुस्तकं धत्ते कुक्कुटं दण्डमेव च ।
सुमहामहिषारूढो यमः कृष्णाङ्ग ईरितः ॥
खङ्गं च खेटकं हस्ते कर्त्रीं चैवारिमस्तकम् ।
दंष्ट्रालम्बमुखीं कुर्याच्छ्वानारूढां च निर्ऋतिम् ॥
वरं पाशं च कमलं करैर्विभ्रत्कमण्डलुम् ।
कर्तव्यो मकरारूढो वरुणः पश्चिमे तथा ।
वरं ध्वजं पताकां च दधद्हस्तैः कमण्डलुम् ।
मृगारूढो हरिद्वर्णः पवनो वायुदिक्पतिः ॥
गदां निधिं बीजपूरं करैर्विभ्रत्कमण्डलुम् ।
गजारूढः प्रकर्तव्यौ धनदश्चोत्तरे तथा ॥
वरदं च त्रिशूलं च नागेन्द्रं बीजपूरकम् ।
वृषारूढश्च कर्तव्य ईशानो धवलद्युतिः ॥

इन्द्रः
(i) अ० आ० श्यामवर्णं द्विहस्तं च रक्ताम्बरधरं शुभम् ।
किरीटमुकुटोपेतं सर्वाभरणभूषितम् ॥
शक्तिर्दक्षिणहस्ते तु वामहस्तेऽङ्कुशं धृतम् ।
विशालोदरग्रीवं च वामे शचीसमन्वितम् ॥
द्विनेत्रं सौम्यवदनं सिंहासनोपरि स्थितम् ।
आसीनं वा प्रकर्तव्यं गजारूढमथापि वा ॥
इन्द्रमेवं समाख्यातमश्विन्यौ च प्रवक्ष्यते ।

(ii) सु० आ० इन्द्रमैन्द्रे तु मतिमांस्त्विन्द्रो वज्राङ्कुशौद धत् ।
श्यामाङ्गं तु गजारूढमप्सरोगणसंयुतम् ॥

(iii) पू० कार० वज्रपाणिर्महावीरस्सिहस्कन्धोऽवलीलधृक् ।
ललाटोरस्थलायामपीवरोरुर्महोदरः ॥
प्रसन्नवदनश्श्यामवर्णो रक्ताम्बरस्सुखी ।
किरीटकुण्डली हारकेयूरादिविभूषितः ॥
पृथुशिरोगजारूढो देवराजश्शचीपतिः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

(iv) शि० सं० सुरराजं प्रवक्ष्येऽहमैरावतसमाश्रितम् ।
किरीटकुण्डलधरं भुजद्वयसमन्वितम् ॥
कुलिशं दक्षिणे पाणौ वामहस्ते तथोत्पलम् ।
दिव्यरत्नविभूषाढ्यं दिव्यचीनांशुकैर्युतम् ॥
चित्रचामरधारण्यौ स्त्रियौ पार्श्वे प्रकल्पयेत् ।
सिंहासनस्थमथवा लिखेद् गन्धर्वसंयुतम् ॥
इन्द्राणीं वामहस्तस्य लिखेदुत्पलधारिणीम् ।

(v) बृ० सं० शुक्लश्चतुर्विषाणो द्विपो महेन्द्रस्य वज्रपाणित्वं च ।
तिर्यग्ललाटसंस्थं तृतीयमपि लोचनं चिह्नम् ॥

(vi) वि० ध० चतुर्दन्ते गजे सक्तः श्वेतः कार्यस्सुरेश्वरः ।
वामोत्सङ्गता कार्या तस्य भार्या शची नृप !॥
नीलवस्त्रा सुवर्णाभा सर्वाभरणवांस्तथा ।
तिर्यग्ललाटकस्थाक्षः कर्तव्यश्च विभूषितः ॥
शक्रश्चतुर्भुजः कार्यो द्विभुजा च तथा शची ।
पद्माङ्कुशौ च कर्तव्यौ वामदक्षिणहस्तयोः ॥
वामं शचीपृष्ठगतं द्वितीयं वज्रसंयुतम् ।
वामे शच्याः करे कार्या रम्या सन्तानमञ्जरी ॥
दक्षिणं पृष्ठविन्यस्तं देवराजस्य कारयेत् ।

(vii) रूप० वरं वराङ्कुशौ चैव कुण्डीं धत्ते करैस्तु यः ।
गजारूढः सहस्राक्ष इन्द्रः पूर्वदिशाधिपः ॥

अग्निः वच्मीह वह्निरूपं तु रक्तवर्णं चतुर्भुजम् ।

(i) सु० आ० ४१ वरदाभयंहस्तं च ... ... ॥
शक्तिस्स्यादपरे वामे दक्षिणे तु स्रुचं धरम् ।
एकाननं त्रिनेत्रं च रक्तकेशोर्ध्वमेव च ॥

„ ४८ कृत्वा चाग्निमजारूढं रक्ताभं रक्तलोचनम् ।
शिखाभिरूर्ध्वगाभिश्च युक्तं शक्तिस्रुवं धरम् ॥

(ii) पू० कार० अर्धचन्द्रासनासीनो ब्रह्मरूपो हुताशनः ।
प्रज्वलत्काञ्चनज्योतिः पिङ्गलः पिङ्गलोचनः ॥
हेमकूर्चाग्रसदृशस्वरूपं च शिरोरूहम् ।
तरुणादित्यसंकाशं तद्वस्त्रमुपवीतकम् ॥
अक्षमाला च शक्तिश्च दक्षिणेऽक्षिणेऽपि च ।
ज्वालामालाकुलं तीव्रं पार्श्वस्थं ह्यंशुमण्डलम् ॥
मेषारूढं च कुण्डस्थो योगपट्टेन वेष्टितम् ।
दक्षिणे तु स्थिता स्वाहा रत्नकुण्डलमण्डिता ॥

(iii) शि० सं० वह्नेस्स्वरूपं वक्ष्यामि शुद्धकाञ्चनसुप्रभम् ।
अर्धचन्द्रासनगतं रक्तवस्त्रविराजितम् ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

लोहितं वा प्रकुर्वीत बालार्कसमतेजसम् ।
युक्तं यज्ञोपवीतेन लम्बकूर्चेन शोभितम् ।।
मेषपृष्ठस्थितं देवं भुजद्वयसमन्वितम् ।
दक्षिणे चाक्षसूत्रं स्यात् करे वामे कमण्डलुः ।।
स्वाहादेवी कृता पार्श्वे कुङ्कुमेन विलोपिता ।
अरुणैरम्बरैर्भव्या लेख्या मात्र ? विभूषिता ।।
कुण्डस्थो वा प्रकर्तव्यो हव्यवाहो विचक्षणैः ।
ज्वालाभिस्सप्तशीर्षेण शोभमानो महाद्युतिः ।।

(iv) वि० ध०

रक्तं जटाधरं वह्निं कारयेद्धूम्रवाससम् ।
ज्वालामालाकुलं सौम्यं त्रिनेत्रं श्मश्रुधारिणम् ।।
चतुर्बाहुं चतुर्दंष्ट्रं देवेशं वायुसारथिम् ।
चतुर्भिश्च शुकैर्युक्ते धूमचिह्नरथे स्थितम् ।।
वामोत्सङ्गगता स्वाहा शक्रस्येव शची भवेत् ।
रत्नपात्रकरा देवी वह्नेर्दक्षिणहस्तयोः ।।
ज्वालात्रिशूले कर्त्तव्ये त्वक्षमाल्यं च वामके ।

(v) रूप०

वरदः शक्तिहस्तश्च समृणालकमण्डलुः ।
ज्वालापुञ्जनिभो देवो मेषारूढो हुताशनः ।।

वैवस्वतः यमः

(i) अ० आ०

द्विभुजः कृष्णवर्णस्तु खड्गखेटकधारिणी ।
करालदंष्ट्रवदनो रक्तमाल्यानुलेपनः ।।
रक्तवस्त्रधरोग्रश्च किरीटमकुटान्वितः ।
दीप्ताग्निसदृशाक्षश्च महामहिषवाहनः ।।
यमस्त्वेवं हि पार्श्वस्थौ तमिस्रौ चोग्रवक्त्रकौ ।
चित्रगुप्तः कलिश्चैव द्वारपार्श्वे तु संस्थितौ ।।
कृष्णश्यामनिभौ तौ च रक्तवस्त्रधरावुभौ ।
पीठपार्श्वस्थितौ मृत्युसंहितौ व्युग्रतेजसौ ।।
नीललोहितसङ्काशौ द्वौ चामरधृते स्त्रियौ ।
पुरतः संस्थितौ विप्रौ धर्माधर्मसमाह्वयौ ।।
यमस्सिंहासनासीनो महिषारोहितहस्तु वा ।

(ii) सु० आ०

यमं सुदण्डहस्तं तु महिषासनसंस्थिम् ।
करालं कालवर्णं च फलपल्लवपाणिनम् ।।

(iii) पू० का

दण्डपाणिर्महादीप्तः कालाञ्जनसमच्छविः ।
महामहिषिकारूढो दीप्ताग्निसमलोचनः ।।

(iv) शि० सं०

पितृराजं प्रवक्ष्यामि नीलाञ्जनसमच्छविम् ।
दण्डं पाशं धनुर्दोर्भ्यां प्रदीप्ताग्निविलोचनम् ।।
महामहिषमारूढं सिंहासनमथापि वा ।
मृत्युना चित्रगुप्तेन पार्श्वयोरुपशोभितम् ।।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

करालैः किंकरैश्चैव सुरासुरगणैस्तथा ।
धर्मिभिः पापिभिश्चैव सेव्यमानं निरन्तरम् ॥

(v) वि० ध०
सजलाम्बुदसच्छायस्तप्तचामीकराम्बरः
महिषस्थश्च कर्तव्यस्सर्वाभरणवान् यमः ॥
नीलोत्पलाभां धूमोर्णां वामोत्सङ्गे च कारयेत् ।
धूमोर्णा द्विभुजा कार्या यमः कार्यश्चतुर्भुजः ॥
दण्डखड्गावुभौ कार्यो यमदक्षिणहस्तयोः ।
ज्वाला त्रिशूला कर्तव्या त्वक्षमाला च वामके ॥
दण्डोपरि मुखं कार्यं ज्वालामालाविभूषणम् ।
धूमोर्णा दक्षिणो हस्तो यमपृष्ठगतो भवेत् ॥
वामे तस्याः करे कार्यं मातुलुङ्गं सुदर्शनम् ।
पार्श्वे तु दक्षिणे तस्य चित्रगुप्तं तु कारयेत् ॥
आपीच्यवेषं स्वाकारं द्विभुजं सौम्यदर्शनम् ।
दक्षिणे लेखनी तस्य वामे पत्रं तु कारयेत् ॥
वामे पाशधरः कार्यः कालो विकटदर्शनः ।

(vi) रूप०
लेखनीं पुस्तकं धत्ते कुक्कुटं दण्डमेव च ।
महामहिषमारूढो यमः कृष्णाङ्ग ईरितः ॥

निर्ऋतिः

(i) अ० आ०
निर्ऋतिर्नीलवर्णस्तु द्विभुजश्च महातनुः ।
खड्गं दक्षिणहस्तेन वामहस्तेन खेटकम् ॥
पीतवस्त्रधरं रौद्रं करालास्यं च दंष्ट्रिणम् ।
सर्वाभरणसंयुक्तं नानापुष्पैरलङ्कृतम् ॥
दुकूलवसनास्सर्वाः पीनोरुजघनस्तनाः ।
मध्यक्षामातिसौम्याश्च किञ्चित्प्रहसिताननाः ॥
नानागन्धानुलिप्ताङ्गा भद्रपीठोपरिस्थिताः ।
समभङ्गसमायुक्तास्सप्तसङ्ख्याप्सरास्स्मृताः ॥
अप्सरैश्च समायुक्तो निर्ऋतिश्च विशेषतः ।

(ii) सु० आ०
खड्गखेटकसंयुक्तं निर्ऋतिश्यामवर्णकम् ।
करालं विकृताकारं सिंहारूढं द्विनेत्रकम् ॥

(iii) पू० का०
राक्षसेशो विशालाक्षः पीतवस्त्रश्शवासनः ।
निर्ऋतिस्सुस्थितासीनः खड्गहस्तो महोज्वल ॥

(iv) शि० सं०
राक्षसं संप्रवक्ष्यामि नैर्ऋते स्थितम् ।
नरयानसमारूढं रक्षोभिर्बहुभिश्श्रितम् ॥
कालमेघसमाभासं खड्गखेटकधारिणम् ।
पीतवस्त्रपरीधानं स्वर्णभूषाविभूषितम् ॥

(v) वि० धि०
विरूपाक्षो विवृतास्यः प्रांशुदंष्ट्रोज्वलाननः ।
अर्ध्वकेशी खरस्थश्च द्विबाहुर्भीषणाननः ॥
कर्णेन कृष्णरक्ताङ्गः कृष्णाम्बरधरस्तथा ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

सर्वाभरणवान् दंष्ट्रासङ्कैर्दण्डधरस्तथा ॥
भार्याश्चितस्रः कर्तव्या देवी च निऋतिस्तथा ।
कृष्णाङ्गी कृष्णावदना पाशहस्ता तु वामतः ॥

(vi) रूप० खड्गं च खेटकं हस्तैः कर्त्तिकां वैरिमस्तकम् ।
दंष्ट्राकरालवदनं श्वानारूढश्च राक्षसः ॥

वरुणः

(i) अ० आ० वरुणश्शुक्लवर्णस्तु द्विभुजः पाशहस्तकः ।
सर्वाभरणसंयुक्तः करण्डमकुटान्वितः ॥
पीतवस्त्रधरश्शान्तो महाबलसमन्वितः ।
यज्ञसूत्रसमायुक्तो मकरस्थानकासनः ॥

(ii) सु० आ० वरुणं पाशहस्तं तु शुक्लवर्णसमप्रभम् ।
अन्यहस्तेन वरदं सर्वाभरणभूषितम् ॥

(iii) पू० का० शङ्खकुन्देन्दुधवलः पाशहस्तो महाबलः ।
केयूरकुण्डली हारी पीतवासास्सुशोभनः ॥
आसीनो वा स्थितो वापि मकरे वरुणस्मृतः ।

(iv) वि० ध० सप्तहंसे रथे कार्यो वरुणो यादसां पतिः ।
स्निग्धवैदूर्यसङ्काशः श्वेताम्बरधरस्तथा ॥
किंचित्प्रलम्बजठरो मुक्ताहारविभूषितः ।
सर्वाभरणवान्राजन् ! महादेवश्चतुर्भुजः ॥
वामभागगतं केतुं मकरं तस्य कारयेत् ।
छत्रं तु सुसितं मूर्ध्नि भार्या सर्वाङ्गसुन्दरी ॥
वामोत्सङ्गगता कार्या मध्ये तु द्विभुजा नृप! ।
उत्पलं कारयेद्वामे दक्षिणं देवपृष्ठगम् ॥
पद्मपाशौ करे कार्यौ देवदक्षिणहस्तयोः ।
शङ्खं च रत्नपात्रं च वामयोस्तस्य कारयेत् ॥
भागे तु दक्षिणे गङ्गा मकरस्था सचामरा ।
देवी पद्मकरा कार्या चान्द्रगौरी वरानना ॥
वामे तु यमुना कार्या कूर्मसंस्था सचामरा ।
नीलोत्पलकरा सौम्या नीलनीरजसन्निभा ॥

(v) रूप० वरं पाशौ व्यलं कुण्डी हस्तैर्बिभ्रत्क्रमाच्च यः ।
नक्रारूढः स कर्त्तव्यो वरुणः पश्चिमाश्रितः ॥

वायुः

(i) अ० आ० द्विभुजस्तु महावीर्य्यस्ताम्राक्षो धूम्रसन्निभः ।
ध्वजं वै दक्षिणे हस्ते वामहस्ते तु दण्डधृक् ॥
कुञ्चितभ्रूयुतो वायुः श्वेताम्बरविभूषितः
नानाभरणसंयुक्तः केशाढ्यः कैशैस्तु सुविकीर्णकः ॥
सिंहासनोपरिष्टात्तु शीघ्रयात्रोत्सुकः स्थितः ।

(ii) सु० आ० अनिलं धूम्रवर्णं तु मृगारूढं धृतध्वजम् ।
सव्येऽङ्कुशधरं श्यामं चात्मानं विधिवत्गतम् ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

(iii) पू० का० कुञ्चितभ्रूर्युवा वायुस्ताम्रदृग् धूम्रसन्निभः ।
अङ्कुशेन करो वीर्येशशम्बराम्बरसंयुतः ॥
मृगारूढो विधातव्यस्सर्वाभरणभूषितः ।

(iv) शिल्प०सं० समीरणं प्रवक्ष्यामि सूत्रहरिणवाहनम् ।
पीताम्बरधरं देवं चित्ररत्नविभूषितम् ॥
वरदं दक्षिणं हस्तं बामहस्तं पताकया ।
विभ्राणं कुण्डलोपेतं किरीटवरधारिणम् ॥

(v) वि० ध० वायुरम्बरवर्णस्तु तदाकाराम्बरो भवेत् ।
काष्ठपूरितचक्रस्तु द्विभुजो रूपसंयुतः ॥
गमनेच्छुश्शिवा भर्या तस्य कार्या च वामतः ।
कार्यो गृहीतचक्राङ्कः कराभ्यां पवनो द्विजः ॥
तथैव देवी कर्त्तव्या शिवा परमसुन्दरी ।
व्यावृतास्यस्तथा कार्यो देवो व्याकुलमूर्धजः ॥

(vi) रूप० वरं ध्वजं पताका च कमण्डलुकरैर्दधत् ।
मृगारूढो हरिद्वर्णः पवनो वायुदिक्पतिः ॥

धनदः
धनदस्सर्वयक्षेशस्सर्वाभरणभूषितः ।

(i) अ० आ० तप्तकाञ्चनसङ्काशो हस्तद्वयसमन्वितः ॥
वरदाभयहस्तश्च गदां वै वामहस्तके ।
करण्डमकुटोपेतस्सितवासोत्तरीयकः ॥
दक्षभागे शङ्खनिधिर्वामे पद्मनिधिस्तथा ।
धनदस्य तु वामे तु देवीं कुर्य्यात्सलक्षणाम् ॥
पद्मपीठोपरिष्टात्तु द्विनेत्रो मेषवाहनः ।
रक्ताम्बरधरस्सौम्यश्शङ्खपद्मनिधियुतः ॥
शङ्खपद्मनिधी द्वौ च भूताकारौ महाबलौ ।
आसीनौ पद्मपीठे तु पद्ममहस्तौ द्विजोत्तम ! ॥
करण्डमुकुटोपेतौ सितावासोत्तरीयकौ ।

(ii) सु० आ० यक्षेशं तु गदाहस्तं श्यामरूपं भयावहम् ।
द्विबाहुं रक्तवस्त्राढयं रक्ताक्षं रक्तपाणिनम् ॥

(iii) पू० का० मकुटी कुण्डली हारी केयूरी नरवाहनः ।
यक्षराजः कुवेरोऽयं तप्तकाञ्चनसन्निभः ॥
शङ्खपद्मनिधीयुक्तो गदाहस्तो निधीश्वरः ।

(iv) शि० सं० हरमित्रं प्रवक्ष्यामि द्रव्यहारविभूषितम् ।
किरीटकुण्डलयुतं श्वेताम्बरविराजितम् ॥
नरयुक्तविमानस्थं गदापाणिं वरप्रदम् ।
महोदरं महाबाहुं गौरवर्णं मनोहरम् ॥
अष्टभिर्निधिभिर्युक्तं द्रविणव्यग्रपाणिभिः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

समन्तात् मुह्यकैर्युक्तं चित्रकर्मणि लेखयेत् ।

(v) वि० ध०

कर्तव्यः पद्मपत्राभो वरदो नरवाहनः ।
चामीकराभो वरदस्सर्वाभरणभूषितः ॥
लम्बोदरश्चतुर्बाहुर्वामपिङ्गललोचनः ।
आपीच्यवेषः कवची हारभारी मनोहरः ॥
द्वे च दंष्ट्रे मुखे तस्य कर्तव्ये श्मश्रुधारिणः ।
वामेन विभवा कार्या मौलिस्तस्पारिमर्दन ! ॥
वामोत्सङ्गगता कार्या वृद्धिर्देवी वरप्रदा ।
देवपृष्ठगतं पाणिं द्विभुजायास्तु दक्षिणम् ॥
रत्नपात्रधरं कुर्याद्वामं रिपुनिषूदन ! ।
गदाशक्ती च कर्त्तव्ये तस्य दक्षिणहस्तयोः ॥
सिंहार्कलक्षणं केतुं शिविकामपि पादयोः? ।
शङ्खपद्मनिधी कार्यौ सरूपौ निधिसंस्थितौ ॥
शङ्खपद्माञ्जलिक्रान्तं वदनं तस्प पार्श्वयोः ।

(vi) रूप०

गदानिधी बीजपूरकमण्डलुधरः करैः ।
गजारूढः प्रकर्त्तव्यः सौम्यो नरवाहनः ॥

ईशः

ईशो वै द्विभुजश्शान्तस्सर्वाभरणभूषितः ।

(i) अ० आ०

जटामकुटसंयुक्तश्शुक्लवस्त्रद्युतिः स्थितः ॥
शुक्लयज्ञोपवीतश्च शुक्लपद्मोपरि स्थितः ।
शूलं दक्षिणहस्ते तु कपालं वामहस्तके ॥

(ii) सु० आ०

ईशानं तु चतुर्बाहुं त्रिनेत्रं तु जटाधरम् ।
शूलपाणिं वृषारूढं वरदाभयपाणिकम् ॥

(iii) पू० का०

वृषारूढो महाराजो धवलः पिङ्गलेक्षणः ।
त्रिशूलपाणिरीशानस्त्रिनेत्रो लोकशङ्करः ॥

(iv) शि० सं०

ईशानं संप्रवक्ष्यामि शारदेन्दुसमप्रभम् ।
शुभ्रं वृषभमारूढं बालेन्दुकृतशेखरम् ॥
जटामण्डलभूषाढ्यं लोचनत्रयभूषितम् ।
त्रिशूलपाणिं वरदं व्याघ्रचर्माम्बरावृतम् ॥
मणिकुण्डलभूषाढ्यं नागयज्ञोपवीतिनम् ।
लिखेदेवंविधं देवं चित्रकं चित्रकोविदः ॥

(v) रूप०

वरं तथा त्रिशूलं च नागेन्द्रबीजपूरकम् ।
बिभ्राणो वृषभारूढ ईशानो धवलद्युतिः ॥

समाप्तः षष्ठो पटलः

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सप्तमो पटलः

मूर्त्यन्तराणि

यक्ष-विद्याधर-भक्त-मुनि-वसु-मरूद्गण-पितृगणादीनां-प्रतिमा-लक्षणम्

अश्विनीदेवते

(i) अ० आ०

एकसिंहासनासीनावश्विन्यावश्वरूपिणौ ।
दाडिमीपुष्पसङ्काशावुभयौ सोपवीतिनौ ॥
फुल्लरक्तोत्पलाक्षौ च पीतस्रग्वस्त्रधारिणौ ।
नासत्यदस्रनामानौ जटामकुटधारिणौ ॥
करद्वयसमायुक्तौ श्रीभूषणविभूषितौ ।
अभयं दक्षिणं हस्तं पुस्तकं वामहस्तके ॥
लम्बितं दक्षिणं पादं वाममुत्कुटिकासनम् ।
देवानां भिषजावेतौ तौ चिकित्साविधायिनौ ॥
तयोश्च पार्श्वयोर्विप्र ! दक्षिणेऽदक्षिणे क्रमात् ।
मृतसञ्जीविनी चैव संज्ञितौ मचारोद्धृतौ ॥
पृष्ठे विशल्यकरणी द्वे स्त्रियोपेतपिङ्गलौ ।
वामे धन्वन्तरिश्चैव आत्रेयश्च तथैव च ॥
पीतरक्तनिभावेतौ विधेयौ कृष्णावाससौ ।
खड्गखेटकहस्तौ तौ सर्वाभरणभूषितौ ॥

(ii) सु० आ०

नासत्यश्चव दस्रश्च अश्विनौ तौ प्रकीर्तितौ ।
शुक्लवस्त्रधरोष्णीषौ पुस्तकाभयपाणिनौ ॥
सोत्तरीयौ सुरूपौ च शुक्लहेमनिभौ तथा ।

(iii) पू० कार०

उभयौ सोपवीतौ तौ चूडामकुटधारिणौ ।
फुल्लरक्तोत्पलाक्षौ च पीतस्रक्शुक्लवस्त्रकौ ॥

(iv) शिल्प०

एकसिंहासनासीनावश्विनावश्वरूपिणौ ।
दाडिमीपुष्पसङ्काशावुभौ तौ सोपवीतकौ ॥
फुल्लरक्तोत्पलाक्षौ च पीतस्रग्वस्त्रधरिणौ ।
करद्वयसमायुक्तौ श्रीभूषणविभूषितौ ॥
अभयं दक्षिणे हस्ते वरदं वामहस्तके ।
लम्बितं दक्षिणं पादं वाममुत्कुटिकासनम् ॥

(v) वि० ध०

पद्मपत्रसवर्णाभौ पद्मपत्रसमाम्बरौ ।
द्विभुजौ देवभिषजौ कर्तव्यौ देहसंयुतौ ॥
सर्वाभरणसम्पन्नौ विशेषाच्चारुलोचनौ ।
तयोरोषधयः कार्या दिव्या दक्षिणहस्तयोः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वामयोः पुस्तके कार्ये दर्शनीये तथा नृप ।
एकस्य दक्षिणे पार्श्वे वामे चान्यस्य यादव! ॥
नारीयुगं प्रकर्तव्यं सुरूपं चारुदर्शनम् ।
तयोश्च नामनी प्रोक्ते रूपसंपत्तथाकृतिः ॥
मधूकपुष्पसङ्काशा रूपसंपत्प्रकीर्तिता ।
आकृतिः कथिता लोके शरकाण्डनिभा तथा ॥
रत्नभाण्डकरे कार्ये चन्द्रशुक्लाम्बरे तथा ।

(vi) स० सू०

सदृशावश्विनौ कार्यौ लोकस्य शुभदायकौ ।
शुक्लमाल्याम्बरधरौ जाम्बूनदविभूषितौ ॥

यक्षविद्याधराः
मान०

यक्षविद्याधरादीनां लक्षणं वक्ष्यतेऽधुना ।
द्विभुजं च द्विनेत्रं च करण्डमकुटान्वितम् ॥
चरणाम्बरसंयुक्तं राक्षसाकारवद् भवेत् ।
श्यामवर्णं च पीतं च यक्षाणां वर्णमेव च ॥
श्यामरक्तं च पीतं च वर्णं विद्याधरं तथा ।
यक्षविद्याधरादीनां नवतालेन कारयेत् ॥
देवस्यानुचरा यक्षा विद्याधराश्च भारगाः ।
गानादि योग्यादि गन्धर्वा देवगुल्माननार्थकम् ॥
निग्रहा राक्षसा प्रोक्ताश्चैव यक्षे तु भेदकम् ।
यक्षैश्च चामराद्यैश्च सुराणां चिह्नधारिणः ॥
स्थानकं चासनं चैव यक्षविद्याधरादीनाम् ।
दक्षिणं स्वस्तिकं पादं वामपादं तु कुञ्चितम् ॥
चामरादैर्वृतं हस्तं तं चोर्व्याश्रितमेव वा ।
एवं तु यक्षरूपं स्याद् विद्याधरमासनान्वितम् ॥
पुरतः पृष्ठपादौ च लाङ्गलाकारौ एव च ।
जान्वाश्रितौ हस्तौ गोपुरोद्धृतहस्तकौ ॥
एवं विद्याधराः प्रोक्ताः सर्वाभरणभूषिताः ।
नृत्तं वा वैष्णवं वापि वैशाखं स्थानकं तु वा ॥
गीतवीणाविधानैश्च गन्धर्वाश्चेति कथ्यते ।
चरणं प॒ुसमानं चोर्ध्वकायं तु नराभम् ॥
वदनं गरुडभावं बाहुकौ च पक्षयुक्तौ ।
मकुटं कमलयुक्तं पुष्पच्छायं वर्णम् ॥
परितः करुणवीणं किन्नरस्य तु स्वरूपम् ॥

वसवः
(i) अ० आ०

धरो ध्रुवश्च सोमश्च आपस्त्वनल एव च ।
अनिलः प्रत्युषश्चैव प्रभावश्च तथैव च ॥
वसवश्चाष्टकास्त्वेते रक्तवर्णा द्विबाहवः ।
पीताम्बरधरास्सर्वे आसीनो वा स्थितोऽपिवा ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

खड्गखेटकहस्तास्ते सर्वाभरणभूषिताः ।
करण्डमकुटोपेता रौद्रास्सर्वे प्रकीर्तिताः ॥

(ii सु० आ० धरो ध्रुवस्तथा सोमस्सावित्रस्त्वनिलोऽनलः ।
प्रत्युषश्च प्रभावश्च सुदंष्ट्रा भीमरूपकाः ॥
खड्गखेटकहस्तास्तु कुञ्चितभ्रूसुलोचनाः ।
सर्वाभरणसंयुक्ताश्चित्रवस्त्रधरास्तथा ॥
रक्तवस्त्रधराः पीताः प्रोक्ता वैवस्वतास्त्विह ।

(iii) पू० कार० धरो धूम्रश्च सोमश्च आपश्चैवानिलोऽनलः ।
प्रत्यूषश्च प्रभावश्च वसवष्चाष्ट एव च ॥
द्विभुजाश्च द्विनेत्राश्च असिखेटकसंयुताः ।
रक्तवर्णा इमे सर्वे पीतवस्त्रसमान्विताः ॥
सर्वाभरणसंयुक्तास्स्निग्धकुन्तलमूर्धजाः ।

(iv) विश्व० अथातस्संप्रवक्ष्यामि वसुरूपाणि ते जय ! ।
पद्माक्षमालिके तस्य दक्षवामकरद्वये ॥
सीरशक्ती दधानोऽयं धराख्यो वसुरादिमः ।
मालां पुष्करबीजोत्थां चक्रं शाक्ति कमण्डलुम् ॥
दक्षाधरादिसिक्येन? यस्य स्युस्स ध्रुवो मतः ।
मुक्ताफलकृता माला पङ्कजं शक्तिरङ्कुशः ॥
सः वसुः कीर्तितो वत्स? सोमनामेति वै बुधैः ।
सव्यवामोर्ध्वगौ यस्य करौ स्तश्शक्तिसंयुतौ ॥
सीराङ्कुशान्वितौ चाधः स भवेदापसंज्ञकः ।
अक्षमालोपवीत्यूर्ध्वे सृणिशक्तिकरावधः ॥
यस्य स्तस्सोऽनिलाख्यस्स्याच्छुभदः पञ्चमो वसुः ।
स्रुवाक्षमालिके दक्षे वामे शक्तिकपालभृत् ॥
सव्योर्ध्वादिक्रमाद्योऽसौ नलाख्यस्तु वसुस्स्मृतः ।
खड्गाङ्कुशधरस्सव्ये शक्तिखेटकरोऽन्यतः ॥
प्रत्यूषाख्यो वसुश्चायं सप्तमः परिकीर्तितः ।
सव्ये दण्डकपालोऽसौ वामे तु सृणिशक्तिकः ॥
शुभदः कीर्तितश्चायं प्रभासो वसुरष्टमः ।
एते सर्वे समाख्याता नवकाञ्चनसन्निभाः ॥
धरो ध्रुवश्च सोमश्चापश्चैवानिलोऽनलः ।
प्रत्यूषश्च प्रभासश्च वसवोऽष्टौ प्रकीर्तितः ॥

नागाः श्वेतदेहश्च कर्तव्यस्स्फुरन्मौक्तिकसन्निभः ।

(i)मय० रक्ताङ्गस्स्वस्तिकोपेतस्सुतेजास्तक्षको महान् ॥
कृष्णः कार्कोटकः कण्ठे शुक्लरेखात्रयान्वितः ।
रक्तपद्मनिभः पद्मः शिरशुक्लसविद्रुमः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

शङ्खवर्णो महापद्मो मस्तके कृष्णशूलधृक् ।
हेमाभश्शङ्खपालस्स्यात् सितरेखाधरो गले ।।
कुलिको रक्तदेहस्तु चन्द्रार्धकृतमस्तकः ।
द्विजिह्वा बाहुवत्सप्तफणामणिसमन्विताः ।।
अक्षसूत्रधरास्सर्वे कुण्डिकापुच्छसंयुताः ।
एकभोगास्त्रिभोगा वा ह्येतज्जातास्सुतादयः ।।

(ii) अ० आ०
त्रिनेत्रं चतुर्भुजं सौम्यं रक्ताभं सितवाससम् ।
अभयवरदोपेतं परहस्ते तु नागधृक् ।।
करण्डमकुटोपेतं नागं पञ्चफणान्वितम्
सर्वाभरणसंयुक्तं पद्मपीठोपरि स्थितम् ।।

(iii) शिल्प०
नागानां वक्ष्यते रूपं नाभेरुर्ध्वं नराकृतिः ।
सर्पाकारमधोभागं मस्तके भोगमण्डलम् ।
एकं फणात्रयं वापि पञ्च वा सप्त वा नव ।।
द्विजिह्वास्ते विधातव्याः खड्गचर्मकरैर्युताः ।।

अप्सरसः

(i) सु० आ०
रम्भा च विपुला चैव उर्वशी च तिलोत्तमा ।
मध्यक्षामसमायुक्ताः पीनोरुजघनस्तनाः ।।

(ii) शिल्प०
दुकूलवसनास्सर्वाः पीनोरुजघनस्तनाः ।
मध्ये क्षौवादिवर्णातिसौम्याश्च किंचित्प्रहसितानना: ।।
नानालङ्कारसंयुक्ता भद्रपीठोपरिस्थिताः ।
समभङ्गसमायुक्तास्सप्तसङ्ख्याप्सरो स्मृताः ।।

असुराः

शिल्प०
किरीटकुण्डलोपेतास्तीक्ष्णदंष्ट्रा भयानकाः ।
नानाशस्त्रधराः काक्षा दैत्यास्सुरगणद्विषः ।।
दानवाः विकृताकारा भ्रकुटीकुटिलाननाः ।
करिभेन ? च कुब्जेन मण्डिताश्शस्त्रपाणयः ।
दंष्ट्राकरालवदना भ्रकुटीकुटिलेक्षणाः ।
नानारूपा महाकाया नानाशस्त्रधरास्तथा ।।

पिशाचाः

शिल्प०
उत्पर्वकृशकायास्ते चर्मास्थिस्नायुविग्रहाः ।
ह्रस्वकीर्णशिरोजास्स्युः पिशाचाश्चित्रकर्मणि ।।

वेतालाः

शिल्प०
ईदृशा एव वैताला दीर्घदेहाः कृशोदराः ।
कपोलैः पूर्वजैर्युक्ता लेखनीया मनीषिभिः ।।

भूतपिशाचादयः

स० सू०
वैदूर्यशकसङ्काशा? हरितश्मश्रवोऽपि च ।
रोहिता विकृता रक्तलोचना बहुरूपिणः ।।
नागैः शिरोरूहालीनैर्विरागाभरणाम्बराः ।
कार्याः पिशाचा भूताश्च परूषासत्यवादिनः ।।
(वहुप्रकारमन्दहा?) विरूपा विकृताननाः ।
घोररूपा विधातव्या ह्रस्वा नाना(सु?यु)धाश्च ते ।।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सुभीमविक्रमा भीमा (:) सङ्घा यज्ञोपवीतिनः ।
वर्मभिः शाटिकाचित्रैर्भूताः कार्याः सदा बुधैः ॥
येऽपि नोक्ता विधातव्यास्तेऽपि कार्यानुरूपतः ।
यस्य यस्य च यल्लिङ्गमसुरस्य सुरस्य च ॥
यक्षराक्षसयोर्वापि ना (ना?ग) गन्धर्वयोरपि ।
तेन लिङ्गेन कार्यः स यथा साधु विजानता ॥
प्रायेण वीर्यवन्तो हि दानवाः क्रूरकर्मिणः ।
किरीटिनश्च कर्तव्या विविधायुधपाणयः ॥
तेभ्योऽपीषत् कनीयांसो दैत्याः कार्या गुणैरपि ।
दैत्येभ्यःपरिहीणास्तु यक्षाः कार्या मदोत्कटाः ॥
हीनास्तेभ्योऽपि गन्धर्वा गन्धर्वेभ्योऽपि पन्नगाः ।
नागेभ्यो राक्षसा हीनाः क्रूर(विक्रिमतसूषिणः?)॥
विद्याधराश्च यक्षेभ्यो हीनदेहतराः स्मृताः ।
चित्रमाल्याम्बरधराश्चित्रचर्मासिपाणयः ॥
नानावेषधरा घोरा भूतसङ्घा भयानकाः ।
पिशाचेभ्योऽधिकाः स्थूलास्तेजसा परूषास्तथा ॥
अन्यूनाधिकरूपांश्च प्रायशः कुर्वीत् शुभान् ।

मरुद्गणः
अ० आ०

मरुद्गणा धूम्रवर्णा द्विभुजात्यन्तसुन्दराः ।
केशभारसमायुक्तास्सर्वाभरणभूषिताः ॥
दुकूलवसनास्सर्वे नानापुष्पैरलङ्कृताः ।
अभयवरदोपेता टङ्कशूलसमन्विताः ॥
स्थानकाः पद्मपीठे तु शुक्लवस्त्रधराश्शुभाः ।

साध्याः
ब्र० पु०

साध्याः पद्मासनगताः कमण्डल्वक्षसूत्रिणः ।
धर्मपुत्रा महात्मानो द्वादशामरपूजिताः ॥

पितरः
(i) अ० आ०

पितरः पीतवर्णाभाः वृद्धास्ते केशबन्धिताः ।
यज्ञसूत्रसमायुक्ता द्विभुजाः श्वेतवाससः ॥
नानाभरणसंयुक्ता भस्मोद्धूलितविग्रहाः ।
सितदन्तसमायुक्ताः सौम्यदृक्पातनान्विताः ॥
फलके भद्रपीठे वा पितरस्तु महात्मनः? ।
वामजानूपरिन्यस्तवामहस्तसमन्विताः ॥
सूची दक्षिणहस्ते तु पितरस्त्रय उच्यते? ।

(ii) सु० आ०

पितापितामहौ चैव प्रपितामह एव च ।
पितरस्स्तूयमानास्तु तेषां वै लक्षणं श्रृणु ॥
सुदृढा पीतवर्णास्तु छत्रदण्डधरास्तथा ।
शुक्लवस्त्रैः परिच्छिन्नाः कीर्तिताः पितरस्त्रयः ॥

(iii) वि० ध०

कुशपद्मविष्टरस्थाः पितरः पिण्डपात्रिणः ।

(iv) शिल्प०

पितरः पीतवर्णाभाः द्विभुजाः श्वेतवाससः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

यज्ञसूत्रसमायुक्तास्सौम्यदृग्वदनान्विताः ॥
फलके भद्रपीठे वा त्रयस्तु सहिताननाः ।

सप्तर्षयः

(i) अ० आ०

ऋषयः पीतवर्णास्तु नानावर्णान्विताम्बराः ।
वृद्धाश्च द्विभुजाश्शान्ता जटामकुटमण्डिताः ॥
चिबुकाहृदयान्ताश्च उपवीतसमन्विताः ।
भस्मना च त्रिपुण्डास्यास्स्थानका वासनास्तु वा ॥
दण्डं दक्षिणहस्ते तु छत्रं वामकरे धृतम् ।
क्षत्रदण्डं विना वापि सव्यं वै ज्ञानमुद्रिका ॥
वामजानूपरिन्यस्तवामहस्तसमन्विताः ।
मनुस्त्वगस्त्य इत्युक्तो वसिष्ठो गौतमस्तथा ॥
अङ्गिरास्स्याद्विश्वामित्रः भरद्वाज इति स्मृताः ।
एते वै सप्त ऋषयः कीर्तिताश्च विशेषतः ॥

(ii) सु० आ०

भृगुश्चैव वशिष्ठश्च पुलस्त्यः पुलहः क्रतुः ।
काश्यपः कौशिकश्चैव अङ्गिरा मुनयस्त्विमे ॥
सुवल्कला जटायुक्तास्सुमुखा दंशहस्तकाः ।
कट्या च मण्डिताकाराश्शुक्लवस्त्रधराश्शुभाः ॥
पिङ्गलाश्च सुनेत्राश्च पत्नयस्सप्त कीर्तिताः ।

(iii) पू० कार०

अगस्त्यश्च पुलस्त्यश्च विश्वामित्रः पराशरः ।
जमदग्निश्च वाल्मीको सनत्कुमारश्च सप्त च ॥
शुक्लवस्त्रधरास्सर्वे शुक्लयज्ञोपवीतकाः ।
शुक्लवस्त्रोत्तरीयाश्च जटावल्कलसंयुताः ॥
कमण्डलवक्षहस्ताश्च दीर्घश्मश्रुसमन्विताः ।

(iv) मान०

ऋषीणां लक्षणं वक्ष्ये शास्त्रे संक्षिप्यतेऽधुना ॥
अगस्त्यः काश्यपश्चैव भृगुर्वसिष्ठो भार्गवः ॥
विश्वामित्रस्तथा भारद्वाजः सप्तर्षयः क्रमात् ।
अगस्त्यं सप्ततालेन मानयेत्त्वङ्गमानकम् ॥
काश्यपं चाष्टतालेन मानयेदपि च भृगुम् ।
अन्यथा ऋषिसर्वान् नवतालेन कारयेत् ॥
श्यामवर्णमगस्त्यं च काश्यपं पीतवर्णकम् ।
भृगुं च कृष्णवर्णं कुर्याद् वसिष्ठं रक्तवर्णकम् ॥
भार्गवं पिङ्गलाभं स्याद् विश्वामित्रं च रक्तकम् ।
भरद्वाजं च हारिद्रं वर्णमेवं क्रमाद् विदुः ॥
द्विभुजं च द्विनेत्रं च जटाजूटेन मण्डितम् ।
पीताम्बरधरं चैव सर्वेषामपि मुनीनाम् ॥
कुब्जाकारं बृहत्कुक्षि कषायं पूर्णशोभितम् ।
अगस्त्यं चैवेति प्रोक्तमन्यं चैवेति पौरुषम् ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सर्वेषामपि मुनीनां यज्ञसूत्रोत्तरीयकैः ।
दण्डं च सव्यहस्तेन वामहस्तेन पुस्तकम् ॥
अथवा यष्टिं विना सव्ये हस्तौ सदृशौ मुनीनाम् ।
अथवाराध्यवत्कुर्यादासनं स्थानकं तु वा ॥

भक्ताः मान०

अधुना वक्ष्यते सर्वभक्तानां लक्षणं क्रमात् ।
पादं चतुर्विधं प्रोक्तं तद्वशान्मानं गृह्यते ॥
प्रथमं सालोक्यमथ द्वितीयं सामीप्यमुच्यते ।
सारूप्यं च तृतीयं स्यात्सायुज्यं तु चतुर्थकम् ॥
भक्तिज्ञानं च वैराग्ययुक्तं सालोक्यमीरितम् ।
ज्ञानं वैराग्यसंयुक्तं सामीप्यमिति कथ्यते ॥
केवलं ध्यानसंयुक्तं सारूप्यमिति निश्चयम् ।
शुद्धज्ञानसमायुक्तं सायुज्यं परमार्थवत् ॥
उत्तमनवतालेन सालोक्याङ्गं प्रमीयते ।
अधमदशतालेन सामीप्याङ्गं च निर्मितम् ॥
मध्यमदशतालेन सारूप्यं मानयेत्सुधीः ।
उत्तमदशतालेन सायुज्यं कथितं बुधैः ॥

अर्थः वि० ध०

अर्थः कार्यस्तु रूपेण धनदस्य महात्मनः ।

कामः वि० ध०

कामदेवस्तु कर्तव्यो रूपेणाप्रतिमो भुवि ॥
अष्टबाहुः स कर्तव्यः शङ्खपद्मविभूषणः ।
चापबाणकरश्चैव मदादञ्चितलोचनः ॥
रतिः प्रीतिस्तथा शक्तिर्मदशक्तिस्तथोज्ज्वला ।
चतस्रस्तस्य कर्तव्याः पत्न्यो रूपमनोहराः ॥
केतुश्च मकरः कार्यः पञ्चबाणमुखो महान् ।
करेण कटिगेनाथ निद्रां वामेन कारयेत् ॥
दक्षिणं तु तथा पार्श्वे तस्याः सङ्कर्षणो भवेत् ।
वासुदेवस्तथा वामे मैकानेशा तथा सुतः ।

दिशाः वि० ध०

कालः करालवदनः नित्यगश्च विभीषणः ।
पाशहस्तश्च कर्तव्यः सर्पवृश्चिकरोमवान् ॥

ज्वरः वि० ध०

ज्वरस्त्रिपादः कर्तव्यस्त्रिनेत्रैर्वदनैस्त्रिभिः ।
भस्मप्रहरणो रौद्रस्त्रिबाहुर्व्याकुलेक्षणः ॥

वेदाः वि० ध०

सामवेदस्तु कर्तव्यः किं तु श्ववदनः प्रभुः ।
अथवा देवरूपेण वेदाः कार्या विचक्षणैः ॥
ऋग्वेदस्तु स्मृतो ब्रह्मा यजुर्वेदस्तु वासवः ।
सामवेदस्तथा विष्णुः शम्भुश्चाथर्वणो भवेत् ॥

शास्त्राणि वि० ध०

शिक्षा प्रजापतिर्ज्ञेया कल्पो ब्रह्मा प्रकीर्तितः ।
सरस्वती व्याकरणं निरुक्त वरुणः प्रभुः ॥
छन्दो क्षितिस्तथैवाग्निर्ज्यौतिषं भगवान्रविः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मीमांसा भगवान्सोमो न्यायमार्गः समीरणः ।।
धर्मश्च धर्मशास्त्राणि पुराणं च तथा मनुः ।
इतिहासं प्रजाध्यक्षो धनुर्वेदं शतक्रतुः ।।
आयुर्वेदस्तथा साक्षाद्देवो धन्वन्तरिः प्रभुः ।
फलवेदं महीदेवी नृत्यशास्त्रं महेश्वरः ।।
सङ्कर्षणः पाञ्चरात्रं रुद्रः पाशुपतं तथा ।
पातञ्जलमनन्तश्च सांख्यञ्च कपिलो मुनिः ।।
अर्थशास्त्राणि सर्वाणि धनाध्यक्षः प्रकीर्तितः ।
कलाशास्त्राणि सर्वाणि कामदेवो जगद्गुरुः ।।
अन्यानि यानि शास्त्राणि यत्कर्तॄणि प्रचक्षते ।
स चैव देवता तस्य शास्त्रकाव्यस्त्र देहवत् ।।

धर्मज्ञानवैराग्यादयः
वि० ध०

धर्मस्य रूपनिर्माणं ज्ञानस्य च परन्तप ।
वैराग्यस्य च धर्मज्ञ तथैश्वर्यस्य मे वद ।।
चतुर्वक्त्रश्चतुष्पादश्चतुर्बाहुस्सिताम्बरः ।
सर्वाभरणवाञ्छ्वेतो धर्मः कार्यो विजानता ।।
दक्षिणे चाक्षमालां च तस्य वामे तु पुस्तकम् ।
मूर्तिमान्व्यवसायस्तु कार्यो दक्षिणभागगः ।।
वामभागगतः कार्यः सुखः परमरूपवान् ।
कार्यौ धर्मकरौ मूर्ध्नि विन्यस्तौ च तथा तयोः ।
अक्षमाला स्मृतः कालः पुस्तकं चागमं स्मृतम् ।
यज्ञः सत्यं तपोदानं तस्य वक्त्रचतुष्टयम ।।
देशकालौ तथा शौचं शुद्धिश्चास्य भुजःस्मृतः ।
श्रुतिः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः ।।
तस्य देवस्य धर्मज्ञ ज्ञेयं पादचतुष्टयम् ।
सत्वाधिकत्वाच्च शुकलस्तु ज्ञानवासश्च कर्तियते ।।
अथवा चास्य कर्तव्याः पत्न्यश्चैव चतुर्दश ।
कार्तिर्लक्ष्मी धृतिर्मेधा पुष्टिः श्रद्धा क्रिया मतिः ।।
बुद्धिर्लज्जा वपुश्शान्तिः सिद्धिस्तुष्टिश्चतुर्दशी ।
द्वाराण्येतानि धर्मस्य सर्व्वाणि कथितानि ते ।।
कार्याः सरूपा द्विभुजाश्च सर्वास्तेजोन्वितास्ताश्च सुभूषणाश्च ।
धर्मःस्थितः स्याद्यदि चैक एव भार्यान्वितश्चेदथवोपदिष्टः ।।

व्योम
वि० ध०

नीलोत्पलाभं गगनं तद्वर्णाम्बरधारिणम् ।
चन्दार्कहस्तं कर्तव्यं द्विभुजं सौम्यदर्शनम् ।।
चतुरस्रं भवेन्मूले ततो वृत्तं महाभुज ।
ततोल्पचतुरस्रं च चतुरस्रं ततो भवेत् ।।
ततोल्पचतुरस्रं च मेरुवत्संस्थितं ततः ।
भद्रपीठमिदं प्रोक्तं व्योमभागं तृतीयकम् ।।
सर्वेषां भद्रपीठानामेतल्लक्षणमुच्यते ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सम्भवश्चतुरस्रं तु मध्यभागं प्रकीर्तितम् ॥
भद्रपीठं ततो भागं तत्र पद्मं निवेशयेत् ।
शुभाष्टपत्रं तन्मध्ये कर्णिकायां दिवाकरम् ॥
पत्रेषु कल्पयेत्तत्र दिक्पालांश्च यथादिशम् ।
भद्रपीठमधस्तात्तु पृथ्वीं परिकल्पयेत् ॥
अन्तरिक्षं तथा स्तम्भमूर्ध्वभागं ततो विदुः ।
तत्र सन्निहिताः सर्वे भवन्ति त्रिदशोत्तमाः ॥
सर्वदेवमय व्योम कथितं ते महाभुज ।
तस्य सम्पूजनं कृत्वा सर्वान्कामानवाप्नुयात् ॥

ऐडूक
वि० ध०

ऐडूकरूपनिर्माणं शृणुष्व गदतो मम ।
ऐडूकपूजनात्पूजा कृतास्य जगतो भवेत् ॥
भद्रपीठं बुधः कुर्यात्सोपानैः शोभनैर्युतम् ।
चतुर्भिर्यादवश्रेष्ठ यथादिशमरिन्दम् ॥
तस्योपरिष्टादपरं भद्रपीठं तु कारयेत् ।
तस्योपरिष्टादपरं तादृग्विधमरिन्दम् ॥
तस्योपरिष्टात्कर्तव्यं लिङ्गरूपं विजानता ।
तत्तु तत्रापि कर्त्तव्यं लिङ्गरेखाविराजितम् ॥
तस्य मध्ये ध्रुवां यष्टिं चतुरस्रां तु कारयेत् ।
तस्योपरिष्टात्कर्तव्या भूमिकास्तु त्रयोदश ॥
तस्योपरिष्टात्कर्तव्यं तथैवामलतारकम् ।
तस्योपरि पुनर्यष्टिः कार्या राजन्सुवर्तुला ॥
समार्धचन्द्रमध्यस्थचन्द्रकेण विराजिता ।
भूमिका या मया प्रोक्ता तथैवामलतारकम् ॥
भुवनास्ते त्वया ज्ञेयास्तथा राजंश्चतुर्दश ।
लिङ्गे महेश्वरो देवो वृत्ता यष्टिः पितामहः ॥
चतुरस्रा तु या यष्टिः स च देवो जनार्दनः ।
गुणरूपेण विज्ञेयं भद्रपीठत्रयं तथा ।
गुणाधानमितिप्रोक्तं त्रैलोक्यं सचराचरम् ।
अधस्ताद्भुवनानां तु लिङ्गोपरि तथा नृप ॥
लोकपालाश्च कर्तव्याः शूलहस्ताश्चतुर्दिशम् ।
विरूढो धृतराष्ट्रश्च विरूपाक्षश्च यादवः ॥
कुबेरश्च महातेजाः सूर्यवेशधराः शुभाः ।
सर्वे कवचिनः कार्याः शुभाभरणभूषिताः ॥
विरूपाक्षं विजानीहि शक्रदेवं गणेश्वरम् ।
धृतराष्ट्रं विजानीहि यमं भुवननायकम् ॥
विरूपाक्षं विजानीहि वरुणं यादसाम्पतिम् ।
राजराजं विजानीहि कुबेरं धनदं प्रभुम् ॥

समाप्तस्सप्तमो पटलः

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अष्टमो पटलः

जैन-प्रतिमा-लक्षणं बौद्ध-प्रतिमा-लक्षणञ्च

अ. जैन-प्रतिमा-लक्षणम्

जिनस्वरूपम्
शि० रत्ना०

अरूपं रूपमापन्नं विश्वरूपं जगत्प्रभुम् ।
केवलं ज्ञानमूर्तिञ्च वीतरागं जिनेश्वरम् ॥
द्विभुजञ्चैकवक्त्रञ्च बद्धपद्मासनस्थितम् ।
लीयमानपरब्रह्मजिनमूर्तिजगद्गुरूम् ॥

जिनेश्वराणां सामान्यलाञ्छनानि

दिव्यतरुः सुरपुष्पसुवृष्टिदुंन्दुभिरासनयोजनघोषौ ।
आतपवारण-चामर-युग्मे यस्य विभाति च मन्डलतेजः ॥
अशोकवृक्षः सुरपुष्पवृष्टिर्दिव्यध्वनिश्चामरमासनञ्च ।
भामण्डलं दुन्दुभिरातपत्रं सत्प्रातिहार्याणि जिनेश्वराणाम् ॥

जैनलक्षणम्
(i) मान०

सुगतजैनकादीनां लक्षणं मानपूर्वकम् ।
स्थावरं जङ्गमं चैव लक्षणं वक्ष्यतेऽधुना ।
द्विभुजं च द्विनेत्रं च मुण्डतारं च शीर्षकम् ॥
ऋजुस्थानकसंयुक्तं तथा चासनमेव च ।
समाङ्घ्रि ऋज्वाकारं स्याल्लम्बहस्तद्वयं तथा ॥
आसनं च द्विपादौ च पद्मासनं तु संयुतम् ।
ऋजुकं च ऋजुभावं योगं तत्परमात्मकम् ॥
सव्यापसव्यहस्तं च मूलोर्ध्वोमुखं करौ ।
स्थानकं चासनं वापि सिंहासनोपरि न्यसेत् ॥
उपरे तु निर्यूहं कुर्यान्मकरतोरणं भवेत् ।
तदूर्ध्वं कल्पवृक्षः स्यात्सगजेन्द्रपरैः सह ॥
नारदादीन् ऋषीन्देवान्देवाङ्गनाभिः सह सेवितान् ।
यक्षविद्याधराद्यैश्च चक्रमन्यत्र भूपतीन् ॥
नागेन्द्रादीन् च दिक्पालान्यक्षैश्च सह सेवितान् ।
यक्षयक्षेश्वरौ पार्श्वे चामरोद्धृतसेवितान् ॥
चतुर्त्रयान्तरीक्षे तु तस्याधो जिनदेवतान् ।
स्फटिकश्वेतरक्तं च पीतश्यामनिभं तथा ॥
सिद्धादिश्च सुगन्धश्च जिनं चार्हं तु पार्श्वकम् ।
एतत्पञ्चपरमेष्टी (वर्ण) पञ्चबेरं यथाक्रमम् ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

उत्तमं दशतालेन देवाङ्गैः सह मानयेत् ।
चतुर्विंशतितीर्थान् दशतालेन कारयेत् ॥
निराभरणसर्वाङ्गं निर्वस्त्राङ्गं मनोहरम् ।
सर्ववक्षःस्थले हेमवर्णं श्रीवत्सलाञ्छनम् ॥
द्वारे चण्डं महाचण्डं कुर्यात्सव्यापसव्यके ।
एवं तु जिनमित्युक्तं शेषमागमत उक्तवत् ॥

(ii) बृ० सं० — आजानुलम्बबाहुः श्रीवत्साङ्कः प्रशान्तमूर्तिश्च ।
दिग्वासास्तरुणो रूपवांश्च कार्योऽर्हतां देवः ॥

(iii) प्र० सा० सं० — अथ बिम्बं जिनेन्द्रस्य कर्तव्यं लक्षणान्वितम् ।
ऋज्वायतसुसंस्थानं तरुणाङ्गदिगम्बरम् ॥
श्रीवत्सभूषितोरस्कं जानुप्राप्तकराग्रजम् ।
जिनाङ्गुलप्रमाणेन साष्टाङ्गुलशतायतम् ॥
कक्षादिरोमहीनाङ्गं श्मश्रुशेषविवर्जितम् ।
ऊर्ध्वप्रलम्बकं दत्वा समाप्त्यन्तं च धारयेत् ॥

अ. २४ तीर्थङ्कराः
अ० पृ० — तीर्थङ्करान् प्रवक्ष्यामि चतुर्विंशतिसंख्यकान् ।
नामवर्णलाञ्छनार्थं देवीयक्षादिकक्रमम् ॥
ऋषभश्चाजितश्चैव संभवश्चाभिनन्दनः ।
सुमतिः पद्मप्रभश्च सुपार्श्वः सप्रभो मतः ।
चन्द्रप्रभश्च सुविधिः शीतलो दशमो मतः ।
श्रेयांश्चसो वासुपूज्यश्च विमलोऽनन्तसंज्ञकः ॥
धर्मः शान्तिः कुन्थुररो मल्लिनाथस्तथैव च ।
मुनिस्तथा सुव्रतश्च नमिश्चारिष्टनेमिकः ॥
पार्श्वनाथो वर्धमानश्चतुर्विंशतिरर्हताम् ।

तेषां वर्णाः — चन्द्रप्रभः पुष्पदन्तः श्वेतौ वै क्रौञ्चसम्भवौ? ।
पद्मप्रभो धर्मनाथो रक्तोत्पलनिभौ मतौ ।
सुपार्श्वः पार्श्वनाथश्च हरिद्वर्णौ प्रकीर्तितौ ।
नेमिश्च श्यामवर्णः स्यान्नीलो मल्लिः प्रकीर्तितः ॥
शेषाः षोडश सम्प्रोक्तास्तप्तकाञ्चनसमप्रभाः ।
वर्णानि कथितान्यग्रे लञ्छनानि ततः शृणु ॥

,, लाञ्छनानि — वृषो गजाश्वकपयः क्रौञ्चपद्मकस्वतिकाः ।
चन्द्रो मकरश्रीवत्सौ गण्डको महिषस्तथा ॥
शूकरः शशादनश्च वज्रश्च मृग आजकः ।
नन्द्यावर्तश्च कलशः कूर्मो नीलाब्जशङ्खकौ ॥
सर्पः सिंहश्चर्षभादेर्लाञ्छनानीरितानि च ।

ब. २४ शासनदेविकाः — चतुर्विंशतिरुच्यन्ते क्रमाच्छासनदेविकाः ॥
(यक्षिण्यः); — चक्रेश्वरी रोहिणी च प्रज्ञा वै वज्रशृङ्खला ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

नरदत्ता मनोवेगा कालिका ज्वालमालिका ॥
महाकाली मानवी च गौरी गान्धारिका तथा ।
विराटा तारिका चैवानन्तागतिश्च मानसी ॥
महामानसी. च जया विजया चापराजिता ।
बहुरूपा च चामुण्डाऽम्बिका पद्मावती तथा ॥
सिद्धायिकेति देव्यस्तु चतुर्विंशतिरर्हताम् ।

चक्रेश्वरी
षट्पादा द्वादशभुजा चक्राण्यष्टौ द्विवज्रकम् ।
मातुलिङ्गाभये चैव तथा पद्मासनाऽपि च ॥
गरुडोपरिसंस्था च चक्रेशी हेमवर्णिका ।

रोहिणी
चतुर्भुजा श्वेतवर्णा शङ्खचक्राभयवरा ।
लोहासना च कर्तव्या रथारूढ़ा च रोहिणी ।

प्रज्ञावती
प्रज्ञावती श्वेतवर्णा षड्भुजा चैव संश्रुता ॥
अभयवरदफल—चन्द्राः परशुरुत्पलम् ॥

वज्रशृङ्खला
नागपाशाक्षफलकं वरदं हंसवाहिनी ।
चतुर्भुजा तथैवोक्ता विख्याता वज्रशृङ्खला ॥

नरदत्ता
चतुर्भुजा चक्रवज्र—फलानि वरदं तथा ।
श्वेतहस्तिसमारूढा कर्त्तव्या नरदत्तिका ॥

मनोवेगा
चतुर्वर्णा स्वर्णवर्णाऽशनिचक्रफलं वरम् ।
अश्ववाहनसंस्था च मनोवेगा तु कामदा ॥

कालिका
कृष्णाऽष्टबाहुस्त्रिशूल—पाशाङ्कुशधनुःशरा ।
चक्राभयवरदाश्च महिषस्था च कालिका ॥

ज्वालामालिनी
कृष्णा चतुर्भुजा घण्टा त्रिशूलं च फलं वरम् ।
पद्मासना वृषारूढा कामदा ज्वालमालिनी ॥

महाकाली
चतुर्भुजा कृष्णवर्णा वज्रगदावराभयाः ।
कूर्मस्था च महाकाली सर्वशान्तिप्रदायिनी ॥

मानवी
चतुर्भुजा श्यामवर्णा पाशाङ्कुशफलं वरम् ।
सूकरोपरिसंस्था च मानवी चार्थदायिनी ॥

गौरी
पाशाङ्कुशाब्जवरदाः कनकाभा चतुर्भुजा ।
सा कृष्णहरिणारूढा कार्या गौरी च शान्तिदा ॥

गान्धारी
करद्वये पद्मफले नक्रारूढा तथैव च ।
श्यामवर्णा प्रकर्त्तव्या गान्धारी नामिका भवेत् ॥

विराटाख्या
श्यामवर्णा षड्भुजा द्वौ वरदौ खड्गखेटकौ ।
धनुर्बाणौ विराटाख्या व्योमयानगता तथा ॥

अनन्तमतिः
चतुर्भुजा स्वर्णवर्णा धनुर्बाणौ फलं वरम् ।
हंसासनाऽनन्तमतिः कर्तव्या शान्तिदायिनी ॥

मानसी
षड्भुजा रक्तवर्णा च त्रिशूलं पाशचक्रके ।
डमरुर्वै फलवरे मानसी व्याघ्रवाहना ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

महामानसी	चतुर्भुजा सुवर्णाभा शरः शार्ङ्गं च वज्रकम् ।
	चक्रं महामानसी स्यात् पक्षिराजोपरिस्थिता ॥
जया	वज्रचक्रे पाशाङ्कुशौ फलं च वरदो जया ।
	कनकाभा षड्भुजा च कृष्णशूकरसंस्थिता ॥
विजया	सिंहासना चतुर्बाहुर्वज्रचक्रफलोरगाः ।
	तेजोवती स्वर्णवर्णा नाम्ना सा विजया मता ॥
अपराजिता	खड्गखेटौ फलवरौ श्यामवर्णा चतुर्भुजा ।
	शान्तिदाऽष्टापदस्था च विख्याता ह्यपराजिता ॥
बहुरूपा	द्विभुजा स्वर्णवर्णा च खड्गखेटकधारिणी ।
	सर्पासना च कर्तव्या बहुरूपा सुखावहा ॥
चामुण्डा	रक्ताभाष्टभुजा शूल—खड्गौ मुद्गरपाशकौ ।
	वज्रचक्रे डमर्वक्षौ चामुण्डा मर्कटासना ॥
अम्बिका	हरिद्वर्णा सिंहसंस्था द्विभुजा च फलं वरम् ।
	पुत्रेणोपास्यमाना च सुतोत्सङ्गा तथाऽम्बिका ॥
पद्मावती	पाशाङ्कुशौ पद्मवरे रक्तवर्णा चतुर्भुजा ।
	पद्मासना कुक्कुटस्था ख्याता पद्मावतीति च ॥
सिद्धायिका	द्विभुजा कनकाभा च पुस्तकं चाभयं तथा
	सिद्धायिका तु कर्तव्या भद्रासनसमन्विता ।
स. २४ शासनदेवाः (यक्षाः)	वृषवक्त्रो महायक्षस्त्रिमुखश्चतुराननः ।
	तुम्बुरुः कुसुमाख्यश्च मातङ्गो विजयस्तथा ॥
	जयो ब्रह्मा किन्नरेशः कुमारश्च तथैव च ।
	षण्मुखः पातालयक्षः किन्नरो गरुडस्तथा ॥
	गन्धर्वश्चैव यक्षेशः कुबेरो वरुणस्तथा ।
	भृकुटिश्चैव गोमेधः पार्श्वो मातङ्ग एव च ॥
	यक्षाश्चतुर्विंशतिकाः ऋषभादेर्यथाक्रमम् ।
	भेदाश्च भुजशस्त्राणां कथयामि समासतः ॥
वृषवक्त्रः	वराक्षसूत्रे पाशश्च मातुलिङ्गं चतुर्भुजः ।
	श्वेतवर्णो वृषमुखो वृषभासनसंस्थितः ॥
महायक्षः	श्यामोऽष्टबाहुर्हस्तिस्थो वरदाभयमुद्गराः ।
	अक्षपाशाङ्कुशाः शक्तिर्मातुलिङ्गं तथैव च ॥
त्रिमुखः	मयूरस्थस्त्रिनेत्रश्च त्रिवक्त्रः श्यामवर्णकः ।
	परश्वक्षगदाचक्रशङ्खा वरश्च षड्भुजः ॥
चतुराननतुम्बुरु	नागपाशवज्राङ्कुशा हंसस्थश्चतुराननः ।
	द्वौ सर्पौ फलवरदौ तुम्बुरुर्गरुडासनः ॥
कुसुममातङ्गौ	कुसुमाख्यो गदाक्षौ च द्विभुजो मृगसंस्थितः ।
	मातङ्गः स्याद् गदापाशौ द्विभुजो मेषवाहनः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विजयजयौ	पर्शुपाशाभयवराः कपोते विजयः स्थितः ।
	शक्त्यक्षफलवरदा जयः कूर्मासनस्थितः ॥
ब्रह्मयक्षेशौ	पाशाङ्कुशाभयवरा ब्रह्मा स्याद्धंसवाहनः ।
	त्रिशूलाक्षफलवरा यक्षेट्श्वेतो वृषस्थितः ॥
कुमारषण्मुखौ	धनुर्बाणफलवराः कुमारः शिखिवाहनः ।
	षण्मुखः षड्भुजो वज्रो धनुर्बाणौ फलं वरः ॥
किन्नरपतालौ	किन्नरेशः पाशाङ्कुशौ धनुर्बाणौ फलं वरः ।
	पातालश्च वज्राङ्कुशौ धनुर्बाणौ फलं वरः ॥
गरुडगन्धर्वौ	पाशाङ्कुशफलवरा गरुडःस्याच्छुकासनः ।
	पद्माभयफलवरा गन्धर्वः स्याच्छुकासनः ॥
यक्षेशकुबेरौ	यक्षेट् खरस्थो वज्रारि धनुर्बाणाः फलं वरः ।
	पाशाङ्कुशफलवरा धनेट् सिंहे चतुर्मुखः ॥
वरुणभृकुटी	पाशाङ्कुश—धनुर्बाण—सर्पवज्रा ह्यपां पतिः ।
	शूलशक्ति वज्रखेटा ? डमरुभृंकुटिस्तथा ॥
पार्श्वः	पार्श्वो धनुर्बाण भृण्डि मुद्गरश्च फलं वरः ।
	सर्परूपः श्यामवर्णः कर्तव्यः शान्तिमिच्छता ॥
मातङ्गः	फलं वरोऽथ द्विभुजो मातङ्गो हस्तिसंस्थितः ।
गोमेधः	? ... ...॥
	यक्षाश्चतुर्विंशतिकास्तथर्षभादितः क्रमात् ।
लाञ्छनानि	चामरेन्द्रच्छत्रत्रयमशोकः पुष्पवर्षणम् ॥
	ज्ञानं ध्वजास्तथा यक्षदेवीनां लाञ्छलानि च ।

टि०—जैनानामपि सम्प्रदाये दशदिग्पालानां (इन्द्र-अग्नि-यम-निर्ऋति-वरुण-वायु-कुबेर-ईशान-पातालाधीश्वरनागदेव-ऊर्ध्वलोकाधीश्वरब्रह्म-देवेत्यादीनाम्) नव-ग्रहाणां, सरस्वत्याः योगिनीनाञ्चापि लक्षणानि प्रायेण ब्राह्मणप्रतिमा-लक्षणैस्सह समानान्येवातः विस्तरेणालम् । परं विद्यादेवीनां(श्रुतदेवीनां वा) क्षेत्रपालस्य च लक्षणं दीयते । तथाहि—

षोडशविद्यादेव्यः	प्रथमा रोहिणी ज्ञेया प्रज्ञप्तिर्वज्रशृङ्खला ।
शि० रत्ना० नामानि	वज्राङ्कुशी समाख्याता चक्रेश्वरी तथैव हि ॥
	नरदत्ता च काली च महाकाली च गौरिका ।
	गान्धारी च महाज्वाला विज्ञातव्या च मानवी ॥
	वैरोट्याच्छुप्तिका चैव मानसी महामानसी ।
	इमाष्षोडशसंख्याका विद्यादेव्यः शुभप्रदाः ॥
१. रोहिणी लक्षणानि	सुरभिवाहनारूढा गौरवर्णा तु रोहिणी ।
	अक्षबाणधनुःखड्गसमन्वितचतुष्करा ॥
२. प्रज्ञप्तिः	प्रज्ञप्तिः श्वेतवर्णा च मयूरवरवाहना ।
	वरदशक्तिसंयुक्ता सशक्तिमातुलिङ्गिका ॥
३ वज्रशृङ्खला	चतुर्भुजा च शङ्खाभा पद्मस्था वज्रशृङ्खला ।
	वरदशृङ्खलायुक्ता शृङ्खलापद्मसंयुता ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

४. वज्राङ्कुशी	वज्राङ्कुशी गजारूढा कनकाभा चतुर्भुजा । वरदं वज्रकं धत्तेऽङ्कुशञ्च मातुलिङ्गकम् ॥
५. चक्रेश्वरी	गरूडस्था तडिद्वर्णाऽप्रतिचक्रा चतुर्भुजा । चक्रेश्वरीति या ख्याता चक्रयुक्तचतुष्करा ॥
६. नरदत्ता	नरदत्ता च हेमाभा महिषीवाहनस्थिता । वरदखड्गसंयुक्ता खेटकमातुलिङ्गिका ॥
७. काली	काली तु कृष्णवर्णा स्यात्पद्मासना चतुर्भुजा । अक्षसूत्रगदावज्राऽभययुक्तचतुष्करा ॥
८. महाकाली	महाकाली तमालाभा पुरुषवाहनस्थिता । अक्षसूत्रं तथा वज्रं धत्तेऽभयञ्च घंटिकाम् ॥
९. गौरी	गौरी कनकवर्णाभा गोधावाहनसंस्थिता । वरदमूसलाक्षाब्जसमन्वितचतुष्करा ॥
१०. गान्धारी	गान्धारी नीलवर्णा च कमलासनसंस्थिता । वरदं मूसलं वज्रमभयञ्चैव बिभ्रती ॥
११, महाज्वाला	मार्जारवाहना नित्यं ज्वालोद्भासिकरद्वया । शशाङ्कधवला ज्वाला देवी भद्रं ददातु नः ॥
१२. मानवी	मानवी श्यामवर्णा च कमलस्था चतुर्भुजा । वरदपाशशाखाक्षसूत्रालङ्कृतहस्तका ॥
१३. वैरोटचा	वैरोटचा श्यामवर्णा चाजगरासनसंस्थिता । सव्ये खड्गोरगौ धत्ते वामे खेटकपन्नगौ ॥
१४. अच्छुप्ता	अच्छुप्ता च तडिद्वर्णा तुरङ्गवाहनस्थिता । खड्गबाणधनुः खेटविभूषितचतुर्भुजा ॥
१५. मानसी	मानसी धवलाभा च हंसवाहनसंस्थिता । वरदवज्रवज्राक्षवलयान्वितबाहुका ॥
१६. महामानसी	सिंहासनसमासीना धवला महामानसी । वरासिखेटकैर्युक्ता कुण्डचा चैव चतुर्भुजा ॥

क्षेत्रपालः— ॐ नमः क्षेत्रप्रालाय कृष्णगौरकाञ्चनधूसरकपिलवर्णाय विंशतिभुज-
(i) आ० दि० दण्डाय बर्बरकेशाय जटाजूटमण्डिताय वासुकीकृतजिनोपवीताय तक्षककृत-मेखलाय शेषकृतहाराय नानायुधहस्ताय सिंहचर्मावरणाय प्रेतासनाय कुक्कुरवाहनाय त्रिलोचनाय च ।

(ii) नि०क० क्षेत्रपालं क्षेत्रानुरूपनामानं श्यामवर्णं बर्बरकेशमावृत्तपिङ्गनयनं विकृतदंष्ट्रं पादुकाधिरूढं नग्नं कामचारिणं षड्भुजं मुद्गरपाशडमरूकान्वितदक्षिण-पाणिं श्वानाङ्कुशगेडिकायुतवामपाणिं श्रीमद्भगवतो दक्षिणपार्श्वे ईशानाश्रितं दक्षिणाशामुखमेव प्रतिष्ठाप्यम् ।

मणिभद्रक्षेत्रपालः

ढक्का शूलसुदामपाशाङ्कुशखड्गैः ।
त्वत्करषट्कं युक्तं भात्यायुधवर्गैः ॥

टि०—जैनानां शान्तिदेव्यः कल्पना विलक्षणैव—

शान्तीदेवी

श्री चतुर्विधसंघस्य शासनोन्नतिकारिणी ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

(i) प्र० क० शिवशान्तिकरी भूयात् श्रीमती शान्तिदेवता ।।

(ii) शान्तिदेवतां धवलवर्णीं कमलासनां चतुर्भुजां वरदाक्षसूत्रयुक्तदक्षिणकरां कुण्डिकाकमण्डल्वन्वितवामकराम् ।

जिनायतनम्

अ० पृ० १२१

जिनालयं प्रवक्ष्यामि जिनेन्द्रभवनं तथा ।
आश्रयन्ति ततो दिव्या जिनशासनपारगाः ।।
जिनेन्द्रस्य तथा यक्षा देव्यश्च जिनमातृकाः ।
तीर्थङ्कराणां सर्वेषामतीतानामवर्तिनाम् ।।
केवल्यृषभदेवाद्याः पद्मनाभादितः क्रमात् ।
पृथक् चतुर्विंशतिर्वै जिनानां वा द्वासप्ततिः ।।
जन्मनिष्क्रमणस्थानज्ञाननिर्वाणभूमिषु ।
अन्येषु पुण्यदेशेषु नदीकूले नगरेषु च ।।
ग्रामादिसन्निवेशेषु समुद्रपुलिनेषु च ।
अन्येषु वा मनोज्ञेषु कारयेज्जिनमन्दिरम् ।।

शि० रत्ना०

जिनायतने जिनमूर्तीनां स्थापनक्रमः

नेमिश्च मल्लिनाथश्च वीरो वैराग्यकारकाः ।
त्रयो वै मन्दिरे स्थाप्या शुभदाः न गृहे मताः ।।
ऋषभादिजिनपंक्तिः स्थाप्या दक्षिणतः सदा ।
चतुर्विंशजिनालये सर्वस्मिन्सृष्टिमार्गतः ।।
चतुर्विंशतिपृथक्त्वे जिनानां च द्वासप्ततिः ।
मूलनायको भवेद्यस्तु तस्य स्थाने सरस्वती ।।
जिनालये जिनं कुर्यादन्ते कुर्यात्सरस्वतीम् ।
सरस्वती जिनश्चैव ह्यन्योन्यवरोधकम् ।।

जिनेन्द्रस्याष्टौ प्रतीहराः

अ० पृ० २२०

इन्द्र इन्द्रजयश्चैव महेन्द्रो विजयेन्द्रकः ।
धरणेन्द्रः पद्मकश्च सुनाभः सुरदुन्दुभिः ।।
इत्यष्टौ च प्रतीहाराः वीतरागादिशान्तिदाः ।
पृथगेकैकशश्चैव कथयिष्याम्यनुक्रमम् ।।
फलं वज्राङ्कुशौ दण्ड इन्द्रोऽसव्ये इन्द्रजयः ।
द्वौ वज्रौ फलदण्डौ च महेन्द्रोऽसव्ये विजयः? ।।
तदायुधयोगोद्भवास्त्रिपञ्चाश्वफणा मताः ।
धरणेन्द्रः पद्मकश्च सर्वे शान्तिकराः स्मृताः ।।
यक्षरूपाधिकाराश्च निधिहस्ताः शुभोदराः ।
सर्वशान्तिप्रदावेवं सुनाभः सुरदुन्दुभिः ।।
इत्यष्टौ च जिनेन्द्रस्य प्रतीहाराश्च शान्तिदाः ।
नगरादौ पुरे ग्रामे सर्वविघ्नप्राणाशनाः ।।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ब. बौद्ध-प्रतिमा-लक्षणम्

बुद्धाः बुद्धशक्तयः बोधिसत्वाश्च

पञ्चध्यानिबुद्धानामाविर्भावः—चक्षुर्वैरोचनो बुद्धो श्रवणो वज्रसूर्यकः ।
घ्राणश्च परमाद्यैस्तु पद्मनर्तेश्वरो मुखम् ॥
कायः श्रीहेरूको राजा वज्रसत्वञ्च मानसम् ।
पञ्चध्यानिबुद्धाः जिनो **वैरोचणो** ख्यातो **रत्नसंभव** एव च ।
अमिताभामोघसिद्धिरक्षोभ्यश्च प्रकीर्तिताः ॥
वर्णाः अमीषां सितः पीतो रक्तो हरितमेचकौ ।
बोध्यग्री—वरदो—ध्यानं मुद्रा अभय-भू-स्पृशौ ॥

१. अमिताभः—अ० सं०—पश्चिमे दले रविमण्डलोपरि रक्त-ह्रीः—कारसम्भूतो रक्त-वर्णोऽमिताभः पद्मचिन्हसमाधिमुद्राधरः संज्ञास्कन्धस्वभावो ··· ···ग्रीष्मर्तु रूपःग्राम्लरस-शरीरः तवर्गात्मा··· ···जापमन्त्रश्चायं ओं आः आरोलिक हुम् ।

२. अक्षोभ्यः--अ० सं०—नील-हुं-कारनिष्पण्णद्विभुज एकमुखो भूस्पर्शमुद्राधरो वज्र-पर्यङ्की·····कृष्णवज्रचिन्हः सुविशुद्धधर्मधातुविज्ञानस्कन्धस्वभावः·········शिशरमध्याह्न-कटुश्रुति-आकाशशब्दचवर्गो 'ग्राः वज्रधृक् हुम्' अस्य जापमन्त्रः ।

३. वैरोचनः—अ० सं०—ओंकारजः शुक्लवर्णः वैरोचनः शुक्लचक्रचिन्हः बोध्य-ग्रीमुद्राधरः रूपस्कन्धस्वभावः···हेमन्तऋतुविशुद्धः मधुरसशरीरः कवर्गव्यापी··· ···'ओं आः जिनजिक हुं' इत्यस्य जपमन्त्रः ।

४. अमोघसिद्धिः—अ० सं०—उत्तरदले श्यामखंकारजः(श्यामवर्णोऽमोघसिद्धिः विश्व-वज्रचिन्हाभयमुद्राधरो संस्कारस्कन्धस्वभावो वर्षा-ऋतु-रूपः)··· ···तिक्तरसात्मकः पव-र्गविशुद्धः अस्य मन्त्रः—"ओं आः प्रज्ञाधृक् हुमिति" ।

५. रत्नसंभवः—अ० सं०—दक्षिणदले सूर्यमण्डलोपरि त्रां-कारजः पीतवर्णो रत्नसम्भवो रत्नचिन्हवरदमुद्राधरो वेदनास्वभावपिशुनशरीरः······वसन्तऋतु-लबणशरीरः तवर्गव्यापी ··· ··· ···'ओं आः रत्नधृक् हुम्'—जपमंत्रः ।

६. वज्रसत्वोऽपि—अ० सं०—वज्रसत्वस्तु हुंकारजन्मा··· ···द्विभुज एकवक्त्रो वज्र-वज्रघण्टाधरः मनस्स्वभाव कापायरसशरीरः शरद्-ऋतु-विशुद्धः यरलवाद्यात्मकः ।

टि० १—ध्यानिबुद्धाः दिव्यबुद्धाः आदिबुद्धा वा सन्ति, तेषां दिव्यबुद्धशक्तिषु—
१—वज्रधात्वीश्वरी १—लोचना ३—मामकी ४—पाण्डरा ५—आर्यतारा ६—वज्रसत्वात्मिकेति षण्णां ध्यानिबुद्धानां दिव्यशक्तयस्संकीर्त्यन्ते ।

टि० २—दिव्यबोधिसत्वेषु च १—सामन्तभद्रः २—वज्रपाणिः ३—रत्नपाणिः ४—विश्वपाणिः ६—घण्टापाणिश्चेति यथाक्रमं षण्णां ध्यानिबुद्धानां बोधिसत्वाः व्यपदिश्यन्ते ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

टि० ३—मानुषबुद्धेषु— १—विपश्यिन् २—शिखी ३—विश्वभूः ४—क्रकुच्छन्दः ५—कनकमुनिः ६—काश्यपः ७—शाक्यसिंहश्चेति सप्तानां विशेषतो परिसंख्यानम्। तत्रान्तिमस्य लक्षणं यथा साधनमालायां—

गौतमो बुद्धः—सव्यकरेण भूस्पर्शमुद्रां उत्सङ्गस्थितावसव्यहस्तं काषायवस्त्रावगुण्ठनं नीलगौररक्तश्यामचतुर्म्मारोपरि विश्वपद्मवज्रावस्थितं शान्तं लक्षणव्यञ्जनेनान्वितगात्रम्। तस्य भगवतो दक्षिणे मैत्रेयबोधिसत्वं गौरं द्विभुजं जटामुकुटिनं सव्यकरेण चामररत्न-धारिणं अवसव्येन नागकेशरपुष्पच्छटाधारिणम्। तथा वामतो लोकेश्वरं शुक्लं दक्षिण-करेण चामरधरं वामकरेण कमलधरम्। भगवन्मुखावलोकनपरौ च तौ भावयेत्।

टि० ४— मानुषबुद्धशक्तिषु—१—विपश्यन्ती २—शिखिमालिनी ३—विश्वधरा ४—ककुद्वती ५—कण्ठमालिनी ६—महिधरा ७—यशोधरा चेति यथासंख्यं मानुषबुद्धानां शक्तयस्सन्ति।

टि० ५—मानुषबोधिसत्वेषु— १—महामतिः २—रत्नधरः ३—आकाशगञ्जः ४—शकमङ्गलः ५—कनक-राजः ६—धर्मधरः ७—आनन्दश्चेति यथासंख्यं मानुषबुद्धाना बोधिसत्वाश्च विभावनीयाः।

भावीबुद्धो मैत्रेयः—पीत-'मैं'-कारपरिणतं विश्वकमलस्थितं त्रिमुखं चतुर्भुजं कृष्ण-शुक्ल-दक्षिण-वाम-मुखं सुवर्णगौरं सत्वपर्यङ्किनं व्याख्यानमुद्राधरकरद्वयम् अपरदक्षिणवाम-भुजाभ्यां वरदपुष्पितनागकेशरमञ्जरीधरं नानालङ्कारधरम् आत्मानं मैत्रेयरूपमालम्ब्य···।

सर्वतन्त्रस्वतन्त्रः मञ्जुश्रीः बोधिसत्वः—तस्य चतुर्दशरूपाणि

अमिताविर्भावौ—१. वाक्—द्विभुजैकमुखं सितं वज्रपर्यङ्कोपरि समाधिमुद्राहस्तम् अशेषकुमाराभरणभूषितं पञ्चवीरकं मञ्जुश्रीभट्टारकं··· निष्पाद्य·····वज्रजिह्वोपरि बुद्धम् अमिताभं विचिन्त्य·······ओं वाक्येदन्नमः इति जापमंत्रः।

२—धर्मधातुवागीश्वरश्च—अष्टभुजं चतुर्मुखं मूलमुखं रक्तगौरं दक्षिणं कुङ्कुमारुणं पश्चिमं पद्मरक्तम्, उत्तरं पीतरक्तं, द्वाभ्यां हस्ताभ्यां धनुर्बाणधरम्, अपराभ्यां पाशाङ्कुशधरं, पुनरपराभ्यां प्रज्ञापारमितापुस्तकखड्गधरं, तथापराभ्यां घण्टावज्रधरं महारागशृङ्गाररसोज्ज्वलं ललितासनस्थं विश्वपद्मचन्द्रे दिव्यवस्त्राभरणममिताभ-जटामुकुटिनम्·····।

अक्षोभ्याविर्भावेषु—३—मञ्जुघोषः—मञ्जुघोषरूपम् आत्मानं पश्येत् सिंहस्थं कनक-गौरवर्णं सर्वालङ्कारभूषितं व्याख्यानमुद्राव्यग्रकर वामपार्श्वे उत्पलधरमक्षोभ्यमुकुटिनम्। दक्षिणे सुधनकुमारं वामे यमान्तकं पश्येत्··· ···मंत्रं जपेत् 'ओं वागीश्वर मुः··· ···।'

४. सिद्धैकवीरः—सिद्धैकवीरो भगवान् चन्द्रमण्डलस्थः चन्द्रोपाश्रयो जगद्द्योतकारी द्विभुज एकमुखः शुक्लो वज्रपर्यङ्की दिव्यालङ्कारभूषितः पञ्चचीरकशेखरो वामे नीलो-त्पलधरो दक्षिणे वरदः। ततश्च भगवतो मौलौ अक्षोभ्यं देवताः पूजां कुर्वन्ति।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

५. वज्रानङ्गः—वज्रानङ्गमार्य्यमञ्जुघोषं पीतवर्णं षड्भुजं मूलभुजाभ्यां आकर्णपूरितरक्तोत्पलकर्णिकाशरयुक्तकुसुमधनुर्द्धरं दक्षिणद्वयेन खङ्गदर्पणभृतं वामयुगालेनेन्दीवररक्ताशोकपुष्पपल्लवधरम् अक्षोभ्याधिष्ठितजटामुकुटिनं प्रत्यालीढपदं षोडशवर्षाकारं महाशृङ्गारमूर्तिं पश्येत् ।

६. नामसङ्गीतिः—रक्तगौरं पद्मचन्द्रोपरि वज्रपर्य्यङ्कनिषण्णं प्रथममुखं रक्तं दक्षिणं नीलं वामे शुक्लम् इति त्रिमुखं हस्तचतुष्टयेन यथायोगं प्रज्ञाखड्गधनुर्बाणयोगिनं रत्नकिरीटिनं द्वात्रिंशल्लक्षणाशीत्यनुव्यञ्जनविराजितं कुमारं कुमाराभरणभूषितमात्मानं विभाव्य……… तदनु सर्व्वतथागताभिषेकपूर्व्वकमक्षोभ्यमौलिनमात्मानं विचिन्तयेत् ।

पञ्चध्यानिबुद्धसमष्टयाविर्भावेषु—७. वागीश्वरः—पञ्चवीरैकशेखरं कुमारं सर्वाभरणभूषितं कुङ्कुमारुणं वामेनोत्पलं दक्षिणेन लीलया स्थितं सिंहासनस्थमात्मानं कुमाररूपेण चिन्तयेत् … …ओं वागीश्वर मुः ।

८. मञ्जुवरः—तप्तकाञ्चनाभं पञ्चवीरकुमारं धर्मचक्रमुद्रासमायुक्तं प्रज्ञापारमितान्वितनीलोत्पलधारिणं सिंहस्थं ललितक्षेपं सर्वालङ्कारभूषितं ··ओं मञ्जुवर हुम् ।

९. मञ्जुवज्रः

कुङ्कुमारुणसंमूर्त्तिर्नीलसितत्रयाननः ।
भुजद्वयसमाश्लिष्टस्वाभविद्याधरास्यधृक् ॥
खड्गबाणभुजश्चापनीलोत्पलपरिग्रहः ।
विश्वदलाब्जचन्द्रस्थो वज्रासनशशिप्रभः ॥

१०. मञ्जुकुमारः—मञ्जुकुमारं त्रिमुखं षड्भुजं कुङ्कुमारुणं नीलसितदक्षिणेतरवदनं सत्त्वपर्यङ्किनं खड्गबाणवरदं दक्षिणकरत्रयं, प्रज्ञापारमितापुस्तकनीलोत्पलचापवद्वामकरत्रयं सश्रृङ्गारकुमाराभरणनिवसनादिकं नानापुष्पमधाशोभचीरत्रयविराजितं तथागतपरमानुपरिघटितं……. ।

स्वतन्त्राविर्भावेषु—११. अरपचनः—वामकरकलितपुस्तकं तदितरहस्तविन्यस्तप्रज्ञाखड्गं पञ्चरत्नालङ्कृतमकुटं आकुञ्चितपचञ्चीरं बन्धूककान्तिवसनयुगलं यथायथमुचितस्थाननिवेशितरुचिरशृंगाराभरणं स्मितस्फुरन्कपोलस्थलं शरदभ्रवृन्दमिवैकत्र कृतावस्थानमन्धकारचकितमिव पुञ्जीकृतमालोकयेत् ।

१२. स्थिरचक्रः—स्फुरदमलमिन्दीवरं मुःकाराधिष्ठितकिञ्जल्कं विचिन्त्य तत्परिणतं कुङ्कुमाभं पञ्चचीरं कुमाराभरणं शृङ्गारैकरसं खड्गपुस्तकधरं वागीश्वरमात्मानं चन्द्रस्थं ध्यायात् ।

१३. वादिराट्—

स्वच्छं षोडशवत्सराकृतिधरं शार्दूलपृष्ठस्थितं
व्याख्याव्याकुलपाणिपद्मयुगलं वामार्द्धपर्य्यङ्किनम् ।
दीर्घं नापि न चापि खर्व्वमसमं सौन्दर्यराश्याश्रयं
रत्नस्वर्णमणिप्रकारविविधालङ्कारमालाकुलम् ॥

१४. मञ्जुनाथः

व्युत्थाय मञ्जुनाथस्य वहन् गर्वं समाहितः ।
………………………त्रिमुखं षड्भुजं तथा ॥
चक्रवज्रमहारत्नपद्मखड्गधरायुधम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

बोधिसत्वः अवलोकितेश्वरः लोकेश्वरो वा--तस्य पञ्चदशरूपाणि

१. षडक्षरी लोकेश्वरः—आत्मानं लोकेश्वररूपं सर्व्वालङ्कारभूषितं शुक्लवर्णं चतुर्भुजं वामतः पद्मधरं दक्षिणतो अक्षसूत्रधरं, अपराभ्यां हस्ताभ्यां हृदि संपुटाञ्जलिस्थितं ध्यायात् । दक्षिणे मणिधरं तद्वद्वर्णभुजान्वितं पद्मान्तरोपरिस्थम् वामे तथैव अपरपद्मस्थां षडक्षरी-महाविद्याम् ।

२. सिंहनादः—श्वेतं जटामकुटिनं त्रिनेत्रं द्विभुजं तपस्विवेषधरं महाराजलीलया स्थितं वामहस्तादुत्थितपद्मोपरि ज्वलदूर्ध्वखड्गं दक्षिणे सितत्रिशूलं सितफणिवेष्टितं वामे नानासुगन्धिपुष्पैः पूर्णं श्वेतकपालम् अमिताभमुकुटिनं स्फुरत्पञ्चतथागतं महानिर्म्माण-रूपिणं ध्यायात् ।

३. खसर्पणः—आत्मानं भगवन्तं ध्यायात् हिमकरकोटिकिरणावदातं देहमूरूजटा-मुकुटममिताभशेखरं विश्वनलिननिषण्णं शशिमण्डले अर्द्धपर्य्यङ्कनिषण्णं सकलालङ्कारधर-विग्रहं स्मेरमुखं द्विरष्टवर्षदेशीयं दक्षिणे वरदकरं वामकरेण सनालकमलधरं कर-विगलत्पीयूषधाराभ्यवहाररसिकं तदधः समारोपितोर्ध्वमुखं महाकुक्षिमतिकृशमति-शितिवर्णं सूचीमुखं तर्पयन्तं श्रीमत्पोतलकाचलोदरनिवासिनं करुणास्निग्धविलोकनं शृंगाररसपर्य्युपासितमतिशान्तं नानालक्षणालङ्कृतम् ।

तस्य पुरतस्तारा दक्षिणपार्श्वे सुधनकुमारः । तत्र तारा श्यामा वामकरविधृतं सनाल-मुत्पलं दक्षिणकरेण विकाशयन्ती नानालङ्कारवती अभिनवयौवनोद्भिन्नकुचभारा । सुधनकुमारश्च कृताञ्जलिपुटः कनकावभासद्युतिः कुमाररूपधारी वामकक्षविन्यस्तपुस्तकः सकलालङ्कारवान् ।

पश्चिमे भ्रकुटी हयग्रीव उत्तरे । तत्र भ्रकुटी चतुर्भुजा हेमप्रभा जटाकलापिनी वामे त्रिदण्डीकमण्डलुधारिहस्ता दक्षिणे वन्दनाभिनयाक्षसूत्रधरकरा त्रिनेत्रा । हयग्रीवो रक्तवर्ण्णः खर्व्वलम्बोदरः ऊर्ध्वज्वलत्पिङ्गलकेशः भुजगयज्ञोपवीती कपिलतरश्मश्रुश्रेणी-परिचितमुखमण्डलः रक्तवर्तुलत्रिनेत्रः भ्रकुटीकुटिलभ्रूकः व्याघ्रचर्म्माम्बरः दण्डायुधः दक्षिणकरेण वन्दनाभिनयी । एते सर्व्वे एव स्वनायकाननप्रेरितदृष्टयो यथाशोभमवस्थिता-श्चिन्तनीयाः

४. लोकनाथः

पूर्ववत् क्रमयोगेन लोकनाथं शशिप्रभम् ।
ह्रीकाराक्षरसंभूतं जटामुकुटमण्डितम् ।।
वज्रधर्म्मजटान्तःस्थं अशेषरोगनाशनम् ।
वरदं दक्षिणे हस्ते वामे पद्मधरं तथा ।।
ललिताक्षेपसंस्थं तु महासौम्यं प्रभास्वरम् ।
वरदोत्पलकरा सौम्या तारा दक्षिणतः स्थिता ।।
वन्दनादण्डहस्तस्तु हयग्रीवोऽथ वामतः ।
रक्तवर्णो महारौद्रो व्याघ्रचर्म्माम्बरप्रियः ।।

५. हालाहलः

ह्रीकारबीजनिष्पन्नं हालाहलं महाकृपम् ।
त्रिनेत्रं त्रिमुखं चैव जटामुकुटमण्डितम् ।।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

प्रथमास्यं सितं नीलदक्षिणं वामलोहितम् ।
शशाङ्कार्द्धधरं मूर्ध्नि कपालकृतशेखरम् ॥
जटान्तःस्थजिनं सम्यक् सर्व्वाभरणभूषितम् ।
सितारविन्दनिर्भासं शृंगाररससुन्दरम् ॥
षड्भुजं स्मेरवक्त्रं च व्याघ्रचर्म्माम्बरप्रियम् ।
वरदं दक्षिणे पाणौ द्वितीये चाक्षमालिकम् ॥
तृतीये शरनर्त्तनं च वामे चापधरं तथा ।
द्वितीये सितपद्मं च तृतीये स्तनमेव च ॥

६. (अ) पद्मनर्त्तेश्वरः—पद्मनर्त्तेश्वराम्नायेनार्य्यावलोकितेश्वरभट्टारकमात्मानं विभावयेत् एकमुखम् अष्टादशभुजमर्द्धपर्य्यङ्किनं अमिताभजटाजूटमण्डलं, सर्व्वकरैर्विश्वपद्मधारिणम्, योगिनीवृन्दपरिवृतं, दक्षिणवामपार्श्वस्थिततारासुधनभ्रकुटीहयग्रीवं, दिव्यालङ्कारभूषणम् ।

(ब) पद्मनर्त्तेश्वरमात्मानं भावयेत् सत्त्वपर्य्यङ्कनिषण्णं द्विभुजैकमुखं रक्तं सकलालङ्कारधरम् अमिताभमकुटं वामपार्श्वे पाण्डरवासिनीसमाश्लिष्टम् आलिङ्गनाभिनयस्थितवामभुजेन रक्तपद्मधरं नर्त्तनाभिनयेन सूचीमुद्रया विकाशदपरदक्षिणकरम् ।

(स) पद्मनर्त्तेश्वरं रक्तवर्णमेकमुखं जटामुकुटिनं त्रिनेत्रमष्टभुजं सर्व्वालङ्कारभूषितं सर्पयज्ञोपवीतमर्द्धपर्य्यङ्केन ताण्डवं । प्रथमभुजद्वयेन नृत्याभिनयं द्वितीयदक्षिणभुजेन हृदि विकाशयन्तं सूचीमुद्रां वामभुजेन रक्तपद्मं शिरसि धृतं तृतीयभुजद्वयेन वज्रवद्दण्डत्रिशूलधरं चतुर्थभुजद्वयेन अक्षसूत्रकुण्डिकाधरं अष्टदेवीपरिवृतम् एवंभूतं पद्मनर्त्तेश्वरलोकनाथं भावयेत् ।

७. हरिहरिहरिवाहनोद्भवः—हरिहरिहरिवाहनोद्भवं भगवन्तमार्य्यावलोकितेश्वरं सर्व्वाङ्गशुक्लं जटामकुटिनं शान्तवेशं, दक्षिणकरेण भगवन्तं तथागतं साक्षिणं कुर्व्वन्तं, द्वितीयेन अक्षमालाधारिणं, तृतीयेन दुःकुहकं लोकमुपदेशयन्तं, वामेन दण्डधरं, द्वितीयेन कृष्णाजिनधरं, तृतीयेन कमण्डलुधरं, सिंहगरुड़विष्णुस्कन्धसंस्थितमात्मानं ध्यात्वा ... ...।

८. त्रैलोक्यवशङ्करः—लोकेश्वरं सर्व्वाङ्गमहारागरक्तमेकमुखं द्विभुजं त्रिनेत्रं जटामकुटमण्डितं वज्राङ्कितपाशाङ्कुशहस्तं रक्तपद्मे वज्रपर्य्यङ्कनिषण्णं दिव्याभरणवस्त्रविभूषितमात्मानं विचिन्त्य ... ... ।

९. (अ) रक्तलोकेश्वरः—दक्षिणोत्तरपार्श्वे ताराभृकुटीदेवीद्वयसहितम् आर्य्यावलोकितेश्वरभट्टारकं रक्तवर्णं रक्तमाल्याम्बरानुलेपनं पाशाङ्कुशधनुर्बाणधरं चतुर्भुजं शृंगारैकरसं रक्तकुसुमयिताशोकतरोरधस्तादवस्थितमात्मानं विचिन्तयेत् .. ... ।

(ब) रक्तवर्णम् अमिताभगर्भजटामुकुटधरं वामकरगृहीतरक्तपद्मं तच्च दक्षिणकरेण विकासयन्तं विविधालङ्कारभूषितम् ।

१०. मायाजालक्रमः—भगवन्तमार्य्यावलोकितेश्वरं कृष्णवर्णं प्रत्यालीढस्थं सूर्य्यमण्डलस्थितं पञ्चमुखं त्रिनेत्रं द्वादशभुजं सितरक्तदक्षिणमुखद्वयं तथा पीतहरितवाममुखद्वयं दक्षिणभुजैः डमरूखट्वाङ्गाङ्कुशपाशवज्रशरधरं वामभुजैस्तर्ज्जनीकपालरक्तकमलमणिचक्र-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

चापधरं दंष्ट्राकरालसकलवदनं षण्मुद्रोपेतं सार्द्रमुण्डमालालङ्कृतशरीरं नग्नं सर्व्वाङ्ग-सुन्दरमात्मानं झटिति प्रत्याकलय्य... ... ...।

११ नीलकण्ठः—भगवन्तं पीतवर्णम् अर्द्धचन्द्राङ्कितजटामकुटिनम् अमिताभोपलक्षित-शिरःप्रदेशं रक्तपद्मोपरिस्थितं कृष्णसारहरिणचर्म्मणि वज्रपर्य्यङ्किनं समाधिमुद्रोपरि नानारत्नपरिपूर्णकपालधारिणं एणेयचर्म्मकृतयज्ञोपवीतिनं व्याघ्रचर्म्माम्बरधरं निराभरणं नीलकण्ठं नीलगुलिकाविशिष्टकण्ठं पार्श्वद्वये परस्पराभिसम्बद्धपुच्छसमणिफणाविशिष्ट-भगवदवलोकनपरोर्ध्वमुखकृष्णसर्पद्वयोपलक्षितमात्मानमेवं विभावयेत् ।

१२. सुगतिसन्दर्शनः—सुगतिसन्दर्शनलोकेश्वरभट्टारकं शुक्लवर्णं षड्भुजं वरदाभयाक्ष-मालाधरं दक्षिणे, वामे पद्मकुण्डीत्रिदण्डीधरं च रत्नाभरणभूषितं व्रतसूत्रधारिणं जटामुकुटिनं पद्मोपरि चन्द्रमण्डलस्थितं सौम्यरूपं भावयेत् ।

१३. प्रेतसन्तर्पितः—जटामुकुटिनं षड्भुजं प्रथमभुजद्वयेन वरदौ द्वितीयभुजद्वयेन रत्नपुस्तकौ तृतीयभुजद्वयेन अक्षमालात्रिदण्डिकं सर्व्वालङ्कारभूषितं व्रताक्षसूत्रधारिणं सौम्यमूर्तिं पद्मोपरि चन्द्रमण्डले स्थितं श्वेतवर्णं विभावयेत् ।

१४. सुखावतीलो०—त्रिमुखश्श्वेतवर्णः षड्भुजः दक्षे मुद्राः शरक्षेपजपमालावरदानि, वामेषु धनुःकमलतारोरूसमर्पणानि ललितासनः कमलोपरि वज्रताराविश्वतारा-पद्मताराभिः परिवृतः । उपरि चैत्यः ।

१५. वज्रधर्मः

तं सितं रक्तवर्णं तु पद्मरागसमद्युतिम् ।
पञ्चबुद्धमुकुटधरं हर्षेणोत्फुल्ललोचनम् ।।
वामतो स्पर्द्धया नालं धृत्वा षोडशपत्रकम् ।
पद्मं विकाशयन्तं च हृदि दक्षिणपाणिना ।।
मयूरोपरि मध्यस्थे निषण्णं चन्द्रमण्डले ।
सत्त्वपर्य्यङ्कमाभुज्य सश्रृङ्गाररसोत्सवम् ।।
चैत्यान्तःस्थमहाकर्म्मकूटागारविहारिणम् ।
भावयेद् वज्रधर्म्माग्रचं नित्यं बोधिमवाप्नुयात् ।।

अमिताभाविभावेषु—देवौ देव्यश्च

१. महाबलः—महाबलमेकमुखं चतुर्भुजं सर्व्वाङ्गरक्तमूर्ध्वपिङ्गल सर्प्पविबद्धकेशं दक्षिणभुजाभ्यां सितदण्डसितचामरधरं वामभुजाभ्यां वन्दनाभिनयसपाशतर्ज्जनीकरं व्याघ्रचर्म्मनिवसनं सर्पाभरणं प्रत्यालीढं दंष्ट्राकरालवदनं सूर्य्यमण्डलप्रभामालिनम् अमिताभ-मुकुटिनं ध्यायात् ।

२. सप्तशतिकहयग्रीवः—रक्तवर्णं महाभयानकं त्रिनेत्रं कपिलश्मश्रुरौद्रं बृहदुदरं दंष्ट्राकरालिनं दन्तौष्ठकपालमालिनं जटामुकुटिनम् अमिताभशिरस्कं द्वितीयमुखं भीम-भयानकं नीलं हयाननं हीहीकारनादिनं ब्रह्माण्डशिखराक्रान्तं, द्वितीयेन भवाग्रपर्य्यन्तं अष्टनागोपेतं खर्व्ववामनाकारं व्याघ्रचर्म्मनिवसनं सर्व्वालङ्कारभूषितं सकलदेवासुरं तर्ज्जयन्तं गृहीतवज्रदण्डं... ... ...।

३. कुरुकुल्ला—(i) शुक्ला—आत्मानं भगवतीमक्षसूत्रोत्पलामृतकुण्डीं सव्यासव्यपाणिभ्यां दधानां त्रिनेत्रां पद्मधृक्प्रमुखैः सर्व्वतथागतैः वीणादिषोडशदेवीभिरभिषिक्ताम् अमिताभवि-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

राजितनानापुष्पोपशोभितजटामुकुटां शृंगारादिरसोपेतां किञ्चित्सव्यपाणिपल्लवस्थाक्षसूत्रें- मालोकामानां क्षीराम्भोधिश्वेतवर्णाब्जस्थाममृताङ्कोपरि सत्त्वपर्य्यङ्कासनस्थां कङ्कणकेयूर- कुण्डलनूपुरमुक्ताहारदिव्यवस्त्रादिविभूषितां नीलानन्तबद्धकेशीं पीयूषवर्णवासुकिकृतहारां रक्ततक्षककृतकर्णोग्रकुण्डलां दूर्व्वाश्यामकर्क्कोटककृतयज्ञोपवीतां शुक्लपद्मनागेन्द्रकृतहारां मृणालवर्णमहापद्मकृतनूपुरां पीतशङ्खपालकृतकङ्कणां धूमाभ्रवत्कुलिककृतकेयूरां शुभ्रवर्णां स्रवदमृतविग्रहां करुणार्द्रचित्तां भावयेत् ।

(ii) तारोद्भवा—रक्तवर्णां रक्तपद्मचन्द्रासनां रक्तपट्टांशुकोत्तरीयां रक्तप्रभावलयां रक्तताटङ्ककिरीटिनीं चतुर्भुजां सव्ये अभयप्रदां द्वितीये समापूरितशरां वामे रत्नचापधरां द्वितीये रक्तोत्पलधराम् अमिताभतथागतमुकुटां कुरुकुल्लपर्व्वतगुहास्थितराहुमस्तकस्थित- सपत्नीककामदेवोपरिस्थितां शृंगाररसान्वितप्रथमयौवनोपेतां कुरुकुल्लां भावयेत् ।

(iii) उड्डियानकु०—द्विरष्टवर्षाकारां ज्वलत्पिङ्गलोर्द्ध्वमूर्द्धजां पञ्चकपालशिरोधरां शवारूढां मुण्डमालालङ्कृतहाराम् अर्द्धपर्य्यङ्कनाटचस्थाम् ईषद्दंष्ट्राकरालवदनां ललज्जिह्वां चक्रीकुण्डलकण्ठिकाकेयूरमेखलानूपुरकृतभूषणां व्याघ्रचर्म्मनिवसनां चलद्रक्तवर्तुलचापारो- पितत्रिनेत्रामू अमिताभनाथमुकुटीं चतुर्भुजाम् आकर्णपूरितरक्तोत्पलकलिकाशरपूरितरक्तकु- सुमधनुर्द्धरां शेषद्विभुजाभ्यां रक्तपुष्पकृताङ्कुशरक्तोत्पलधारिणीं विचिन्तयेत् ।

(iv) अष्टभुजा—कुरुकुल्लां भगवतीं अष्टभुजां रक्तवर्णां रक्ताष्टदलपद्मसूर्य्ये वज्रपर्य्यङ्कनिषण्णां कूटागारमध्यनिवासिनीं प्रथमकरद्वयेन त्रैलोक्यविजयमुद्राधरां अवशिष्टदक्षिणकरैः अङ्कुशम् आकर्णपूतिशरं वरदमुद्रां दधानां, परिशिष्टवामभुजैः पाशं चापम् उत्पलं दधानां सकलालङ्कारवतीं भावयेत् । पूर्व्वदले प्रसन्नतारां दक्षिणदले निष्पन्न- तारां पश्चिमदले जयतारां उत्तरदले कर्णताराम् ऐशानदले चुन्दाम् आग्नेयदले अपराजितां नैर्ऋत्यदले प्रदीपतारां वायव्यदले गौरीतारां च ध्यायात् । एताश्च सर्व्वा रक्तवर्णाः पञ्चतथागतमुकुटचः वज्रपर्य्यङ्कनिषण्णा दक्षिणभुजाभ्यां वरदमुद्राऽकर्णपूरितशरधराः वाम- भुजाभ्यां उत्पलचापधराः, पूर्व्वद्वारे वज्रवेतालीं लम्बोदरां विकृतमुखीं रक्तवर्णाम् अक्षोभ्य- मुकुटां दक्षिणहस्ताभ्यां तर्ज्जन्यङ्कुशधरां वामकराभ्यां वज्रघण्टापाशधराम्, दक्षिणद्वारे अपराजितां पीतवर्णां रत्नसम्भवमुकुटां दक्षिणहस्ताभ्यां दण्डाङ्कुशधरां वामहस्ताभ्यां घण्टापाशधराम्, पश्चिमद्वारे एकजटां कृष्णवर्णाम् ऊर्ध्वकेशां लम्बोदरां दन्तावष्टब्धौष्ठाम् अमिताभमुकुटां दक्षिणकराभ्यां वज्राङ्कुशधरां वामकराभ्यां घण्टापाशधराम्, उत्तरद्वारे वज्रगान्धारीं कनकश्यामां अमोघसिद्धिमुकुटां विकृतमुखीं लम्बोदरां दक्षिणभुजाभ्यां खड्गाङ्कुशधरां वामभुजाभ्यां घण्टापाशधरां चिन्तयेत् । एताश्चतस्र आलीढपदस्थाः ।

४. भृकुटी—चतुर्भुजैकमुखीं पीतां त्रिनेत्रां नवयौवनां वरदाक्षसूत्रदक्षिणकरां, त्रिदण्डिकमण्डलुधरवामकराम् अमिताभमुद्रितां पद्मचन्द्रासनस्थां भगवतीं ध्यात्वा …।

५. महासितवती—महासितवती चतुर्भुजैकमुखी रक्ता दक्षिणभुजद्वये अक्षसूत्रवरद- वती वामभुजद्वये वज्राङ्कुशहृत्प्रदेशस्थपुस्तकवती ह्रीं‌बीजा अमिताभमुकुटी अर्द्धपर्य्यङ्क- स्थिता नानालङ्कारवती सूर्य्यासनप्रभा चेति ।

अक्षोभ्याविर्भावेषु देवाः—

१. चण्डरोषणः—श्रीचण्डमहारोषणं भगवन्तमतसीपुष्पसङ्काशमचलापरनामानमेकमुखं

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

द्विभुजं केकराक्षं दंष्ट्राविकरालमहाघोरवदनं रत्नमौलिनं दंष्ट्रानिपीडिताधरं मुण्डमालां-शिरस्कमाररक्तचक्षुर्द्वयं दक्षिणे खड्गधरं तर्ज्जनीपाशहृदयस्थवामकरं सितसर्पयज्ञोपवीतं व्याघ्रचर्म्मनिवसनं नानारत्नविरचिताभरणं भूमिलग्नवामचरणमीषदुन्नतदक्षिणचरणं सूर्य्यप्रभामालिनमात्मानं विचिन्त्य..........अक्षोभ्यमुकुटिनं ध्यायात् ।

२. हेरूकः
(i) द्विभुजः

शवस्थमर्द्धपर्य्यङ्कं नरचर्म्मसुवाससम् ।
भस्मोद्धूलितगात्रं च स्फुरद्वज्रं च दक्षिणम् ॥
चलत्पताकाखट्वाङ्गं वामे रक्तकरोटकम् ।
शतार्द्धमुण्डमालाभिः कृतहारमनोरमम् ॥
ईषद्दंष्ट्राकरालास्यं रक्तनेत्रं विलासिनम् ।
पिङ्गोर्ध्वकेशमक्षोभ्यमकुटं कर्णकुण्डलम् ॥
अस्थ्याभरणशोभं तु शिरः पञ्चकपालकम् ।
बुद्धत्वदायिनं ध्यायात् जगन्मारनिवारणम् ॥

(ii) शक्तचालिङ्गतः

दंष्ट्रोत्कटमहाभीममुण्डस्रग्दामभूषितम् ।
भक्ष्यमाणं महामांसं श्रीहेरूकं नमाम्यहम् ॥

३. बुद्धकपालः—.....महावीरो घोरसंहारकः, नीलवर्णो महावपुः अस्थ्याभर-णमर्द्धपर्य्यङ्कनृत्यस्थं मुण्डमालाविभूषितं मुकुटे अक्षोभ्यधारिणम् एकवक्त्रं चतुर्भुजं वामे खट्वाङ्गकपालं दक्षिणे कर्त्तिडमरुकं प्रज्ञालिङ्गितं, वामे चित्रसेना मत्ता नग्ना मुक्तकेशी सर्व्वभयरहिता देवी चुम्बयन्ती मुहुर्मुहुः एवम् आत्मानं ध्यात्वा..............।

४. वज्रडाक:
(i) सम्वरः

ललितस्थं कपालमालं चन्द्रार्धं मूर्धनि धारयेत् ।
षण्मुद्रा मुण्डमाल च विश्ववज्री त्रिलोचनः ॥
आलीढपादविन्यासो विश्वाक्षरविवर्तिनीः ।
सभैरवां कालरात्रिमारूढो व्याघ्रचर्मभृत् ॥
अक्षोभ्यशेखरः कृष्णो वज्रघण्टाजटान्वितः ।
वीरोऽसौ वज्रवाराही वज्रास्रक्पूर्णकपालभृत् ॥
खट्वाङ्गमेखला रक्ता त्रिनेत्रा मुण्डमालिनी ।
पञ्चमुद्रा मुक्तकेशी दिग्वस्त्रा बुद्धशेखरा ॥

(ii) सप्ताक्षरः

षड्भुजं त्रिमुखं त्र्यक्षं सर्व्वलक्षणलक्षितम् ।
व्यञ्जनाशीतिसंयुक्तम् आलिकाल्युद्भवं प्रभुम् ॥
वज्रघण्टासमापन्नं नरचर्म्मार्द्रधारिणम् ।
वामे कपालखट्वाङ्गत्रिशूलं दक्षिणे करे ॥
कपालमालामुकुटिं विश्ववज्रजटाधरम् ।
अर्द्धेन्दुशेखरं चैव षण्मुद्रादेहभूषणम् ॥
नीलपीतहरितवक्त्रं व्याघ्रचर्म्माम्बरावृतम् ।
आलीढक्रान्तसूर्य्यस्थभैरवकालरात्रिकम् ॥
यथा नाथस्य तथा वज्रवाराह्यापि भुजादिभिः ।
देवी जानु समावेष्टय परमानन्दविह्वला ॥

सप्ताक्षरमण्डलञ्च

हेरुकी प्रथमादेवी द्वितीया वज्रभैरवी ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तृतीया घोरचण्डी च चतुर्थी वज्रभास्करी ॥
पञ्चमी वज्ररौद्री च षष्ठी स्याद् वज्रडाकिनी ।
नीला पीता रक्ता हरिता धूम्रा सिता देव्यः॥
मुक्तकेशा महारौद्रा त्रिनेत्राश्च दिगम्बराः ।
रणड्डमरुघण्टा च हस्तेतरकरैद्वये ॥
दधाना नरचर्म्माणि प्रेतसूर्योपरि स्थिता ।
कपालमालामकुटा आलीढासनसंस्थिताः ॥
षडक्षरभवा भव्या देव्यः सर्व्वा यथाक्रमम् ।

(iii) महामाया

महामायाह्वयं देवं चतुर्मुखं चतुर्भुजम् ॥
अङ्के यस्य तथा देवी चतस्रो दिक्षु चापराः ।

पूर्वदले वज्रडाकिनीं नीलवर्णां नीलपीतसितहरितवदनां वज्रकपालघण्टाखट्वाङ्ग-धारिणीम्, दक्षिणदले रत्नडाकिनीं पीतनीलसितहरितवदनां रत्नच्छटात्रिशूलग्रीवानिपीडितजम्बूकपताकाधारिणीम्, पश्चिमदले पद्मडाकिनीं सितवर्णां सितपीतनीलहरितवदनां विश्वकमलशरकपालचापधराम्, उत्तरदले विश्वडाकिनीं हरितवर्णां हरितपीतसित-नीलवदनामसिडमरूपाशकपालधराम् ।

५. हयग्रीवः—आर्यहयग्रीवं रक्तवर्णं त्रिमुखमष्टभुजं प्रतिमुखं त्रिनेत्रं नीलसितदक्षिणेतरवदनं सर्प्पाभरणं ललिताक्षेपपदविन्यासं सक्रोधदृष्टिनिरीक्षणं प्रथममुखं स्मेरं ललज्जिह्वं दक्षिणमुखं दंष्ट्रावष्टब्धौष्ठं व्याघ्रचर्म्मनिवसनं वज्रदण्डकरणमुद्राशरोद्यतदक्षिण-करचतुष्टयं तर्जनिकास्वकुचग्रहपद्मधनुरुद्यतवामकरचतुष्टयम् अक्षोभ्यमौलिनं ध्यायात् ।

६. यमारिः—(i) रक्तयमारिः—आत्मानं यमान्तमेकमुखं द्विभुजं प्रत्यालीढपदं रक्तपरिपूर्णकपालवामकरं सार्द्रपीतमुण्डाङ्कितसितदण्डदक्षिणकरं नागाभरणविभूषणं पिङ्गलोर्ध्ववकेशं व्याघ्रचर्म्माम्बरधरम् अक्षोभ्यमुकुटिनं स्वाभप्रज्ञालिङ्गितं महिषोपरि विश्व-दलकमलसूर्य्यस्थं ध्यायात् । भगवतीं च द्विभुजैकमुखीं विचित्राभरणामालीढपदस्थितां मदविह्वलां स्खलद्व्याघ्रचर्म्मांशुकां भगवता सह सम्पुटयोगेन प्रत्यालीढेनावस्थितां एवं विचिन्त्य…।

(ii) कृष्णयमारिः अ.

यमारिरतिभीषणः ।
कठोरर्वाहिकण्ठाभो सव्ये शुक्लारुणेतरः ॥
क्रोधपर्य्यङ्कयोगेन विश्वाब्जरविसंस्थितः ।
स्वाभविद्याधरास्वादरसायनमहासुखः ॥
कठोरोर्ध्वज्वलत्केशः पिङ्गभ्रूश्मश्रुलोचनः ।
फणीन्द्रवृन्दनेपथ्यो मृणालधवलद्विजैः ॥
मुद्गरासिधरः सव्ये वामे राजीवरत्नधृक् ।

ब. आत्मानं प्रत्यालीढपदस्थितं एकमुखं द्विभुजं नीलवर्णं दक्षिणकरे वज्राङ्कितोद्यतनीलदण्डं वामकरे तर्जनीपाशं हृदि, एवम्भूतं यमारिं स्फुरत्संहरद्रूपं विश्वदलकमलोपरि सूर्य्यस्थं महिषारूढं भावयेत् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

७. अ. जम्भालः—जम्भालं त्रिमुखं षड्भुजं अक्षोभ्यजटामुकुटिनं दक्षिणत्रिभुजैः मातुलुङ्गाङ्कुशबाणधरं प्रथमवामभुजैकेन वामपापार्श्वस्थितप्रज्ञालिङ्गितमपरवामभुजाभ्यां सपाशनकुलकार्म्मुकधरमात्मानं निष्पाद्य……… ।

ब. उच्छूष्मजम्भालः--आत्मानं भगवन्तं उच्छुष्मं पञ्चवर्षकुमाराकृतिं खर्व्वं विश्वपद्मस्थं चन्द्रोपरि सर्पाभरणभूषितं रत्नमुकुटिं मुञ्चद्रत्नमुखपीताङ्गसुप्तधनदस्य ललाटं दक्षिणेन चरणेन चरणद्वयं वामेनाक्रान्तमूर्तिं प्रत्यालीढपदं नग्नम् ऊर्ध्वलिङ्गं लम्बोदरं हृदि दक्षिणपाणिस्थरक्तपूर्णकपालाभिमुखदृष्टि वामजङ्घासक्तवामकरेण रत्नच्छटोद्गार्य्यधोमुखनकुलीं दधानमविद्धढोल्लकर्णद्वयमर्द्धेन्दुदंष्ट्राकरालवदनं रक्तवर्त्तुलत्रिनेत्रं कृतभृकुटीललाटं पिङ्गोर्ध्वकेशं भूस्पर्शमुद्रनीलाक्षोभ्यमुनिमुद्रितमस्तकं…… ।

अक्षोभ्याविभूताः देव्यश्च

१. महाचीनतारा

(i) सा० मा०

प्रत्यालीढपदां घोरां मुण्मालाप्रलम्बिताम् ।
खर्व्वलम्बोदरां भीमां नीलनीरजराजिताम् ॥
त्र्यम्बकैकमुखां दिव्यां घोराट्टहासभासुराम् ।
सुप्रहृष्टां शवारूढां नागाष्टकविभूषिताम् ॥
रक्तवर्तुलनेत्रां च व्याघ्रचर्म्मावृतां कटौ ।
नवयौवनसम्पन्नां पञ्चमुद्राविभूषिताम् ॥
ललज्जिह्वां महाभीमां सदंष्ट्रोत्कटभीषणाम् ।
खड्गकर्त्रिकरां सव्ये वामोत्पलकपालधाम् ॥
पिङ्गोग्रैकजटां ध्यायात् मौलावक्षोभ्यभूषिताम् ।

(ii) त० सा०

प्रत्यालीढापदां घोरां मुण्डमालाविभूषिताम् ।
खर्व्वां लम्बोदरीं भीमां व्याघ्रचर्म्मावृतां कटौ ॥
नवयौवनसम्पन्नां पञ्चमुद्राविभूषिताम् ।
चतुर्भुजां लोलजिह्वां महाभीमां वरप्रदाम् ॥
खड्गकर्तृसमायुक्तां सव्येतरभुजद्वयाम् ।
कपालोत्पलसंयुक्तसव्यपाणियुगान्विताम् ॥
पिंग्रोग्रैकजटां ध्यायेन्मौलो अक्षोभ्यभूषिताम् ।
बालार्कमण्डलाकारलोचनत्रयभूषिताम् ॥
जलच्चितामध्यगतां घोरदंष्ट्रां करालिनीम् ।
सावेशस्मेरवदनां स्त्र्यलङ्कारविभूषिताम् ॥
विश्वव्यापकतोयान्तः श्वेतपद्मोपरिस्थिताम् ।
अक्षोभ्यदेवीमूर्ध्न्यस्त्रीमूर्त्तिर्नागरूपधृक् ॥

२. अ—जाङ्गुली—आत्मानमार्यजाङ्गुलीरूपं सर्वशुक्लां चतुर्भुजामेकमुखां जटामुकुटिनीं शुक्लोत्तरीयां सितरत्नालङ्कारभूषितां शुक्लसर्पविभूषितां सत्वपर्यङ्कमाविष्टां मूलभुजाभ्यां वीणां वादयन्तीमपरदक्षिणेनाभयप्रदां चन्द्रांशुमालिनीम् ।

ब—आर्य्यजाङ्गुलीमात्मानं झटिति · निष्पादयेत् पीतां त्रिमुखां षड्भुजां नीलासितदक्षिणेतरवदनां खड्गवज्रबाणदक्षिणहस्तत्रयां सतर्ज्जनीपाशविषपुष्पकार्म्मुक-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

करत्रयां स्फीतफणामण्डलशिरःसर्पस्थां सर्वदिव्यवस्त्राभरणभूषितां कुमारीलक्षणोज्ज्वलान् अक्षोभ्याक्रान्तमस्तकां ध्यात्वा ……… ।

३. एकजटा

(i) सामान्या

कृष्णवर्णाः मताः सर्व्वा व्याघ्रचर्म्मावृताः कर्तौ ॥
एकवक्त्राः त्रिनेत्राश्च पिङ्गोर्ध्वकेशमूर्द्धजाः ॥
खर्व्वा लम्बोदरा रौद्राः प्रत्यालीढपदस्थिताः ॥
सरोषकरालवक्त्राः मुण्डमालाप्रलम्बिन्नाः ॥
कुणपस्था महाभीमा मौलावक्षोभ्यभूषिताः ।
नवयौवनसम्पन्नाः घोराट्टहासभासुराः ॥

(ii) विद्युज्जालकराली—द्वादशमुखां महाकृष्णवर्णां चतुर्विंशतिभुजां चतुर्मारसमाक्रान्तां श्वेतकपालोपरि प्रत्यालीढपदां महाप्रलयाग्निसमप्रभां विवृतास्यां हाहाकारां ललज्जिह्वां सरोषां विकृतकोटिभीमभृकुटीतटोद्भ्रूनेत्रचलद्वर्त्तुलां भयस्यापि भयङ्करीं कपालमाला शिरसि भूषितां व्याडैरलङ्कृतां षण्मुद्रोपेतां प्रथममुखं महाकृष्णं तथा दक्षिणमुखपञ्चकं सितपीतहरितरक्तधूम्रवर्णं च वाममुखपञ्चकं रक्तसितपीतहरितसितरक्तं च ऊर्ध्वमुखं धूम्र-विकृतं क्रुद्धं सर्व्वमुखानि दंष्ट्राकरालवदनानि त्रिनेत्राणि ज्वलितोर्ध्वपिङ्गलकेशानि सरोषां खर्व्वलम्ब्रोदरीं पीनोन्नतपयोधरां व्याघ्रचर्म्मनिवसनां दक्षिणद्वादशभुजेषु खड्ग-वज्र चक्र-रत्नच्छटा-अङ्कुश-शर-शक्ति-मुद्गर-मुसल-कर्त्रि-डमरु-अक्षमालिकां च, वामद्वादश-भुजषु धनुः-पाश-तर्ज्जनी-पताका-गदा-त्रिशूल-चषक-उत्पल-घण्टा-परशु-ब्रह्मशिरः कपालं च—

सुप्रहृष्टां शवारूढां नागाष्टकविभूषिताम् ।
नवयौवनसम्पन्नां हाहाट्टहासभासुराम् ॥
पिङ्गोग्रैकजटां ध्यायात् मौलावक्षोभ्यभूषिताम् ।

४. पर्णशवरी—भगवतीं पीतवर्णां त्रिमुखां त्रिनेत्रां षड्भुजां प्रथममुखं पीतं दक्षिणं सितं वामं रक्तं ललितहासिनीं सर्व्वालङ्कारधरां पर्ण्णपिच्छिकावसनां नवयौवनोद्धतां पीनां खर्व्व-लम्बोदरीं ललज्जिह्वां दक्षिणभुजैः वज्रपरशुशरधारिणीं वामभुजैः सतर्ज्जनिकापाशपर्ण-पिच्छकाधनुर्धारिणीं पुष्पावबद्धजटामुकुटस्थाक्षोभ्यधारिणीं सूर्य्यप्रभामण्डलिनीम् अधो विघ्नान् निपात्य सितपद्मचन्द्रासने प्रत्यालीढस्थां हृद्वाममुष्टितर्ज्जन्याधो विघ्नगणान् सन्तर्ज्य दक्षिणवज्रमुष्टिप्रहाराभिनयाम्…भावयेत्…।

५. प्रज्ञापारिमिता

द्विभुजामेकवदनां सितवर्णां मनोरमाम् ।
अर्द्धचर्चरकेशां च श्वेताम्भोरूहसंस्थिताम् ॥
पद्मं दक्षिणहस्ते तु रक्तवर्णं विभावयेत् ।
प्रज्ञापारमितां वामे वज्रपर्यङ्कसंस्थिताम ॥
सर्वालङ्कारसम्पूर्णां भावयेन्नाभिमण्डले ।
अंकारज्ञानसम्भूतां परमानन्दकारिणीम् ॥

६. वज्रचर्चिका—वज्रचर्च्चिकां त्रिनेत्रामेकमुखीमर्द्धपर्यङ्कताण्डवां मृतकासनस्थां कृशाङ्गीं दंष्ट्रोत्कटभैरवां नरशिरोमालाविभूषितकण्ठदेशामस्थ्याभरणभूषितां पञ्चमुद्रा-धारिणीमक्षोभ्यमुकुटिनीं व्याघ्रचर्मनिवसनां मुक्तकेशीं षड्भुजां दक्षिणे वज्रचक्रधारिणीं वामे कपालमणिकमलधरां रक्तवर्णां कर्मानुरूपतः शुक्लादिवर्णयुक्तां च ।

७. महामन्त्रानुसारिणी—महामन्त्रानुसारिणी चतुर्भुजैकमुखी कृष्णा दक्षिणभुजद्वये वज्रवरदवती वामभुजद्वये परशुपाशवती हुँकारबीजा अक्षोभ्यकिरीटिनी सूर्यासनप्रभा ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

८. महाप्रत्यङ्गिरा—महाप्रत्यङ्गिरा कृष्णा षड्भुजैकमुखा खड्गाङ्कुशवरददक्षिणहस्ता रक्तपद्मत्रिशूलहृदयस्थसर्पपाशतर्ज्जनीयुक्तवामहस्ता हुँबीजा अक्षोभ्यमुकुटा सर्व्वालङ्कारवती रूपयौवनसम्पन्ना ।

९. ध्वजाग्रकेयूरा—ध्वजाग्रकेयूरा कृष्णा त्रिमुखी चतुर्भुजा रक्तश्यामदक्षिणवाममुखी खड्गपाशधारिदक्षिणकरद्वया वज्राङ्कितखट्वाङ्गचक्रवामहस्तद्वया ऊर्ध्वपिङ्गलकेशी शुष्कपञ्चमुण्डालङ्कृतशिरस्का व्याघ्राजिनवसना दंष्ट्राकरालमुखी प्रलम्बोदरी प्रत्यालीढपदा सूर्य्यासनप्रभा पीतवस्त्रकञ्चुकिनी हुँबीजा अक्षोभ्यमुकुटा ।

१० वसुधारा—पीतवँकारपरिणतां द्विभुजैकमुखीं पीतां नवयौवनाभरणवस्त्रविभूषितां धान्यमञ्जरीनानारत्नवर्षघटवामहस्तां । दक्षिणेन वरदां अनेकसखीजनपरिवृतां विश्वपद्मचन्द्रासनस्थां रत्नसम्भवमुकुटिनीम् ।

११. नैरात्म्या—शवहृच्चन्द्रस्थार्द्धपर्य्यङ्कनाटचस्थितां नैरात्म्यां कृष्णामेकमुखीमूर्ध्वं-पिङ्गलकेशाम् अक्षोभ्यमुकुटिनीं दंष्ट्राकराललल्जिह्वां दक्षिणेन कर्त्रिधारिणीं वामे कपालखट्वाङ्गधारिणीं रक्तवर्तुलत्रिनेत्रां पञ्चमुद्राविभूषणां... ... ...।

बैरोचनाविभविषु—देव्व एव

१. मारीची	हेमाभां सूकरारूढ़ां तप्तकाञ्चनभास्वराम् ।
(i) अशोककान्ता	लीलयोर्ध्वस्थितां चन्द्रविम्बाम्भोरुहसंश्रयाम् ।।
	अशोकवृक्षशाखाग्रविलग्नाँ वामपाणिना ।
	विभ्रतीं वरदाकारदक्षिणकरपल्लवाम् ।।
	दीप्तरत्नोपशोभेन मौलिना बुद्धशेखरम् ।
	श्वेतवस्त्रां नमस्यामि मारीचीमभयप्रदाम् ।।
(ii) आर्यमारीची	चिन्तयेत् आर्यचमारीचीं सूचीसूत्रधरां रूपाम् ।
(iii) मारीची पिचुवा	शृङ्गारवीरसद्धर्षैर्जाम्बूनदसमप्रभाम् ।
	मध्येन्द्रनीलवर्णास्यां भयवीभत्सरौद्रकैः ।।
	करुणाद्भुतशान्तैश्च स्फटिकेन्द्वितराननाम् ।
	त्रिविमोक्षमुखैस्त्र्यक्षां धर्म्मसम्भोगनिर्म्मिताम् ।।
	पीता (क्ष) भरणसद्वस्त्रां मयूखसुखवासिनीम् ।
	सूच्याक्षास्यानि सीवन्तीं बध्नन्तीं मुखचक्षुषी ।।
	हृद्गलेऽङ्कुशपाशाभ्यां विन्धन्तीं बाणकार्मुकैः ।
	वज्रेण दुष्टहृद्भित्त्वाऽशोकेनासेचनापराम् ।।
	विमोक्षाष्टाष्टभिस्तान् दुष्टान् नष्टान् प्रभावयेत् ।
	पादविकाशसंकोचादात्मदृष्टिं च तद्रतिम् ।।
	प्रज्ञोपायपदाक्रान्तां मारीचीं भावयेद्व्रती ।

२. उष्णीषविजया—शुक्लां त्रिमुखां त्रिनेत्रां नवयौवनां नानालङ्कारधरां अष्टभुजां भगवतीं चिन्तयेत्, पीतकृष्णदक्षिणेतरवदनां, दक्षिणचतुर्भुजैः विश्ववज्रपद्मस्थबुद्धबाणवरद-मुद्राधरां, वामचतुर्भुजैः चापतर्ज्जनीपाशाभयहस्तपूर्णकुम्भाः; चैत्यगुहागर्भस्थितां वैरोचनमुकुटिनीं निष्पाद्य स्वबीजं पद्मस्थं हृदि ध्यायात् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

३. सितातपत्रापराजिता—सितातपत्रापराजितां भगवतीं त्रिमुखां षडभुजां प्रतिमुखं त्रिनयनां शुक्लनीलारूणदक्षिणवाममुखीं चक्राङ्कुशधनुर्धारिदक्षिणकरां सितवज्रशरपाशतर्ज्जनीधरवामकरां सक्रोधदृष्टिकां सर्व्वग्रहविध्वंसिनीं दिव्यालङ्कारवस्त्रवतीं वैरोचननायकां ध्यात्वा मुद्रां बन्धयेत ।

४. महासाहस्रप्रमर्दिनी—महासाहस्रप्रमर्द्दनीमात्मानं ध्यायात्; शुक्लामेकमुखीं षड्भुजां दक्षिणत्रिभुजेषु खड्गबाणवरदमुद्राः, वामत्रिभुजेषु धनुःपाशपरशवः, विचित्रालङ्कारधरां रूपयौवनश्रृङ्गारवतीं वैरोचनकिरीटयुक्तां पद्मचन्द्रासनप्रभाम् ।

५. वज्रवाराही—आत्मानं भगवतीं वज्रवाराहीं दाडिमकुसुमप्रख्यां द्विभुजां दक्षिणेन वज्रतर्ज्जनिकाकरां वामेन करोटकखट्वाङ्गधराम् एकाननां त्रिनेत्रां मुक्तकेशां षण्मुद्रा-मुद्रितां दिगम्बरां पञ्चज्ञानात्मिकां सहजानन्दस्वभावां प्रत्यालीढपदाक्रान्त-भैरवकालरात्रिकां सार्द्रमुण्डमालालङ्कृतगात्रां स्रवद्रुधिरं पिबन्तीं भावयेत् ।

अमोघसिद्धच[illegible]र्विषु—देव्य एव

१. खदिरवनीतारा—हरितामामोघसि[illegible]मुकुटीं वरदोत्पलधारिदक्षिणवामकराम् अशोककान्तामारीच्येकजटाव्यग्रदक्षिणवामदिग्भागां दिव्यकुमारीमलङ्कारवतीं ध्यात्वा ।

२. वश्यतारा—खदिरवनीवत् ।

३. षडभुजसिततारा—सिततारां त्रिमुखां षड्भुजां पीतनीलदक्षिणेतरमुखीं प्रतिमुखं त्रिनेत्रां वरदाक्षसूत्रशरवरदक्षिणत्रिकराम् उत्पलपद्मचापधरवामपाणित्रयाम् अर्द्धपर्य्यङ्क-निषण्णां चन्द्रासनचन्द्रप्रभां जटामुकुटस्थितामोघसिद्धिं पञ्चमुण्डविभूषितमस्तकाम् अर्द्धचन्द्र-कृतशेखरां नानालङ्कारधरां द्विरष्टवर्षाकृतिमष्टश्मशानमध्यस्थितां ··· ··· ···।

४. धनदतारा—ताराभगवतीमात्मानं भावयेत् चन्द्रासनप्रभां सौम्यां सत्त्वपर्यङ्कस्थां हरितश्यामामेकवदनां द्विलोचनां चतुर्भुजामक्षसूत्रवरदोत्पलपुस्तकधरां विचित्रवस्त्रालंङ्कार-वतीम्·········लोचनादिभिर्देवीभिरभिषिक्तामात्मानमोघसिद्धिमुकुटं ध्यायात् ।

५. पर्णशवरी—पर्णशवरीं हरितां त्रिमुखां त्रिनेत्रां षड्भुजां कृष्णशुक्लदक्षिणवामाननां वज्रपरशुशरदक्षिणकरत्रयां कार्म्मुकपत्रच्छटासपाशतर्ज्जनीवामकरत्रयां सक्रोधहसिताननां नवयौवनवतीं सपत्रमालां व्याघ्रचर्म्मनिवसनामीषल्लम्बोदरीमूर्ध्वसंयतकेशीमधोऽशेषरोग-मारिपदाक्रान्तामामोघसिद्धिमुकुटीमात्मानं झटिति निष्पाद्य··· ·· ···।

६. महामायूरी—महामायूरीं हरितवर्णां त्रिमुखां षड्भुजां प्रतिमुखं त्रिनेत्रां कृष्णशुक्ल-दक्षिणेतरवदनां; दक्षिणत्रिहस्तेषु यथाक्रमं मयूरपिच्छबाणवरदमुद्राः; तथा वामत्रिहस्तेषु रत्नच्छटाचापोत्सङ्गस्थकलशाः; विचित्राभारणां श्रृङ्गाररसां नवयौवनीं चन्द्रासने चन्द्रप्रभा-वतीमर्द्धपर्य्यङ्किनीममोघसिद्धिमकुटीं भावयेदात्मानम् ।

७. वज्रश्रृङ्खला—हरितां त्रिमुखाम् अष्टभुजां प्रथममुखमीषद्धासरसं, दक्षिणं कपिलं कपिललोचनं च; वामं रक्तं भृकुटीदंष्ट्राकरालं ; दक्षिणेषु चतुः करेषु अभयवज्रश्रृङ्खलशर-धरां वामचतुःकरैः रुधिरपूर्णकपालतर्ज्जनीपाशचापधरां, ललिताक्षेपासनस्थां मार्ज्जारच-र्म्मोत्तरीयाममोघसिद्धभूषितोर्ध्वपिङ्गलकेशां विचिन्त्य ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

द्वादशभुजं लम्बोदरैक्ववदनम् अर्धपर्य्यङ्कताण्डवं त्रिनेत्रमप्येकदन्तं, सव्यभुजेषु कुठार-शर-अङ्कुश-वज्र-खड्ग-शूलं च वामभुजेषु मूषल-चाप-खट्वाङ्ग-असृक्कपाल-शुष्कमांसकपाल-फट्कं च रक्तपद्मे मूषिकोपरिस्थितमिति ।

२. विघ्नान्तकः—आत्मानं प्रत्यालीढपदस्थितम् एकमुखं द्विभुजं नीलवर्णं वामकारेण तर्ज्जनिकापाशं दक्षिणकरेणोद्यतवज्रं भयानकं पिङ्गलोर्ध्वकेशम्·················विश्वदल-कमलोपरि सूर्य्यस्थं भावयेत् ।

३. वज्रहुँकारः

खधातुरेफजे सूर्य्ये हुँकारज्वलद्भास्वरम् ।
कल्पानलमिवात्युग्रं कृष्णवर्णं महाद्युतिम् ।।
तदुत्पन्नं महारौद्रं वज्रहुँकारसंज्ञकम् ।
अट्टहासं महारौद्रं क्षेपयन्तं त्रिधातुकम् ।।
घण्टावज्रप्रयोगेन मुद्रावद्धकरद्वयम् ।
प्रत्यालीढपदेनैव भैरवाक्रान्तभीकरम् ।।

४. भूतडामरः

आत्मानं पश्येत् रौद्रं च ज्वालामालाकुलप्रभम् ।
चतुर्भुजं महाक्रोधं भिन्नाञ्जनसमप्रभम् ।।
दक्षिणे वज्रमुल्लाल्य तर्ज्जयन् वामपाणिना ।
दंष्ट्राकरालवदनं नागाष्टकविभूषितम् ।।
··· ··· ··· ··· ··· ··· ··· ··· ··· ··· ··· ····।
कपालमालामुकुटं त्रैलोक्यमपि नाशनम् ।।
अट्टहासं महानादं त्रैलोक्याधिष्ठितं प्रभुम् ।
प्रत्यालीढसुसंस्थानम् आदित्यकोटितेजसम् ।।
अपराजितपदाक्रान्तं मुद्राबन्धेन तिष्ठति ।

५. वज्रज्वालानलार्कः—वज्रज्वालानलार्कं नीलवर्णं ज्वालामालाकुलप्रभं चतुर्म्मुखमष्टभुजं श्रृङ्गारवीरवीभत्सकरुणरसान्वितं चतुर्म्मुखं चतुर्भिर्दक्षिणकरैर्वज्र-खड्गचक्रबाणधरं, चतुर्वामकरैर्घण्टाचापपाशखट्वाङ्गासक्तविचित्रपताकधरं ज्वलदनलकपिलशिखाकलापम् अतिभीषणमहाहिवलयकङ्कणकटिसूत्रनूपुरकण्ठिका-कुण्डलमुकुटाभरणं महामायाचक्ररचनचतुरं सपत्नीकं विष्णुमालीढपदेनाक्रम्यावस्थितं भावयेदिति ।

६. त्रैलोक्यविजयः—त्रैलोक्यविजयभट्टारकं नीलं चतुर्म्मुखमष्टभुजं प्रथममुखं क्रोधश्रृङ्गारं दक्षिणं रौद्रं वामं वीभत्सं पृष्ठं वीररसं द्वाभ्यां घण्टावज्रान्वितहस्ताभ्यां हृदि जज्रहुँकारमुद्रावरं दक्षिणत्रिकरैः खट्वाङ्गाङ्कुशबाणधरं वामत्रिकरैश्चापपाशवज्रधरं, प्रत्यालीढेन वामपादाक्रान्तमहेश्वरमस्तकं दक्षिणपादावष्टब्धगौरीस्तनयुगलम् ।

७. परमाश्वः—परमाश्वं रक्तं चतुर्मुखमष्टभुजं चतुश्चरणं प्रथमुखं क्रोधश्रृङ्गारं त्रिलोचनं दक्षिणं रौद्रं वामं ब्रह्ममुखं, मूर्ध्नि ललितोद्धूलितोष्ठं हरिताश्वमुखम्, एकेन दक्षिण-त्रिपताकाधरकरेण विश्ववज्रसहितेनोत्तिष्ठाभिनयं कुर्व्वन्तं, एकेन वामखेटकहस्तेन विश्व-पद्मं धारयन्तं पुनर्दक्षिणत्रिपताकाकरेणोत्तिष्ठाभिनयं कुर्व्वन्तम् पुनर्वामकरेण शक्तिं धारयन्तं पुनर्दक्षिणकराभ्यां खड्गं बाणं च, अवशिष्टवामकराभ्यां दण्डं चापं च धारयन्तं, प्रत्या-लीढेन दक्षिणपादैकेनेन्द्राणीं श्रियं चाक्रम्य स्थितं, द्वितीयदक्षिणचरणेन रतिं प्रीतिं च, वाम-प्रथमपादेनेन्द्रं मधुकरं च, वामद्वितीयपादेन जयकरं वसन्तं च, इत्यात्मानं ध्यायात् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

८. नामसंगीतिः—एकवक्त्रः श्वेतवर्णः ध्याननयनः स्मेराननः जटामुकुटधरः नानालङ्कारालङ्कृतः षण्मुद्रालङ्कृतः प्रथमाभ्यां सव्यदक्षाभ्यां हृदयप्रदेशे अभयमुद्राद्वयं, द्वाभ्यां मुकुटोपरि कृताञ्जलिमुद्रां, दक्षतृतीयेन विश्ववज्रोपरि खड्गम, सव्यवामचतुर्भुजाभ्यां तर्पणमुद्राद्वयं, सव्यवामपञ्चमाभ्यां पात्रस्थामृतक्षेपणमुद्रां, षष्ठसव्यवामाभ्यां सपात्रध्यानमुद्रां, वामतृतीयेन सवज्रखट्वाङ्गं दधानं, कमलोपरि वज्रासनः ।

स्वतन्त्रा देव्यश्च

१. सरस्वती—महासरस्वती—भगवतीं महासरस्वतीमनुविचिन्तयेत् शरदिन्दुकराकारां सितकमलोपरि चन्द्रमण्डलस्थां दक्षिणकरेण वरदां वामेन सनालसितसरोजधरां स्मेरमुखीमतिकरुणामयां श्वेतचन्दनकुसुमवसनधरां मुक्ताहारोपशोभितहृदयां नानारत्नालङ्कारवतीं द्वादशवर्षाकृतिं मुदितकुचमुकुलदन्तुरोरस्तटीं स्फुरदनन्तगभस्तिव्यूहावभासितलोकत्रयाम् ।

२. अपराजिता—अपराजिता पीता द्विभुजैकमुखी नानारत्नोपशोभिता गणपतिसमाक्रान्ता चपेटादानाभिनयदक्षिणकरा गृहीतपाशतर्ज्जनीकहृदयस्थितवामभुजा अतिभयङ्करकरालरौद्रमुखी अशेषमारनिर्दलनी ब्रह्मादिदुष्टरौद्रदेवतापरिकरोच्छ्रितच्छत्रा चेति ।

३. वज्रगान्धारी—वज्रगान्धारी कृष्णा षण्मुखी द्वादशभुजा ऊर्ध्वपिङ्गलकेशी प्रत्यालीढपदा दंष्ट्राकरालवदना प्रतिमुखं त्रिनेत्रा दक्षिणषड्भुजेषु यथाक्रमं वज्रवज्रघण्टाखड्गत्रिशूलबाणचक्राणि, वामषड्भुजेषु खट्वाङ्गाङ्कुशधनुःपरशुपाशहृत्तर्ज्जन्यः, प्रथममुखं कृष्णं, अपराणि मुखानि पञ्चवर्णानि, विश्वपद्मसूर्य्यासना चेति ।

४. वज्रयोगिनी—भट्टारिकां वज्रयोगिनीं तत्रस्थितह्रींकारपरिणतां पीतवर्णां स्वयमेव स्वकर्त्रिकर्त्तितस्वमस्तकवामहस्तस्थितां दक्षिणहस्तकर्त्रिसहिताम् ऊर्ध्वविस्तृतवामबाहुं अधोनमितदक्षिणबाहुम् वासशून्यां प्रसारितदक्षिणपादां सङ्कुचितवामपादां भवायेत् । कबन्धान्निसृत्यासृग्धाराश्च स्वमुखे प्रविशति, अपरे उभयोः पार्श्वयोगिन्योर्मुखे प्रविशति इति भावयेत । वामदक्षिणपार्श्वयोः श्यामवर्णवज्रवर्णनीपीतवर्णवज्रवैरोचन्यौ वामदक्षिणहस्तकर्त्रिसहिते दक्षिणवामहस्तकर्परसहिते प्रसारितवामपादप्रसारितदक्षिणपादे सङ्कुचितेतरपादे मुक्तकेश्यौ भावयेत् । उभयोः पार्श्वयोः उभयोः योगिन्योः मध्ये अन्तरिक्षे अतिभयाकुलं श्मशानं भावयेत ।

५. गृहमातृका—गृहमातृका त्रिमुखश्वेतपीतरक्ता षड्भुजा, दक्षे धर्मचक्र-मुद्रा-वज्र-शरा; वामे कमल-चापौ; सहस्रदलपद्मे वज्रासना ।

६. गणपतिहृदया—एकमुखा द्विभुजा वरदा अभया नृत्यासना ।

७. वज्रविदारिणी च—वज्रविदारणी पञ्चमुखी दशभुचा, दक्षे अङ्कुशखड्गशर-वज्र-वरदा, बामे पाश-चर्म-ध्वज-अस्भया, प्रत्यालीढासना ।

समाप्तोऽष्टमो पटलः

समाप्तं प्रतिमा-लक्षणम्

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विषयानुक्रमणिका
(तृतीयखण्डस्य)

विषयाः		पृष्ठाङ्काः
१.	चित्रप्रशंसा	२९६
२.	चित्रोत्पत्तिः	२९७
३.	चित्रं नृत्यं गीतञ्च	"
४.	षडङ्गं चित्रम्	२९८
५.	चित्रप्रकाराणि	२९८-२९९
६.	चित्रोद्देशाः चित्रविषयाः वा	२९९-३०१
७.	चित्राङ्गानि	३०१
८.	भूमिबन्धनं चित्रभित्तिर्वा	३०१-४
९.	लेप्यकर्म	३०५-८
१०.	अण्डकवर्तनम्	३०८
११.	चित्रकर्मणि देवादीनां शरीरप्रमाणादि-	३०९
	अ. शरीरप्रमाणम्	३०९
	ब. हंसादि-पञ्चपुरुष-स्त्रीलक्षणम्	३०९-१०
	स. चित्रकर्मणि मूर्त्यवयव-प्रमाणम्	३१०-११
	य. चित्रकर्मण्यङ्गप्रत्यङ्गमानेन स्त्रीणां निर्माणम्	३११
	र. तेनैव सामान्यमानवर्णनम्	३११-१२
	ल. चित्रकर्मणि देवतानेत्राद्यङ्गवर्णनम्	३१२-१३
१२.	नानावर्णानुगता शुभाकारविहाराः ऋज्वागतसाचीकृताद्यनेक-भेदोपसहिताश्चित्रकर्मणो नवभेदाः	३१३-१६
१३.	चित्रे देवनृपर्षिगन्धर्वदैत्यदानवादीनां सपरिच्छदानां निर्माण-देशविशेषानुरूपासनशयनयानवेशसरित्सागरवाहनशैलशिखरसद्वीपभू-मण्डलशङ्खपद्मनिधिचन्द्रनक्षत्ररात्रिसन्ध्यादिनिर्माणम्	३१६-२१
१४.	विलेखा-लक्षणम्	३२१-२२
१५.	वर्तिका	३२२
१६.	चित्रलेखन-विधिः	३२२
१७.	अ. वर्तनाविधाः ब. पट्टपत्रवर्तनादिप्रकारश्च	३२३
१८.	चित्रपत्रोत्पत्तिः	३२३-२५
१९	कण्टकलक्षणम्	३२५-२७
२०.	चित्रकर्मणि वर्णभेदः—शुद्धवर्णमिश्रवर्णादयश्च स्वर्णप्रयोगोऽपि	३२७-३१
२१.	चित्रे श्रृङ्गारादिरसप्रदर्शनं ... ...रसचित्रादेश्च टि०	३३१
२२.	चित्रदोषाः	"
२३.	चित्रगुणाः	३३१-३२
२४.	चित्रकारः	३३२
	ग्रन्थकर्तुर्ग्रन्थसमापनस्तवः	"

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

State Museum Library, Lucknow
C 24

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh